काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE

NEW SERIES

Vol. XXXVII

PRINTED AND PUBLISHED BY BHAGAVATI PRASAD B, A.
AT THE MEDICAL HALL PRESS, BENARES., FOR THE PROPRIETORS,
E. J. LAZARUS & Co.,
BENARES.
1915.

INDEX TO VOLUME XXXVII. New Series.

* *Pages 225-240 and 297-304 of Advaitdipika were by mistake not included in Pandit Volumes XXXIII-XXXVI and are therefore included in this Volume.*

while we attribute it to the object, on account of its being cognised as something outside of ourselves. If then, this form be regarded as distinct from the 'qualification', and changing with each cognition,—or even if it were non-different from the cognition,—in either case, it would not be capable of any verbal relationship; as like cognition it would never form the object of any verbal convention.

It might be urged that, "what the 'concrete qualification' does is to indirectly impose its own external form on the cognition, and thus make it also concrete; as it is only thus that the cognition could come into existence, and this externality of form would form the basis of the verbal relationship."

But in that case, the form of the concrete qualification externally imposed, having its character dependent upon a single thing (viz the qualification itself), would be destroyed as soon as it would be produced on the production of the 'concrete qualification'; and thus being cognised as undergoing destruction, it would be different with each 'concrete qualification'; and we have already shown that there can be no verbal convention with regard to any such thing as would differ with each individual.

Objection: "The 'concrete qualification' of the cow "imposes its appearance externally; and the appearance imposed "by another 'concrete qualification' would be similar to that "imposed by the former. The concrete qualifications too are com-"prehensive of their own forms only; and as such they could "never lead to the apprehension of the difference among the forms "imposed by themselves; as the apprehension of difference "depends upon the apprehension of both the members (between "whom the difference exists). Hence as this difference is not "apprehended, we come to look upon the forms imposed by the "concrete qualifications to be all one only; and thus speak of "there being a single objective for all these qualifications. It is "this objective that constitutes the 'Sāmānya' or 'community';

"and this community is negative in its character, being "devoid of any absolute difference from the externally imposed "forms of the 'concrete qualifications'; and combining with "the four other factors—of (1) the 'specific individuality; (2) the "cognition, (3) the form of the cognition, and (4) the imposed "form,—comes to be spoken of as '*ardhapancamākāra* (with a "four-and-a half-fold form); and having *externality* imposed upon "it, it becomes expressible by words, and thereby comes to be the "objective of the verbal relation. And it is the cognition of this "that consititutes the cognition of the 'specific individuality'; "and the form in which the community is imposed is that "of that individuality. This 'community' again has the character "of the *preclusion of all other things*; it has both positive and "negative forms, as is proved by such assertions as 'the cow is', "'the cow is not', and so with all other things; if the communi-"ty expressed by the word 'cow' were only in the positive form, "then we could not have the assertion 'the cow is'; as such "an assertion would be tautological (the idea of 'is' being con-"tained in the word 'cow' itself); nor could we have the "assertion 'the cow is not'; as this would be a contradiction in "terms (no negation being compatible with positive charac-"ter); similarly, if it had a purely negative form, the asser-"tion 'the cow is not' would be tautological, and that 'the "cow is' would be a contradiction in terms; as has "been declared in the following words:—'We cannot say that "the *jar exists*, as the jar is a real entity; nor can we say *the* "*jar does not exist*, as there is contradiction between *existence* "and *non-exsistence*'. It is for this reason that even distinct "individuals appear as one.

"This 'community' is the objective of all 'concrete quali-"fications'; and the singleness of this leads to the singleness of "these qualifications; and the singleness of these latter leads "to the singleness also of their origin in the shape of the "abstract unqualified cognitions that we have with regard to "each individual object; and this leads to the singleness of the

"origin of these abstract notions,—namely, the objects them-"selves. This has been thus declared :—'The cognition being " the cause, a single idea cannot be diverse ; and as the cause " of a single cognition the individualities must be one".

To the above we make the following reply: The above reasoning is not sound ; as it would seem that the Bauddhas give the name 'community' to the unity that is imposed by reason of the non-apprehension of the difference among the forms of the 'concrete qualifications,'—this non-apprehension being inferred from the fact of no other alternative being found to be possible. And on this point we have the following observations to make :—Does the 'imposition of non-difference' consist in the non-apprehension of difference among the forms ? or does it consist in the apprehension of non-difference ? The former could not be the case ; as in that case the imposition of difference too would be as likely ; that is to say, just as the differences among the forms of the concrete qualifications are not apprehended, so also is non-difference not apprehended ; and hence just as nondifference is imposed by reason of the non-appehension of difference,—so, in the same manner, would difference be imposed by the non-apprehension of non-difference ; and thence there could be no usage based upon non-difference. Nor is the second alternative quite reasonable—viz : that the imposition of non-difference consists in the apprehension of non-difference. Because it is only when the *existence of the soul is admitted that a single perceiver can apprehend both difference and non-difference ; when however, the existence of the soul is denied (as it is by the *Bauddha*), there can be no one observer of many things ; speceally as the 'concrete qualifications' are each restricted to their own individual forms. Even though there be a single observer of many things,—yet unless there be any ground for singleness, there can be no apprehension of non-difference among different things. In fact, even

*The reading '*abhāvādēkō*' does not afford any meaning ; hence the translation adopts the reading '*ātmavādē*.'

if there were such an apprehension, it would be possible also in the case of such different forms as those of the cow, the horse and the buffalo; as there would be no difference in the character of the differences in the two cases.

Page 320.] *Objection*: "In the case of the forms of the cows, we have such a ground for singleness in the form of the *preclusion of non-cows.*"

Reply: What are the 'non-cows' the preclusion whereof imposes singleness on the form of cows? It might be urged that those animals that are not cows are the 'non-cows.' But then, the question would arise—what are the cows that are not 'non-cows'? And thus it would be necessary to determine the forms of the *cow*, the preclusion whereof would determine the form of the *non-cow*; and conversely it would be necessary to determine the form of the *non-cow*, the preclusion whereof would determine the form of the *cow*; and thus the ignorance of one would imply the ignorance of both. As has been thus declared by the great teacher (Kumārila): 'It would only be the well-known *cow* that could be precluded; and as this *preclusion* would be in the form of the negativing of the cow, it becomes necessary to say what this *cow* is that is negatived; until the cow is known, there can be no *non-cow*; and when there is no *non-cow*, whence could there be the *cow*? (*Çloka-vartika*—Chapter on '*Apoha*').

It might be urged that what constitutes the denotation of the word is the *Apoha* or *negation of the contrary*. To this we make the following reply: what is this '*apoha*'? Is the 'apoha,' 'the negation of the non-cow' a positive entity, or a negative one? If the former, then, is this positive entity of the same character as the individual cow,? or is it in the form of the individual non-cow? If the former, then it becomes something specific (as pertaining to a definite individual) and not generic (pertain-

ing to all individuals; and we have already shown that no verbal process can apply to any such specific entity. If however, it be held to be of the nature of the individual non-cow, then too the same objections would apply; and over and above these there would be the further objection that the *cow* in that case would cease to form the denotation of the word 'cow'. If then the 'Apoha' be regarded as a positive entity apart from the particular individuals, and pertaintng to all of these,—then the difference in our views would be only verbal (as in this case what you call '*apoha*' we call '*Sāmānya*').

Further, if Apoha be regarded as a negative entity, consisting as it does, of negation or preclusion,—then (being a negative entity) it could never be apprehended by a direct positive sensuous cognition; as it is only that which produces a cognition that can have the apprehensible or coginsable character; and a negative entity is, by its very nature, wholly devoid of the productiveness of any effect. And when a thing is not cognised by Sense-perception, there can be no cognition of a verbal convention with regard to it; and thus no verbal process could apply to a negative entity. When a negative entity is cognised by means of a word, the person hearing the word could not, by its means, be moved to any activity towards a positive object; for the simple reason that the negative is wholly different from the positive entity, and the two are devoid of all reationship between themselves.

Objection: "The verbal process applying to the 'specific individuality' must be regarded as due to non-discrimination or ignorance; snice the individuality is cognised in the negative form; that is to say, the cognition of the cogniser is mistaken, being due to their unifying the perceptible and the imaginary, and then attributing a character to a thing to which it does not belong.*"

*This sentence is rather obscure; aud appears to be a quotation from an old Bauddha work.

Reply: This is not right; that which is not cognised cannot have imposed on it any thing as identical with itself, in the form of a negative entity. As a matter of fact, the person hearing the word uttered has at that time no cognition of the object signified; as the word (according to you) pertains to something wholly different; and there is no other means available for cognising it; and yet we find the word giving rise to an activity on the part of the hearer, towards a positive object. And hence we cannot regard a negation to be the denotation of a word.

Nor have we any other ground for singleness (of the forms of individual cows). If all positive entities were to be mere negations of one another, and appearing as a new object at every moment, then no such entity could be cognised by means of any word; and that which is not directly cognised cannot form the object of avoidance or acceptance, as its capablities would be absolutely unknown. And yet as a matter of fact, we do find usage based upon words; and so have we also the activity of all living beings in the world tending towards the obtaining of the desirable and the avoiding of the undesirable, and proceding from direct sensuous perception. And it is this usage that establishes the existence of a community common among many individuals; and it is to these communities that we find the denotations of words to pertain; and when a man knows of the capabilities of a certain class, and he comes to know that such and such a thing belongs to that class, he acts towards the obtaining of that object, even though he may never have perceived the particular object before.

Thus then the comprehensive cognition pertaining to distinct individuals serves as the basis for Community; and if this were a mere negation, then the whole activity of the world would be impossible.

CHAPTER VIII.

On Viçesha.

Text (156): *Individualities are the ultimate (i. e., final) specificatives or differentiatives of their substrates. They reside in such beginningless and indestructible eternal substances, as the Atoms, Ākāça, Time, Space, Soul and Mind,—inhering in their entirety in each of these, and serving as the basis of absolute differentiation or specification. Just as we have with regard to the Bull as distinguished from the Horse, certain distinct cognitions—such f. i. as, (1) that it is a 'bull,' which is a cognition based upon its having the shape of other bulls, (2) that it is 'white,' which is based upon a quality, (3) that it is 'runing swiftly', which is based upon action (4) that it has a 'fat hump,' which is based upon 'constituent parts,' and (5) that it carries a 'large bell', which is based upon conjunction; so have the Yogis, who are possessed of powers that we do not possess, distinct cognitions based upon similar shapes, similar qualities and similar actions—with regard to the eternal atoms, the liberated souls and minds; and as in this case no other cause is possible, those causes by reason whereof they have such distinct cognitions,—as that 'this is a peculiar substance,' 'that a peculiar soul,' and so forth,—and which also lead to the recognition of one atom as being the same that was perceived at a different time and place,—are what we call the 'ultimate Individualities.'*

Page 322] Objection: "*What would be the harm if even in the absence of such 'Individualities,' Yogis could have, by the help of merits born of*

Yogic practices, the said distinct cognitions and recognitions?"

Reply: *This could never be; just as the merits born of Yoga could never bring about the cognition of whiteness where there is no whiteness, or the recognition of that which has never been perceived; in fact if there were any such, they could only be false; exactly in the same manner, without the 'ultimate individualities' in question, the Yogis could not, by the helps of the merits of Yoga alone, have the distinct cognitions or recognitions referred to above.*

Objection: "*Why cannot you assume a self-differentiation in the atoms themselves, as you do in the 'Individualities'?"*

Reply: *The atoms themselves could not be the cause of these distinct cognitions; because of all atoms having the same nature; that is to say, as a matter of fact we find that the cognitions that a certain thing brings about are with regard to things other than itself; e. g., the lamp brings about the cognition of the jar; and certainly one lamp is never rendered cognisable by another lamp. And just as the flesh of the cow and the horse are unclean by themselves, and other things become unclean by coming in contact with them,—so in the case in question, the 'ultimate Individualities,' though of the same nature, are differentiated by themselves, and the atom &c., become differentiated by reason of their contact with these 'individualities'* (I-ii-6).

Commentary.

Reverence to the Wearer of Five Faces who is free from

five-foldness, and who is the ordainer of the four cycles of time, the four sciences and the four castes!

Page 323.] The eternal substances are called 'anta' 'end' or 'ultimate,' because they continue to exist at the end of (after) all productions and destructions; and the 'specific individualities' inhere in these eternal substances and they are called '*viçesha*' or 'specific,' because they serve to specify or differentiate their substrates from all other things. This the author proceeds] to explain—*They reside in such beginningless and indestructible &c., &c.* This expression, serves to explain what is meant by the word '*antya*,' 'ultimate' The expression, '*serving as the bases &c*,' explains what is meant by the individualities being differentiatives of their substrates.' *Inhering in their entirety &c.*—that is, in each substance there is only one distinct 'Individuality; in as much as the differentiation of one substance is accomplished by a single 'individuality,' there would be no need for assuming any more of such 'Individualities.' How this is the distinguishing feature of 'Individualities' we have explained before.

As the putting forward of the definition of these individualties would be right only after their existence has been proved, the author proceeds to prove their existence...Just as we have distinct cognitions with regard to individual cows &c., so would those people who are capable of perceiving the atom &c., be sure to have distinct cognitions with regard to these; as only thus could the existence ef individual atoms be possible. The mere difference among the individuals could not be the cause of these distinct cognitions; as though we may see an individual object, we may not have a definite cognition with regard to it; as we find in the case of the post which, when seen, is not definitely recognised as a post. The distnict cognitions in question could not be possible without some cause, and we find no other ground

or cause available, in as much as the shapes, qualities and action are the same in all; hence that which serves as the cause or ground of the distinct cognitions of the atom &c., is what we call 'specific individuality.' Then again, atoms are often recognised to be the same even though seen at different times and places;—and that they are thus recognised is proved by the fact of their belonging to certain communities, and possessing certain 'individualities',—just like such ordinary objects as the jar and the like. No recognition of a previously perceived substance would be possible unless it possessed some 'specific individuality'; hence we conclude that the cause or ground for the distinct cognitions in question, lies in the form of the 'specific individuality'.

An objection is raised: "The Yogis have the perception of super-sensuous things, by reason of certain merits acquired by yoga; and by the same powers they could have the distinct cognitions and recognitions of atoms &c., even without the 'individualities'."

Reply:—This cannot be;..
..................The perception of supersensuous things also by force of yogic powers is not without some cause.

Page 324.] *Objection: "Why cannot you assume &c., &c.* The Individualities could not be possessed of further individualities; as that would land us in a *regressus ad infinitum*; and hence, just as distinct cognitions, by Yogis, of the individualities are possible even without their possessing other individualities,—so could the Yogis have in the case of atoms also by themselves; what then is the use of assuming any individualities at all?"

Reply: Not so;..................because one thing tends to bring about the cognition of something different from itself; *e. g.* the jar, &c., which are not of the nature of Light, are illumined and rendered perceptible by the lamp, which is of the nature of Light; and one lamp is not illumined by another; every lamp

being self-luminous. *Just as the flesh of the cow &c., &c., &c.* The touch of these unclean things brings impurity to the man touching them. The distinct cognitions of the atoms, which are distinct and possessed of certain common properties, are possible only by reason of certain 'individualities', and not by themselves.

In each of the eternal substances, possessing certain properties in common, there inhere certain individualities which serve to differentiate them.

CHAPTER IX.

On *Samavāya*—Inherence.

Text (157): *Inherence is the relationship between things that are inseparably connected, and which stand to each other in the relation of the container and the contained,—the relationship, namely, that serves as the ground of the notion that 'such and such a thing subsists in this.' That is to say, the relationship named* 'Samavāya' *or 'inherence' is that from which proceeds the notion that 'this subsists in this,'—with regard to substances, qualities, actions, communities and individualities, that appear in the form of causes and effects, as well as those that do not appear as causes and effects, which are inseparably connected; and also that relationship from which proceeds the interdependence of things of limited extension upon something else, from which they are known to be different. As for instance, the notion that 'there is curd in this pit' is found to be present only when there is a distinct relationship between the two things; so also the notions—'the cloth is in these threads' 'the mat is in these reeds,' 'this, quality and that action are in this substance' 'Being is in these substances, qualities and*

actions', 'there is the general character of substance in this substance', 'the general character of quality in this quality', 'the general character of action in this action', 'the ultimate individualities in this eternal substance'; and from all such notions we infer the existence of the relationship in question. *(VII-ii-29, 27, 28, ; V-ii-23)*

Commentary.

Reverence to Çiva, accompained by Umā, the destroyer of internal darkness, the cause of the destruction and origination of the universe,—He who has pure Consciousness for his body!

The author proceeds to describe 'Samavāya' or 'inherence'. *Inherence is the relationship &c., &c.* This we have already explained when mentioning the categories by name. The author proceeds to show what the 'inseparable substances' are, the relationship whereof is called 'inherence':—*With regard to substances &c., &c.* '*That appear in the form of causes and effects and those that do not appear in these forms*'—this is added with a view to restrict the scope of the relationship; that is to say, the relation between the whole and its parts, between transient substances and their qualities, between eternal substances and the transient qualities belonging to them, between actions and the substances to which they belong—all these appearing in the form of causes and effects,—is '*samavāya* or 'inherence'; and it is also that relationship which subsists between eternal substances and their qualities, between communities and the individuals included therein, between ultimate individualities and the substances in which they reside, —all these not appearing in the form of causes and effects, but being inseparably connected.

Similarly the expression—'*in the relationship of the container and the contained*'—is added by way of a restriction. Inherence is that which gives rise to the notion that 'this subsists in that'.

Inherence also consists in the interdependence, or non-separateness of such things of limited extension as are distinctly known to be different from each other. This we infer from the fact of mutual intermixture of two distinct things being due to a certain definite relationship (and this relationship can be none other than that of inherence).

This same fact the author proceeds to explain further :—*As for instance &c., &c.* All the notions cited point to some sort of a distinct relationship between the two objects in each case. The argument is put forward in the following form :—' All these notions are based upon a particular kind of relationship,—because they are definitely ascertained notions,—like the notion ' there is curd in this pit.'

Page 326]. Text (158) *: Inherence is not mere conjunction ; (1) because the members of this relationship are inseparably connected ; (2) because this relationship is not caused by the action of any of the members related ; (3) because it is not found to end with the disjunction of the members ; and (4) because it is found subsisting only between the container and the contained.*

Commentary.

The author proceeds to show that Inherence is not the same as Conjunction. The relationship between the yarns and the cloth is not one of Conjunction. In proof of this, the following four reasons are given :—

(1) Conjunction occurs between objects that, prior to the conjunction, have a separate existence ; whereas Inherence subsists between objects that have no separate existence. (2) Conjunction is brought about by the action of one or both of the members related, whereas in the case of Inherence we do not find any such cause; and the only cause for this relationship lies in the productive potency of the cause bringing the

substances into existence. (3) Conjunction ceases as soon as there is a disjunction of the members related ; whereas Inherence is indestructible. (4) Conjunction occurs between two substances that have independent existence ; for instance, the various fingers of the hand come into mutual contact when the hand is held up ; whereas Inherence subsists only in such substances as stand to each other in the relation of the container and the contained.

For these reasons, Inherence cannot be regarded as the same as Conjunction ; it is a distinct relationship.

Text (159): *Inherence is a category distinct from Substance and the rest ; as like 'being', it has a character different from these. That is to say, as in the case of 'being' we find that bringing about notions of itself in regard to the substrates of the classes of 'substance' and the rest, it differs from its substrates, as also from other classes,—so also Inherence, being the cause of the notion that 'this subsists in that,' with regard to the other five categories, must be regarded as something different from these. Nor is there a multiplicity of Inherences, as there is of Conjunctions ; because like 'being', Inherence has the same distinguishing feature, and also because there are no reasons for making distinctions in regard to it ; for these reasons Inherence, like 'being', must be regarded as one only.*

Commentary.

Having thus proved the existence of Inherence, the author proceeds to show that it is distinct from the other categories :—By '*bhāva*' the community of 'Being' is meant ; the mention of 'substance &c.' includes the classes of 'Quality' &c. In the case of 'Being' we find that it brings about

notions akin to itself,—such for instance as 'this *is*'—with regard to its substrates, in the shape of substances, qualities and actions; similarly the class of 'substance,' brings about the idea of *substance* with regard to its substrates, Substances; the class of 'Quality' gives rise to notions of *quality* in regard to its substrates, Qualities; similarly the class of Action brings about notions of itself with reference to its substrates, Actions. And just as bringing about these notions, the classes of 'Being,' 'substance' &c, are regarded as different from one another, and also from their respective substrates,—in the same manner, in the case of Inherence also, we find that it gives rise to the idea that 'this subsists in that,' in regard to all the other five categories; and as such it cannot but be regarded as something different from these latter.

As regards the question as to whether Inherence is one or many, the author says—*It has no multiplicity, as Conjunction has*; just as in the case of 'Being' we find that there is no difference in the various notions of 'being,' so, in the same manner, we do not find any difference in the various notions of Inherence that we have; nor have we any proof for regarding Inherence as many; and for these reasons we conclude that Inherence is one only.

Text (160):—Objection: "*If Inherence is one only, then, in as much as there would be one and the same relationship between substances and the class 'substance,' between qualities and the class 'Quality,' and between actions and the class 'Action,'—we would have an intermixture of Categories.*"

Reply: *Not so; because of the differences in the container and the contained in each case. That is to say, though Inherence is one only everywhere and self-sufficient, yet there is a restriction due to the differences of the container and the contained. For instance, the community of 'substance' resides in substances*

only; the community of 'quality' in qualities only; and that of 'Action' in actions only.

Question: "*How do you know that this is so?*"

Answer: *We learn this from the perception of their concomitances and non-concomitances; that is to say, from the invariable concomitance of the notion of 'this subsists in that', which is based upon Inherence, we infer that Inherence is one only everywhere; and from the non-concomitance of the notion of 'substance' &c., in all cases we infer that there is a restriction or limitation in regard to them. For instance, as in the case of the curd and the pit, though the conjunction is one only, yet there is a restriction (as to which is the container and which the contained),—so, in the same manner, in the case of the communities (of 'substance' &c)., even though the Inherence is one only, there is restriction as to the container and the contained, based upon the differences in the potencies of being the 'manifester' and the 'manifested.'*

Commentary.

The sense of the objection may be thus explained :—" If Inherence were one only, then the relationship that the community of 'substance' would bear to the Earth and other substances would be the same as that subsisting between the community of 'Quality' and the particular qualities, and also that subsisting between the community of 'Action' and the particular actions; and thus in as much as the connection of the community of 'substance' which makes the Earth a *substance*, is the same the presence whereof we would find in qualities and actions also,—these latter also would be *substances*; and in the same manner, the connection of the community of 'Qnality' making colour, &c., qualities would be the same as that present

प्राप्तः। अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति परिभाषया न भवति। ङेप्रथमयोरित्यत्र मकारान्तरं प्रश्लिष्य अम् मान्त एवावशिष्यते न तु विक्रियत इति व्याख्यानाद्वा॥

त्वाहौ सौ। ७। २। ९४॥

युष्मदस्मदोर्मपर्यन्तस्य त्वाहावादेशौ स्तः सौ परे। त्वम्। अहम्। परमत्वम्। परमाहम्। अतित्वम्। अत्यहम्॥

तुभ्यमह्यौ ङयि। ७। २। ९५॥

अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। तुभ्यम्। मह्यम्। परमतुभ्यम्। परममह्यम्। अतितुभ्यम्। अतिमह्यम्॥

तवममौ ङसि। ७। २। ९६॥

अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि। तव। मम। परमतव। परममम। अतितव। अतिमम॥

त्वमावेकवचने। ७। २। ९७॥

एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ। त्वाम्। माम्। त्वया। मया। त्वत्। मत्। त्वयि। मयि॥

समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी।
समासार्थोऽन्यसंख्यश्चेत्स्तो युवावौ त्वमावपि॥ १॥
सुजस्ङेङस्सु परत आदेशाः स्यु सदैव ते।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि॥ २॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः॥ ३॥

द्वेकसंख्यः समासार्थौ बह्वर्थे युष्मदस्मदी।

तयोरङ्गीकृतार्थत्वान्न युवावौ त्वमौ न च॥ ४॥

त्वां मां वा अतिक्रान्त इति विग्रहे अतित्वम्। अत्यहम्। अतित्वाम्। अतिमाम्। अतियूयम्। अतिवयम्। अतित्वाम्। अतिमाम्। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्याम्। अतिमाभ्याम्। अतित्वाभिः। अतिमाभिः। अतितुभ्यम्। अतिमह्यम्। अतित्वभ्यम्। अतिमभ्यम्। ङसि-भ्यसोः। अतित्वत्। अतिमत्। भ्यामि प्राग्वत्। अतितव। अतिमम। अतित्वयोः। अतिमयोः। अतित्वाकम्। अतिमाकम्। अतित्वयि। अतिमयि। अतित्वासु। अतिमासु। युवामावां वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औअम्औट्सु। अतियुवाम्। अत्यावाम्। त्रीणि वचनानि तुल्यानि। अतियुवान्। अत्यावान्। अतियुवया। अत्यावया। अतियुवाभ्याम्। अत्यावाभ्याम्। अतियुवाभिः। अत्यावाभिः। भ्यसि। अतियुवभ्यम्। अत्यावभ्यम्। ङसिभ्यसोः। अतियुवत्। अत्यावत्। ओसि। अतियुवयोः। अत्यावयोः। अतियुवाकम्। अत्यावाकम्। अति-युवयि। अत्यावयि। अतियुवासु। अत्यावासु। युष्मानस्मान् वा अतिक्रान्त इति विग्रहे सुजसङेङस्सु प्राग्वत्। औअम्औट्सु अतियुष्माम्। अत्यस्माम्। अतियुष्मान्। अत्यस्मान्। अतियुष्मया। अत्यस्मया। अतियुष्माभ्याम्। अत्यस्माभ्याम्। अतियुष्माभिः। अत्यस्माभिः। अतियुष्मभ्यम्। अत्यस्मभ्यम्। ङसिभ्यसोः। अतियु-ष्मत्। अत्यस्मत्। ओसि अतियुष्मयोः। अत्यस्मयोः। अतियु-

ष्माकम्। अत्यस्माकम्। अतियुष्मयि। अत्यस्मयि। अतियुष्मासु। अत्यस्मासु॥

प्रत्ययोत्तरपदयोश्च। ७। २। ९८॥

मपर्यन्तयोरनयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। त्वत्पुत्रः। मत्पुत्रः॥

त्रिचतुरोः स्त्रियां तिसृचतसृ। ७। २। ९९॥

स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः॥ तिस्रः। चतस्रः २ तिसृभिः। चतसृभिः। तिसृभ्यः २। चतसृभ्यः २। आमि नुमचिरेतिनुट्। नतिसृचतसृ इति दीर्घो न। तिसृणाम्। चतसृणाम्। तिसृषु। चतसृषु। स्त्रियां किम्। त्रयः। चत्वारः। त्रीणि। चत्वारि। स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह। प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः मतिवत्। आमि प्रियत्रयाणामिति विशेषः। प्रियास्तिस्रो यस्येति विग्रहे तु प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि। स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः। नलुमतेति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ। भाष्योदाहरणप्रामाण्याद्वादेशात् पूर्वविप्रतिषेधेन नुम्। प्रियतिसृणी। प्रियतिसृणि। तृतीयादिषु पुंवद्भावविकल्पात्पर्यायेण नुमभावौ। प्रियतिस्रा। प्रियतिसृणा इत्यादि। एवं प्रियचतसा इत्यादि। नद्यृतश्चेति कप् न। विभक्त्याश्रयत्वेन तिसृचतसृभावस्य बहिरङ्गत्वात्॥ तिसृभावे संज्ञायां कन्युपसंख्यानम्॥ *॥ तिसृका नाम ग्रामः॥

अचि र ऋतः । ७ । २ । १०० ॥

तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि ॥ गुणदीर्घोत्वानामपवादः । तिस्रश्चतस्रस्तिष्ठन्ति । तिस्रश्चतस्रः पश्य । प्रियतिस्रः प्रियचतस्रः आगतः ॥

जराया जरसन्यतरस्याम् । ७ । २ । १०१ ॥

जराशब्दस्य जरस्वा स्यादजादौ विभक्तौ ॥ जरसौ । शीभावात्परत्वाज्जरस् । आमि नुटः परत्वाज्जरस् । जरसामित्यादि । पक्षे रमावत् । इह । पूर्वविप्रतिषेधेन शीभावं प्रति सन्निपातपरिभाषाया अनित्यतां चाश्रित्य जरसी इति केचिदाहुस्तन्निर्मूलम् । यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्तत्वमाश्रित्य औङ आपः आङि चापः याडापः ह्रस्वनद्यापः ङेराम्नीति पञ्चापि विधयः प्राप्ताः । एवं नल्लिशपृत्सु । तथापि । अनल्विधावित्युक्तेर्न भवन्ति । आ आबिति प्रश्लिष्य आकाररूपस्यैवापः सर्वत्र ग्रहणात् । एवं हल्ङ्याप्भ्य इति सूत्रेपि आ आप् डी ई इति प्रश्लेषादतिखट्वः निष्कौशाम्बिरित्यादिसिद्धे दीर्घग्रहणं प्रत्याख्येयम् । न चैवमप्यतिखट्वायेत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वञ्चाश्रित्य याट् स्यादिति वाच्यम् । आबन्तं यदङ्गं ततः परस्य याड्विधानात् । उपसर्जनस्त्रीप्रत्यये तदादिनियमात् । पदाङ्गाधिकारे तस्य तदन्तस्य च । अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति । एकादेशशविकृतस्यानन्यत्वाज्जरशब्दस्य जरस् । निर्जरसौ । निर्जरसः । इनादीन्बाधित्वा परत्वाज्जरस् । निर्जरसा । निर्जरसे । निर्जरसः । पक्षे । हलादौ च रामवत् । वृत्तिकृता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः

सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसादिति रूपे न तु निर्जरसा निर्जरस इति केचिदित्युक्तम् । तथा भिसि निर्जरसैरिति रूपान्तरमुक्तम् । तदनुसारिभिश्च षष्ठ्येकवचने निर्जरस्येत्येव रूपमिति स्वीकृतम् । एतच्च भाष्यविरुद्धम् । क्लीबे सोरमादेशे कृते सन्निपातपरिभाषया न जरस् । अजरम् । अजरसी । अजरे । परत्वाज्जरसि कृते झलन्तत्वान्नुम् । सान्तेति-दीर्घः । अजरांसि । अमि लुकोऽपवादममभावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभाषया न लुक् । अजरसम् । अजरम् । अजरसी । अजरे । अजरांसि । अजराणि ॥

त्यदादीनामः । ७ । २ । १०२ ॥

एषामकारोऽन्तादेशः स्याद्विभक्तौ ॥ द्विपर्यन्तानामेवेष्टिः ॥ * ॥ स्यः । त्यौ । त्ये । सः । तौ । ते । यः । यौ । ये । एषः । एतौ । एते । अयम् । इमौ । इमे । असौ । अमू । अमी । द्वौ २ । द्वाभ्याम् । द्वयोः २ । द्विशब्दो नित्यं द्विवचनान्तः । द्विपर्यन्तानां किम् । भवान् । भवन्तौ । संज्ञायामुपसर्जनत्वे च नात्वं सर्वाद्यन्तर्गणकार्यत्वात् । द्विर्नाम कश्चित् । द्विः । द्वौ । द्वयः । द्वावतिक्रान्तोऽतिद्विः हरिवत् । प्राधान्ये तु परमद्वावित्यादि ॥

किमः कः । ७ । २ । १०३ ॥

किमः कः स्याद्विभक्तौ । अकच्सहितस्याप्ययमादेशः । कः । कौ । के । कम् । कौ । कान् इत्यादि सर्ववत् ॥

कु तिहोः । ७ । २ । १०४ ॥

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः ॥ कुतः । कुत्र । कुह ॥

क्वाति । ७ । २ १०५ ॥

किमः क्वेत्यादेशः स्यादति । क्व ॥

तदोः सः सावनन्त्ययोः । ७ । २ । १०६ ॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे । स्यः । सः । एषः । असौ । परमसः । द्विपर्यन्तानामित्येव । नेह । त्वम् । न च तकारोच्चारणसामर्थ्यान्नेति वाच्यम् । अतित्वमिति गौणे चरितार्थत्वात् । सञ्ज्ञायां गौणत्वे च न । त्यद् । अतित्यद् । अनन्त्ययोः किम् । हे स । त्यदादीनां सम्बोधनन्नास्तीति तूत्सर्गः ॥

अदस औ सुलोपश्च । ७ । २ । १०७ ॥

अदस औकारोन्तादेशः स्यात्सौ परे सुलोपश्च ॥ असौ । औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च ॥ * ॥ प्रतिषेधसन्नियोगशिष्टमुत्वं तदभावे न प्रवर्तते । असकौ । असुकः ।

इदमो मः । ७ । २ । १०८ ॥

इदमो मस्य मः स्यात्सौ परे । त्यदाद्यत्वापवादः । अयम् । इयम् ।

दश्च । ७ । २ । १०९ ॥

इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । इमम् । इमौ । इमान् । इमे । इमाः । इमाम् । इमे । इमाः । इमे । इमानि ॥

यः सौ । ७ । २ । ११० ॥

इदमो दस्य यः स्यात्सौ परे । इयम् ॥

इदोऽय् पुंसि । ७ । २ । १११ ॥

इदम इदः स्थाने अय् स्यात्सौ परे पुंसि ॥ अयम् ॥

अनाप्यकः । ७ । २ । ११२ ॥

अककारस्य इदम इदोऽन्स्यादापि विभक्तौ । आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः । अनेन । अनया । अनयोः । अकः क्रिम् । इमकेन ॥

हलि लोपः । ७ । २ । ११३ ॥

अककारस्य इदम इदो लोपः स्यादापि हलादौ । नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे । सुपि चेति दीर्घः । आभ्याम् । एत्वं एभिः । अत्व कृते नित्यत्वाण्ङेः स्मै । पश्चाद्धलिलोपः । अस्मै । अस्मात् इत्यादि । अकः । किम् । इमकाभ्याम् ॥

मृजेर्वृद्धिः । ७ । २ । ११४ ॥

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे । मार्ष्टा । मार्ष्टुम् । मार्जितुम् ।

अचोऽञ्णिति । ७ । २ । ११५ ॥

ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः स्यात् ॥ एकस्तण्डुलनिचायः । द्वौ सूर्पनिष्पावौ । कारकः । गौः । गावौ । गावः । सखायौ । सखायः ।

अत उपधायाः । ७ । २ । ११६ ॥

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे ।

पाकः । त्यागः । रागः । पाचकः । पाठकः । अतः किम् । भेदकः । उपधायाः किम् । चकासकः । तक्षकः ॥

तद्धितेष्वचामादेः । ७ । २ । ११७ ॥

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् ॥

किति च । ७ । २ । ११८ ॥

किति तद्धिते च तथा । गार्ग्यः । वात्स्यः । दाक्षिः । औपगवः । कापटवः । नाडायनः । प्राग्वहतेष्ठक् । आक्षिकः । शालाकिकः । त्वाष्ट्रो जागत इत्यादावादिवृद्धिरन्त्योपधावृद्धिं बाधते इति सर्वेष्टसिद्धिः ॥

इत्योरम्भट्टेन श्रीघोण्डभट्टविश्वरूपात्मजेन वैजनाथभट्ट-विश्वरूपापरनामधेयेन विरचितायां व्याकरणदीपिका-समाख्यायां पाणिनिसूत्रवृत्तौ सप्तमाध्यायस्य द्वितीयः पादः समाप्तः ॥

सप्तमाऽध्यायस्य तृतीयः पादः।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्। ७। ३। १॥

परिभाषेयमिति पदमञ्जर्यां स्पष्टम्। एषां पञ्चानां वृद्धिप्राप्तावचामादेरच आत् ञ्णिति किति च। देविकायां भवं दाविकमुदकम्। देविकाकूले भवा दाविकाकूलाः शालयः। पूर्वदेविका नाम प्राचां ग्रामः। तत्र भवः पूर्वदाविकः। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः। साप्याकार एव भवति। अस्य स्वतन्त्रविधित्वे तु नेदं सिध्येत्। दाविकाकूला इति तु विधित्वेपि सिध्यति। अङ्गस्याचामादेरच आद्भवति स चेद्देविकादीनामाद्यच् भवतीत्यर्थसम्भवात्। अत एव सुदेविकायां भवः सौदेविक इत्यत्र नातिव्याप्तिः। विधित्वे सुशब्दोकारस्य देविकाद्यनवयवत्वात् परिभाषात्वे देविकादेर्वृद्ध्यप्राप्तेश्च। परिभाषात्वे तु अङ्गस्येत्यस्यैवमभिसम्बन्धः क्रियते देविकादीनां वृद्धिप्राप्तावचामादेराकारो भवति देविकादीन्यङ्गसम्बन्धीनि चेत्[ु] रिति। अनुवृत्तस्य सम्बन्धो वक्तव्य इत्येतावदेव चास्य प्रयोजनं। न तु किञ्चिद्व्यावर्त्यम्। यदि च परिभाषात्वेपि अङ्गस्याचामादेरचो वृद्धिप्राप्तौ आद्भवति स चेद्देविकादीनामाद्यजित्यर्थः स्यात्तदापि पूर्वदाविको नैव सिद्ध्येत्। शिंशपाया विकारः शांशपश्चमसः। पलाशादिभ्यो वेत्यञ्। शिंशपास्थले भवा देवाः शांशपास्थलाः। पूर्वशिंशपा नाम प्राचां ग्रामः। तत्र भवः पूर्वशांशपः। दित्यौह इदं दात्यौहम्। दीर्घ-

सत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम् ॥ वहीनरस्येत्वं वक्तव्यम् ॥ * ॥ वहीनरस्यापत्यं वैहीनरिः । आकारवृद्धिः प्राप्ता सा इकारेण बाध्यते । तस्य त्वैकारवृद्धिर्भवत्येव । न हि तस्यां नाप्राप्तायामिकारो विधीयते । यतः सापि बाध्येत । केचित्तु विहीनरस्यैव वैहीनरिमिच्छन्ति ॥

केकयमित्रयुप्रलयानामादेरियः । ७ । ३ । २ ॥

एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे ॥ केकयस्यापत्यं कैकेयः । जनपदशब्दात्क्षत्रियादञ् । मैत्रेयिकया श्लाघते । मित्रयूनां भावेनेत्यर्थः । गोत्रचरणाच्छ्लाघात्याकारेति वुञ् । तत्र हि लौकिकं गोत्रं गृह्यते । लोके च ऋषिशब्दो गोत्रमित्यभिधीयते इति काशिका । प्रलयादागतं प्रालेयम् । इयादेशेन वृद्धिर्न बाध्यते । विषयभेदात् । अचामादेर्वृद्धिर्यादेरियादेशः । अङ्गं तूभयोर्विशेषणं न कार्यीति हरदत्तः ॥

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । ७ । ३ । ३ ॥

पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किन्तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः ॥ वैयाकरणः । स्वश्वस्यापत्यं सौवश्वः । स्वश्वशब्दः शिवादिरिति पदमञ्जर्यां स्पष्टम् । य्वाभ्यां किम् । वर्थस्यापत्यं वार्थिः । पदान्ताभ्यां किम् । यतीति यन् तस्य छात्रा यात्राः । प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थम् इह मा भूत् । दाध्यश्विः । माध्वश्विः । अन्यथैभ्यां वृद्धिबाधे सिद्धे तद्वैयर्थ्यात् । एतच्च सूत्रं नाप्राप्ततद्धितेष्वचामादेरित्येतद्विषयकम् । द्वे अशीती भृतो द्व्याशीतिक इत्यादौ संख्यायाः संवत्सरसंख्यस्य चेत्येतद्विषये न प्रवर्तते । कथं

तर्हि पूर्वेच्वलिन्दे भवः पूर्वैषयलिन्द इत्यादौ प्राचां ग्रामनगराणामित्येतद्विषये प्रवृत्तमिति चेत्। इष्टानुरोधेन प्राचांग्रामेत्यचैतदनुवर्त्य वाक्यभेदेन व्याख्यायते संख्यायाः संवत्सरेत्यत्र तु नेत्यवेहि। पूर्वशब्द आवर्तते तत्रैकोऽवयववचनः। अपरो व्यवस्थावचनः। ताभ्यां पूर्वावैचौ भवतस्तौ चाङ्गस्यावयवाविति। तेन उश्चाजश्च वजौ तयोरिदं औवजन्तस्येदमौवजीयमिति छः सिद्धः। अन्यथैचोरभक्तत्वादतन्मध्यपतितत्वाच्च प्रातिपदिकस्यावृद्धत्वान्न स्यादिति पदमञ्जर्यां स्पष्टम्॥

द्वारादीनां च। ७। ३। ४॥

द्वार। स्वर। स्वाध्याय। व्यल्कश। स्वस्ति। स्वर्। स्फ्यकृत्। स्वादुमृदु। श्वस्। श्वन्। स्व। स्वग्राम। एषां न वृद्धिः ऐजागमश्च। द्वारे नियुक्तो दौवारिकः। द्वारपालस्येदं दौवारपालम्। दाविकाकूलवदसिद्धिः। सौवर्यः सप्तम्यः। व्यल्कशे भवः वैयल्कशः। स्वस्तीत्याह सौवस्तिकः। स्वर्भवः सौवः। अव्ययानां भमात्रे टिलोपः। स्वर्गगमनमाह सौवर्गगमनिकः। स्फ्यकृतस्यापत्यं स्फैयकृतः। ऋषित्वादणिति पदमञ्जर्यां स्पष्टम्। स्वादुमृदुन इदं सौवादुमृदवम्। श्वो भवं शौवस्तिकम्। श्वसस्तुट् चेति ठञ्। शुनो विकारो मांसं शौवम्। श्वादंष्ट्रायां भवः शौवादंष्ट्रो मणिः। संज्ञापूर्वको विधिरनित्य इति वृद्धाच्छो न। प्रत्ययसंज्ञाविशिष्टस्यैव छस्य विधानात्। स्वस्येदं सौवम्। स्वग्रामे भवः सौवग्रामिकः। अध्यात्मादित्वाट्ठञ्। स्वाध्यायशब्दो यदि शोभनोऽध्यायः स्वाध्यायः आङ् मध्ये प्रक्षिप्तः अन्येषामपि दृश्यते

इति वा उत्तरपदादेर्दीर्घत्वं तदा पूर्वेणैव सिद्धम्। यदि च स्वश्चासावध्यायश्च स्वाध्याय इति तदापि श्वादंष्ट्रवत्स्वशब्दादित्वेन स्वाध्यायस्वग्रामयोः सिद्धमेवेति दिक्॥

न्यग्रोधस्य च केवलस्य। ७। ३। ५॥

अस्य न वृद्धिरैजागमश्च। नैयग्रोधम्। प्लक्षादिभ्योऽण्। केवलस्य किम्। न्यग्रोधमूले भवाः न्यग्रोधमूलाः शालयः। न्यग्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम्। अव्युत्पत्तिपक्षे तु विध्यर्थम्॥

न कर्मव्यतिहारे। ७। ३। ६॥

अत्र ऐच् न स्यात्। व्यावक्रोशी। व्यावहासी॥

स्वागतादीनां च। ७। ३। ७॥

ऐच् न स्यात्। स्वागतमित्याह स्वागतिकः। स्वध्वरे चरति स्वाध्वरिकः। स्वङ्गस्यापत्यं स्वाङ्गिः। व्याङ्गिः। व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। स्वपतौ साधु स्वापतेयम्॥

श्वादेरिञि। ७। ३। ८।

ऐच् न। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः। एतत्प्रकरणनिर्दिष्टैरादेरचो विशेषणात्तदादिविधिर्भवतीत्यत्रैतदेव ज्ञापकम्॥ इकारादाविति वाच्यम्॥ *॥ श्वगणेन चरति श्वागणिकः। श्वायूथिकः॥ इजन्तस्य चान्यत्र तद्धिते प्रतिषेधो वक्तव्यः॥ *॥ श्वाभस्त्रेरिदं श्वाभस्त्रम्। इञश्चेत्यण्॥

पदान्तस्यान्यतरस्याम्। ७। ३। ९॥

श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा। श्वापदस्येदं श्वापदम्। शौवापदम्। शौवदंष्ट्रचर्माभावे अण्॥

उत्तरपदस्य। ७। ३। १०॥

अधिकारोऽयं हनस्त इत्यस्मात्प्राक्। वक्ष्यति जे प्रोष्ठपदानाम्। प्रोष्ठपदासु जातः प्रोष्ठपादो ब्राह्मणः॥

अवयवादृतोः। ७। ३। ११॥

अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिर्ञ्णिति किति च तद्धिते॥ पूर्ववार्षिकः। पूर्वशारदः। अपरहैमनः। वर्षाणां पूर्वं इत्येकदेशिसमासः। तत्र भव इत्यर्थे वर्षाभ्यष्ठक्। ऋत्वण्। हेमन्ताच्च सर्वत्रारात्र तलोपश्चेत्यण्। अवयवात्किम्। पूर्वासु वर्षासु भवः पौर्ववर्षिकः। पौर्वशरदिकः। कालाठ्ठञ्। ऋतोर्वृद्धिमद्विधावयवानामिति तदन्तविधिरुदाहरणे। प्रत्युदाहरणे तु न। अवयवत्वाभावात्। ऋतुवाचकादृवृद्धिनिमित्तप्रत्ययविधौ तदन्तविधिर्वक्तव्योऽवयववाचकानां पूर्वपदत्वे इति तदर्थः। वृद्धिमद्विधौ किम्। पूर्वप्रावृषम्। ऋत्वण्। न तु प्रावृष एण्यः॥

सुसर्वार्द्धाज्जनपदस्य। ७। ३। १२॥

उत्तरपदस्य वृद्धिः। पाञ्चालकः। सर्वपाञ्चालकः। अर्द्धपाञ्चालकः। जनपदतदवध्योश्च। अवृद्धादपि बहुवचनविषयादिति वुञ्। सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः। जनपदवाचिनः शब्दस्यानन्तरं प्रत्यये विधीयमाने तदन्तविधिर्यदि सुप्रभृतिभ्यः परः स भवतीति तदर्थः॥

दिशोऽमद्राणाम्। ७। ३। १३॥

दिग्वाचकाज्जनपदवाचिनो वृद्धिः। पूर्वपाञ्चालकः। उत्तरपा-

ञ्चालकः । दिशः किम् । पूर्वपञ्चालानामयं पौर्वपञ्चालः । दिक्-शब्दग्रहणेन दिग्वाचकस्यैव ग्रहणात्तदन्तविधेरभावान्न वुञ् । अम-द्राणां किम् । पौर्वमद्रः । मद्रेभ्योऽञ् । योगविभाग उत्तरार्थः । सुसर्वार्द्धदिशो जनपदस्यामद्राणामित्युक्ते स्वादिभ्यः परस्यापि मद्रस्य पर्युदासो मा भूदितीहार्थोऽपि ॥

प्राचां ग्रामनगराणाम् । ७ । ३ । १४ ॥

यद्यपि नगरस्यापि ग्रामनामधेयत्वमस्ति तथापि नगराणा-मित्युत्तरपदविशेषणं ग्रामाणामित्यङ्गविशेषणमित्यर्थमुभयम् । प्राचां देशे दिशः परेषां नगरवाचिनां ग्रामवाच्यङ्गानामवयवस्याद्यचो वृद्धिः । पूर्वैषुकामशम्यां भवः पूर्वैषुकामशमः । समुदायग्रामना-मधेयादण् । पूर्वपाटलिपुत्रकः । उत्तरपदमेव नगरमाह । रोप-धेतोः प्राचामिति वुञ् । यद्यप्येकमेव पाटलिपुत्रम् । तथापि तदेकदेशे तत्प्रवृत्त्या समानाधिकरणसमासः । भाष्ये तु नगरग्रहणं प्रत्याख्यातम् । पदैकदेशन्यायेनोत्तरपदस्यापि ग्रामत्वमित्याशयात् ।

संख्यायाः संवत्सरसंख्यस्य च । ७ । ३ । १५ ॥

संख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ । द्विसांव-त्सरिकः । द्वे षष्टी भृतो द्विषाष्टिकः । संख्यायाः परिमाणस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वैसमिकः द्वैरात्रिक इत्युत्तरपदवृद्धिर्न ॥

वर्षस्याभविष्यति । ७ । ३ । १६ ॥

उत्तरपदवृद्धिः स्यात् । द्विवार्षिकः । भविष्यति तु द्वैव-

षेकः । अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न । कर्म करिष्यतीत्यादि पदान्तरसमभिव्याहारेण हि गम्यते तत्र भविष्यत्ता न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः । वर्षाल्लुक् च चित्तवति नित्यमिति नित्यं लुक् तु न भवति । आरम्भसामर्थ्यादेव नित्यत्वे सिद्धे पुनर्नित्यग्रहणाद् भूतार्थे एव स हीष्यते । अन्यत्र चित्तवत्यपि विकल्प एव ॥

परिमाणान्तस्यासंज्ञाशाणयोः । ७ । ३ । १७ ॥

उत्तरपदवृद्धिः स्यात् ञिदादौ । परमनैष्किकम् । असमासे निष्कादिभ्य इत्यत्र समासपर्युदासादत्र ठञ् । द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । द्विनैष्किकम् । शाणप्रतिषेधात्परिच्छित्तिसाधनमिह परिमाणम् । तेनोन्मानस्यापि भवति । असंज्ञेति किम् । पञ्च लोहिन्यः पञ्च कलापाः परिमाणमस्य पाञ्चलोहितकम् । पाञ्चकलापिकम् । लोहिनी गुञ्जा । तद्धितान्तसंज्ञा । द्वैशाणम् । कुलिजशब्दमपि केचित्पठन्ति । द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः । कुलिजं धान्यमानम् । अन्तग्रहणं चिन्त्यप्रयोजनम् ॥

जे प्रोष्ठपदानाम् । ७ । ३ । १८ ॥

प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः जातार्थे ञिति णिति किति च ॥ प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः । प्रोष्ठपदाभिर्युक्तः काल इत्यणो लुबविशेषे इति लुपि कृतसन्धिवेलादिसूत्रेण जातार्थेऽण् । जे इति किम् । प्रोष्ठपदासु भवः प्रौष्ठपदः । बहुवचननिर्देशात्पर्यायोऽपि गृह्यते । भद्रपादः ॥

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च । ७ । ३ । १९ ॥

हृदाद्यन्ते पूर्वपदोत्तरपदयोरचामादेरचो वृद्धिर्ञिति णिति किति च ॥ सुहृदोऽपत्यं सौहार्दः । सौभाग्यम् । सुभगाया अपत्यं सौभागिनेयः । कल्याण्यादीनामिनङ् । महते सौभगायेत्यत्रोद्गात्राद्यञन्ते तु छान्दसत्वान्नोत्तरपदवृद्धिः । सक्तुप्रधानाः सिन्धवः सक्तु सिन्धवः । तेषु भवः साक्तुसैन्धवः । सिन्धुः कच्छादिः । तेन तदन्तविधिरिष्यते इत्यणिति वृत्तिः ॥

अनुशतिकादीनां च । ७ । ३ । २० ॥

एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च । अनुशतिकस्येदं आनुशातिकम् । अनुहोडेन चरति आनुहौडिकः । अङ्गारवेणुर्नाम कश्चित्तस्यापत्यं आङ्गारवैणवः । सूचनडस्यापत्यं सौचनानाडिः । आकृतिगणोऽयम् । अभिगममर्हति आभिगामिकः ॥

देवताद्वन्द्वे च । ७ । ३ । २१ ॥

अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे ॥ आग्निमारुतम् । आग्निवारुणम् । यो देवताद्वन्द्वः सूक्तसम्बन्धी वा हविःसम्बन्धी तत्रायं विधिः । इह तु न भवति । स्कन्दविशाखौ देवते अस्य स्कान्दविशाखः । ब्रह्मप्रजापती ब्राह्मप्रजापत्यमिति वृत्तिः । अत्र सास्यदेवतेत्यण् । पत्युत्तरपदाण्ण्यः । ननु सास्यदेवतेत्यत्र न जातिवचनो देवताशब्दः । किन्तर्हि यस्मै हविर्निरूप्यते । यद्वा मन्त्रस्तुत्यम् । सा देवता गृह्यते । न चैवम्भूतोऽत्र द्वन्द्वार्थः एवं भूतत्वे वा यथा तद्धिता भवन्ति । तथायमपि विधिः प्राप्नोति । अत्राहुः । तद्धितः

दाम्नीशसयुयुजस्तुतुदसिसिचमिह
पतदशनहः करणे त्रट् ॥ १६० ॥

दाप् लवन इत्येवमादिभ्यः करणे कारके त्रट् भवति । दान्ति तेन दात्रम् । नेत्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्रम् । दंष्ट्रा । अजादिषु पाठाट्टाप् । नध्री । दंशेः कृतनखस्यनिर्देशो ज्ञापकः क्वचिदन्यत्रापि नखम् । दशनः ।

धात्रपोत्रे ॥ १६१ ॥

धात्रपोत्रइत्येते शब्दरूपे निपात्येते । धेटः कर्म्मणि त्रट् निपात्यते । धयंति तामिति धात्री । पोत्रमिति पुनातेः पवतेर्वा करणे त्रट् निपात्यते । हलस्य सूकरस्य वा मुखं चेद्भवति हलस्य पोत्रम् । सूकरस्य पोत्रम् ।

लूधूसूखनर्तिसहचर इत्रः ॥ १६२ ॥

करण इति वर्तते । ल्वादिभ्यो धुभ्यः करणे इत्रो भवति । लुनाति तेन लवित्रम् । धुवति तेन धवित्रम् । सुवति तेन सवित्रम् । खनित्रम् । अरित्रम् । सहित्रम् । चरित्रम् ।

पुवः खौ ॥ १६३ ॥

करण इति वर्तते । पवतेः पुनातेर्वा करणे इत्रो भवति खुविषये । पूयतेऽनेन पवित्रम् । पवित्रा नाम नदी ।

कर्तरि चर्षिदेवतयोः ॥ १६४ ॥

पुव इत्रो भवति कर्तरि करणे च कारके । ऋषिदेवतयोरभिधेययोर्भिन्नयोगनिर्देष्टत्वाद्यथासंख्यं न भवति

पूयतेऽनेन पुनाति वा पवित्रो ऽयमृषिः । देवतायां पवित्रोऽर्हन् स मा पुनातु ।

ञीतः क्तः १ १६५ ॥

संप्रतीति वर्तते ञिशब्देतो धोः संप्रति क्तो भवति। ञिमिदा मिन्नः । ञिधृषा । धृष्टः । ञिक्ष्विदा । क्ष्विण्णः ।

मतिबुद्धिपूजार्थाञ्च ॥ १३६ ॥

मतिरनुमतिः । बुद्धिर्ज्ञानम् । पूजा अर्चा । मत्यर्थेभ्यः पूजार्थेभ्यश्च धुभ्यः संप्रति क्तो भवति । राज्ञां मतः । राज्ञामिष्टः । राज्ञां बुद्धः । राज्ञां ज्ञातः । राज्ञां पूजितः । राज्ञामर्चितः । क्तयोगे कर्तरि ता प्राप्ता नद्धितेत्यादिना प्रतिषिद्धा भवतीत्यनेन पुनर्विधीयते। चकारोऽनुक्तसमुच्चयार्थः ।

शीलितो रक्षितः क्षांतः आक्रुष्टो जुष्ट इत्यपि ।
रूष्टश्च रुपितश्चोभौ अभिव्याहृत इत्यपि ॥
हृष्टतुष्टौ तथा कान्तः दयितोन्यः संयतोद्यतौ ।
कष्टभविष्यतीत्याहुरमृताः पूर्वक स्मृताः ॥

अमृतशब्दः संप्रति वबहुत्वनिर्देशात् । सुप्तः शयितः स्थितः आसित इत्येवमादयोऽपि संप्रति बोद्धव्याः ।

उणादयो बहुलम् ॥ १६७ ॥

पूर्वः स्वावित्यतो मण्डूकप्लुत्या स्वाविति वर्तते उण् इत्येवमादयस्त्याः संप्रति स्वर्थे बहुलं भवन्ति । खुविषये क्वचित्त्यसंज्ञा भवति । कृवापाजिमिस्वदिसाध्यशूभ्य उण् । कारुः । वायुः । पायुः । जायुः । मायुः । स्वादुः । साधुः । आशुः क्वचित्त्यसंज्ञा न भवति । कृधूभ्य-

वसरः । कृसरः । धूसरः त्यसंज्ञाविरहात्यादेशयोरिति षत्वं न भवति । इह च शंखः शंठः इति इरा न भवति । क्वचिदुभयथा । वृदवदिहनिकमिकाषिभ्यः सः । वत्सम् । तर्सम् । एपम्प्रति त्यसंज्ञा षत्वं प्रति नास्ति । इह च षण्ड इति प्रकृतिकार्यं ध्वादिसत्वं न भवति । उक्तं च ।

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥

तथा अनुक्ताभ्योपि प्रकृतिभ्यस्त्या भवन्ति । अण्डः जृकुस्तृभ्य्ड्ः जरण्डः । करण्डः । सरण्डः । वरण्डः । आङिईर्तेरपीष्यते एरण्डः । अनुक्ता अपि त्या भवन्ति झफिडः ऋफण्डः इत्येवमादिषु । तथा संप्रतिकाले उणादयो विहिताः क्वचिद्भूतेऽपि दृश्यन्ते॰ कषितोऽसौ कषिः । ततोऽसौ तन्तिः । भक्षितं भस्म । चरितं चर्म्म । वृत्तं तदिति वर्त्म । तदुक्तं बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषां कार्यसशेषविधश्च तदुक्तं नैगमरूढभवं हि सुसाधु जात्यपेक्षयैकत्वं तनुदृष्टेरिति प्यखेकर्म्मणि का तनुदृष्टिं वीक्ष्य तनुदृष्टेः प्रकृतेस्तनोर्गुणस्य दर्शनादित्यर्थः । तद्बाहुलकमुक्तम् । एवं हि नैगमाः गौरित्येवमादयः रूढिभवाः पलाश इत्येवमादयः शब्दा सुसाधवो भवन्ति ।

इत्यभयनन्दिविरचितायां जैनेन्द्रमहावृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ * ॥

ॐ नमः ॥

गम्यादिर्वर्त्स्यति ॥ १ ॥

उणादयो अन्यत्र च ये साधिता गम्यादयः शब्दास्ते च वर्त्स्यति काले साधवो भवन्ति वर्त्स्यतीत्यनागतस्य कालस्य सामान्येन ग्रहणं संप्रत्त्यादिकाले तेषां साधुत्वव्यवच्छेदार्थं आरम्भः । गमिष्यति गमी ग्रामम् । आगमिष्यति आगमी नगरम् । आधमर्ण्ये चेन इति कर्म्मणि तायाः प्रतिषेधात् कर्म्मण्यावाप्ति इत्येवं भवति । एवं भविष्यति भावी । प्रस्थास्यते प्रस्थायी । प्रतिभोत्स्यते प्रतिबोधी । प्रतियोक्ष्यते प्रतियोगी । प्रयास्यति प्रयायी । गमेरिन्निति इन् । स एव आङि णिदिति णिन् । भुवश्चेति भवतेरपि णिन् । अन्येभ्यः सुपि शीले जातौ णिनिति णिन् । कथं श्वागमी ग्रामं अनद्यतने लुङिति लुङ्प्राप्तेः तदसद्यतो वर्त्स्यतीत्यनेन सामान्यशब्देनानद्यतनविशेषोप्यगृहीतो यथा गौरित्यनेन खण्डमुण्डोपि अतो वर्त्स्यतीत्यविशेषणवृत्तावप्यर्थकरणादेर्विशेषप्रतिपत्तिः । अथवा अनद्यतने लुङित्यत्र गम्यादिर्वर्त्स्यतीत्येतदनुवर्तिष्यते तेनानद्यतनविषयेपि गम्यादयः सिद्धा भवन्ति असमाद्धा अनद्यतने भवन्ति । लुङ्लृटावपि भवतो गमिष्यति गन्तेति ॥

पुरायावतोर्लट् ॥ २ ॥

पुरा च यावच्च पुरायावतौ तयोः पुरायावच्छब्दयोर्वाचोर्वर्त्स्यतिधोर्लट् भवति । पुरा भुङ्क्ते । यावदधीते । भविष्यदनद्यतने लटोऽयमपवादो लट् । लङपि लृडपवादः तत्रापवादयोः स्पर्द्धे परत्वाल्लुट् प्राप्तः पूर्वनिर्णयेन लट्

भवति । श्वः पुराऽधीते । श्वो यावदधीते । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येत्यभिधानात् । तेनेह न भवति । यावद्दास्यति तावद्भोक्ष्यते महत्या पुरो जेष्यति ॥

वा कदाकर्ह्योः ॥ ३ ॥

कदा कर्हि इत्येतयोर्वाचोर्वत्स्यतिधोर्वा लट् भवति । कदा भुङ्क्ते । कदा भोक्ष्यते । कदा भोक्ता । कर्हि भोक्ष्यते । कर्हि भोक्ता ॥

किंवृत्ते लिप्सायाम् ॥ ४ ॥

किमो वर्तनं किंवृत्तं तस्मिन् वाचि लिप्सायां गम्यमानायां वत्स्यति वा लट् भवति । लृटि लुटि च प्राप्ते अयमारम्भः लब्धुमिच्छा लिप्सा प्रार्थनाभिलाषः को भवद्भ्यो भिक्षां ददाति । को भवद्भ्यो भिक्षां दास्यति । को भवद्भ्यो भिक्षां दाता । इह कस्मान्न भवति । कदा भोजयिष्यसि भोजयितासि वा । किमो हि विभक्त्यन्तस्य डतरडतमान्तस्य च वर्तनं किंवृत्तमिति वैयाकरणानामभिप्रायः । तच्चेह नास्ति ततोऽत्र लटोभावात् लृङ्लुटावेव भवतः । लिप्सायामिति किम् । कः पाटलिपुत्रं यास्यति ।

लिप्स्यसिद्धौ ॥ ५ ॥

वत्स्यतीत्यनुवर्तते लिप्सति हि लिप्स्यो दाता ओदनादिश्च तत्र दातरि तासो लिप्स्यस्य सिद्धिः लिप्स्यसिद्धिः याचकेन हि यो लिप्स्यते दाता तस्य सिद्धौ स्वर्गादिफलप्राप्तौ ओदनादौ तु भासः । याचकेन हि यो लिप्स्यते ओदनादिना करणभूतेन सिद्धिः दातुः स्वर्गादिफलप्राप्तिः तस्यां गम्यमानायां वत्स्यति वा

लट् भवति । यो भवद्भ्यो भिक्षां ददाति दाता वा स स्वर्गलोकं गच्छति गमिष्यति गन्ता वा । दानाद्दातुः स्वर्गसिद्धिं ब्रुवाणो दातारमेवमुत्साहयति । ननु चात्र उभयत्रापि लिप्सायाः गम्यमानत्वात् किंवृत्ते लिप्सायामित्येव लट्विकल्पसिद्धेर्व्यर्थोऽयमारम्भः । न व्यर्थः किंवृत्तार्थत्वादेतदारम्भस्य । पूर्वेण हि किंवृत्ते वाचि लट्विकल्पो विहितः ।

लोडर्थलक्षणे ॥ ६ ॥

वर्त्स्यतीति वेति च वर्तते । लोडर्थः प्रैषादिः स लक्ष्यते अनेन लोडर्थलक्षणं तस्मिन् लोडर्थलक्षणे ध्वर्थे वर्तमानात् धोर्वर्त्स्यति वा लट् भवति उपाध्यायश्चेदा गमिष्यति । उपाध्यायश्चेदागन्ता । अथ त्वं तर्कमधीष्व अथ गणितमधीष्व । अत्रोपाध्यायागमनेन प्रैषो लक्ष्यते ।

लिङ् चोर्ध्वमौहूर्तिके ॥ ७ ॥

वेति वर्तते । लोडर्थलक्षण इति । ऊर्ध्वं मुहूर्ताद्भव काल ऊर्ध्वमौहूर्तिकः निपातनात्सविधिरुत्तरपदस्यैप् ऊर्ध्वमौहूर्तिके वर्त्स्यति काले लोडर्थलक्षणे वर्तमानाद्धोर्लिङ् भवति लट् वा । ऊर्ध्वं मुहूर्तादुपाध्यायश्चेदागच्छेत् उपाध्यायश्चेदागच्छति उपाध्यायश्चेदागमिष्यति उपाध्यायश्चेदागन्ता अथ त्वं तर्कमधीष्व अथ त्वं गणितमधीष्व ।

वुणतुमौ क्रियायां तदर्थायाम् ॥ ८ ॥

वर्त्स्यतीत्येव वर्तते । यस्माद्धोः त्योत्पत्तिः प्रार्थ्यते तद्वाच्यक्रिया तच्छब्देनाभिप्रेता सा क्रिया अर्थः

प्रयोजनं यस्या व्रजनादिक्रियायाः सा तदर्था तस्यां वाचि वर्त्स्यति काले वुरातुमौ भवतः । कारको व्रजति । कर्तुं व्रजति । भोजको व्रजति । भोक्तुं व्रजति । क्रियायामिति किम् । भिक्षिष्ये इत्यस्य जटाः । अध्येष्ये इत्यस्य कमण्डलुः । द्रव्यमत्र तदर्थम् । तदर्थायामिति किम् । धावतस्ते पतिष्यति दण्डः । नात्र धावनं दण्डपतनार्थम् । ननु सामान्यविहितेन एवुना सिद्धं किमर्थं वुण्विधीयते झिकृते भान्तो भवतीति भिन्नविषयत्वात्तुमपि न बाधकः क्रियायां तदर्थायां वाचि लृट् वक्ष्यते स बाधकः स्यात् वासमविधिना ण्वुर्भविष्यतीति चेत् एवं तर्हि नियमार्थं वुण्वचनं वर्त्स्यति क्रियायां तदर्थायां वाचि वुणेव यथा स्यात् तृजादयो मा भूवन् इति कर्ता व्रजति विकिरो व्रजति इत्येवमादि न भवति ॥

भाववाचिनः ॥ ९ ॥

भाववाचिनो घञादयः ते वर्त्स्यति काले क्रियायां तदर्थायां वाचि भवन्ति । यद्यपि सामान्येन विहिता घञादयस्तथापि वुराग्रहणं ज्ञापकमुक्तं सामान्यविहितास्त्याः वर्त्स्यति काले क्रियायां तदर्थायां न भवन्तीति तुमा च बाध्येरन् । तेनायं यत्नः । पाकाय व्रजति । मतये व्रजति । पुष्टये व्रजति । तुमर्थाद् भाव इत्यप् । भाव इति किम् । षणे न । वाचि ग्रहणं किमर्थम् । यकाभ्यः प्रकृतिभ्यो येन विशेषणेन त्या विहितास्ताभ्यः प्रकृतिभ्यो तेन विशेषणेन क्रियायां तदर्थायां वाचि यथा स्युरित्येवमर्थम् ॥

कर्म्मणि चाण् ॥ १० ॥

कर्म्मणि वाचि तदर्थायां च क्रियायामण् भवति । पूर्वेण वुण्प्राप्तः । वाऽसमविधिश्च नास्तीत्युक्तम् एन् स्यात् तेनायमारम्भः । कुम्भकारो व्रजति । काण्डलावो व्रजति । वाचि ग्रहणानुवृत्तेः यथाविहितमण् भवति इति कर्म्मण्येव वाचि भविष्यति । कर्म्मग्रहणं किमर्थम् अपवादविषयेऽपि यथा स्यादित्येवमर्थः । गोदायो व्रजति । तुषपायी व्रजति । क्रियायां तदर्थायामनुवर्तते । चकारः किमर्थः केवले कर्म्मणि केवलायां च क्रियायां वाचि मा भूत् । प्रत्येकमीपा निर्देशात् वाक्यः ।

लृट् ॥ ११ ॥

लट् भवति क्रियायां तदर्थायां वाचि । करिष्यामीति व्रजति । उदाहरणे इति शब्दः हेतुहेतुमद्भावद्योतनार्थः ।

शेषे ॥ १२ ॥

उक्तादन्यः शेषः शुद्धं वत्स्यत् कालमात्रं शेषे वर्त्स्यति लृट् भवति । करिष्यति । हरिष्यति ॥

विभाषा लृटः सत् ॥ १३ ॥

वर्त्स्यति लृट् तस्य स्थाने सत्संज्ञौ शतृशानौ विभाषया भवतः। पक्ष्यन्तं पश्य । पक्ष्यमानं पश्य । पक्ष्यता कृतम् हेपक्ष्यन् । हे पक्ष्यमाण । अर्जयिष्यति वसति । अध्येष्यमाण आस्ते । देवदत्तः पश्यति पक्ष्यति वा पक्ष्यमाणः पक्ष्यते वा । व्यवस्थितविभाषेयम् । तेन इवादिभियोंगे सम्बोधने लक्षणहेतोः क्रियायां बत्यत्र नित्यो विधिः। वातैकार्थत्ये विकल्पः । इतिशब्दयोगे तु न भवति ।

गतस्रोतोरोधे न खलु यतितव्यं कृतधिया
तदारम्भः श्रेयानुपरितनभीतिप्रतिभटः ॥ ६० ॥

तदत्रायुस्तावदस्माभिरभिरक्षणीयं सर्वत एवात्मानङ्गोपायेदिति हि श्रूयते ।

कामः—समयोचितमिदं समर्थ्यते लोकवृत्तवेदिना लोभेन ।

आदेयो न हि सौप्तिकप्रणिहितैरस्माभिराकस्मिकः
पातः क्रुद्धविवेकलक्षणमहापातालगर्तोदरे ।
सद्यस्संप्रति डम्भदर्पकुहनासूयादिदत्तेक्षणः
प्रत्यर्थिप्रतिरोधकर्मणि महामोहः प्रवर्तिष्यते ॥६१॥

प्रतिवहनः संमुखमागत्यनिवर्त्तकः सचासौ वातूलश्च तेन रहितः कालः नरोद्धुं शक्येत गन्तव्यमिति वारयितुं शक्यते किं नशक्यत इत्यर्थः । अथ किंकर्तव्यमित्यत आह गतेति—। कृतधिया निश्चितबुद्धिना जनेन गतस्य स्रोतसः प्रवाहस्य रोधे निरोधे यतितव्यं नखलु गतस्य स्रोतसः निरोधासंभवात् तत् तस्मात्कारणात् उपरितनायाः अप्रस्थिताः भीतेः प्रतिभटः प्रतिबन्धकः आरम्भः उद्योगः श्रेयान् श्रेष्ठः स एव कर्तव्यइत्यर्थः ॥ ६० ॥

तत् तस्मात् हेतोः अस्माभिरायुरभिरक्षणीयम् । आत्मानं शरीरं सर्वस्मात् भय स्थानात् गोपायेत् रक्षेदिति श्रुतिवचश्श्रूयते हि ।

लोकवृत्तान्तं वेत्तीति लोकवृत्तान्तवेदी तेन समयस्य कालस्योचितमिदं समर्थ्यते प्रतिपाद्यते । अतएवमेव वक्तव्यमित्याह-

आदेय इति—॥ सौप्तिके प्रणिहितैरस्माभिः क्रुद्धो यो विवेकः तल्लक्षणस्य तद्रूपस्य महतः पातालस्य गर्तोदरे श्वभ्रान्तः आकस्मिकः निर्हेतुकः पातः पतनं अस्माभिः आदेयः आदातुं योग्यः न हि । राजकृत्यसिद्धिः कथमित्याह सद्य इति—सम्प्रति प्रत्यर्थिनां प्रतिरोधकर्मणि निवारणकृत्ये डम्भदर्पकुहनासूयादिषु दत्तेक्षणः दत्तदृष्टिः महामोहः सद्यः प्रवर्तिष्यते प्रवृत्तो भविष्यति ॥ ६२ ॥

तद्वयमिदानीं भिन्नदिक्काः प्रतिष्ठेमहि आत्मार्थे पृथिवीं त्यजेदिर्तिहि वदन्तीति निष्क्रान्तास्सर्वे—

इतिकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये कामादिव्यूहभेदो नाम चतुर्थोऽङ्कः ।

श्रीमते भाष्यकाराय महादेशिकायनमः ।
श्रीमते निगमान्तमहादेशिकायनमः ॥

तत्तस्माद्धेतोः भिन्नदिक्काः भिन्नाः प्रतिनियताः दिशः येषां ते तथा प्रतिष्ठामहे प्रस्थास्यामहे । प्रस्थाने हेत्वन्तरमाह आत्मार्थइति वदन्ति मुनय इति शेषः ।

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवायनमः ।

श्रीमते निगमान्तगुरवेनमः ॥

सङ्कल्पसूर्योदये पञ्चमोऽङ्कः ।

ततः प्रविशति डम्भः कुहना च,

डम्भः—अहहारे त्वां धर्मपत्नि कुहने संबोधयामि । त्वं हि मे तारेव बृहस्पतेरहल्येव गौतमस्यास्पृष्टपुरुषान्तरा तथाविर-हात्तमा सहधर्मचारिणी ।

कुहना*—जं बह्मणेसरो भणइ, तह विलज्जामि णिद्दिट्टादो णिदंस-णादो । अरुंधई विइ वसिट्ठस्सेति वअणिज्जं घरसामिणा । जाहे अहं तक्करेहिं किदवेहिं गामणीहिं णरिंदामच्चेहिं पासंडोहिं अण्णेहिं वि तारिसेहिं पत्थिदह्मि ताहेवि ता तुमं एव्व सुमरिऊण सेवामि ।

---

* यद्ब्राह्मणेश्वरो भणति, तथापि लज्जामि निर्दिष्टाचिदर्शनात् । अरुन्धतीव वसिष्ठस्येति वचनीयं गृहस्वामिना । यदाहं तस्करैः कितवैर्ग्रामणीभिर्नरेन्द्रामात्यैः पाषण्डिभिरन्यैरपि तादृशैः प्रार्थितास्मि तदापि तान् त्वामेव स्मृत्वा सेवे ।

अत्रापि पूर्वाङ्कदर्शितैरेव दंभाद्यैः महामोहस्य विमतभङ्गप्रयतनवर्णनादङ्गास्य-मेवार्थोपक्षेपकम् । कुहना डम्भस्य पत्नी । अरेइति सम्बोधनसूचनम् । हे भो इतिवत् । त्वा त्वां सम्बोधयामि । अस्पृष्टं पुरुषान्तरं अन्यपुरुषो यया तथा मे सहधर्मचा-रिणी हि ।

यत् ब्राह्मणेश्वरो भणति तत्सत्यमिति शेषः । तस्करादीनां कुहनासम्बन्धः कादाचित्कः, डम्भस्य तु नित्यइति भावः ।

डम्भः—सान्तर्हासं, अत एव सर्वलोकपतिव्रता खल्वसि अद्य पुनरनुगतानपि मे गार्हपत्यादीन् यतःकुतश्चनानीतैरपि शुष्मभिस्समादधानया यज्ञपत्न्या त्वया नकदाचिदपि मामकमग्निहोत्रं विच्छिद्यते पर्वकालेषु चानाविष्कृतपुष्पया त्वया दर्शपूर्णमासौ च नित्यमनुवर्त्यते । निर्वर्त्यते च पिण्डपितृयज्ञादिकम् । का कथा प्रायश्चित्तस्य ।

कुहना *—संतं पाअं संतं पाअं । जाअंमि खु विच्छेए समाहाणिज्जं णाखु काहेपि अह्म घरे अग्गीणं विच्छेओ पसंगाहिं खु कुलदेवआहिं णिच्चं रक्खिज्जन्ति अह्माणं अग्गिणो । तह उप्पण्णं खु पुप्फं अणाविक्करणिज्जं पत्तोवि अ पव्वसु ताहिं एव्व कुलदेवआहिं विलम्बीअदि पुप्फसमओ ।

डम्भः—साधु कुहने साधु, अस्मत्सहधर्मचारिणी खल्वसि । बहु मन्ये त्वाम् ब्राह्मण्यप्रतिष्ठापिकां यज्ञपत्नीं परमश्रोत्रियधर्मपत्नीम् । नित्यमेव खल्वशनायोदन्याभ्यामातुरस्य मे हरिवासरेषु मृष्टमपि भोजनमनाविष्कुर्वाणया त्वया प्राप्यते द्वादशीव्रतम् प्रख्याप्यते च प्रतिगृहं साधनसंपत्तिश्रमेण ।

* शांतं पापं शांतं पापं जाते खलु विच्छेदे समाधानीयम् । न खलु कदाप्यस्मद्गृहे ऽग्नीनां विच्छेदः । प्रसन्नाभिः खलु कुलदेवताभिर्नित्यं रक्ष्यन्तेऽस्माकमग्नयः । तथा उत्पन्नं खलुपुष्पमनाविष्करणीयं प्राप्तोऽपि च पर्वसु ताभिरेव कुलदेवताभिर्विलम्ब्यते पुष्पसमयः ।

सर्वलोकपतिव्रता सर्वेषु लोकेषु पतिव्रतात्वेन प्रसिद्धा सर्वलोकपतिषु व्रतवती च अनुगतान् शान्तानपि शुष्मभिः अग्निभिः समादधानया अनाविष्कृतं अप्रकाशितं पुष्पं रजः यया तथा ज्ञातमप्यार्तवमनाविष्कुर्वाणया त्वयेत्यर्थः । एवं तेषुतेष्वेव कालेषु सर्वकर्मणां निवर्तनात् प्रायश्चित्तंकथैव नास्ति ।

शान्तं पापं । यतः कुतश्चनानीतैरपि शुष्मभिः समादधानयेति तेनोक्तम् । तदलीकवचनश्रवणजनितं पापम् शान्तमित्यभिप्रायः अस्याः पुष्पसमय इत्यन्त माकर्ण्य डम्भस्तां श्लाघते साध्वित्यादि ।

किन्तु किञ्चित् रहस्यमुपदिशामि। सन्तीदानीमन्तिमयुगभूमिकाभेदा इव केचिदवधीरितसकलधर्माः प्रव्राजितवेषभाजः प्रकटितमायाविलासाः पूर्वदेवाः। ते च रावणधनंजयन्यायेन भवतीं जिघृक्षेयुः, अतो मत्समीपं कदाचिदपि नातिवर्तेथाः। न च परमब्राह्मणं मां मुहूर्तमपि त्वदन्याः परिचरितुमर्हन्ति। अहं पुनरधुना दिव्यादिव्यसर्वभोगसार्वभौमस्य राज्ञो महामोहस्यानुचितमाचरन्तमाततायिनं विवेकमभिचरितुं देव्या दुर्मत्या प्रार्थितोऽस्मि, यथा वत्स डम्भ विश्वधर्मोपप्लावकेन त्वया विवेकः प्रध्वंसनीय इति। ततश्चाहं नित्यनिस्पृहोऽपि दाक्षिण्यपरवशतया "षट्स्वनभिचरत्यते"-दिति महर्षिभाषितं चानुवर्तमानः काममप्यलक्ष्यां देवतामाराराधयिषुरास्थितनियमोऽस्मि। तन्मे दिव्यगङ्गाजलाप्लुतलोकपालपुरोहितोपनीतानि पारिजातपुष्पफलान्युपाहर।

ब्राह्मण्यस्य प्रतिष्ठापिकां परमस्य श्रोत्रियस्य पत्नीं परम् अश्रोत्रियपत्नीं इति च नित्यमेव अशनायोदन्याभ्यां क्षुत्तृड्भ्यामातुरस्य अनाविष्कुर्वाणया मया नदत्तमिति यदन्त्या अन्तिमयुगस्य कलियुगस्य भूमिकाभेदा वर्णिकाभेदा। अवधीरिताः सकलाः धर्माः वेदोक्तधर्माः प्रव्राजितानां सन्यासिनां वेषभाजः प्रकटिताः प्रकाशिताः मायायाः वञ्चनायाः विलासाः यैस्ते तथा पूर्वदेवाः असुराः रावणो यथा भिक्षुरूपी सीतां जहार, धनञ्जयो यथा सन्यासिरूपमास्थाय सुभद्रामुपयेमे तन्न्यायेनेत्यर्थः। परममुत्तमं ब्राह्मणं परम्अब्राह्मणमिति च। त्वदन्ये त्वत्त इतरे मां परिचरितुं नार्हन्ति। अतः कदाचिदपि नातिवर्तेथाः। स्वचिकीर्षितमाह अहं पुनरिति। दिव्याश्चादिव्याश्च ये सर्वे भोगाः तेषां सार्वभौमस्य विश्वेषां धर्माणामुपप्लावकेन नाशकेन दाक्षिण्यपरवशतया दाक्षिण्याधीनतया षट्सु आततायिषु अग्निदोगरदश्चेत्यारभ्य षडेते आततायिन इत्युक्तेषु अनभिचरन् अभिचारमकुर्वन् अलक्ष्यामप्रत्यक्षामाराराधयिषुः आराधयितु मिच्छुः दिव्यगङ्गायाः मन्दाकिन्याः जले आप्लुताः स्नाताः ये लोकपालानां पुरोहिताः तैरुपनीतानि पारिजातपुष्पादीनि आदिशब्देन पल्लवसलिलादि गृह्यते॥

कुट्टनी *—हद्धि हद्धि सअलाअमसारग्गहणविसारओ विवेओ समअमप्पमुहेहिं अमच्चअणेहिं संरक्खिओ कहं अभिआरिज्जइ । तारिसेसु पउत्तो अभिआरो कत्तुणो एव्व बाहं आवहइत्ति सुणीअइ ।

दम्भः—अयि मुग्धब्राह्मणि अविचारितास्मद्विभवा किं भाषसे ।

विद्याश्चतुष्कसहिता विदिता द्विसप्त
क्षिप्रं चतुर्गुणितचन्द्रकलाः कलाश्च ।
काले च साधुविहिताः क्रतवस्सहस्रं
धर्मध्वजाश्च भुवनेषु मया निबद्धाः ॥ १ ॥

अयि परमधार्मिक सहधर्मचारिणि आस्तामिदं तावद्विद्यावाद माहात्म्यं निस्पृहत्वमपि निपुणमवधारय ।

* हा धिक् हा धिक् । सकलागमसारग्रहणविशारदो विवेकः शमदमप्रमुखै रमात्यजनैस्संरक्षितः कथमभिचर्यते तादृशेषु प्रयुक्तोऽभिचारः कर्तुरेव बाधामावहतीति श्रूयते ।

कर्तुरेव बाधामावहतीति श्रूयते । श्रुतिश्च "प्रत्यगेनमभिचारस्तृणुते" इति । मुग्धब्राह्मणि मूढब्राह्मणि । अविचारितमस्माकं वैभवं यया सा तथा ।

विद्येति-॥ चतुष्कं विद्यानां चतुष्टयं तेन सहिताः द्विसप्त चतुर्दश विद्या मया विदिताः । चतुर्दशविद्याः

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इत्युक्ताः । विद्याचतुष्कं तु

आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव च ।
अर्थशास्त्रं परं तस्मादित्युक्तम् ।

अतो विद्या अष्टादश चतुर्गुणितचन्द्रकलाः षोडशश्च चतुर्गुणिताश्चेत् चतुष्षष्टिर्भवन्ति । ताश्च मयाविदिताः काले शास्त्रोक्तकाले धर्मध्वजः अयं धार्मिक इति धर्मसूचकोध्वजश्च निबद्धः ॥ १ ॥

निर्जित्य क्षितिमण्डलं भृगुपतिर्मह्यं प्रदातुं पुनः
प्रह्वः प्रार्थयत न्यषेधि च मया विश्वं तृणीकुर्वता ।
अस्मद्वैभवदृष्टिसंभृतचमत्कारैरमर्त्येश्वरैः
दत्तौ धिक्कृतवानहं शमधनः स्वर्गापवर्गावपि ॥ २॥

कुहना*—सविमर्शं एवं णाम महप्पहावाणं तुह्माणं विवेआहिआरो किं सेणो अण्णारिसो वा जोवि कोवि जत्थ॰अहं सह॰धम्मेआरिणी होम्मि ।

दम्भः—अयि महाश्रोत्रियधर्मपत्नि महानुभावानामस्मदन्तेवासिनामत्यन्तरहस्यमिदमावेदयामि । सखीभ्यस्तृणादिभ्योऽपि नैतद् ब्रूयाः । न खलु श्येनादिवद्विशेषतो विहितोऽयमभिचारः ।

किन्तु

ये तु धर्मतयाधीतास्ते सर्वे मत्परिग्रहात् ।
अविशेषेण गच्छन्ति विवेकस्याभिचारताम् ॥ ३ ॥

---

* एवं नाम महाप्रभावाणां युष्माकं विवेकाभिचारः किं श्येनः अन्यादृशो वा योऽपि कोऽपि यत्राहं सहधर्मचारिणी भवामि ।

विद्याचारमाहात्म्यं विद्यया महात्म्यं आचारेण माहात्म्यं च । निस्पृहत्वमाह

निर्जित्येति—॥ भृगुपतिः जामदग्न्यः क्षितिमण्डलं निर्जित्य पुनर्मह्यं प्रदातुं प्रह्वस्सन् प्रार्थयत विश्वं तृणीकुर्वता मया न्यषेधि च । अस्माकं वैभवस्य दृष्ट्या संभृतः संपादितः चमत्कारो येषां तैः अमर्त्येश्वरैः ब्रह्मविष्णुरुद्रैः दत्तौ स्वर्गापवर्गावपि शमः शान्तिर्धनं यस्य स तथा अहं धिक्कृतवान् निरस्तवान् ॥ २ ॥

महान् अनुभावः उत्कर्षः येषां तेषामस्माकं अन्तेवासिनां शिष्याणामपि अत्यन्तरहस्यम् । श्येनादिवत् आदिशब्दः सर्पादीनां ग्राहकः । विशेषतः विशेषेण श्येनः सर्प इत्यादिवच्च विहितोऽयमभिचारः ।

किन्त्विति तेभ्यो विशेषं द्योतयति ।

ये त्विति—॥ धर्मतया प्रवृत्तिधर्मतया निवृत्तिधर्मतया वा ये ऽधीताः शास्त्रेणेति शेषः । ते सर्वे मत्परिग्रहात् मया परिग्रहात् अविशेषेणायमभिचारः अयं तु नेति विशेषाभावेन विवेकस्याभिचारतां गच्छन्ति । प्रवृत्तिनिवृत्तिरूपाः सर्वेऽपि धर्माः दम्भायत्ताश्चेत् विवेकनाश इति भावः ॥ ३ ॥

कुहना*—सुट्ठु चिन्तिअं को उण इमस्सि परपीडणजण्णे तुम्हाणं उवदेसं कुणज्ज ।

दम्भः—अहह अयि मुग्धे सर्वज्ञस्य मे किमन्येनोपदेष्ट्रा । सर्वेऽपि हि पण्डितंमन्या मामेवाश्रित्य संशयं प्रशमयन्ति । अथापि मयेदानीं साक्षिमात्रतया स्थापितः कश्चिदुत्कृष्टसर्वजनतिरस्कारको गर्वो नाम सर्वजनहृदयसंवादी महामोहसमयमहोपाध्यायः । तस्य चेदानीमागमनं प्रतीक्ष्यास्मिन् सिद्धाश्रमे नवकृत्वः पुण्याहपूते संभृतसंभारैस्सप्तर्षिभिः प्रदिष्टां वृसीमधितिष्ठामि ।

कुहना†—जुत्तं आअरिअं कज्जसिद्धि अ तुम्ह करगआ होज्ज ।

दम्भः—निमित्तं सूचयन् अस्मत्कुलधर्मपालिनि कुहने स्पन्दते मम दक्षिणं चक्षुः । अद्यैव च सुहृत्समागमस्सम्पत्स्यते (पुरस्तादवलोक्य) कः खल्वसौ ज्वलत्प्रभाकञ्चुकितदुर्निरीक्षमूर्तिर्महात्मा मध्यम लोकमवतीर्यास्मदाश्रमाभिमुखमागच्छति ।

---

* सुष्ठु चिन्तितं कः पुनरस्मिन् परपीडनयज्ञे युष्माकमुपदेशं कुर्यात् ।

† युक्तमाचरितं कार्यसिद्धिश्चयुष्माकं करगता भूयात् ।

अन्येनोपदेष्ट्रा किं नकिंचिदप्युपदेष्टव्यमित्यर्थः । तदेव विशदयति सर्वेपीति ॥ अथापि साक्षिमात्रतया साक्षाद्द्रष्टृमात्रत्वेन स्थापितः उत्कृष्टजनानां तिरस्कारकः अवमन्ताखर्वाणां जनानां हृदयेन संवादो समानवादः सकलजनहृदयवेद्य इति यावत् । नवकृत्वः पुण्याहपूत इति शुद्ध्यतिशयद्योतनम् । सप्तर्षिभिः प्रदिष्टां दत्तां वृसीं नयनमपि तैरेव कार्यं नान्यैः इति व्यज्यते ।

अस्मिन्नवसरे गर्वस्समागतः । दम्भस्य दक्षिणनयनस्फुरणं जातम् । तदेवाह-निमित्तं शुभनिमित्तं सूचयन्निति अभिनयन्नित्यर्थः । स्पन्दते चलति अस्य किं फलमित्यत्राह—अद्यैवेति—॥ ज्वलन्त्या प्रभया कञ्चुकिता आवृता अत एव दुर्निरीक्षा निरीक्षितु मशक्या मूर्तिर्यस्य स तथा । अस्माकमाश्रमस्याभिमुखं संमुखमागच्छति अशोकः ।

इति स्मृत्युक्तप्रक्रियया यज्ञाच्छ्रोत्रियेण यथाशास्त्रं निर्वर्तितात्पर्जन्य वृष्टिर्भवति पर्जन्याद्व्रीहियवादिरूपस्यान्नस्य सम्भव उत्पत्तिर्भवति अन्नात् स्त्रीपुंसाभ्यां भुक्ताच्छुक्रशोणितरूपेण परिणताद्भूतानि प्राणिनो भवन्ति जायन्ते जातान्यन्नेनैव जीवन्ति अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते जातान्यन्नेनैव जीवन्तीत्यादिश्रुतेः। एवं वृष्ट्यन्नद्वारा जगज्जीवनहेतुर्यो यज्ञः स तु कस्माद्भवति तत्राह यज्ञः कर्मसमुद्भवः ऋत्विग्यजमानादिभिः क्रियमाणहोममन्त्रादिक्रिया वैदिकी कर्मेत्युच्यते तस्मात्सम्यगुद्भवो यस्य स कर्मसमुद्भवो पूर्वलक्षणो यज्ञः यज्ञकारणभूतं यत्कर्म तत्तु ब्रह्मोद्भवं ब्रह्म वेदऋगादिस्तस्मादुत्पन्नं विद्धि तच्च ब्रह्माक्षरसमुद्भवं विद्धि यथार्द्रेन्धाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इति श्रवणात्सर्वजगत्कारणभूतादक्षरात्परमात्मनः सकाशान्निश्वासरूपेण स्वयमेवाविर्भूतमतएव नित्यमपौरुषं ब्रह्म वेदं विजानीहीत्यर्थः यस्माद्यज्ञैकमूला जगदुत्पत्तिः स्थितिश्च तस्मात्स्वयं सर्वगतं सर्वार्थप्रकाशकत्वेन सर्वलोकस्थानां तत्तद्धर्मनियतिस्थापकत्वेन च सर्वत्र स्थितमपि ब्रह्म वेदो यज्ञे ब्राह्मणादिभिरनुष्ठापितव्ये औपासनाद्यश्वमेधान्ते कर्मण्येव तद्विधानैकप्रयोजनत्वात्प्रतिष्ठितं नित्यं नियमेन स्थितं भवति वर्णाश्रमिणां कर्तव्यत्वेन कर्माणि वेदएव विदधातीत्यर्थः । ईश्वरः श्रुतिमुखेन यज्ञसन्ततिं विधाय यज्ञद्वारा वृष्टिञ्चान्नञ्च सम्भाव्य भूतसृष्टिं तात्स्थितिञ्च निर्वोढुमिच्छया स्वयमेवं चक्रं प्रवर्तितवान् तदिदमीश्वरप्रवर्तितं चक्रं नियतमिह लोके यः कर्माधिकारी ब्राह्मणादिर्नानुवर्तयति परमेश्वरेण श्रुत्या विधापितं कर्मयोगं नानुतिष्ठति एतदीश्वरशासनमकृत्वा स्वयमिन्द्रियाराम इन्द्रियार्थेष्ववाजस्रमारमतीतीन्द्रियारामो विषयभोगलम्पटः सन्नतएवाघायुरायुषः फलमघमेव यस्य सोघाऽयुर्भूत्वा काकवच्छागलिवन्मोघं व्यर्थं निष्फलमेव जीवति नैतावन्मात्रमेव भवति किन्त्वीश्वराज्ञोल्लङ्घनदोषेण विहिताकरणप्रत्यवायेन नित्यकृतपापसङ्घातेन चानेककल्पं नरकञ्चाधिगच्छतीत्यर्थः। ततो विवेकिनो ब्राह्मणादेर्मुमुक्षोरनात्मज्ञस्य संसारतरणार्थं लोकहितार्थं चावश्यं वेदोक्तं कर्म कर्तव्यमेवेति सिद्धमित्याहुः ॥ १६ ॥

अत्र भगवान्वासुदेवो ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनामिति साङ्ख्यानां संन्यासिनामसाङ्ख्यानां योगिनां गृहीणां चोत्तरदक्षिणायनवदसङ्कीर्णं निष्ठाद्वयं विभज्य दर्शयित्वा तदेकं वद निश्चित्येति

स्वकर्त्तव्यं पृष्टवतोऽर्जुनस्य कर्माधिकारिणः सन्निहितत्वात्तद्धितमुपदेष्टुं च कर्मणामनारम्भादिति कर्मयोगमुपक्रम्य नियतं कुरु कर्म त्वमित्यस्मै कर्मयोगमेवोपदिश्य यज्ञार्थादित्यारभ्य मोघं पार्थ स जीवतीत्यन्तेन ग्रन्थेनात्मज्ञस्य मुमुक्षोः सत्त्वशुद्ध्यर्थं कर्म कर्तव्यमेव कृते च कर्मणि देवताप्रसाद ईश्वरप्रसादश्च सिद्ध्यतीति सूचयितुं कर्मणः कर्तव्यत्वमेव बहुप्रकारेण निश्चित्येदानीं साङ्ख्यस्य यतेर्ज्ञानयोगनिष्ठां विना नान्यत्कथञ्चिदपीषत्कर्तव्यमस्तीति सूचयितुमाह—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।

आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

य इति । तुशब्दोऽनात्मरतिव्यावृत्त्यर्थः यस्तु मानवः बहिरन्तश्च सर्वत्र ब्रह्मैव मापयति ग्राहयतीति मानं प्रत्यग्दर्शनं तदेव सर्वदा वाति भजतीति मानवो ब्रह्मविद्यतिरात्मरतिः अहं ब्रह्मास्मीतिश्रुत्युक्तरीत्या स्वात्मना साक्षात्कृते नित्यानन्दैकरसेऽद्वितीये परे ब्रह्मण्येव रतिरन्तःकरणं क्रीडा सर्वदा विहारो यस्य स आत्मरतिरेव भवेत् आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द इति श्रवणाद्यो ब्रह्मवित् सर्वदात्मन्येव विहरति न क्वचिदप्यनात्मनीत्यर्थः किञ्चात्मतृप्तश्च आत्मनैवानन्दैकरसेन पूर्णेन स्वीकृत्याधिगतेन तृप्तः आत्मलाभान्न परं विद्यत इति स्मरणादतः प्राप्तव्यान्तराभावादात्मप्राप्त्यैव सर्वत्र प्राप्तालम्बुद्धिर्यस्य स आत्मतृप्तश्च भवेत् आत्मन्येव चक्षुषा रूपवद्बहिरन्तस्सर्वत्र वृत्तेर्विषयभूते चिदानन्दैकरसे ब्रह्मण्येव सन्तुष्टः यथा कामी इष्टार्थे सन्तुष्टो भवति तथा य आत्मन्येव सन्तुष्टश्च स्यात् तस्य महात्मन आत्मारामस्य कृतकृत्यस्य यतेः कार्यं कर्त्तव्यं कर्म न विद्यते नास्ति पर्याप्तकामत्वेन प्राप्तव्याभावादित्यर्थः । नन्वधिकृतत्वाविशेषाद्विदुषोऽपि कर्तव्यमेव कर्म कर्मविधेः सर्वसामान्यात्कर्मशास्त्रतदर्थतन्नियमपरिज्ञातृत्वाद्विदुषः विद्वान्यजत इति विशेषविधानाच्च विधिबलाद्विदुषाऽप्यवश्यं कर्म कर्तव्यमेवेति चेद्भवानत्र प्रष्टव्यः परावरैकत्वविज्ञानवन्हिनिर्मूलितद्वैतभ्रमस्य सर्वं ब्रह्मेत्र पश्यतो जीवन्मुक्तस्य ब्रह्मविदः कर्मकरणं स्वार्थं वा किं परार्थं वा? आद्ये कर्मैहिकार्थं वा किमामुष्मिकार्थं वा ? आद्ये शरीरक्षार्थं वा किं परिग्रहरक्षार्थं वाप्युत विलासार्थं वा नाद्यः सिद्धेन्यथार्थे न यतेत तत्र परिश्रमं यत्र समीक्षमाण इति वचनाच्छरी·

रीस्थतेः प्रारब्धाधीनत्वात्तदुद्दिश्य विदुषः कर्मानुपपत्तेः न द्वितीयः एव वै तमात्मानं विदित्वेति श्रुतेः निःशेषनिवृत्तमिथ्याज्ञानानां ब्रह्मविदां पुत्राद्येषणाभ्यो व्युत्थानश्रवणात्ताभ्य उत्थितवतो विदुषः परिग्रहाभावात्तद्रक्षानिमित्तककर्मानुपपत्तेर्न तृतीयः सर्वमात्मानमेव पश्यत आत्मरतेर्विदुषोऽन्यत्र रत्यप्रसक्तौ विलासासम्भवात्तर्ह्यामुष्मिकार्थमस्त्विति चेत्तत्रापि किं स्वर्गार्थं वा किमपवर्गार्थं वा किमात्मशुद्ध्यर्थं वा? नाद्यः पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ते कामा इति सर्वकामप्रविलयश्रवणाद्विदुषः स्वर्गकामासम्भवात्तदर्थककर्मानुष्ठानानुपपत्तेः न द्वितीयः न कर्मणा न प्रजयेति श्रुत्या कर्मणो मोक्षसाधनत्वनिषेधाज्जीवन्मुक्तत्वाच्च विदुषस्तदर्थकर्मासिद्धेः तृतीयेऽपि किं शरीरशुद्ध्यर्थं वा किं चित्तशुद्ध्यर्थं वा किमात्मशुद्ध्यर्थं वा कर्म कर्तव्यं? नाद्यः कलेवरं मूत्रपुरीषभाजनमिति स्मरणात्प्रत्यक्षत्वाच्च मलमांसास्थिमतो वपुषः कर्मणा शुद्ध्यसम्भवान्न द्वितीयः यतयः शुद्धसत्वा इति श्रवणाच्छुद्धचित्तत्वादेव सम्यगुत्पन्नात्मज्ञानत्वाद्विदुषस्तच्छुद्धये ज्ञासिद्धेः न तृतीयः अस्ताविषं शुद्धमपापविद्धमिति स्वतः शुद्धत्वश्रवणान्निरवयवत्वेन कर्माविषयत्वाच्चात्मनस्तेन शुद्धिकल्पनायोगात् यज्ज्ञानबलेन विष्णुरुद्रादयोऽकार्यशतकोटिमपि कृत्वा स्वयं शुद्ध्यन्ति अन्यानपि च शोधयन्ति तमात्मानं कः केन शोधयेत् स्वतएव सतः शुद्धिर्नासता येन केनचिदित्यात्मनः स्वतएव शुद्धत्वात्तदर्थककर्मासम्भवात्। तर्हि विदुषः कर्माचरणं परार्थमेवास्त्विति चेत्त्वमत्र प्रष्टव्यः लोकार्थं यः करोति स किमपरोक्षज्ञानी उत परोक्षज्ञानी वेति आद्ये स यतिर्वा गृहस्थो वा नाद्यस्तस्य निरभिमानत्वात्संन्यस्तसर्वकर्मतत्साधनत्वाच्च कर्मशब्दाप्रसक्तेः देहवर्णाश्रमादिष्वहं ममेत्यभिमानः प्रपञ्चसत्यत्वबुद्धिरर्थित्वं कर्तव्यताबुद्धिः अकरणे प्रत्यवायभयं शास्त्रभयं च खलु प्रवृत्तेर्बीजं तदेतत्सर्वमपि समूलं परावरैकत्वविज्ञानमहाग्निना निर्दह्य स्वयं निष्क्रियब्रह्मात्मना तिष्ठतीति निर्दग्धानात्मतादात्म्यग्रन्थेस्सर्वात्मभावापन्नस्य स्वात्मारामस्य यतेरतिवदनमेव न सम्भवति किमुत कर्मणि प्रवृत्तिरिति तथाच श्रुतिः प्राणो ह्येष सर्वभूतैर्विभाति जानन्विद्वान्भवते नातिवादीति। ततो ब्रह्मनिष्ठस्यात्मरतेः स्वार्थं वा परार्थं वा कर्मणि प्रवृत्तिर्न सम्भवति नापि द्वितीयः जन्मानेकसहस्रकृतपुण्यपुञ्जपरिपाकेनेश्वरप्रसादेन च सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं ब्रह्मैवाहमिति ब्रह्मात्मैकत्वविज्ञानमप्रतिबद्धं यदा समुत्पन्नं स्यात्तदैव गृहस्थोऽपि याज्ञवल्क्या-

दिवेदषणाभ्योप्युत्थास्यति नत्वहं ममेति संसर्तुमर्हति तत्कारणासम्भवात्सं-
सारकारणं खल्वनात्मनि देहादावहम्भावस्तदन्यत्र मम भावश्च तदेतद्द्वयं य-
स्य ब्रह्मात्मैकत्वविज्ञानेन विध्वस्तं न स पुनः संसाराय कल्पते न हि ब्रह्मैवाह-
मिति विज्ञानं ब्राह्मणोऽहं ममेदमिति बुद्धिश्च तेजास्तिमिरवत्परस्परविरुद्धमे-
कत्र वस्तुं शक्नोति ततो ब्रह्मतत्वविज्ञानखड्गनिर्भिन्नहृदयग्रन्थेर्विदुषः पुनः
संसरणं न सम्भवत्यतः संसाराद्व्युत्तिष्ठत्येव गृह्यपि विद्वान् यदि न व्युत्तिष्ठत
तदव्युत्थानमेव ज्ञापयत्यज्ञानतत्कार्यनिगृहीतत्त्वं विदुषः। ननु तद्धेतुकप्रा-
रब्धाभावाद् गृही ब्रह्मभावापन्नोपि नोत्तिष्ठतीति चेज्जडभरतवद्वसेत् न
त्वहं ममेदमिति संसरति मिथ्यात्वज्ञानस्य संसारविरोधित्वान्न हि मरुं
निर्जलं दृष्ट्वा पुनर्दूरात्प्रतीयमानं जलमादातुं पातुं वा विवेकी गच्छति स्वयं
बलवता प्रेष्यमाणोऽपि वेगेन हर्षेण च न पूर्ववद्गच्छति किन्तु हा कष्ट-
मिति रुदन्मन्दं गच्छति नाप्यन्यं चोदयति तद्वत्प्रतिकूलप्रारब्धवानपि
विद्वान् तत्सर्वमिथ्यात्वदर्शी संसर्तुं न हृष्यति नाऽन्यं प्रेषयति च किन्तु
भग्नकटिसर्पवन्मन्दगतिर्भविष्यति प्रवृत्तिहेतोरनात्मन्यहम्भावस्याभावात् ब्र-
ह्मैवाहमिति ब्रह्मात्मना ब्रह्मण्येव तिष्ठतो ब्रह्मविदो ब्राह्मणस्य चण्डालमिव
तनुं स्पृष्टुं न रोचते देहादितादात्म्यं विनाऽहं ममेति व्यवहर्तुं च न शक्यते
ब्रह्मविदां देहादितादात्म्यमतीवदुःखं तत्तादात्म्येनाहं ममेति प्रवृत्तिः ततोऽ-
तिदुःखं तत्रापि कर्मकरणमत्यन्तदुःखमेवेति विज्ञाय ग्रहस्थोऽपि विद्वान्
सर्वं संन्यस्यत्येव न स्वार्थं न परार्थं वा कर्म कर्तुं शक्नोत्यतः परोक्षज्ञा-
न्येव चतुर्थाध्याये चात्र च वक्ष्यमाणरीत्या लोकसङ्ग्रहं करिष्यतीति न
क्वचिदप्यपरोक्षज्ञानी निःशेषविनष्टानात्माहम्भावः। ननु—

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥
नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।

इत्यादिवाक्यार्थपर्यालोचनया त्वपरोक्षज्ञानिनोपि लोकसङ्ग्रहार्थं कर्म
कर्तव्यमेवेति प्रतीयते कथं परोक्षज्ञान्येव लोकसङ्ग्रहं करिष्यतीति नियमः क्रि-
यते विशुद्धात्मत्वादिविशेषणजातं कथं परोक्षज्ञानिनस्सिद्ध्योर्द्विना ब्रह्मविदं
ब्रह्मनिष्ठं मुनिरिति तत्त्वविदिति ब्रह्मविल्लिङ्गदर्शनात्ततोऽपरोक्षज्ञानिनोऽपि
लोकसङ्ग्रहार्थं कर्म कर्तव्यमेवेति चेत्सत्यं विशुद्धात्मत्वादिविशेषणजात-
मितरस्माद्ब्रह्मविदं व्यावर्त्तयति तदिदं मुक्तिकृतलक्षणं जन्मशतकोट्याप्य-
न्येषामलभ्यं तथाप्यत्र त्वं प्रष्टव्यः अपरोक्षज्ञानी द्विविधस्सिद्धः साधक-

श्चेति तयोः किं सिद्धस्योच्यते उत साधकस्य वा लोकसङ्ग्रह इति नाद्यः मुक्तत्वात्तस्य लोकसङ्ग्रहानुपपत्तेः सर्वमिदमहं च ब्रह्मैवेति नित्यानिरन्तरब्रह्मनिष्ठया निशितकृतपरावरैकत्वविज्ञानखड्गेन द्वैतभ्रमबन्धं विच्छिद्य ब्रह्मादिस्तम्बपर्यन्तैः सह सर्वप्राणिभिः स्वं मुक्तं पश्यतो ब्रह्मविद्यतेस्तद्दृष्ट्या बद्धलोकाभावात्तत्सङ्ग्रहासम्भवाद्यथा देवदत्तस्सर्वेभ्यः पूर्वं स्वयं भुङ्क्त्वा स्वमेव भुक्तवन्तं पश्यति नान्यं यथा वा यज्ञदत्तः स्वयं पूर्वं प्रतिबुद्ध्य स्वमेव प्रतिबुद्धं पश्यति न तथा विद्वानात्मानमेव मुक्तं पश्यति किन्तु स्वविज्ञानेन स्वं च सर्वं च प्राणिजातं मुक्तमेव पश्यति यथा बुद्धिमान् स्वस्य चेतनत्वधर्मवैशिष्ट्यविज्ञानेन ब्रह्माण्डस्थं प्राणिजातं सर्वं चेतनत्वधर्मविशिष्टमेव विजानाति यथा वा पाचकः स्थालीपुलाकस्यैकस्य पक्वताज्ञानेन सर्वस्याप्यन्यस्य पक्वतां विजानाति तथा ब्रह्मविद्यतिः स्वमुक्त्या सर्वान्मुक्तानेव विजानाति नतु स्वमात्रं यस्तु स्वमात्रमेव मुक्तं पश्यति नत्वन्यं न स ब्रह्मविदेव भवति नापि च मुक्तः किन्तु स वाचा मुक्तः न त्वविद्याबन्धाद्यथा विवेकी सूक्ष्मबुद्ध्या तरङ्गफेनबुद्बुदाद्यम्मयं सर्वं जलमात्रं पश्यति यथा कटकमुकुटादि हैमं सर्वं हेममात्रं पश्यति यथा वा रज्जुसर्प रज्जुमात्रं पश्यति तथा यस्तु प्रत्यक्दृष्ट्या स्वं च जगत्सर्वं च ब्रह्ममात्रं पश्यति स एव ब्रह्मविदद्वैतदर्श्यविद्याबन्धविमुक्तश्च तस्यैतस्याद्वैतदर्शिनो महात्मनः सिद्धस्य सुप्तोत्थितवत्स्वातिरिक्तमपश्यतः पूर्णवृत्तेर्ब्रह्मविद्वरिष्ठस्य लोकविधिविधानाविधेयादेरभावात्तदुद्देशेन कर्माणि प्रवृत्तिर्न सम्भवति । कुर्वन्नपि न लिप्यत इति प्रवृत्तिद्योतकं वाक्यं विद्यते तत्कथमिति चेत्तदर्थं श्लोकव्याख्यानावसरे वक्ष्यामः । विद्वान्यजत इत्यत्र विदितवेदार्थो ब्राह्मणो विद्वच्छब्दार्थो न तु ब्रह्मविद्यतिस्तस्य सर्वकर्मसंन्यासित्वाद्विधेरपि लोकवन्मिथ्यात्वकोटयन्तःपातित्वाच्च कर्मविध्यनुपपत्तेर्न द्वितीयः साधकस्य मुमुक्षोर्यतेः कर्मविद्ध्यदर्शनान्न हि मुमुक्षोर्यतेर्निदिध्यासोर्लोकसङ्ग्रहार्थं कर्म कर्तव्यमितिविधिरस्ति विना समाधिं तमेव धीरो विज्ञाय प्रज्ञामिति परं ब्रह्मानुसन्दध्यादिति यच्छेद्वाङ्मनसी प्राज्ञ इति ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति ज्ञाननिष्ठैव कर्तव्यत्वेन श्रूयते स्मर्यते च मनस्संयम्य मच्चित्त इति ध्यानयोगपरो नित्यमिति वाचं यच्छ मनो यच्छेति चातस्साधकस्यात्मवेदिनो यतेः कर्तव्यः समाधिरेव न श्रौतं न स्मार्तञ्च स्वार्थं परार्थं वा शौचमाचमनं स्नानं न तु चोदनया चरे-

दिति ज्ञाननिष्ठस्य विद्ध्यभावस्मरणात् एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति श्रुत्या जिज्ञासया संन्यस्तसर्वकर्मणो यतेर्विविदिषोरेव जिज्ञासाया सम्प्रवृत्तो नाद्रियेत्कर्मचोदनामिति श्रवणादिज्ञानसाधनं विना नान्यत्कर्तव्यमिति कर्मविधेरुपेक्ष्यत्वस्मरणात्किमुत सिद्धस्य विज्ञातात्मतत्त्वस्य साधकस्य कर्मतन्त्रानवकाश इत्यतः परोक्षज्ञान्येव बहुधा कृतश्रवण आभासात्मज्ञान्यहं ममादिबाह्यवासनाबद्धलोकसङ्ग्रहवचनस्य विषयः। अथवा लोकानुग्रहार्थं ब्रह्मणा सृष्टाः महान्तो व्यासागस्त्यपराशरवसिष्ठादयस्तत्सदृशा वा अन्ये अधिकारिकाः निग्रहानुग्रहक्षमास्ते वा भवेयुर्लोकसङ्ग्रहवचनस्य विषयाः न तु सिद्धो नापि साधको मुमुक्षुर्यतिस्ततएवोच्यते भगवता सर्वज्ञेन तस्य कार्यं न विद्यते इति ॥ १७ ॥

ननु ब्रह्मेन्द्रादिभिस्तत्पदं लब्ध्वा यत्सुखं प्राप्तं तत्कर्म जन्यमेव ततः सर्वत्र सुखस्य कर्मसाध्यत्वाद्ब्रह्मविदोपि सुखार्थित्वाच्च तस्य निरन्तरसुखसिद्ध्यै कर्म यत्किञ्चित्कर्तव्यमेवेत्याशङ्क्यानन्दो ब्रह्मेति विज्ञानमानन्दं ब्रह्मेति ब्रह्मण आनन्दैकरूपत्वश्रवणान्निरन्तरब्रह्मनिष्ठया तद्भावापन्नस्याखण्डानन्दस्वरूपेणैव तिष्ठतोऽस्य निरन्तरब्रह्मानन्दरसानुभूतेरनवच्छिन्नत्वात् क्रियाजन्यसुखस्यानित्यत्वात्तदनपेक्षिणो ब्रह्मविदः कर्मसाध्योऽर्थस्तदभावेऽनर्थो वा न कश्चिदस्तीत्याह—

नैव तस्य कृते नार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

नैवेति। तस्याहमेवेदं सर्वमिति सर्वमात्मानमेवाद्वितीयं पश्यत आत्मारामस्यात्मानन्दस्य यतेः सिद्धस्य कृतेनानुष्ठितेन कर्मणा प्राप्तव्योऽर्थः कश्चिदपि नैवास्ति आत्मतृप्तत्वात् सर्वमिथ्यात्वदर्शित्वाच्च योगक्रियया प्राप्तव्याकाशगमनाद्यणिमादिसिद्धिर्नापेक्ष्यते सर्वात्मभावापन्नत्वात्तपःक्रियया प्राप्तव्यब्रह्मेन्द्रादिपदापेक्षा च न सम्भवति जीवन्मुक्तत्वाद्वैदिकक्रियया प्राप्तव्यचित्तशुद्धिद्वारकमोक्षापेक्षापि नास्त्यतो ब्रह्मवित्तमस्य कर्मणा साधनीयोऽर्थः कश्चिदपि नास्त्येवेत्यर्थः। नन्वेतस्य कर्मप्राप्तव्येष्टार्थाभावेपि विध्युल्लङ्घनदोषो वाप्यकरणे प्रत्यवायदोषो वा स्यात्तेन ज्ञानहानिर्वा स्वरूपहानिर्वा प्रसज्येतेत्याशङ्कायामाह नाकृतेनेति। उक्तलक्षणस्य ब्रह्मविदस्त्वकृतेन विहितानाचरणेनानर्थ उक्तः कश्चनेहलोके न सम्भवति मायामात्रमिदं द्वैतमितिन्यायेन विधेरप्यविद्यक-

त्वेन मिथ्यात्वाद्विदुषस्तदुल्लङ्घने दोषाभावः उभे ह्येवैष ते आत्मानं स्पृणुत इतिश्रुतेरकर्मणापि ब्रह्ममात्रत्वदर्शनेन स्वतःसत्ताभावादकर्मापि दोषाय न कल्पते निरन्तरब्रह्मनिष्ठयैव तिष्ठता विदुषस्तेन ज्ञानहानिर्न सम्भवति एष नित्यो महिमा ब्राह्मणस्येति ब्रह्मवित्स्वरूपस्य कर्माकर्माभ्यां वृद्धिक्षयाभावश्रयणाद्ब्रह्मविदोऽकर्मणा स्वरूपहानिश्च न भवति तस्मादकृतेनास्य न कश्चिदप्यनर्थ इत्यर्थः। नन्वस्य मुक्तिप्रतिबन्धकनिवृत्त्यर्थं वाऽप्याध्यात्मिकाद्युपद्रवनिवृत्त्यर्थं वाऽप्युपास्तिक्रियया शिवो वा विष्णुर्वान्यो वा व्यपाश्रयणीयो भवति अथवा शरीरयात्रार्थं ब्राह्मणो वा क्षत्रियो वाप्यनुसृत्याश्रयणीयो भवत्यतो विदुषः सर्वदा कर्मत्यागो न युज्यत एवेत्याशङ्कायामाह न चेति। अस्योक्तलक्षणस्य ब्रह्मवित्तमस्य देवेषु शिवो वा विष्णुर्वा भूतेषु ब्राह्मणो वाऽन्यो वा कश्चिदपि यत्किञ्चित्कार्यमुक्तलक्षणमुद्दिश्य क्रियया व्यपाश्रय आश्रयणीयः कश्चिदपि नास्ति इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मन इति वचनादिहैवास्मिन्नेव शरीरे नित्यनिरन्तरब्रह्मनिष्ठया भाविशरीरप्रापकमज्ञानं तत्कार्यसञ्चितादिसर्वकर्मजातं च विनिर्मूल्य स्वयं शरीरसम्बन्धरहितत्वेनैव सदा स्थितत्वाद्ब्रह्मविदोत्रैव मुक्तस्येतो मुक्तिप्रतिबन्धकासम्भवान्मिथ्यात्वकोट्यन्तःपातित्वाच्च शिवविष्ण्वादिराराध्यो न भवति आध्यात्मिकाद्युपद्रवस्य शरीरत्राणस्य च प्रारब्धाधीनत्वात्पुम्प्रयत्नस्य वैयर्थ्यदर्शनाच्च न कोपि ब्राह्मणादिराश्रयणीय एवातो ब्रह्मविद्वर्यस्य क्वचिदपि यत्किञ्चिदपि कर्म न कर्त्तव्यमेव कृतं चेत्स ब्रह्मविदेव न भवति तथाच स्मृतिः—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्ववित्॥ इति।

अत्र श्रुतिरपि तदेतदृचाभ्युक्तं एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् तस्यैव स्यात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति। तदेतत्प्रमेयं ऋचा ऋग्वेदेन भ्युक्तमभितो निरूपितमस्ति तत्किं ब्राह्मणस्य ब्रह्मज्ञस्य पुरुषस्य एष नित्यो महिमा शाश्वतं सामर्थ्यं तत्किं कृतेन कर्मणा न वर्द्धते उत्कृष्टत्वं न प्राप्नोति नाप्यकृतेन कनीयान् कनिष्ठो भवति एवंविधो यस्तस्यैव पदवित् पदस्यात्मस्वरूपस्य वित् ज्ञानं भवति एवं तं परमात्मानं विदित्वा स कर्मणा पापकेन वा न लिप्यत इत्यर्थः।

अन्ये तु इदं द्वयमित्थं योजयन्ति-न कर्मणामित्यारभ्य शरीरयात्रापी-त्यन्तेनात्मज्ञाननिष्ठायोग्यतासिद्ध्यर्थं निष्काममकर्मानुष्ठेयमिति प्रतिपाद्य यज्ञार्था-

दित्यादिना मोघमित्येतेनाप्यनात्मज्ञस्य कर्माधिकृतस्य कर्मानुष्ठाने बहुविधं कारणमुक्तं तदकरणे च सङ्कीर्तनं कृतं सर्वथाधिकृतेन कर्म कर्तव्यमेवेति प्रकरणार्थः। एवं स्थिते किं सर्वैरेव चक्रमनुवर्तनीयमुताशुद्धचित्तेनानात्मज्ञेनेत्यर्जुनसंशयमालक्ष्य स्वयमेव ब्रह्मविदः कर्मानुपयोगमाह यस्त्विति। यस्त्वात्मज्ञाननिष्ठः आत्मन्येव रतिर्न विषयेषु यस्य स आत्मरतिरेव स्याद्भवेत् तथात्मनैव तृप्तो नान्नपानादिनेत्यात्मतृप्तः प्राप्तपरमानन्दात्मनैव तृप्तत्वादन्नरसादावनासक्त इत्यर्थः। आत्मविदः सर्वतो वैतृष्ण्यं दृष्टं तन्मुमुक्षुणा यत्नेन सम्पाद्यमित्यभिप्रेत्याह आत्मन्येव च सन्तुष्टः सन्तोषो हि बाह्यार्थलाभेन सर्वस्य भवति तमनपेक्ष्यात्मन्येव सन्तुष्टः सर्वतो विरक्त इत्यर्थः रतितृप्तिसन्तोषाणां मोदप्रमोदानन्दवदवान्तरभेदः आत्मक्रीड आत्मरतिः क्रियावानेष च ब्रह्मविदां वरिष्ठ इतिश्रुतेः। यद्वा विषयारामस्य हि स्रक्चन्दनवनितादिषु रतिर्भवति मनोज्ञान्नपानादिना तृप्तिः पशुपुत्रसुवर्णादिलाभेन रागाद्यभावेन च सन्तुष्टिर्भवति लब्धपरमानन्दस्य तु द्वैतदर्शनाभावादातितुच्छत्वाच्चानात्मविषयरतितृप्तितुष्ट्यभावादुपचारादेवमुच्यते—आत्मरतिरात्मतृप्त आत्मसन्तुष्ट इति बोध्यम्। यः कश्चिदपि मनुष्य एवम्भूतः स एव कृतकृत्यो न तु ब्राह्मणत्वादिप्रकर्षेणेति कथयितुं मानव इत्युक्तम् तस्यैवम्भूतस्याधिकारहेत्वभावात्किमपि कार्यं कर्तव्यं वैदिकं लौकिकं वा न विद्यते इत्यर्थः॥ १७॥

इतश्चात्मविदो न किंचित्कर्तव्यमित्याह नैवेति। यद्वा चतुर्थपादमेव विवृणोति नैवेति। तस्यात्मरतेः कृतेन कर्मणा अर्थोऽभ्युदयलक्षणं मोक्षलक्षणं वा प्रयोजनं नैवास्ति तस्य स्वर्गाद्यभ्युदयार्थित्वाभावान्मोक्षस्य च कर्मासाध्यत्वादित्यर्थः परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति श्रुतेः। कृतेन कर्मणा अकृतो नित्यो मोक्षो नास्तीत्यर्थः ज्ञानसाध्यत्वस्यापि व्यावृत्तिरेवकारेण सूचिता आत्मरूपस्य हि मोक्षस्य नित्यप्राप्तत्वादज्ञानमात्रमप्राप्तिस्तस्मिंस्तु तत्त्वज्ञानेन निवृत्ते तस्यात्मविदो न किंचित्कर्मसाध्यं वा प्रयोजनमस्तीत्यर्थः। आत्मविदो नित्याद्यकरणे प्रत्यवायो भविष्यतीत्याशङ्कां परिहरति नाकृतेनेति। अकृतेन नित्यकर्माकरणेन इहलोके गर्हितत्वरूपः प्रत्यवायप्राप्तिरूपो वा कश्चनार्थो नास्तीत्यर्थः। सर्वत्रोपपत्तिमाहोत्तरार्द्धेन नचेति। चो हेतौ यस्मात्मविदः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु कोऽप्यर्थव्यपाश्रयः प्रयोजनसम्बन्धो नास्ति कञ्चिद्भूतविशेषमाश्रित्य कोऽपि क्रियासाध्योऽर्थो नास्तीति वाक्यार्थः अतोऽस्य

ज्ञातः प्रतीत इत्यर्थः । विद्यया वित्तः विद्याचुञ्चुः विद्याचणः । काव्यचुञ्चुः । काव्यचणः ।

इतो ग्रन्थस्य ग्राहके कश्लुक्च ॥३।३।८४॥

तेनेति तृतीयान्तात् इतो इत्प्रत्याहारगृहीतप्रत्ययान्ताद्ग्रन्थस्य शास्त्रस्य ग्राहकेऽवधारके कप्रत्ययो भवति इतश्च लुक् । द्वितीयेन रूपेण ग्रन्थस्य ग्राहकः द्विकः । त्रिकः । चतुष्कः । पंचकः ।

ग्रहणाद्वा ॥ ३ । ३ । ८५ ॥

इदन्ताद्ग्रन्थस्य ग्रहणात् ग्रहणे वर्तमानात्कप्रत्ययो वा भवति । स्वार्थे प्रकृत्यर्थे एवार्थान्तरानिर्देशात् इतश्च श्लुग्वा भवति । द्विकं द्वितीयकं ग्रन्थस्य ग्रहणमस्य । त्रिकं तृतीयकं व्याकरणस्य ग्रहणमस्य ॥ एवं चतुष्कम् । चतुर्थकम् । पंचकम् पञ्चमकम् ।

सस्याद्गुणात्परिजाते ॥ ३ । ३ । ८६ ॥

सस्यशब्दाद्गुणवाचिनश्च तेन परिजातेऽर्थे को भवति । परिः सर्वतो भावे जाते सम्पत्तौ । सस्येन परिजातः सस्यकः शालिः । यः सर्वतो गुणैस्सम्पन्नो न यस्य किञ्चिदपि वैगुण्यमस्ति स एवमुच्यते । एवं सस्यको देशः । सस्यको वत्सः । सस्यकं साधुः सस्यको मणिः । मणौ रूढश्चायम् ॥

पार्श्वकायश्शूलिकदाण्डाजिनिकानुपद्यन्वेष्टा ॥३।३।८७॥

पार्श्वकादयः शब्दाः कादिप्रत्ययान्ता निपात्यन्ते । अन्वेष्टा चेत्प्रत्ययार्थो भवति ॥ पार्श्वोतकः पार्श्वमनृजुरुपायः । पार्श्वेनान्वेष्टा सपार्श्वकः ऋजुनोपायेनान्वेष्टा व्यानर्थोऽन्योऽनृजुनोपायेनान्विच्छति स उच्यते नान्यः । अयश्शूलदण्डाजिनाभ्यां ठण् । अयः शूलसाम्यादयः शूलं तीक्ष्णो पापः तेनार्थो-

न्वेष्टः अयःशूलिकः राभसिक उच्यते । दण्डाजिनं दम्भः दण्डाजिनेनार्थानन्वेष्टा दाण्डाजिनकः मिथ्यावृत्तिः दाम्भिक उच्यते । केचित् ठमाहुः तेषामयःशूलिकः । दण्डाजिनिकः । अनुपदादीन् पदस्य पश्चादनुपदम् । अनुपदमन्वेष्टा अनुपदी गवामुष्ट्राणां वा ॥

धनहिरण्येऽभिलाषे ॥ ३ । ३ । ९८ ॥

धनहिरण्याभ्यां निर्देशादेव सप्तम्यन्ताभ्यामभिलाषेऽर्थे को भवति ॥ धनेऽभिलाषो धनकः देवदत्तस्य । हिरण्यको देवदत्तस्य ।

स्वाङ्गेषु सक्ते ॥ ३ । ३ । ९९ ॥

स्वाङ्गवाचिभ्यस्तेषु सक्तेऽर्थे को भवति । केशेषु सक्तः केशकः । नखकः । दन्तकः । केशादिरचनायां सक्त उच्यते ॥ बहुवचनं समुदायार्थम् । केशनखकः । दन्तनखकः ।

उदरे ठगाद्यूने ॥ ३ । ३ । १०० ॥

उदरशब्दात्तस्मिन् सक्तेऽर्थे ठण् भवति । सक्तश्चेदाद्यूनः अविजिगीषुर्भवति । उदरे सक्तः औदरिकः । उदरकोऽन्यः ।

कर्मठो घटः ॥ ३ । ३ । १०१ ॥

कर्मन् शब्दात्सप्तम्यन्तात् ठप्रत्ययो भवति । इगादेशाभावश्च निपात्यते घटश्चेत् वाच्यः । कर्मणि घटः घटिता घटमानः कर्मठः, पुरुषः ॥

अंशं हारिणी ॥ ३ । ३ । १०२ ॥

अंशमिति द्वितीयान्तात् हारिणी अर्थे को भवति । अंशं हारी अंशकः पुत्रः । अंशको दायादः । हारीत्यावश्यके णिन् ।

शीतकोष्णकौ कारिणि ॥ ३ । ३ । १०३ ॥

शीतोष्णाभ्यां मन्दशीघ्रवाचिभ्यां क्रियाविशेषणाभ्यां कारिण्यर्थे को निपात्यते। शीतं कारी शीतकः, क्रियासु मन्दः। उष्णं कारी उष्णकः, क्रियासु शीघ्र इत्यर्थः।

तन्त्रान्नवोद्धृते ॥ ३ । ३ । १०४ ॥

तंत्रशब्दान्निर्देशादेव पंचम्यन्तान्नवोद्धृतेऽचिरापहृतेऽर्थे को भवति। तन्त्रान्नवोद्धृतः तन्त्रकः, प्रावारः। तन्त्रकं, वस्त्रं। प्रत्यग्रमित्यर्थः॥

कमितर्यन्वभ्यभीभ्यः ॥ ३ । ३ । १०५ ॥

अनु अभि अभीभ्यः कमि तरि कामयमाने को भवति। अनुकमिता अनुकः। अभिकमिता अभिकः। अभीकः। निपातनादेव पक्षे दीर्घत्वम्।

विशालविशंकटविकटसंकटोत्कटप्रकटनिकटावकटावकुटारावटीटावनाटावभ्रटनिबिडनिबिरीसचिक्कचिकिनचिपिटचिल्लपिल्लचुल्लोपत्यकाधित्यकाः ॥३।३।१०६॥

विशालादयः शब्दाः शालादिप्रत्ययान्ताः यथास्वं प्रसिद्धेऽर्थे विशेषे निपात्यन्ते। विगते विशाले शृंगे विशंकटे शृङ्गे तद्योगाद् गौश्च विशाला गौः। विशंकटा गौः। विकटो देशः। विकटः कटीतटः। अत्र वेःशालशङ्कटकटाः प्रत्ययाः। संगतः संकटः पन्थाः। उद्गतः उत्कटः गन्धः। प्रगतः प्रकटोऽर्थः। निगतः निकटो ग्रामः। अत्र समुत्प्रनिभ्यः कटः। अवगतः अवकटः। अवकुटारः। अत्रावात्कटः कुटारश्च। अवनतमवटीटमवनाटमवभ्रटम्। नासिकायाः अवनता अवटीटा अवनाटा अवभ्रटा नासिका। नासिकायामवनतः अवटीटः अवनटः अवभ्रटो देवदत्तः। अत्राऽवान्नासिकानतविषये

गर्भोऽस्य सञ्जातेऽर्थे इतः प्रत्ययो भवति । षष्ठ्यर्थे ऽप्राणिनि चेत्भवति ॥ गर्भोऽस्य सञ्जातः गर्भितो व्रीहिः । गर्भिताः शालयः । अन्यत्र गर्भिणी गौः ॥

अस्त्यस्मिन्वेति मतुः ॥ ३ । ३ । ११६ ॥

तदिति प्रथमान्तादस्तीत्येवसुपाधिकात् षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुर्भवति । गावोऽस्यास्मिन्वा सन्तीति गोमान् । यवमान् । अस्ति धनमस्यास्मिन्वा अस्तिमान् । स्वस्त्यारोग्यमस्यास्तीति स्वस्तिमान् । एतेऽव्यये । वृक्षा अस्मिन् सन्ति वृक्षवान्, पर्वतः । प्लक्षवान् । अस्तीति किम् ? गावोऽस्य । विनास्तिना स्वविशेषणे स्यात् । गावोऽस्यासन् । गावोऽस्य भवितारः । भूतभविष्यत्सत्तयोरपि स्यात् । इतिकरणो विवक्षार्थः तेन—

भूमिनिन्दा प्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां प्रायो मत्वादयो मताः ॥ १ ॥

भूम्नि बहुत्वे गोमान् । निन्दायां ककुदावर्तिनी । प्रशंसायां रूपवान् । नित्ययोगे क्षीरिणो वृक्षाः । अतिशायने उदरिणी कन्या । संसर्गे दण्डी । छत्री । प्रायिकमेतत्सत्तामात्रेऽपि दृश्यते । व्याघ्रवान्पर्वतः । स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । स्पर्शवान् वायुः ।

श्लोकः—प्राग्जितात्कृतलब्धादौ स्वरूपप्रत्ययस्ततः ।
मत्वर्थश्च ततो वृत्तौ समानायां च नेष्यते ।

मत्वर्थीयान्मत्वर्थीयः स्वरूपो न भवति । गावो येषां सन्तीति गोमन्तः । गोमन्तोऽत्र सन्तीति मतुर्न भवति । विरूपस्तु भवत्येव दण्डिमती शाला । विरूपोऽपि समानायां वृत्तौ न भवति । दण्ड एषामस्तीति दण्डिनः । दण्डिनोऽस्य सन्तीति मतुर्न भवति । असंज्ञाभूतात् कर्मधारयाच्च भवति । वीरपुरुषा अस्मिन्

ग्रामे सन्तीति तत्र बहुव्रीहिरेव भवति । वीरपुरुषको ग्राम इति । संज्ञायां तु भवति कृष्णसर्पवान् वल्मीकः इति । गुणे गुणिनि च ये गुणशब्दास्तेभ्यो न भवति । शुक्लो वर्णोऽस्यास्तीति । तिक्तो रसोऽस्यास्ति । ये तु गुणमात्रे तेभ्यो भवत्येव । रूपवान् । रसवान् । काठिन्यवान् इति ।

आयात् ॥ ३ । ३ । ११७ ॥

गुणादिभ्यो यः रूपाच्छस्ताहालादित्यऽऽएतस्माद्यप्रत्ययात् याः प्रकृतयो निर्दिश्यन्ते ताभ्यो मतुप्रत्ययो भवति इति वेदितव्यम् । तदस्यास्ति अस्मिन्निति विषये । वातवान् । चूडावान् । अपवादैर्बाधा मतोर्माभूदिति वचनम् ।

वातदन्तबलललाटादूलः ॥ ३ । ३ । ११८ ॥

वातादिभ्यो मत्वर्थे ऊलप्रत्ययो भवति । वातूलः । बालूलः दन्तूलः । ललाटूलः । मतुश्च वातवान् । दन्तवान् । बलवान् । ललाटवान् ।

प्राण्यङ्गादातो लः ॥ ३ । ३ । ११९ ॥

प्राण्यङ्गवाचिनः आकारान्तात् मत्वर्थे लो भवति । चूडालः । जङ्घालः । मतुः चूडावान् । जङ्घावान् ।

सिध्मादिरुक्क्षुद्रजन्तोः ॥ ३ । ३ । १२० ॥

सिध्मादिभ्यः रुक्वाचिभ्यः क्षुद्रजन्तुवाचिभ्यश्च मत्वर्थे लो भवति । सिध्मलः । गडुलः । पार्ष्णीलः । धमनीलः । पार्ष्णीधमनीशब्दौ दीर्घान्तावेव गणे पठ्येते । तेन ह्रस्वान्ताभ्यां मतुरेव । रुक् मूर्छालः । विचर्चिकालः । विपादिकालः । क्षुद्रजन्तुः—यूकालः । मक्षिकालः । क्षुद्रजन्तुरानकुलात् । मतुः सिध्मवान् । मूर्छावान् । यूकावान् । वत्सलकुशादयः रूढिशब्दाः नात्र कश्चित् वत्साद्यर्थोऽस्ति ते यथाकथंचि-

दुत्पाद्याः ।

प्रज्ञापर्णोदकफेनाल्लेलौ ॥ ३ । ३ । १२१ ॥

प्रज्ञादिभ्यो मत्वर्थे लेलौ भवतः । प्रज्ञालः । प्रज्ञिलः । प्रज्ञावान् । पर्णलः । पर्णिलः । पर्णवान् । उदकलः । उदकिलः । उदकवान् । फेनलः । फेनिलः । फेनवान् ॥

काडाजटाघाटात्क्षेपे ॥ ३ । ३ । १२२ ॥

काडादिभ्यो मत्वर्थे लेलौ भवतः क्षेपे गम्यमाने । काडालः । काडिलः । जटालः । जटिलः । घाटालः । घाटिलः । क्षेपो मतुना न गम्यत इति मतुर्न भवति । एवमन्यत्रापि । क्षेप इति किम् ? काडावान् । जटावान् । घाटावान् ॥

वागालाटौ ॥ ३ । ३ । १२३ ॥

वाच इत्येतस्मात्तदस्यास्त्यस्मिन्निति आल आटौ भवतः पक्षे ग्मिनोऽपवादः । वाचालः वाचाटः । बहुनिःसारं वदन् । अन्यत्र वाग्मी । वाग्मान् ॥

ग्मिन् ॥ ३ । ३ । १२४ ॥

वागस्यास्मिन्निति विषये वाचो ग्मिन्प्रत्ययो भवति । वाग्मी, वाग्वान् । गकारोऽनुनासिकनिवृत्त्यर्थः ।

मधुकृषिलोमपिच्छादिभ्यो रवलशेलाः ॥३।३।१२५॥

मध्वादिभ्यो मत्वर्थे यथासंख्यं रादयः प्रत्ययाः भवन्ति । मध्वादिभ्यो रः मधुरो रसः । मधुरं मधु । मधुशब्दः स्वादुत्वे गुणे वर्तमानः मत्वर्थे रमुत्पादयति । द्रव्यवृत्तेर्मतुरेव मधुमान्घटः । एवं खं महत्कंठविवरमस्यास्तीति खरः गर्दभः । खवान् अन्यः । मुखं सर्वस्मिन्वक्तव्येऽस्यास्तीति मुखरः वाचालः । मुखवान् अन्य इत्यादयः । कृषादिभ्यो वलः कृषीवलः कुटुम्बी । कृषीमत्क्षेत्रम् । रजस्वला स्त्री । रजस्वान् ग्रामः इत्यादयः । लोमादेः शः लोमशः । रोमशः । लोमवान् । रोमवान् । पिच्छादेरिलः पिच्छिलः । पिच्छवान् । उरसिलः । उरस्वान् इत्यादि ।

नोऽङ्गादेः ॥ ३ । ३ । १२६ ॥

अङ्गादिभ्यो मत्वर्थे नो भवति । अङ्गानि अस्याः सन्तीत्यङ्गना । रूढिशब्दोऽयम् कल्याणाङ्ग्यां अन्यत्र अंगवान् । वामनः । वामवान् । पामनः । पामवान् । इत्यादि ।

शाकीपलालीदद्रुवा ह्रस्वश्च ॥ ३ । ३ । १२७ ॥

शाक्यादिभ्यो नो भवति ह्रस्वश्चैषामन्तादेशः । शाकिनः । पालिनः । दद्रुणः । मतुः—शाकीमान् । दद्रूमान् । पलालीमान् । महच्छाकं शाकी । नानाशाकसमाहार इत्यन्ये । महत्पलालं पलाली । पलालक्षोद इत्यन्ये । दद्रू नाम व्याधिः ।

विषुणलक्ष्मणौ ॥ ३ । ३ । १२८ ॥

विषुण इति विष्वक् इत्येतस्मान्मत्वर्थे नप्रत्ययो विषु इत्यादेशश्च निपात्यते । लक्ष्मण इति लक्ष्मीशब्दात् न प्रत्ययोऽकारश्चादेशः । विश्वं चास्य सन्तीति विषुणः । आदित्यो वायुश्च । लक्ष्मीरस्यास्तीति लक्ष्मणः ।

प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥ ३ । ३ । १२९ ॥

प्रज्ञादिभ्यो मत्वर्थे णो भवति । प्राज्ञः । श्राद्धः । आर्चः । वार्तः । मतु—प्रज्ञावान् । श्रद्धावान् । अर्चावान् । वृत्तिमान् ।

ज्योत्स्नादिभ्योऽण् ॥ ३ । ३ । १३० ॥

ज्योत्स्नादिभ्यो मत्वर्थेऽण् भवति । ज्योतिरस्यास्तीति ज्योत्स्ना चन्द्रमा अत एव वचनात् न प्रत्ययः उपान्त्यस्य च लुक् । सास्मिन्नस्तीति ज्यौत्स्नः पक्षः । ज्यौत्स्नी रात्रिः । तमोऽस्यामस्तीति तमिस्रा रात्रिः । तमिस्रं तमः । तदस्मिन्नस्तीति तामिस्रः पक्षः । तामिस्री रात्रिः । तामिस्राणि गुहामुखानि । मतुः । ज्योत्स्नावान् । तमिस्रावान् । इत्यादयः ।

सिकताशर्करात् ॥ ३ । ३ । १३१ ॥

सिकताशर्कराभ्यां मत्वर्थेऽण् भवति । सैकतः । शार्करः ओदनः । मतुः सिकतावान् । शर्करावान् ।

इलश्च देशे ॥ ३ । ३ । १३२ ॥

सिकताशर्कराभ्यां मत्वर्थे इलश्चाण् च भवतः । मतुश्च सिकतिलः । सैकतः । सिकतावान् देशः । शर्करिलः । शार्करः शर्करावान् देशः ।

द्युद्रोर्मः ॥ ३ । ३ । १३३ ॥

द्युद्रुभ्यां मत्वर्थे मो भवति । द्यौरस्यास्तीति द्युमः । द्युशब्द उकारान्तोऽह्नः पर्याय इत्येके । द्रूणयस्यास्मिन्वा सन्तीति द्रुमः । रूढिशब्दाविमौ । अन्यत्र मतुरेव द्युमान् । द्रुमान् ।

काण्डाण्डभाण्डादीरः ॥ ३ । ३ । १३४ ॥

काण्डादिभ्यो मत्वर्थे ईरो भवति मतुश्च । काण्डीरः काण्डवान् । आण्डीरः । आण्डवान् । भाण्डीरः । भाण्डवान् ।

कच्छ्वा डुरः ॥ ३ । ३ । १३५ ॥

कच्छूशब्दान्मत्वर्थे डुरो भवति ॥ कच्छुरः । कच्छूमान् ।

दन्त उन्नतः ॥ ३ । ३ । १३६ ॥

दन्तशब्दादुन्नतोपाधिकान्मत्वर्थे डुरो भवति । दन्ता उन्नता अस्य सन्तीति दन्तुरः । उन्नत इति किम् ? दन्तवान् ।

मेधारथाद्वेरः ॥ ३ । ३ । १३७ ॥

मेधारथाभ्यां मत्वर्थे इरो भवति वा । मेधिरः । मेधावी मेधावान् । रथिरः । रथी । रथिकः । रथवान् ।

कृपाहृदयादालुः ॥ ३ । ३ । १३८ ॥

कृपाहृदयाभ्यां मत्वर्थे आलुर्भवति वा । कृपालुः । कृपावान् । हृदयालुः । हृदयिकः । हृदयी । हृदयवान् ।

केशाद्वः ॥ ३ । ३ । १३९ ॥

केशान्मत्वर्थे वो वा भवति । केशवः । केशी । केशिकः केशवान् ।

मण्यादिभ्यः ॥ ३ । ३ । १४० ॥

मण्यादिभ्यो मत्वर्थे वो भवति मतुश्च । मणिवः । मणिमान् । सिध्मादिपाठान्मणिलः । हिरण्यवः । हिरण्यवान् । इत्यादयः ।

स्वाङ्गाद्धीनादः ॥ ३ । ३ । १४१ ॥

हीनोपाधिकात्स्वाङ्गान्मत्वर्थे अप्रत्ययो भवति । कर्णः कर्णोऽस्यास्तीति कर्णः । छिन्ना नासिका अस्यास्तीति नासिकः । हीनादिति किम्? (व) कर्णवान् । नासिकावान् । इत्येव अन्यत्र ।

अभ्रादिभ्यः ॥ ३ । ३ । १४२ ॥

अभ्रादिभ्यो मत्वर्थे अप्रत्ययो भवति । अभ्राण्यस्मिन् सन्तीति अभ्रं नभः । अर्शांस्यस्य सन्तीति अर्शसः, देवदत्तः । उरसः । उरसवान् इत्यादयः ।

शृङ्गादारकः ॥ ३ । ३ । १४३ ॥

शृङ्गान्मत्वर्थे आरको भवति । शृङ्गारकः । शृङ्गवान् । शिखादित्वात्-शृङ्गी । वृन्दारक इति वृन्दारकनागकुञ्जैररिति सिद्धम् । मतुना वृन्दवान् । शिखादित्वात् वृन्दी ।

फलबर्हाच्चेनः ॥ ३ । ३ । १४४ ॥

फलबर्हाभ्यां शृङ्गाच्च मत्वर्थे इनो भवति । फलिनः ।

बार्हिणः । शृङ्गिणः । मतुः—फलवान् । बर्हवान् । शिखादित्वात् फली । बर्ही ।

मलादीमसश्च ॥ ३ । ३ । १४५ ॥

मलान्मत्वर्थे ईमसश्च इनश्च भवतः । मलीमसः । मलिनः । मलवान् ।

मरुत्पर्वणस्तः ॥ ३ । ३ । १४६ ॥

मरुत्पर्वशब्दाभ्यां मत्वर्थे तो भवति । मरुत्तः । पर्वतः । मरुत्वान् । पर्ववान् ।

वलितुण्डिवटेर्भः ॥ ३ । ३ ४७ ॥

वलितुण्डिवटेभ्यो मत्वर्थे भो भवति । वलिभः । वलिनः इत्यंगादित्वात् । तुण्डिभः । वटिभः । प्रवृद्धनाभिः तुण्डिः ।

ऊर्णाहंशुभमोयुस् ॥ ३ । ३ । १४७ ॥

ऊर्णादिभ्यो मत्वर्थे युस् भवति । ऊर्णायुः । अहंयुः अहङ्कारवान् । शुभंयुः कल्याणवुद्धिः ।

कंशमस्ति यु स्तुयस्तवभाः ॥ ३ । ३ । १४८ ॥

कंशंभ्यां मत्वर्थे ति युस् तु यस् त व भ इत्येते प्रत्यया भवन्ति । कन्तिः । कंयुः । शन्तिः । शंयुः । कन्तुः । शन्तुः । कंयः शंयः । कन्तः शन्तः । कंवः । शंवः । कंभः । शंभः । स इत् पदत्वार्थः ।

तपस्स्रग्मायामेधासो विन् ॥ ३ । ३ । १५० ॥

तप आदिभ्य असन्तेभ्यश्च मत्वर्थे विन् भवति । तपस्वी । स्रग्वी । मायावी । मेधावी । असः यशस्वी । पयस्वी । सरस्वी । मतुः स्रग्वान् । मायावान् । मेधावान् । यशस्वान् । यशस्वती । सरस्वती । ज्योत्स्नाद्यणा बाधा मा भूदिति तपः ग्रहणम् । व्रीह्यादिपाठात् मायी । मायिकः ।

तमिस्रार्णवोर्जस्वलोर्जस्वन्नामयाविन्गोमिन् ॥३।३।१५१

तमिस्रादयो मत्वर्थे निपात्यन्ते । तमःशब्दाद्रः उपान्त्यस्य चेत्वम् तमिस्रा रात्रिः । अर्णसो वः अन्त्यस्य लोपः अर्णवः समुद्रः । ऊर्जाद्वलः–विन् च सक् चागमः ऊर्जस्वलः । ऊर्जस्वी । आमयाद्विन् दीर्घश्चास्य आमयावी । गोशब्दात् मिन् गोमिन् । मतुः तमस्वान् । ऊर्जमान् । गोमान् । स्वमैश्वर्यमस्या स्तीति स्वामीश्वराधिपतीति निपातनात्सिद्धम् ।

नौ शिखादिभ्यां ठेनौ ॥ ३ । ३ । १५२ ॥

नावादिभ्यः शिखादिभ्यश्च मत्वर्थे यथासंख्यं ठ इनौ भवतः । मतुश्च । नाविकः । नौमान् । कुमारिकः । कुमारीमान् । शिखी । शिखावान् । माली । मालावान् ।

ब्रीह्यादतोऽनेकाचः ॥ ३ । ३ । १५३ ॥

ब्रीह्यादिभ्योऽकारान्ताच्च अनेकाचः मत्वर्थे ठेनौ भवतः । ब्रीहिकः । ब्रीही । ब्रीहिमान् । मायिकः । मायी । मायावान् । मायावीति विन् । अतः दण्डिकः । दण्डी । दण्डवान् । छत्रकः । छत्री । छत्रवान् । अनेकाच इति किम् ? स्ववान् । क्रियाजातिभ्यां सप्तम्यर्थे च ठेनौ न भवतः इत्याहु । कारकवान् । व्याघ्रवान् । दण्डवती शाला ।

अशिरसोऽशीर्षश्च ॥ ३ । ३ १५४ ॥

अशिरसः मत्वर्थे ठेनौ भवतः । मतुश्च । तत्सन्नियोगे अशीर्ष इत्यादेशः । अशीर्षिकः । अशीर्षी । अशीर्षवान् । मतावशिरसो अशीर्षभावः । ठेनोस्तु शीर्षोऽचीति विद्यत एव ।

अर्थात्तर्थान्ताद्भावात् ॥ ३ । ३ । १५५ ॥

अर्थशब्दादर्थान्ताच्च भाववाचिन एव मत्वर्थे ठेनावेव भवतः । उभयथा चायं नियमो वाक्यभेदेन क्रियते । अर्थि

याच्ञायां अर्थनमर्थः सोऽस्यास्तीति अर्थिकः । अर्थिप्रतिपक्षमर्थनं प्रत्यर्थः । सोऽस्यास्तीति प्रत्यर्थिकः । प्रत्यर्थी । ठेनाविवेति नियमादतो मतुर्न भवति । भावादिति नियमाद् द्रव्यवचिन ठेनौ न भवतः । अर्थो हिरण्यादिरस्यास्ति इति अर्थवानिति मतुरेव ।

व्रीहितुन्दादेरिलश्च ॥ ३ । ३ १५६ ॥

व्रीहिवाचिभ्यः तुन्दादिभ्यश्च मत्वर्थे इलो भवति ठेनौ च मतुश्च । व्रीहेः । कलमिलः । कलमिकः । कलमी । कलमवान् । व्रीहिः । पूर्व एव विधिः । तुन्दादेः । तुन्दिलः । तुन्दिकः । तुन्दी- तुन्दवान् । उदरिलः । उदरिकः । उदरी । उदरवान् ।

स्वाङ्गाद्विवृद्धात् ॥ ३ । ३ । १५७ ॥

स्वाङ्गात् विवृद्धोपाधिकात् मत्वर्थे इलश्च ठेनौ मतुश्च भवन्ति । वृद्धौ महान्तौ कर्णावस्य स्तः कर्णिलः । कर्णिकः । कर्णी । कर्णवान् । ओष्ठिलः । ओष्ठिकः । ओष्ठी । ओष्ठवान् ।

गुणादिभ्यो यः ॥ ३ । ३ । १५८ ॥

गुणादिभ्यो मत्वर्थे यो भवति । गुण्यः पुरुषः । हिम्यः पर्वतः । मतुः गुणवान् । हिमवान् ।

रूपाच्छस्ताहतात् ॥ ३ । ३ । १५९ ॥

रूपात् शस्ताहतोपाधिकात् मत्वर्थे यो भवति । शस्तं प्रशस्तं रूपमस्यास्तीति रूप्यो नौः । रूप्यः पुरुषः । आहतं उङ्काहतं रूपमस्यास्तीति रूप्यः । कार्षापणः । अन्यत्र मतुः रूपवान् । रूपवती । कन्या । अतः परं मतुर्नास्ति ।

गवादेष्ठण् ॥ ३ । ३ । १६० ॥

गोशब्दपूर्वात् अकारान्तान्मत्वर्थे ठण् भवति । गौशतिकः । गौसहस्रिकः । अत इति किम् ? गोविंशतिमान् ।

केषांचिदत इति नानुवर्तते । गौत्रिकः गौवर्षिकः । गोविंशतिमानिति त्वनभिधानात् न भवति ।

निष्कादेश्शतसहस्रात् ॥ ३ । ३ । १६१ ॥

निष्कादेः शतसहस्रान्मत्वर्थे ठण् भवति । नैष्कशतिकः । नैष्कसहस्रिकः ।

एकादेः कर्मधारयात् ॥ ३ । ३ । १६२ ॥

एकादेः कर्मधारयादकारान्तान्मत्वर्थे ठण् भवति । एको गौः एकगवः सोऽस्यास्तीति ऐकगविकः । ऐकसहस्रिकः ।

सर्वादेरिन् ॥ ३ । ३ । १६३ ॥

सर्वादेरकारान्तात्कर्मधारयादिन् भवति । सर्वं धनं सर्वधनं तदस्यास्तीति सर्वधनी । सर्ववीजी । सर्वक्लेशी नटः ।

द्वन्द्वरुग्निन्द्यात्प्राणिस्थादस्वाङ्गात् ॥ ३ । ३ । १६४ ॥

द्वन्द्वसमासो रुक् रोगः निन्द्यं गर्ह्यं च यत्प्राणिस्थमस्वाङ्गमकारान्तं तस्मान्मत्वर्थे इन् भवति । द्वन्द्वात् कटकवलयिनी । शङ्खनूपुरिणी । रुजः कुष्ठी । किलासी । निन्द्यात् शंखाण्डकी । कुकुदावर्ती । कालतालुकी । अस्वाङ्गादिति किम्? स्तनकेशवती ।

वातातिसारपिशाचात्कक् च ॥ ३ । ३ । १६५ ॥

वातादिभ्यो मत्वर्थे इन् भवति कक् चैषामागमः । वातकी । अतिसारकी । पिशाचकी ।

वयसि डतः ॥ ३ । ३ । १६६ ॥

डतप्रत्याहारग्रहीतप्रत्ययान्तान्मत्वर्थे इन्नेव भवति वयसि गम्यमाने । पञ्चमो मासः संवत्सरो वास्यास्तीति पञ्चमी उष्ट्रः । नवमी इत्यादि ।

सुखादेः ॥ ३ । ३ । १६७ ॥

सुखादिभ्यो मत्वर्थे इन्नेव भवति । सुखी । दुःखी इत्यादि ।

मालात्क्षेपे ॥ ३ । ३ । १६८ ॥

मालाशब्दादिन्नेव भवति क्षेपे । माली । अन्यत्र मालावान् ।

धर्मशीलवर्णान्तात् ॥ ३ । ३ । १६९ ॥

धर्माद्यन्तान्मत्वर्थे इन्नेव भवति । तपस्वी धर्मी । तपस्वी शीली । ब्राह्मणवर्णी । शूद्रवर्णी ।

बाहूवादेर्बलात् ॥ ३ । ३ १७० ॥

बाहूवादेः बलशब्दान्मत्वर्थे इन्नेव भवति । बाहुबली । उरुबली ।

मन्मान्नाम्नि ॥ ३ । ३ । १७१ ॥

मन्म इत्येवमन्तान्मत्वर्थे इन्नेव भवति समुदाये नाम्नि । धामनी । चर्मणी । सोमनी । प्रथमनी कामिनी । अन्यत्र धामवान् सोमवान् ।

हस्तदन्तकराज्जातौ ॥ ३ । ३ । १७२ ॥

हस्तादिभ्यो मत्वर्थे इन्नेव भवति समुदायेन चेज्जातिरभिधीयते । हस्तोऽस्यास्तीति हस्ती । दन्ती । करी । अन्यत्र हस्तवान् । दन्तवान् । करवान् ।

पुष्करादेर्देशे ॥ ३ । ३ । १७३ ॥

पुष्करादिभ्यो मत्वर्थे इन्नेव भवति देशेऽभिधेये । पुष्करिणी । पद्मिनी । अन्यत्र पुष्करवान् हस्ती ।

वर्णी ब्रह्मचारी ॥ ३ । ३ । १७४ ॥

वर्णशब्दान्मत्वर्थे इन्निपात्यते ब्रह्मचारिण्यभिधेये । वर्णी ब्रह्मचर्यमस्यास्तीति वर्णी ब्रह्मचारी इत्यर्थः ॥

सूक्तसाम्नि छः ॥ ३ । ३ । १७५ ॥

तदस्यास्त्यस्मिन्निति विषये सूक्ते सामनि चाभिधेये छो भवति । अच्छावाकशब्दोऽस्मिन्नस्तीति आच्छावाकीयम् । मैत्रावर्णीयम् सूक्तं । साम्नि यज्ञायज्ञीयम् । अशनापिपासीयम् । वारतन्तवीयम् । अस्यवामीयम् ॥

श्लुग्वाध्यायानुवाके ॥ ३ । ३ । १७६ ॥

अध्यायेऽनुवाके चाभिधेये मत्वर्थे यः तस्य श्लुग्वा भवति । अत एव वचनात् छोऽनुमीयते । गर्धभाण्डशब्दोऽस्मिन्नध्यायेऽनुवाके वास्ति गर्धभाण्डः गर्धभाण्डीयो वा । दीर्घजीवितः । दीर्घजीवितीयः । पलितः स्तम्भः पलितस्तम्भीयः । द्रुमपुष्पः द्रुमपुष्पीयः ।

विमुक्तादेरण् ॥ ३ । ३ । १७७ ॥

विमुक्तादिभ्यो मत्वर्थे अध्यायेऽनुवाके वाण् भवति । दैवासुरः अध्यायोऽनुवाको वेत्यादि ।

घोषडादेर्वुच् ॥ ३ । ३ । १७८ ॥

घोषडादिभ्यो मत्वर्थेऽध्यायानुवाकयोर्वुच् भवति । घोषडशब्दोऽस्मिन्नस्तीति घोषडकः । इवेत्वक इत्यादि ।

प्रकारो जातीयर् ॥ ३ । ३ । १७९ ॥

तदस्येति वर्तते ॥ तदिति प्रथमान्तात्प्रकारोपाधिकादस्येति षष्ठ्यर्थे जातीयर् प्रत्ययो भवति ॥ पटुः प्रकारोऽस्य पटुजातीयः । मृदुजातीयः । तज्जातीयः । नानाभूतप्रकारोऽस्य नानाजातीयः । तथाजातीयः । कथंजातीयः । रेफ अरितस्वार्थ इति पर्युदासार्थः ॥

कोऽण्वादेः ॥ ३ । ३ । १८० ॥

अण्वादिभ्यस्तदस्य प्रकारे को भवति । अणुः प्रकारोऽस्य अणुकः । स्थूलकः पटः । अणुकाः माषाः । माषकं हिरण्यम् । इषका । मालिका इत्यादि ।

कृष्णयवजीर्णसुरावदातगोमूत्रात्तिलव्रीहिशाल्यहिसुराच्छादने ॥ ३ । । ३ । १८१ ॥

कृष्णादिभ्यो यथासंख्यं तिलादिषु वाच्येषु तस्य प्रकारे को भवति । कृष्णः प्रकारः एषां कृष्णकाः तिलाः । अन्यः कृष्णजातीयः । एवमुत्तरत्रापि । यवप्रकारा यवकाः व्रीहयः । जीर्णप्रकारा जीर्णकाः शालयः । सुराप्रकारः सुराको वर्णः । सुरकोऽहिः सर्पः । अवदातः प्रकार अवदातकः सुरा । गोमूत्रं प्रकारं गोमूत्रकमाच्छादनम् ।

॥ इति शब्दानुशासने चिन्तामणौ वृत्तौ तृतीयाध्यायस्य तृतीयः पादः ॥

अथ तृतीयाध्यायस्य चतुर्थः पादः ।

भूतपूर्वे चरट् ॥ ३ । ४ १ ॥

अतः परं प्रायशः स्वार्थे काः प्रत्ययाः तत्रोपाधिः प्रकृतेर्विज्ञायते ॥ स प्रत्ययस्य द्योत्यो भवति । पूर्वं भूतो भूतपूर्वः । भूतपूर्वेऽर्थे वर्तमानात्सुबन्ताच्छब्दरूपात् चरट् प्रत्ययो भवति स्वार्थे । आढ्यो भूतपूर्वः आढ्यचरः । दर्शनीयचरः । आढ्या भूतपूर्वा आढ्यचरी ॥

गोष्ठात्खञ् ॥ ३ । ४ । २ ॥

गोष्ठात् भूतपूर्वेऽर्थे खञ् भवति । गोष्ठो भूतपूर्वो गोष्ठीनो देशः ।

षष्ठ्या रूप्यचरट् ॥ ३ । ४ । ३ ॥

षष्ठ्यन्तात् भूतपूर्वेऽर्थे रूप्यचरट् भवतः । देवदत्तस्य भूतपूर्वः देवदत्तरूप्यः गौः । देवदत्तचरः गौः ।

व्याश्रये तस् ॥ ३ । ४ । ४ ॥

नानापक्षाश्रयो व्याश्रयः । षष्ठ्यन्तात् व्याश्रये गम्यमाने तस् भवति । देवदत्तश्चैत्रतोऽभवत् । गुरुदत्तो मैत्रतः । चैत्रमैत्रयोर्विघटमानयोश्चैत्रस्य पक्षे देवदत्तो मैत्रस्य पक्षे गुरुदत्त--इत्यर्थः । एवं यतोऽभवत् । ततोऽभवत् ।

व्याधेः प्रतीकारे ॥ ३ । ४ । ५ ॥

व्याधिवाचिनः षष्ठ्यन्तात् तस् भवति प्रतीकारे गम्यमाने । प्रवाहिकातः । प्रच्छर्दिकातः । कुर्वस्य व्याधेः प्रतीकारं कुर्वीत्यर्थः ।

पर्यभेः सर्वोभये ॥ ३ । ४ । ६ ॥

पर्यभिभ्यां सुबन्ताभ्यां यथाक्रमं सर्वोभयार्थे तस् भवति । परितः । सर्वतः इत्यर्थः । अभितः उभयतः इत्यर्थः ।

आद्यादिभ्यः ॥ ३ । ४ । ७ ॥

आद्यादिभ्यः सप्तम्यर्द्धिभक्त्यन्तेभ्यः तस् भवति । आदावादितः । अन्ततः । मध्यतः । पृष्ठतः । अग्रे निवेसितः पार्श्वतः मुखतः । स्वरतः । अर्थतः । इत्यादयः ।

क्षेपतिग्रहाव्यथे कर्तुस्तृतीयायाः ॥ ३ । ४ । ८ ॥

तृतीयान्तादकर्तृवाचिनः क्षेपातिग्रहाव्यथविषये तस् भवति, क्षेपो निन्दा । वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । अतिक्रम्य ग्रहणमतिग्रहः । वृत्तेनातिगृह्यते वृत्ततोऽतिगृह्यते । अचलनमव्यथनमन्यथा अभितिर्वा वृत्तेन वृत्ततो वा न व्यथते । अकर्तरीति किम् ? देवदत्तेन क्षिप्तः ।

पापहीयमानेन ॥ ३ । ४ । ९ ॥

तृतीयान्तादकर्तृवाचिनः पापहीयमानाभ्यां योगे तस् भवति । वृत्तेन पापः । वृत्ततः पापः चारित्रेण हीयते चारित्रतो हीयते मन्त्रतो हीनः स्वरतो वर्णतो वा ।

पञ्चम्याः प्रतिना ॥ ३ । ४ । १० ॥

प्रतिना योगे या पञ्चमी विहिता तदन्तात्तस् भवति प्रद्युम्नो वासुदेवात्प्रति वासुदेवस्य प्रतिनिधिरित्यर्थः ।

अहीयरुहोऽपाये ॥ ३ । ४ । ११ ॥

हीयरुहवर्जितस्य धातोरपायेऽवधौ या पञ्चमी विहिता तदन्तात्तस् भवति । ग्रामाद् आगच्छति । ग्रामतः आगच्छति । उपाध्यायादधीते उपाध्यायतो अधीते । अहीयरुह इति किम् ? स्वार्थाद्धीयते स्वार्थाद्धीनम् । पर्वतादवरोहति ।

अद्व्यादिवैपुल्यात्सर्वादिकिंवहोः पतस् ॥ ३ । ४ । १४ ॥

द्व्यादिवर्जितेभ्यः किंशब्दाच्च पञ्चम्यान्तात्तस् भवति सर्वस्मात् सर्वतः । ततः कुतः । वहुभ्यो वहुतः । बहुभ्यो वहुतः ।

द्व्यादिप्रतिषेधः किम्? द्वाभ्यां। त्वत्तो-मत्तो इत्यहीयरुहोपाये इति भवति। वैपुल्यप्रतिषेधः किम्? बह्वोः सूपात्। सर्वादिः किम्? बहोरिति किम्? वृत्तात् प्रवात् विनाकिमोद्व्यादित्वात्पृथगुपादानम्। तर्हि सर्वादिति किम्? बहोप्रस्विषये परत्वादयमेवभवति।

इतोऽतः कुतः ॥ ३ । ४ १३ ॥

इतस् अतस् कुतस् इत्येते शब्दाः तसन्ताः निपात्यन्ते। इदमः अस्मात् इतः। कस्मात् कुतः। एतदः एतस्मात् अतः किमः कस्मात् कुतः।

भवदायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् ॥ ३।४।१४ ॥

भवदादिसमानाधिकरणाद्द्व्यादिवैपुल्यात्सर्वादिकिंबहोस्सर्वविभक्त्यन्तात्तस् वा भवति। सभवान् ततोभवान्। तौभवन्तौ ततो भवन्तौ। तेभवन्तः ततो भवन्तः। तंभवन्तं ततोभवन्तम् इति सर्वविभक्तिषु नेयम्। एवमायुष्मद्दीर्घायुर्देवानांप्रियैरप्युदाहार्यम्। यथासम्भवा विभक्तिः।

त्रप्च ॥ ३ । ४ । १५ ॥

भवदादिसमानाधिकरणाद्द्व्यादिवैपुल्यात्सर्वादिकिंबहोः सर्वविभक्त्यन्तात् त्रप्च प्रत्ययो वा भवति। सभवान् तत्रभवान्। तंभवन्तं तत्रभवन्तमित्यादि नेयम्। एवमायुष्मद्दीर्घायुर्देवानांप्रियैरप्युदाहार्यम्। योगविभागः सप्तम्यां परत्वात् त्रप्येव प्राप्ते चकारेण पक्षे तस्विधानार्थम्। ततोभवति तत्रभवति। रूढिशब्दा इमे। ततो भवदादयः समुदायाः पूजावचनाः यथाकथंचित् व्युत्पाद्यन्ते। तेन पुनस्त्यदादिरनुप्रयुज्यते। स तत्रभवान्। तं तत्रभवन्तम्।

क्वकुत्रात्रेह ॥ ३ । ४ । १६ ॥

क्वादयः त्रपन्ता निपात्यंते । किमः कस्मिन् क्व कुत्र । एतदः एतस्मिन् अत्र । इदमः । अस्मिन् । इमकस्मिन् इह ।

सप्तम्याः ॥ ३ । ४ । १७ ॥

सप्तम्यन्तादद्व्यादिवैपुल्यात्सर्वादिकिंवह्वोः त्रप् भवति । सर्वस्मिन् सर्वत्र तत्र यत्र बहुषु बहुत्र ।

किंयत्तत्सर्वैकान्यात्काले दा ॥ ३ । ४ । १८ ॥

किमादिभ्यः सप्तम्यन्तेभ्यः काले वर्तमानेभ्यो दा भवति । कस्मिन्काले कदा । यदा । तदा । सर्वदा एकदा । अन्यदा । काल इति किम् ? क्व देशे ।

सदैतर्ह्यधुनेदानीं तदानीं सद्यः ३ । ३ । १९ ॥

सदादयः शब्दाः काले निपात्यन्ते । सर्वस्मिन् काले सदा सर्वदा इति पूर्वेण । इदमः अस्मिन् काले एतर्हि अधुना इदानीं । तदः तस्मिन् काले तदानीं तदेति पूर्वेण । समानस्य समाने काले सद्यः ।

परेद्यव्यह्नि ॥ ३ । ४ । २० ॥

परशब्दस्याह्नि काले परेद्यवीति निपात्यते । परस्मिन् अहनि परेद्यवि । अद्येति "आद्यमद्येति" सिद्धम् ।

पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ॥३।४।२१॥

पूर्वादिभ्यः सप्तम्यन्तेभ्योऽह्नि काले एद्युस् भवति । पूर्वस्मिन् अह्नि पूर्वेद्युः । अपरेद्युः अधरेद्युः । उत्तरेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः ।

उभयाद्युश्च ॥ ३ । ४ । २२ ॥

उभयशब्दात्सप्तम्यन्तादह्नि काले द्युभवति एद्युश्च । उभयस्मिन् अह्नीति उभयद्युः उभयेद्युः ॥

परुत्परार्यैषमो वर्षे ॥ ३ । ४ । २३ ॥

परुदादयो वर्षे संवत्सरे काले निपात्यन्ते । पूर्वस्मिन्संवत्सरे परुत् । पूर्वतरे संवत्सरे परारि । अस्मिन् इमकस्मिन्वा संवत्सरे एषमः ।

अनद्यतने र्हिः ॥ ३ । ४ । २४ ॥

सप्तम्यन्तात् अनद्यतने काले वर्तमानात् यथासम्भवं अद्व्यादिवैपुल्यात्सर्वादिकिंबहोः र्हिप्रत्ययो भवति । यस्मिन् अनद्यतने काले यर्हि तर्हि । अन्यर्हि । अमुर्हि । कर्हि अनद्यतन इति किम् ? यदा । अनद्यतनेऽपि कालमात्रविवक्षायां दादिप्रत्यया भवन्ति । यदा तदा । सप्तम्यर्थमात्रविवक्षायां त्रप् भवति । तत्र काले यत्र काले ।

प्रकारे था ॥ ३ । ४ । २५ ॥

सप्तम्यन्तादिति निवृत्तम् । यथासम्भवं विभक्तिः । प्रकारे वर्तमानादद्व्यादिवैपुल्यात्सर्वादिकिंवहोः था भवति । सर्वेण प्रकारेण सर्वथा । यथा । तथा । बहोस्तु परत्वात् (धा) भवति ।

कथमित्थमुः ॥ ३ । ४ । २६ ॥

कथं इत्थं इति प्रकारे निपात्येते । थापवादः । केन प्रकारेण कथम् । इदमः एतदो वा अनेन एतेन वा प्रकारेण इत्थम् । उ इत् "मसौचादिति प्रत्याहारार्थः ।

संख्याया धा ॥ ३ । ४ । २७ ॥

संख्यावाचिनः सुपः प्रकारे धा भवति । एकेन प्रकारेण एकधाक्रियते एकधाकरोति । द्विधा चतुर्धा पञ्चधा षोढा बहुधा गणधा ।

विचाले च ॥ ३ । ४ । २८ ॥

विचलनं विचाल: एकस्यानेकीभावः अनेकस्य चैकीभावः तस्मिन् गम्यमाने संख्यायाः सुपो वा भवति । एको राशिः द्वौ क्रियते । द्विधा क्रियते । एकं राशिं द्वीकरोति द्विधाकरोति । त्रिधाकेरोति । अनेक एकः क्रियते एकधा क्रियते एकधाकरोति । शतेन शतधाभिद्यते । चकार उत्तरत्र द्वयोः समुच्चयार्थः ।

वैकाज्ज्ध्यम् ॥ ३ । ४ । २९ ॥

एकन् शब्दात्संख्यावाचिन प्रकारे विचाले च ज्ध्यम् प्रत्ययो भवति वा । एकेन प्रकारेण ऐकध्यं भुङ्क्ते । अनेकमेकं करोति ऐकध्यं करोति एकधा करोति ।

द्वित्रेर्ज्धमेधौ ॥ ३ । ४ : ३० ॥

द्वित्रिभ्यां संख्यावाचिभ्यां प्रकारे विचाले च ज्धंमेधौ प्रत्ययौ वा भवतः । द्वाभ्यां प्रकाराभ्यां द्वैधम् । द्वेधा । त्रैधम् त्रेधा । द्विधा भुङ्क्ते । एकं राशिं द्वैाकरोति । द्वैधम् । द्वेधा द्विधा । त्रैधं । त्रैधा । त्रिधा करोति ।

तद्वति धण् । ३ । ४ । ३१ ॥

द्वित्रिभ्यां संख्यावाचिभ्यां तद्वति प्रकारवति विचालवति चाभिधेये धण् भवति । द्वौप्रकारौ विभागौ चैषां द्वैधानि द्वैधिभावः । त्रैधानि फलानि ।

वारेकृत्वस् ॥ ३ । ४ । ३२ ॥

वरेधात्वर्थस्यायौगपद्येन वृत्तिःकाले वा तस्मिन् वर्तमानात्संख्याशब्दात्तद्वति वारवति धात्वर्थे कृत्वस् प्रत्ययो भवति । पञ्चवाराऽस्य पञ्चकृत्वो भुङ्क्ते । षट्कृत्वः । शतकृत्वः । सहस्रकृत्वः । भुज्यर्थो वारवानिति भुज्यर्थस्येदं विशेषणम् । तद्वतीति किम् ? भोजयस्य पञ्चवाराः ।

चतुस्त्रिद्व्येस्सुच् ॥ ३ । ४ । ३३ ॥

चतुर्द्वित्रिभ्यो वारे वर्तमानेभ्यो संख्याशब्देभ्यः तद्धति सुच् भवति। चत्वारो वारा अस्य चतुर्भुङ्क्ते। त्रिर्भुङ्क्ते। द्विर्भुङ्क्ते। चकारः सुचोवेतिविशेषणार्थः॥

सकृत् ॥ ३ । ४ । ३४ ॥

एकशब्दस्य वारे सुच् सकृदादेशश्च निपात्यते। एकवारं भुङ्क्ते सकृत्भुङ्क्ते ॥

बहोर्धासन्ने ॥ ३ । ४ । ३५ ॥

बहोः संख्यावाचिनः आसन्नेऽदूरेऽविप्रकृष्टकाले वारे वर्तमानात्तद्धति धा भवति। बह्वासन्नं वारं भुंक्ते बहुधाभुङ्क्ते। बहुधापिबति। आसन्न इति किम्? बहुकृत्वो भुङ्क्ते। अन्येभ्योऽपि दृश्यते। गणधाभुङ्क्ते तावद्धाभुङ्क्ते इत्येके॥

दिशो दिग्देशकालेऽतृतीयायुजः ॥ ३ । ४ । ३६ ॥

दिशो दिग्शब्दाद्यो दिशि रूढस्तस्माद्दिशि देशे काले च वर्तमानात्तृतीयावर्जितात् अयुग्विभक्त्यन्तात्स्वार्थे धा भवति। प्राचि दिग्रमणीया। प्राग्देशो रमणीयः। प्राङ्कालो रमणीयः प्राग्रमणीयम्। प्राच्यो दिशः प्राचो देशात्प्राचः कालात् आगतः प्रागागतः। प्राचां दिशि प्राचि देशे प्राचि काले वसति प्राग्वसति। अतृतीयायुज इति किम्? प्राच्या दिशा प्रज्वलितम्। प्राचीं दिशं पश्य। प्राच्यै दिशे देहि। प्राच्यो दिशः एवं "श्लुगञ्चे"रिति धा प्रत्ययस्य श्लुक्।

परावरात्स्तात् ॥ ३ । ४ । ३७ ॥

परावराभ्यां दिग्देशकालेषु वर्तमानाभ्यामतृतीयायुग् विभक्त्यन्ताभ्यां स्वार्थे स्तात भवति। परस्तात। अवरस्तात्

रमणीयम् । परस्तात् अवरस्ताद्वसति । परस्तात् अवरस्तात् दागतः ।

दक्षिणोत्तराच्चातस् ॥ ३ । ४ । ३८ ॥

दक्षिणोत्तराभ्यां दिग्देशकालेषु वर्तमानाभ्यामतृतीया-युग् विभक्त्यन्ताभ्यां परावराभ्यां चातस् भवति । दक्षिणशब्दः काले न सम्भवतीति दिग्देशप्रभृतिर्गृह्यते । दक्षिणतः उत्तरतः रमणीयमागतो वसति । एवं परतः अवरतः अकारस्तसोऽस्य भेदार्थः । तेनातःक्षेपेति त्यच् न भवति । परतो भवं पारतम् ।

अधराच्चात् ॥ ३ । ४ । ३९ ॥

अधरात् दिग्देशकालवृत्तेरतृतीयायुजः आद्भवति । दक्षि-णोत्तराभ्यां च । अधराद्रमणीयमधरादागतमधराद्वसति । एवं दक्षिणादुत्तरात् ।

पश्चोपरस्य दिगादेश्चाति ॥ ३ । ४ । ४० ॥

अपरशब्दस्य केवलस्य दिग्वाचिनः प्रकृतेराद्यवयवात्प-रस्य चाति प्रत्यये परे पश्चादेशो भवति । प्रत्ययोऽप्यत एव वचनादपरादिदिग्देशः कालो वा । पश्चाद्रमणीयम् । पश्चा-दागतः पश्चाद्वसति । दिगादेः दक्षिणापरादिग्देशो वा दक्षि-णपश्चाद्रमणीयम् । उत्तरपश्चाद्रमणीयमित्यादि ।

वोत्तरपदेऽर्धे ॥ ३ । ४ । ४१ ॥

अपरशब्दस्य केवलस्य दिग्वाचिनः समासाद्यवयवात्परस्य चार्धशब्द उत्तरपदे पश्चादेशो वा भवति । अपरमर्धमपरार्धं पश्चार्धम् । दक्षिणस्यापरस्यार्धं दक्षिणापरार्धं दक्षिणपश्चार्धम् । उत्तरापरार्धम् । उत्तरपश्चार्धम् ।

पुरःपुरस्तादवोऽवस्तादधोऽधस्तादुपर्युपरिष्टात् ॥३।४।४२॥

पुरस्तादयः शब्दाः दिग्देशकालवाचिनः अतृतीयायुग्विभक्त्यन्ता निपात्यन्ते । पुरशब्दस्य पुरो रमणीयं पुरः आगत पुरोवसति पुरस्ताद्रमणीयं पुरस्तादागतः पुरस्ताद्वसति । एवमपरस्य । अवोरमणीयमवस्ताद्रमणीयम् । एवमपरशब्दस्य त्रैरूप्यम् । अधरस्य अधोरमणीयमधस्ताद्रमणीयम् । ऊर्ध्वशब्दस्य उपरिरमणीयमुपरिष्टाद्रमणीयम् । उपरिष्टादिति द्वितीयस्तकारः "स्तात्ता" इति प्रत्याहारार्थः ।

दक्षिणाद्वा पञ्चम्याः ॥ ३ । ४ । ४३ ॥

दक्षिणशब्दात्पञ्चमीतृतीयावर्जितादयुग्विभक्त्यन्ताद्दिग्देशकालवृत्तेराप्रत्ययो भवति वा दक्षिणारमणीयम् । दक्षिणावसति । पक्षे दक्षिणतः दक्षिणाद्रमणीयम् । दक्षिणतो दक्षिणाद्वसति । अपञ्चम्या इति किम् ? दक्षिणतः दक्षिणादागतः ।

आहि दूरे ॥ ३ । ४ । ४४ ॥

दिक्शब्दो अवध्यपेक्षास्तत्रावधेः दूरे दिशि देशे वा वर्तमानादपञ्चमीतृतीयान्ताद् दक्षिणशब्दात् आ अहि प्रत्ययौ भवतः । ग्रामाद् दूरः दक्षिणा दिग् रमणीया देशो वा ग्रामाद् दक्षिणा रमणीयम् । दक्षिणाहि रमणीयम् । दक्षिणा वसति । दक्षिणाहि वसति ।

उत्तरात् ॥ ३ । ४ । ४५ ॥

उत्तरशब्दादपञ्चमीतृतीयान्तादाआहिप्रत्ययौ भवतो वा । उत्तरा उत्तराहि रमणीयं उत्तरा उत्तराहि वसति । पक्षे उत्तरतः उत्तरात् ।

एनोऽदूरे ॥ ३ । ४ । ४६ ॥

दिग्शब्दादवधेरदूरे दिग्देशकाले वर्तमानादपञ्चमीतृती-

यान्तात्स्वार्थे एनप्रत्ययो भवति । अस्मात्पूर्वा अदूरा दिग्रमणीया देशः कालो वा पूर्वेणास्य रमणीयं पूर्वेणास्य वसति । एवमपरेण दक्षिणेन उत्तरेण । अदूर इति किम् ? पुरो रमणीयम् ।

उलुगञ्चेः ॥ ३ । ३ । ४७ ॥

अंचत्यन्तात् दिग्वाचकशब्दाद् दिग्देशकाले वर्तमानादतृतीयायुग्विभक्त्यन्तात् यः प्रत्ययो विहितः धा एनो वा तस्य उलुग् भवति । प्राचि दिग्दूरा वा रमणीया देशः कालो वा प्राग्रमणीयम् । प्रागागतः । प्राग्वसति । एवं प्रत्यक् । अपाक् । उदक् ।

तीयशम्बबीजात्कृषौ कृञा डाच् ॥ ३ । ४ । ४८ ॥

तीयप्रत्ययान्तात् शम्बबीजाभ्यां सुबन्ताभ्यां कृञा योगे कृषिविषये डाच् भवति । द्वितीयाकरोति क्षेत्रं, द्वितीयं वारं कृषतीत्यर्थः । एवं तृतीयाकरोति । शम्बाकरोति क्षेत्रं पुनस्तिर्यग्कृषतीत्यर्थः । अन्ये क्षेत्रस्य बीजाकरोति वपतीत्यर्थः । डाचः चकारो "डाच्यूर्यादिति विशेषणार्थः ॥

संख्यादेर्गुणात् ॥ ३ । ४ । ४९ ॥

संख्यायाः आद्यवयवात्परो यो गुणशब्दस्तदन्तात्कृञा योगे कृषिविषये डाच् भवति । द्विगुणाकरोति त्रिगुणाकरोति क्षेत्रम् । क्षेत्रस्य द्विगुणं त्रिगुणं च विलेखनं करोतीत्यर्थः ।

सपत्रनिष्पत्रादतिपीडने ॥ ३ । ४ ५० ॥

सपत्रनिष्पत्राभ्यामतिपीडने गम्यमाने कृञा योगे डाच् भवति । पत्रं शरः, सहपत्रमनेनेति सपत्रः तं करोति सपत्राकरोति मृगम् । निर्गतं पत्रमस्मादिति निष्पत्रस्तं करोति निष्पत्राकरोति मृगम् । सपत्राकरोति निष्पत्राकरोति वृक्षम्

वायुः । अत्र पत्रशातनमेवातिपीडनम् । अन्यत्र सपत्रंकरोति वृक्षं जलसेचनात् । निष्पत्रं करोति वृक्षतलं भूमिशोधकः ।

मद्रभद्रान्मण्डने ॥ ३ । ४ । ५१ ॥

मद्रभद्राभ्यां मण्डने वर्तमानाभ्यां कृञा योगे डाज्भवति । मद्रं मण्डनं करोति मद्राकरोति शिरः । भद्राकरोति शिरः अन्यत्र भद्रंकरोति मद्रम् । मद्रभद्रौ माङ्गल्यवाचिनौ ।

प्रियसुखादानुकूल्ये ॥ ३ । ४ । ५२ ।

प्रियसुखाभ्यामानुकूल्ये वर्तमानाभ्यां कृञा योगे डाज्भवति । प्रियाकरोति सुखाकरोति देवदत्तम् । देवदत्तस्यानुकूल्यं करोति तमाराधयतीत्यर्थः । अन्यत्र सुखंकरोति । प्रियंकरोति तिक्तौषधपानम् ।

दुःखनिष्कूलशूलसमयसत्यात् प्रातिकूल्यनिष्कोषपाकयापनाशपथे ॥ ३ । ४ । ५३ ॥

दुःखादिभ्यो यथासंख्यं प्रातिकूल्यादौ विषये कृञा योगे डाज्भवति । दुखात्प्रातिकूल्ये दुःखाकरोति देवदत्तं देवदत्तस्य प्रातिकूल्यमाचरतीत्यर्थः अन्यत्र दुःखंकरोत्यनशनम् । निष्कुलान्निष्कोषे निष्कुलाकरोति दाडिमं निष्कुष्णाति । अन्तरवयवान् बहिष्करोतीत्यर्थः । अन्यत्र निष्कुलंकरोति शत्रुं शूलात पाके शूलाकरोति मांसम् । शूले । पचतीत्यर्थः । अन्यत्रशूलंकरोति कदनम् । समयात् यापनायां समयाकरोति तन्तुवायः अद्य श्वस्तेपटं दास्यामीति कालक्षेपं करोति । अन्यत्र समयं करोति सत्यात् अशपथे सत्या करोति वणिग्भांडे कार्षापणादानेन भाण्डं गृहीष्यामीति निश्चाययतीत्यर्थः । अन्यत्र सत्यं करोति शपथं करोतीत्यर्थः ।

अनेकाचोऽव्यक्तानुकरणात्कृभ्वस्तिभ्यां ड्विश्च ॥ ३।४।५४॥

अनेकाच् यस्य तस्मादव्यक्तवर्णस्यानुकरणात्कृञा भूअ-स्तिभ्यां च धातुभ्यां योगे डाच् भवति वा द्विश्चास्य प्रकृतिरुच्यते। पटत्करोति पटपटाकरोति । पटपटाभवति । पटपटास्यात् । दमत्करोति दमदमाकरोति । दमदमाभवति। दमदमास्यात्। सिमत्करोति। सिमसिमाकरोति । खटत्करोति खटखटाकरोति । अनेकाच इति किम् ? त्रट्करोति । खात्करोति, अव्यक्तानुकरणादिति किम् ? दशत्करोति । अत्र व्यक्तवर्णमनुकार्यम्। कृभ्वस्ति चेति द्वन्द्वात् द्वित्वमुत्तरत्र यथासंख्यार्थम्

कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः ॥ ३ । ४ । ५५ ॥

कृकर्मणो भ्वस्तिकर्तुश्च प्राक् पूर्वमतत्तत्वे गम्यमाने कृञ्भ्वस्तिभ्यां च योगे च्विप्रत्ययो भवति । प्रागशुक्लमिदानीं शुक्लं करोति शुक्लीकरोति पटम् । एवं शुक्लीभवति शुक्लीस्यात्पटः । कारकीकरोति दण्डीकरोति देवदत्तम् । घटीकरोतिमृदम् । पटीकरोति तन्तून् । पटीस्यात्तन्तवः । सङ्घीकरोति गाः । कर्मकर्तृभ्यामिति किम् ? प्रागदेवकुले इदानीं देवकुले करोति समीपीभवति, अभ्यांशीभवतीति ताच्छब्द्याद्भवति । अन्यत्र शुक्लं करोति शुक्लो भवति शुक्लः स्यात् । प्राग्ग्रहणं किम् ? अशुक्लं शुक्लं करोति एककालमतत्त्वेन भवति न ह्येको भावः कश्चिदेककालं शुक्लोऽशुक्लश्च देशभेदेन । कृभ्वस्तिभ्यामिति किम् ? अशुक्लं शुक्लं सम्पादयति ।

चेतोमनोरहोरजोऽरुश्चक्षुषो लुक् च्वौ ॥ ३ । ४ । ५६ ॥

चेतसादीनां च्वौ परे लुग्भवति । चेतीकरोति । चेतीभवति। चेतीस्यात्। एवं विचेतीकरोति। मनीकरोति। मनीभवति

मनीस्यात् । उन्मनीकरोति । विरहीकरोति । विरहीभवति । विरहीस्यात् । रजीकरोति । रजीभवति । रजीस्यात् विरजीकरोति । अरूकरोति । महारूकरोति । चक्षूकरोति । उच्चक्षूकरोति उच्चक्षूभवति । उच्चक्षूस्यात् । च्वाविति किम् ? मनःकरोति ।

इसुसोर्बहुलम् ॥ ३ । ४ । ५७ ॥

इस् उस् एतदन्तस्य च्वौ परे बहुलं लुग्भवति । सर्पीकरोति नवनीतम् । धनूकरोति वंशम् । बाहुलकान्न भवत्यपि सर्पिर्भवति । धनुर्भवति ।

ईग् हलः ॥ ३ । ४ । ५८ ॥

हलन्तस्य च्वौ परे बहुलमीगागमो भवति । दृषदीभवति शिला । समिदी भवति काष्ठम् । न भवति च दृषद्भवति समिद्भवति ।

व्याप्तौ सात् ॥ ३ । ४ । ५९ ॥

कृभ्वस्तिभ्यां योगे कर्मकर्तृभ्यां प्रागतत्तत्वे विषये सात्प्रत्ययो भवति । व्याप्तौ प्रागतत्तत्वस्य चेत् व्याप्तिः । सर्वात्मना द्रव्येणाभिसंबन्धो गम्यते । सर्वं काष्ठं प्रागनग्निमग्निं करोत्यग्निसात्करोति काष्ठम् । अग्निसात्भवति । अग्निसात्स्यात् । उदकसात्करोति लवणम् । व्याप्ताविति किम्? अग्निकरोति काष्ठम् ।

जातेस्सम्पदा च ॥ ३ । ४ । ६० ॥

कृभ्वस्तिभिः सम्पदा च योगे कृकर्मणो भ्वस्तिकर्तुस्सम्पदिकर्तुश्च प्रागतत्तत्वे जाते सामान्यस्य व्याप्तौ सात् भवति । अस्यां सेनायां सर्वं शास्त्रमग्निसात्करोति दैवम् ।

अग्निसात् भवति । अग्निसात्स्यात् । अग्निसात्संपद्यते । वर्षासु सर्वं लवणमुदकसात्करोति देव इति नेयम् ।

तत्राधीने ॥ ३ । ४ । ६१ ॥

तत्रेति सप्तम्यन्तादधीने आयत्तेऽर्थे कृभ्वस्तिसम्पद्भिर्योगे सात् भवति । राजन्याधीनं करोति राजसात्करोति । राजसात्भवति । राजसात्संपद्यते । राजसात्स्यात् । एवमाचार्यसात्करोतीति नेयम् ।

दिये त्रा च ॥ ३ । ४ । ६२ ॥

तत्रेति सप्तम्यन्ताद्देयोपाधिकात् अधीनेऽर्थे कृभ्वस्ति सम्पद्भिर्योगे त्रा प्रत्ययो भवति । राजन्याधीनं देयं करोति राजत्राकरोति द्रव्यम् राज्ञे दातव्यमिति यत्स्थापितं तदिदानीं राज्ञे ददातीत्यर्थः । एवं राजत्राकरोति । राजत्रास्यात् । राजत्रासम्पद्यते । गुरुत्रासंपद्यते । चकारः कृभ्वस्तिसम्पद्यनुकर्षणार्थः ।

देवादिभ्यः सप्तमीद्वितीयात् ॥ ३ । ४ । ६३ ॥

देवादिभ्यो: सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च स्वार्थे त्राप्रत्ययो भवति । देवेषु वसति देवत्रावसति । देवानागच्छति देवत्रागच्छति । मनुष्येषु वसति मनुष्यत्रावसति । मनुष्यानागच्छति । मनुष्यत्रागच्छति । इत्यादयः ।

बह्वल्पार्थात्कारकाच्छसीष्टानिष्टे ॥ ३ । ४ । ६४ ॥

बह्वर्थादल्पार्थाच्च कारकाभिधायिनः शब्दात्सुबन्तात् शस्प्रत्ययो भवति । यथाक्रममिष्टेनिष्टेऽच विषये । कारकं कर्मादि बहुधन ददाति बहुशोधनं ददाति । बहून् कार्षापणान्ददाति बहुशः कार्षापणान्ददाति विवाही । बहुभिर्भुक्तमतिथिभिः बहुशो भुक्तमतिथिभिः । बहुभ्योऽतिथिभ्यो ददाति

बहुशो अतिथिभ्यो ददाति बहुभ्यो ग्रामेभ्य आगच्छति । बहुशो ग्रामेभ्य आगच्छति । बहुषु ग्रामेषु वसति । बहुशो ग्रामेषु वसति । एवं भूरिशः, प्रभूतशः, गणशः । अल्पार्थात् अल्पं ददाति । अल्पशो ददाति । आद्धेऽल्पैर्भुक्तमतिशो भुक्तमिति नेयम् । एवं स्तोकशः । कतिपयशः । शसेरिकारः अन्तोदसीति प्रत्याहारार्थः ॥

संख्यैकाद्वीप्सायाम् ३ । ४ । ६५ ॥

संख्यावाचिन एकत्वावच्छिन्नार्थवाचिनार्थवाचिनश्च कारकात् । सुबन्ताद्वीप्सायां द्योत्यायां शसि भवति वाधिकाराद् द्विर्वचनमपि भवति । एकमेकं ददात्येकशो ददति । द्वौ द्वौ द्विशः । त्रिशः । तावच्छः । कतिशः । एकैकेन दीयते । एकशो दीयते द्वाभ्यां द्वाभ्यां द्विशः । त्रिशः । एकार्थवाचिनः माषं माषं देहि । माषशो देहि पादशः । पणशः । प्रस्थशः । क्रमेण क्रमेणागच्छति क्रमश आगच्छति । संख्यैकादिति किम्? माषौ माषौ ददाति । वीप्सायामिति किम् ? द्वौ ददाति माषं ददाति । तान्येकैकशः प्रच्छतीति वीप्सायां द्विरुक्तात्पूर्वेणाल्पार्थादिति शस् ।

संख्यादेः पादादिभ्यो दानदण्डे च वुच्लुक् च ॥३।४।६६॥

संख्यायाः प्रकृत्याद्यवयवात्परे ये पादादयस्तदन्ताच्छब्दात् दाने दण्डे वीप्सायां च विषये वुच् भवति तत्सन्नियोगे प्रकृतेश्च लुक् । लुग्ग्रहणं स्थानित्वबाधनार्थम् । द्वौ पादौ ददाति द्विपदिकां ददाति । त्रिपदिकां ददाति । द्विशतिकां त्रिशतिकाम् । द्विमोदकिकां त्रिमोदकिकाम् । दण्डे द्वौ पादौ दण्डितः द्विपदिकां दण्डितः त्रिपदिकाम् । द्विशतिकां त्रिशतिकाम् । वीप्सायां द्वौ द्वौ पादौ भुङ्क्ते द्विपदिकां भुङ्क्ते त्रिपदिकां द्विशतिकां द्विमोदकिकाम् ।

प्रकृते मयट् ॥ ३ । ४ । ६७ ॥

प्राचुर्येण प्राधान्येन वा कृतं प्रकृतं प्रकृतेऽर्थे वर्तमाना-त्स्वार्थे मयट् भवति । अन्नं प्रकृतमन्नमयं दधिमयं पूजामयं यवागूमयी यवागूमयं स्वार्थे कानां प्रत्ययानां प्रकृतिलिङ्गवच-नातिवृत्तिरपि भवति ।

अस्मिन् ॥ ३ । ४ । ६८ ॥

प्रकृतेऽर्थे वर्तमानादस्मिन्निति सप्तम्यर्थे मयट् भवति । अन्नं प्रकृतमस्मिन् अन्नमयं भोजनम् । घृतमयी पूजा ॥

तयोस्समूहवच्च बहुषु ॥ ३ । ४ । ६९ ॥

तयोः प्रकृते मयट् अस्मिन्नित्येतयोर्विषये वर्तमानात् बहुषु समूहवच्च प्रत्ययो भवति मयट् च । अपूपाः प्रकृताः अपूपमयमपूपिकम् । मोदकमयं मोदकिकम् । अपूपाः प्रकृता अस्मिन्नापूपिकमापूपमयं पर्व । गणिका प्रकृताऽस्यां गाणिक्या गाणिकमयी यात्रा । आश्वीया अश्वमयी यात्रा ।

निन्द्ये पाशप् ॥ ३ । ४ । ७० ॥

निन्द्येऽर्थे वर्तमानात्स्वार्थे पाशप् भवति । निन्द्यो वैया-करणः वैयाकरणपाशः । तार्किकपाशः । पकारः पुंभावार्थः कुमारपाशा किशोरपाशा कुमारादयो वयोवचना न पाशान्ता इति न ङी ।

तिङश्च प्रकृष्टे तमप् ॥ ३ । ४ । ७१ ॥

तिङन्तात्सुबन्ताच्च प्रकृष्टे प्रकर्षवत्यर्थे वर्तमानात्स्वार्थे तमप्भवति । तिङः सर्वे इमे पचन्ति अयमेषां प्रकृष्टं पचति पचतितमां देवदत्तः । पचतस्तमाम् । पचन्तितमाम् । सुपः सर्वे इमे शुक्ला अयमेषां प्रकृष्टः शुक्लः शुक्लतमः । आढ्यतमः

सुकुमारतमः । साधकतमः । प्रकृष्टे प्रकर्षे पुनः प्रकर्षप्रत्ययः । तद्यथा युधिष्ठरः श्रेष्ठतमः कुरूणाम् । तरबन्तात् तरप् न भवति अनभिधानात् । पूर्वपदातिशये पूर्वपदात् बहुव्रीहेश्चातिशायिकः प्रत्ययः । सूक्ष्मतमवस्त्रः सूक्ष्मवस्त्रतमः पुरुष इति उत्तरपदातिशये तूत्तरपदादेव न बहुव्रीहेः बह्वाढ्यकतमः न बह्वाढ्यकतमकः इति । पकारः पुम्भावार्थः । शुक्लतमा शाटी ।

द्वयोर्विभज्ये च तरप् ॥ ३ । ४ । ७२ ॥

द्वयोस्तद्गुणयोर्मध्ये यः प्रकृष्टस्तस्मिन् विभज्ये च विभक्तव्ये प्रकृष्टेऽर्थे वर्तमानात्तिङन्तात्सुबन्ताच्च तरप् भवति । द्वौ इमौ पचतः अयमनयोः प्रकृष्टं पचति पचतितराम् । पठतितराम् । पचतेतराम् । अधीतेतराम् । द्वाविमौ पटू अयमनयोः प्रकृष्टं पटुतरः । सुकुमारतरः । पाचकतरः । गोतरः । यस्त्विमं वहति शिरं भारं च । विभक्तव्यः सांकाश्यकेभ्यः पाटलीपुत्रकाः । पचन्तितराम् । पठन्तितराम् । सांकाश्यकेभ्यः पाटलीपुत्रका आढ्यतराः । विभज्यग्रहणमद्वित्वार्थम् ।

तौ ङः ॥ ३ । ४ । ७३ ॥

तौ तकारादी तरप् तमपौ ङ.संज्ञौ भवतः । श्रेयसितरा । श्रेयसितमा । ताविति किम् ? पटिष्ठः । पटीयसी ।

अव्ययैत्किंतिङोऽसत्वे तयोर्ङाम् ॥ ३ । ४ । ७४ ॥

अव्ययेभ्य एकारान्तात् किम्शब्दात् तिङन्ताच्च परयोस्तयोस्तरप्तमपोः ङामादेशो भवति न चेत्तौ सत्वे द्रव्ये प्रकृष्टे वर्तेते । उच्चैस्तराम् । उच्चैस्तमां जल्पति । नीचैस्तरां नीचैस्तमां कथयति । पूर्वाह्णेतरां पूर्वाह्णेतमां भुङ्क्ते । अपराह्णेतराम् अपराह्णेतमामागच्छति । एद्ग्रहणादत्र काले सत्वेऽपि

ङाम् । किम् किन्तमां पचति किन्तरां पचति । तिङ् जल्पतितरां जल्पतितमाम् । असत्वे इति किम्? उच्चैस्तरो वृक्षः । किंतरं दारु ।

गुणाङ्गाद्वेष्ठेयसू ॥ ३ । ४ । ७५ ॥

गुणमभिधायो यः शब्दो द्रव्ये वर्तते तस्माद् गुणाङ्गात्तयोस्तरमपोः यथासंख्यमिष्ठ ईयसु इत्यादेशौ भवतः । पटिष्ठः पटुतमः पटीयान् पटुतरः । लघिष्ठः लघुतमः लघीयान् लघुतरः । अङ्गग्रहणं किम्? शुक्लतरं शुक्लतमं रूपम् ।

प्रशस्ते रूपप् ॥ ३ । ४ । ७६ ॥

तिङन्तात्सुबन्ताच्च प्रशस्तेऽर्थे वर्तमानात् रूपप् प्रत्ययो भवति । प्रशस्तं पचति पचतिरूपम् । पचतोरूपम् । पचन्तिरूपम् । प्रशस्तो वैयाकरणः वैयाकरणरूपः । पंडितरूपः प्रकृत्यर्थस्य वैस्पष्ट्यं प्रशस्तता । तेनेहापि वृषलरूपोऽयमपि पलाण्डुना सुरां पिबेत्। चोररूपोऽयमक्षिस्थमञ्जनं हरेत्। पटुतररूपः। पटुतमरूपः

ईषदसमाप्तेऽङादेःकल्पब्देश्यब्देशीयर् ॥ ३।४।७७ ॥

तिङन्तात्सुबन्ताच्च ङाद्यन्तवर्जितादीषदसमाप्तेऽर्थे वर्तमानात्कल्पप् देश्यप् देशीयर्प्रत्यया भवन्ति। ईषदसमाप्तंपचति पचतिकल्पं पचतिदेश्यं पचतिदेशीयम् । पचतः कल्पम्। पचन्तिकल्पम् । तिङन्ताद् रूपादिक्रियाविशेषणं भवति । अस्मात्तिङ्ग्रहणादन्यस्तद्धितः सुबन्तादेव ईषदसमाप्तःपटुः पटुकल्पः पटुदेश्यः पटुदेशीयः । कारककल्पः । भुक्तकल्पम् । ईषदसमाप्तो गुणो गुणकल्पाद्राक्षा । पयस्कल्पा यवागूः । तैलकल्पा प्रसन्ना । अङादेरिति किम्? तमादिभ्यो न भवति कल्पादिभ्य एव तमादयः । पटुकल्पतमः । पटुकल्पतरः । पटुदेश्यतमः पटुकल्पतररूपः। रूपवन्तोङादिरेफः अरित्स्वार्थे इति पुम्भावार्थः । स्त्रीप्रदेशीयाः। केचित् देश्यपः पकारं नेच्छन्ति तेषां स्त्री

प्रोदेश्या इति भवति ।

सुपः प्राग्बहुर्वा ॥ ३ । ४ । ७८ ॥

ईषदसमाप्तौ वर्तमानात्सुबन्तात्प्राक्पुरस्ताद्बहुप्रत्ययो भवति वा न परस्तात् । ईषदसमाप्तः पटुः बहुपटुः । बहुमृदुः । बहुभुक्तम् । बहुपयो यवागूः । कल्पबाद्यन्तं विशेष्यलिङ्गसंख्यं बहुपूर्वं तु प्रकृतिलिङ्गसंख्यमेव स्वभावात् वचनात् । कल्पबादयोऽपि भवन्ति । सुप इति किम् ? तिङन्तात् मा भूत् ।

नङादेःकपोऽछिन्नादिभ्यः ॥ ३ । ४ । ७९ ॥

छिन्नादिवर्जितात् यः कप्प्रत्ययस्तदन्तात् ङादिप्रत्ययो न भवति ॥ अयमेषां प्रकृष्टपटुकः अयमनयोः प्रकृष्टपटुकः । प्रशस्त-पटुकः । ङादेस्तु को भवत्येव अयमेषां पटुतमकः । अयमनयोः पटुतरकः । पटुरूपकः । पटुकल्पकः । पटुदेश्यकः । अछिन्ना-दिभ्य इति किम् ? कुत्सितः अल्प अज्ञातो वा छिन्नः छिन्नकः अयमेषां छिन्नकतमः । अयमनयोः छिन्नकतरः । छिन्नकरूपः । छिन्नककल्प इति प्रयोगगम्याः ।

अनत्यन्ते ॥ ३ । ४ । ८० ॥

अनत्यंतेऽर्थे यः कप् तदन्तात् ङादिर्न भवति । अनत्यन्त-छिन्नं छिन्नकम् । इदमेषां प्रकृष्टं छिन्नकम् । इदमनयोः प्रकृष्टं छिन्नकम् । ङादेः को भवत्येव छिन्नतमकम् । छिन्नतरकम् ।

प्राक्कात्कप् ॥ ३ । ४ । ८१ ॥

"लोहितान्मणौ कः" इति वक्ष्यते । इत ऊर्ध्वं ततः प्राक् कप् प्रत्ययोऽधिकृतो वेदितव्यः । कुत्सित- अल्पोऽज्ञातो वा अश्वः अश्वकः । गर्दभकः । पित्वात् कुत्सितादरङ्गादिका ।

तिङ्सर्वादेरक्स्वन्त्यात्पूर्वोऽक् ॥ ३ । ४ । ८२ ॥

तिङन्तस्य सर्वादीनां चाक्षु अचां मध्ये योऽन्त्योऽच् त-

स्मात्पूर्वोऽक्प्रत्ययो भवति । प्राक्कात् पपवादः । कुत्सितमल्पमज्ञातं वा पचति पचतकि, पचतकः, पचन्तकि । सर्वके । विश्वके। यकत्पिता । तकत्पिता । ककिम्पिता । त्वकत्पिता । परमत्वकत्पिता । परमसर्वके ।

युष्मदस्मदोः सुपोऽसोभि ॥ ३ । ४ । ८३ ॥

युष्मदस्मदोरक् सुबन्तस्यान्त्यात्पूर्वो भवति । असोभि न चेत् युष्मदस्मद्भ्यां सकार ओकारो भकारो वा परो भवति । युष्मदस्मदोरक्ष्वन्त्यात् पूर्वत्वापवादः । त्वयका । मयका । त्वयकि । मयकि । युष्माककं । अस्माककं । परमत्वयका। परमसयका । असोभि इति किम्? युष्माकासु । अस्माकासु युवकयोः । आवकयोः । युवकाभ्यामावकाभ्यां । युष्माकाभिः । अस्माकाभिः ।

को दिश्चाव्ययस्य ॥ ३ । ४ । ८४ ॥

अव्ययस्य योऽक्ष्वन्त्याच् तस्मात्पूर्वः अक् भवति । यत्तु-ककारान्तमव्ययं तस्याक् सन्नियोगे दकारश्चान्त्यादेशो भवति कुत्सितमल्पमज्ञातं वा उच्चैः । उच्चकैः । नीचैः । नीचकैः दिक् । धकिक्, पृथक्, पृथकत् ।

तूष्णीकाम् ॥ ३ । ४ । ८५ ॥

तूष्णीमः काम् निपात्यते । अकोऽपवादः । कुत्सितमल्पमज्ञातं वा तूष्णीम् तूष्णीकामास्ते । तूष्णीकां तिष्ठति ।

कुत्सिताल्पाज्ञाते ॥ ३ । ४ । ८६ ॥

कुत्सितं गर्हितमल्पं महत् प्रतियोगि अज्ञातं सत्वादिना केनचिद्धर्मेणाज्ञातमेतदुपाधिकेऽर्थे वर्तमानात् यथायोग्यं कबादयः प्रत्यया भवन्ति । कुत्सितोऽल्पोऽज्ञातो वा अश्वः अश्वकः । घृतकम् । पचतकी । सर्वके । उच्चकैः । तूष्णीकाम् । कुत्सितकः । अल्पकः । अज्ञातकः ।

अनुकम्पातन्नीत्योः ॥ ३ । ४ । ८७ ॥

अनुकम्पा कारुण्येनानुग्रहः तस्या नीतिः सन्नीतिः । अनुकम्पायुक्ता नीतिरित्यर्थः । नीतिः सामादिप्रयोगस्तत्रानुकम्पायां सामोपाप्रदाने एव, न भेददण्डौ, तयोरनुकम्पायामयोगादनुकम्पायामनुकम्पायुक्तायां च नीतौ गम्यमानायां यथायोगं कबादयः प्रत्यया भवन्ति । पुत्रकः, वत्सकः, बालकः, बुभुक्षितकः । ज्वरितकः । पचतकि, स्वपितकि । सन्नीतौ पुत्रक उत्सङ्गके उपविश, कर्दमके नासि दिग्धकः । वत्सक तूष्णींकां तिष्ठ, हन्त ते तिलकाः हन्त ते गुडकाः, एहकी । अध्वको ।

वह्वचो नृनाम्नोऽजातेष्ठघेला वा ॥ ३।४।८८ ॥

बह्वचो नृनाम्नो मनुष्यनामधेयाच्छब्दात् ठघेलाः प्रत्यया वा भवन्ति । अनुकम्पायां गम्यमानायामजातेर्न चेत्स शब्दो जातिशब्दो भवति । अनुकम्पितो देवदत्तः देविकः । देवियः । देविलः । देवदत्तकः । जिनिकः । जिनियः । जिनिलः । जिनदत्तकः । नृनाम इति किम् ? सुशिमकः । अजातेरिति किम् ? महिषकः । वराहकः । बह्वच इति किम् ? नामकः गुप्तकः ।

वुजधौ चोपादेः ॥ ३ । ४ । ८९ ॥

बह्वचो नृनाम्नो जातेः उप इत्येवमादेर्वुच् अधप्रत्ययौ, ठघेलाश्च वा भवन्ति । अनुकम्पायामनुकम्पित उपेन्द्रदत्तः उपकः । उपधः । उपिकः । उपियः । उपिलः । उपेन्द्रदत्तकः ।

उकोऽचो लुक् प्रकृत्या च ॥ ३ । ४ । ९० ॥

उगन्तात्परस्यानुकम्पायामज़ादेः प्रत्ययस्यादेर्लुक् भवति । तच्चोगन्तं प्रकृत्या भवति न विकारमापद्यते । गुरुदत्तः गुरुकः । गुरुयः । गुरुलः । मातृकः । मातृयः । मातृलः । प्रकृतिभावाद्वादेशरीभावदीर्घा न भवन्ति ।

श्लुच्युत्तरपदस्य ष्कन् ॥ ३ । ४ । ८१ ॥

बह्वचो नृनाम्नो यदुत्तरपदं तस्य श्लुग्वेति श्लुचि सत्यततः ष्कन् प्रत्ययो भवत्यनुकम्पायाम् । देवदत्तः देवः अनुकम्पितो । देवः देवकः । जिनकः । देवदत्ता देवी । जिनदत्ता जिना । अनुकम्पिता देवी देवका: । जिनका: । उत्तरपदस्येति: किम् ? देवदत्ता दत्ता अनुकम्पिता दत्ता दत्तिका । नकार इच्चा-पुंसोऽनित्क्याप्यासुप इति पर्युदासार्थः ।

श्लुक् चाजिनात् ॥ ३ । ४ । ८२ ॥

अजिनान्तात् समासात् नृनाम्नः ष्कन् भवति अनुकम्पायाम् । कआदीनामपवादः । उत्तरपदस्य च श्लुक् । व्याघ्राजिनो महाव्याघ्राजिनो वा नाम मनुष्यः । सोऽनुकम्पितः व्याघ्रकः सिंहकः वृककः । व्याघ्रका । सिंहका । वृकका ॥

अषडेकाच्यपूर्वपदस्याचि ॥ ३ । ४ । ८३ ॥

षड्वर्जितं यस्यैकाच् पूर्वपदं तस्य यदुत्तरपदं तस्यानुकम्पायां विहितेऽजादौ प्रत्यये परतः श्लुग्भवति । अनुकम्पितो वागाशीः वाग्दत्तः । वाचिकः । वाचियः । वाचिलः । षट् प्रतिषेधः किम् ? षडङ्गुलिः । षडिकः । षडियः । षडिलः । अत्र द्वितीयादचः श्लुचि “ एः ” इति लुचः स्थानिवद्भावापदत्वस्यानिवृत्तेर्डत्वं न निवर्तते ।

द्वितीयादचः ॥ ३ । ४ । ८४ ॥

अनुकम्पायां विहिते ऽजादौ प्रत्यये परतः प्रकृतेर्द्वितीयादचः उत्तरपदस्य शब्दरूपस्य श्लुग्भवति । अनुकम्पितो देवदत्तः देविकः । देवियः । देविलः । उपेन्द्रदत्तः उपधः । उपकः । उपिकः । उपियः । उपिलः । वायुदत्तः वायुकः । वायुयः । पितृदत्तः पितृकः । पितृयः ।

तेनैचः ॥ ३ । ४ । ८५ ॥

अनुकम्पायां विहितेऽजादौ प्रत्यये परतः प्रकृतेर्द्वितीयेनाचा सह तस्मादुत्तरपदस्य श्लुग्भवति यदि स द्वितीयो चेद् भवति । अनुकंपितः अहोधः अहिकः । अहियः । अहिलः । अमोघः । अनिकः । अमियः । अनिलः । कपोतलोमः कपिकः कपियः । कपिलः ।

शेवलसुपरिविशालवरुणार्यमादेस्तृतीयात् ॥ ३।४।८६ ॥

शेवालाद्यादेर्मनुष्यनाम्नोऽनुकम्पायामजादौ प्रत्यये परतः तृतीयादच उत्तरस्य श्लुग्भवति । अनुकम्पितः शेवलदत्तः शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । सुपरियः । सुपरिलः । विशालिकः । विशालियः । विशालिलः । वरुणिकः । वरुणियः वरुणिलः । अर्यमिकः । अर्यमियः । अर्यमिलः ।

क्वचित्तुर्यात् ॥ ३ । ४ । ८७ ॥

अनुकम्पायां विहितेऽजादौ प्रत्यये परे क्वचित्तुर्याच्चतुर्थादच उत्तरस्य श्लुक् भवति । अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिशर्मा वा बृहस्पतिकः । बृहस्पतियः । बृहस्पतिलः । एवं प्रजापतिकादिः । क्वचित् पदिति प्रयोगानुस्मरणार्थमुपेन्द्रदत्तस्य उपक इत्यादि ।

पूर्वपदस्य वा ॥ ३ । ४ । ८८ ॥

पूर्वपदस्यानुकम्पायामजादौ प्रत्यये परे क्वचित् श्लुग्वा भवति । अनुकम्पितो देवदत्तः दत्तिकः । दत्तियः । दत्तिलः । वावचनात् देविकः । देवियः । देविलः ।

ह्रस्वे ॥ ३ । ४ । ८९ ॥

ह्रस्वेऽर्थे वर्तमानात् शब्दात् यथायोगं कबादयो भवन्ति ।

ह्रस्वः पटः पटकः । पुरुषकः । ह्रस्वं पचति पचतकि । जल्पतकि । ह्रस्वाः सर्वे सर्वके । विश्वके । वंशकः । नलकः चरकः । वेणुकः । इत्यादि नामस्वपि ह्रस्वत्वयोगात् ह्रस्वत्व-मस्त्येव ।

कुटीशुण्डाद्रः ॥ ३ । ४ । १०० ॥

कुटीशुण्डाभ्यां ह्रस्वेऽर्थे रो भवति । ह्रस्वा कुटी कुटीरः । शुण्डारः ।

शम्या रुरौ ॥ ३ । ४ । १०१ ॥

शमी शब्दात् ह्रस्वेऽर्थे रुरौ भवतः । ह्रस्वा शमी शमीरुः शमीरः ।

कुतुपः ॥ ३ । ४ । १०२ ॥

कुतू शब्दात् ह्रस्वेऽर्थे डुपा निपात्यते । ह्रस्वा कुतूः कुतुपः चर्ममयं स्नेहभाजनम् ।

कासूगोण्याः ष्तरट् ॥ ३ । ४ । १०३ ॥

कासूगोणीभ्यां ह्रस्वेऽर्थे ष्तरट् भवति । ह्रस्वा कासूः कासूतरी । ह्रस्वा । गोणी गोणीतरी । कासूतरः । गोणीतरः इति पुल्लिङ्गमपीत्येके । कासूः शक्तिर्नामायुधम् । गोण्या वपनम् । षित्वमुत्तरार्थम् ।

वत्सोक्षर्षभाश्वात् ह्रासे ॥ ३ । १०४ ॥

वत्सादिभ्यः स्वार्थे ष्तरट् भवति ह्रासेऽपचये गम्यमाने । ह्रसितो वत्सः वत्सतरः । वत्सः प्रथमवयास्तस्य ह्रासो द्वितीयवयः-प्राप्तिः । ह्रसित उक्षा द्वितीयवयास्तरुणस्तस्य ह्रासः तृतीयवयः-प्राप्तिः । ह्रसित ऋषभः ऋषभतरः । ऋषभोनड्वान् बलीयान् । अस्य ह्रासो भारवहने मन्दशक्तिता । ह्रसितोश्वः । अश्वतरः । अश्वस्याऽश्वायां जातो अश्वःतस्यह्रासो गर्धभपितृकता

आशु गमानादश्वः तस्य । ह्रासो गमनेमन्दिमेत्येके । सर्वथाऽश्वतरशब्दो जातिशब्दः । स्त्रियामश्वतरी वत्सतरी ।

यत्तत्किमन्याद्द्वयोर्निर्धार्ये डतरः ॥ ३ । ४ । १०५ ॥

यदादिभ्यो द्वयोरेकस्मिन्निर्धार्ये वर्तमानेभ्यो डतरप्रत्ययो भवति । समुदायादेकदेशस्य प्रकृत्या निष्कृष्य धारणं निर्धारणं । यतरो भवतोः कठः पटुर्गन्ता दण्डी देवदत्तो वा ततर आगच्छतु । कतरो भवतोः कठः पटुर्वा । अन्यतरो भवतोरागच्छतु महान् वाधिकारात्प्रत्ययो न भवत्यपि । यो भवतोः पटुः स आगच्छतु ।

वैकात् ॥ ३ । ४ । १०६ ॥

एकशब्दात् द्वयोरेकस्मिन्निर्धार्ये डतरो वा भवति । एकतरो भवतोः कठः पटुर्वा । वावचनमगर्थम् । एककः महावाधिकारान्न भवत्यपि—एको भवतोः पटुः पण्डितः ।

बहूनां प्रश्ने डतमश्च ॥ ३ । ४ । १०७ ॥

यत्तत्किमन्येभ्यो बहूनां मध्ये निर्धारे वर्तमानेभ्यः प्रश्नविषये डतमः प्रत्ययो भवति डतरश्च वा । यतमो यतरो वा भवतां कठम्, ततमः ततरो वा आगच्छतु । कतमः कतरो वा भवतां कठः । बहुष्वासीनेषु कश्चित् कंचित् प्रच्छति । कतमो देवदत्तः, कतरो देवदत्तः ॥ अन्यतमोऽन्यतरो वा भवतां कठः । वावचनात् यको भवतां कठः सकः आगच्छतु । महावाधिकारात्यो भवतां कठः स आगच्छतु ॥

एकात् ॥ ३ । ४ । १०८ ॥

एकशब्दाद्बहूनामेकस्मिन्निर्धार्ये डतमो वा भवति । एकतमो भवतां कठः पटुर्गन्ता वाः एककः एक ः।

क्ताद् ङादेश्चानत्यन्ते ॥ ३ । ४ । १०८ ॥

क्तान्तात्केवलात् ङादेस्तमाद्यन्ताच्चानत्यन्ते वर्तमानात्कप् भवति । अनत्यन्तं भिन्नं भिन्नदेवदत्तः अन्यतमोऽन्यतरो वाभवतां कठः । वावचनात् कं भिन्नका घटौ । छिन्निका रज्जुः । ङाद्यन्तात्कात्—अनत्यन्तं भिन्नतमं भिन्नतमकं भिन्नतरकं भिन्नरूपकं भिन्नकल्पकम् ।

न सामि वचने ॥ ३ । ४ । ११० ॥

सामि वचने उपपदेऽनत्यन्ते वर्तमानात् क्तान्तात्केवलात् ङादेश्च कप् न भवति । साम्यर्धं नेममनत्यन्तं भिन्नं कृतं भुक्तं पीतं भिन्नतरम् । भिन्नतमम् ।

लोहितान्मणौ कः ॥ ३ । ४ । १११ ॥

लोहितशब्दात्सुबन्तात् मणौ वर्तमानात्को वा भवति । लोहित एव लोहितको मणिः। लोहितो मणिः । कप्प्रकृते वचनं "नङादिः कपोच्छिन्नादिभ्यः" इति प्रतिषेधनिवृत्यर्थं । लोहितकतमो मणिः । लोहितकतरो मक्षिकोपेन पुम्भावः निवृत्यर्थं च लोहितिका मणिः लोहितिका शाटी । कृमिरागेण लोहितिका मणिः । लोहितिका शाटीत्याङ् पक्षे ।

रक्तानित्यवर्णयोः कालाच्च ॥ ३ । ४ । ११२ ॥

रक्ते द्रव्यान्तरेण लाक्षादिना वर्णान्तरमापादितेऽनित्ये च वर्णे वर्तमानात् लोहितशब्दात्कालशब्दाच्च कप्रत्ययो वा भवति । रक्ते-रोहितकः कालकः पटः । अनित्ये वर्णे लोहितकमक्षिको पेन कालकं मुखं वैलक्ष्येण । वाधिकारात् लोहितः कालः पटः । लोहितं कालं मुखम् ॥

शीतोष्णादृतौ ॥ ३ । ४ । ११३ ॥

शीतोष्णाभ्यांमृतौ वर्तमानाभ्यां स्वार्थे को वा भवति ।

शीत एव शीतकः । उष्ण एव उष्णक ऋतुः । अन्यत्र शीतो वायुः । उष्णः स्पर्शः ॥

लूनविहानात्पशौ ॥ ३ । ४ । ११४ ॥

लूनविहानाभ्यां पशौ वर्तमानाभ्यां स्वार्थे को वा भवति । लून एव लूनकः विहान एव विहानकः पशुः । अन्यत्र लूनः विहानः पाशः ॥

तनुपुत्राणुस्नातबृहतीशून्यात्सूत्रकृत्रिमनिपुण समाप्तवेदाच्छादनरिक्ते ॥ ३ । ४ । ११५ ॥

तन्वादिभ्यो यथासंख्यं सूत्रादिष्वर्थेषु को भवति ॥ तनोः सूत्रे तनुक सूत्रं तन्वेवान्यत् । पुत्रात्कृत्रिमे पुत्रकः कृत्रिमः अन्यत रसः पुत्रः । अणोर्निपुणे अणुकः निपुणः अन्योऽणुः । स्नातात् समाप्तवेदे स्नातकः । यस्य समाप्तो वेदः स उच्यते । अन्यो नद्यां स्नातः । बृहत्या आच्छादने बृहती शाटी बृहतिका । अन्यत्र बृहती छन्दः । बृहतोः ओषधिः । शून्याद्रिक्ते शून्यकः रिक्तः तुच्छ इत्यर्थः । शून्योऽन्यः ।

कुमारीक्रीडनेयोऽव्यादिभ्यः ॥ ३ । ४ । ११६ ॥

कुमारीणां यानि क्रीडनानि तद्वाचिभ्यो ईयसन्तेभ्योऽपि वी एत्येवमादिभ्यश्च स्वार्थे को वा भवति । कुमारी क्रीडनात् कन्दुकः उत्कण्ठः । ईयसः श्रेयानेव श्रेयस्कः ज्यायस्कः । अव्यादेः अविरेव अविकः । याव एव यावकः । मणिक इत्यादयः ॥

तीयाट्टीकणविद्यायाम् ॥ ३ । ४ । ११७ ॥

तीयप्रत्ययान्तात्स्वार्थे टीकण् वा भवति । न चेत् तत्तृतीयान्तं विद्यायां वर्तते ॥ द्वितीयं द्वैतीयकम् । तृतीयं तातीयीकम् । द्वैतीयीकी शाटी ॥ अविद्यायामिति किम् ?

द्वितीया तृतीया विद्या ॥

ञोऽष्टमाद्भागे ॥ ३ । ४ । ११८ ॥

अष्टमशब्दात्भागेंऽशे वर्तमानात्स्वार्थे ञो वा भवति अष्टम एवाष्टमो भागः । अन्यत्र अष्टमो जिनश्चन्द्रप्रभः ।

षष्ठात् ॥ ३ । ४ । ११९ ॥

षष्ठात् भागे ञो वा भवति ॥ षष्ठ एव षाष्ठो भागः । योगविभाग उत्तरार्थः ॥

माने कश्च ॥ ३ । ४ । १२० ॥

मीयते येन तन्मानं तस्मिन् माने विभागे वर्तमानात् षष्ठशब्दात् कश्च ञश्च प्रत्ययौ वा भवतः । षष्ठ एव षष्ठकः षाष्ठो भागः । मानं चेत् अन्यः षष्ठ एव षोष्ठो भागः ॥

एकादाकिंश्चासहाये ॥ ३ । ४ । १२१ ॥

एकशब्दादसहायार्थवाचिनः आकिन् भवति कश्च वा। एक एव एकाकी । एककः । एकाकिभिर्जितम् । अन्यत्रैके आचार्याः । एकः द्वौ बहवः ॥

तिलात्पिञ्जपेजौ निष्फले ॥ ३ । ४ । १२२ ॥

निष्फलेऽर्थे वर्तमानात् तिलशब्दात् पिञ्जपेजौ भवतः । निष्फलः तिलः तिलपिञ्जः । तिलपेजः ॥

मृदस्तिकः ॥ ३ । ४ । १२३ ॥

मृत्शब्दात्स्वार्थे तिको वा भवति । मृदेव मृत्तिका ।

सस्नौ प्रशस्ते ॥ ३ । ४ । १२४ ॥

मृदः प्रशस्ते ऽर्थे सस्नौ भवतः । प्रशस्ता मृत् मृत्सा मृत्स्ना ॥

बहुलङ्कृतोर्द्वयसङ्मात्रट् ॥ ३ । ४ । १२५ ॥

घत्वन्तात्स्वार्थे द्वयसङ् मात्रट् बहुलं भवतः । यावदेव यावद्द्वयसम् । यावन्मात्रम् । तावद्द्वयसं तावन्मात्रम् । बहुलग्रहणं प्रयोगानुसरणार्थः ॥

वर्णात्कारः ॥ ३ । ४ । १२६ ॥

वर्णवाचिनः कारप्रत्ययो भवति स्वार्थे । अ एव अकारः । ककारः । बहुलमित्येव तेनाभिनिष्टान इत्यादौ न भवति । एवकार इत्यादौ च भवति । रेफ "इति रियः फ" इति सिद्धम् । रकार इत्यपि दृश्यते ॥

भेषजादिहोत्रादेवेभ्यष्ट्यण्छतल् ॥ ३ । ४ । १२७ ॥

भेषजादिभ्यो होत्रादेवाभ्यां च स्वार्थे यथासंख्यं ष्यण् छतलो वा भवन्ति । भेषजमेव भैषज्यम् । अनन्त एव आनन्त्यम् । इतिहेत्येव ऐतिह्यम् । इतिहेतिनिपातसमुदायः उपदेशपारंपर्ये वर्तते । चत्वार एव वर्णाः चातुर्वर्ण्यम् चातुर्वैद्यम् । त्रैलोक्यम् । षाड्गुण्यम् । शीलमेव शैलीयमाचार्यस्य । होत्रैव होत्रीयम् । देव एव देवता ।

नामरूपभागाद्धेयः ॥ ३ । ३ । १२८ ॥

नामादिभ्यः स्वार्थे धेयो वा भवति । नाम एव नामधेयम् । रूपमेव रूपधेयम् । भाग एव भागधेयम् ।

मर्तादिभ्यो यः ॥ ३ । ४ । १२९ ॥

मर्तादिभ्यः स्वार्थे यो वा भवति । मर्तः । मर्त्यः । एवं सूरः । सूर्यः । क्षेमः । क्षेम्यः । भाग्यम् । आठ्यम् । गम्यम् । इत्यादिप्रयोगगम्याः ॥

नवात् ततनखञ्च नू च ॥ ३ । ४ । १३० ॥

नवशब्दात्स्वार्थे ततनखञ्च वा भवति यश्च तत्सन्नियोगे

च नवस्य नू इत्यादेशः । नवः नूतम् । नूतनम् । नवीनम् । नव्यम् ॥

प्रात्पुराणे ॥ ३ । ४ । १३१ ॥

प्रशब्दात्पुराणेऽर्थे वर्तमानात्स्वार्थे त्नतनखा भवन्ति वा । प्रगतं कालेन पुराणम् । प्रत्नम् । प्रतनम् । प्रीणम् ।

प्रज्ञादिभ्योऽण् ॥ ३ । ४ । १३२ ॥

प्रज्ञादिभ्यः स्वार्थे अण्वा भवति । प्रजानातीति प्रज्ञः । प्रज्ञ एव प्राज्ञी कन्या । प्रज्ञाऽस्यास्तीति प्राज्ञा कन्या । वणिगेव वाणिज्य इत्यादयः ।

कृष्णौषधिश्रोत्रान्मृगभेषजशरीरे ॥ ३ । ४ । १३३ ॥

कृष्णादिभ्यो यथासंख्यं मृगादिषु वर्तमानेभ्यः स्वार्थे अण् भवति । कृष्ण एव कार्ष्णः मृगः । कृष्णोऽन्यः । ओषधिरेव औषधं भेषजम् । ओषधिरन्या । श्रोत्रात् शरीरे श्रोत्रमेव श्रौत्रम् शरीरम् । श्रोत्रमन्यत् ।

कर्मणस्सन्दिष्टे ॥ ३ । ४ । १३४ ॥

सन्दिष्टेऽर्थे वर्तमानात्कर्मशब्दादण् भवति । सन्दिष्टं कर्म कार्मणं करोति संदिष्टं कर्म करोतीत्यर्थः । वशीकरणमपि कार्मणमुच्यते । अन्यत्र कर्म करोतीत्येव ॥

वाचष्ठण् ॥ ३ । ४ । १३५ ॥

वाक्शब्दात् सन्दिष्टेऽर्थे ठण् भवति ॥ सन्दिष्टा वाक् वाचिकम् कथयति संदिष्टां वाचं कथयतीत्यर्थः । अन्यत्र चित्रा वाक् देवदत्तस्य । वाधिकारेऽपि नित्य एव प्रत्ययोऽन्यथा तद्विशेषाप्रतीतेः ॥

विनयादिभ्यः ॥ ३ । ४ । १३६ ॥

विनयादिभ्यः स्वार्थे ठण् भवति । विनय एव वैनयि-

कम् । समय एव सामयिकमित्यादयः ।

औपयिकम् ॥ ३ । ४ । १३७ ॥

उपायशब्दात्स्वार्थे ठण् वा निपात्यते ह्रस्वश्च । उपाय एव औपयिकम् ॥

अनुगादिनः ॥ ३ । ४ । १३८ ॥

अनुगादिन्शब्दात्स्वार्थे ठण् वा भवति । अनुवदतीत्यनुगादी । आनुगादिकः । विनयादिष्वस्याः प्रक्षेपान्निवृत्ता महाविभाषा ॥

अञिणोऽण् ॥ ३ । ४ । १३९ ॥

अञिन इत्येतत्प्रत्ययान्तात्स्वार्थे अण् भवति । व्यावक्रोशी । व्यावलेखी । व्यावहासी वर्तते । जिन् साङ्कोटिनम् । सांराविणम् । सामार्जिनम् ।

विसारिणो मत्स्ये ॥ ३ । ४ । १४० ॥

विसरतीति विसारी । विसारिन्शब्दात् मत्स्ये वर्तमानात् अण् भवति । वैसारिणो मत्स्यः । अन्यत्र विसारी देवदत्तः ।

ञ्रिर्ञोऽमुख्यकात्पूगात् ॥ ३ । ४ । १४१ ॥

नानाजातीयाः अनियतवृत्तयो धर्मकामप्रधानाः संघाः पूगाः, पूगवाचिनः शब्दात् स्वार्थे ञो भवति । ञ्रिसंज्ञा स चेत् पूगशब्दो मुख्य इति विहितकप्रत्ययान्तो न भवति । लोहध्वजाः पूगाः लौहध्वज्यः लौहध्वज्यौ लोहध्वजाः । शैब्यः शैब्यौ शिबयः । ञ्रित्वात् बहुषु श्लुक् । अमुख्यकादिति किम्? देवदत्तकः ।

व्रातञ्फादस्त्रियाम् ॥ ३ । ४ । १४२ ॥

नानाजातीया अनियतवृत्तयः उत्सेधजीविनः संघाः व्राताः । व्रातवाचिनः ञफप्रत्ययान्ताच्चास्त्रियां वर्तमानात्स्वार्थे ञ्यो भवति । त्रिसंज्ञा कापोतपाक्यः कापोतपाक्यौ कापोतपाकाः । ञफात् कौञ्जायन्यः कौञ्जायन्यौ कौञ्जायनाः । अस्त्रियामिति किम् ? कपोतपाका कौंजायनी ।

शस्त्रजीविसङ्घाड् ञ्यड् वा ॥ ३ । ४ ।१४३ ॥

शस्त्रजीविनां सङ्घः तद्वाचिनः स्वार्थे ञ्यट्प्रत्ययो वा भवति । त्रिः शबराः शस्त्रजीविसंघः । शाबर्यः शाबर्यौ शबराः । पौलिंद्यः । पौलिंद्यौ पुलिन्दाः । वा ग्रहणान्न भवत्यपि शबराः । पुलिन्दः । टकरो ङ्यर्थः । शाबरी पौलिन्दी ।

वाहीकेष्वब्राह्मणराजन्येभ्यः ॥ ३ । ४ । १४४ ॥

वाह्लिकेषु यः शस्त्रजीविसंघः ब्राह्मणराजन्यवर्जितस्तद्वाचिनः स्वार्थे ञ्यट् नित्यं भवति । त्रिः । कुण्डिविशाः शस्त्रजीविसङ्घः, कौण्डिविश्यः कौण्डिविश्यौ कुण्डिविशाः । क्षौद्रक्यः क्षौद्रक्यौ क्षुद्रकाः । माण्डव्यः । माण्डव्यौ माण्डवाः । अब्राह्मणराजन्येभ्य इति किम् ? गोपालिः गोपाली । शालंकायनः शालंकायनी । राजन्येभ्यः राजन्यः राजन्यौ राजन्याः । काम्बठ्यः काम्बठ्यौ काम्बठ्याः । शस्त्रजीविसंघादिति किम् ? मल्लः मल्लौ मल्लाः ।

दामिनीयौधेयपार्श्वादिवृकाच्छाञण् टेन्यण् ॥३।४।१४५॥

दामन्याद्यादिभ्यः वृकशब्दाच्च शस्त्रजीविसंघवाचिभ्यः यथासंख्यं छादयः स्वार्थे त्रिसंज्ञाः प्रत्यया भवन्ति । दामन्यादिभ्यश्छः दामनयः शस्त्रजीविसंघः दामनीयः दामनीयौ दामनयाः । यौधेयादिभ्योऽञ् यौधेयः यौधेयाः शौभ्रेयः

शौभ्रेयाः । पश्वादिभ्योऽण् पर्शोरपत्यं बहवो माणवकाः शस्त्रजीविसंघः पार्शवः पार्शवौ पर्शवः। राक्षसः राक्षसौ रक्षांसि। आसुरः आसुराः। वृकात् टेन्यण् वृकाः शस्त्रजीविसंघः वार्केण्यः वार्केण्यौ वृकाः व्रीहिकत्वे नित्यं ज्यत्यव्राहिकत्वे विकल्पेन प्राप्ते वचनम् ।

श्रीशमीशिखाशालोर्णामत्वभिजिद्विदभृतो
गोत्रेणो यञ् ॥ ३ । ४ । १४६ ॥

श्यादिभ्यो यो मतुस्तदन्तात् श्रीमदित्यादेः अभिजिद्विदभृद्भ्यां चाणन्तेभ्यो गोत्रे वर्तमानेभ्यः स्वार्थे ञिः यञ् प्रत्ययो भवति । श्रीमत् श्रीमतोऽपत्यं श्रैमत, श्रैमत एव श्रैमत्यः श्रैमत्यौ श्रैमताः । शमिवत् शामिवत्यः शामिवत्यौ शामिवताः शिखावत शैखावत्यः शैखावत्यौ शैखावताः। शालावत् शालावत्यः शालावताः । ऊर्णवत् और्णवत्यः और्णवताः । अभिजित् आभिजित्यः आभिजिताः । विदिभृत् वैदभृत्यः वैदभृताः गोत्र इति किम् ? श्रीमत् इदं श्रैमतम् । आभिजितः मुहूर्तः । स्वार्थिको ऽयम् यञ् । गोत्रेऽपत्य एव वर्तत इति तदाश्रयः प्रत्ययो भवति । श्रैमतस्यापत्यं युवा श्रैमत्यायनः ।श्रीमतानां समूहः श्रैमतकम् । श्रैमत्यस्य संज्ञादि श्रैमतम् । अभिजितम् ।

इति शब्दानुशासने चिन्तामणौ वृत्तौ तृतीयाध्यायस्य चतुर्थः पादः ।

समाप्तोऽध्यायस्तृतीयः ।

अथ चतुर्थाध्यायस्य प्रथमः पादः ।

गुपौधूप्विच्छिपनिपणेराय: ॥ ४ । १ । १ ॥

गुपौ रक्षणे धूप सन्तापे विच्छ गतौ पनि स्तुतौ पणि व्यवहारे चैत्येतेभ्यः स्वार्थे आय प्रत्ययो भवति । नित्याः शपीति वचनादेते विषयः । गुप्तिः गोपाया । जुगोप गोपायाञ्चकार गोपिता गोपायिता । धूपायिता धूपिता । विच्छिता विच्छायिता । पनिता पनायिता । पणिता पणायिता । स्तुत्यर्थेन पनिना साहचर्यात् पणेरपि स्तुत्यर्थ एव गृह्यते नान्यः । शतस्य पणते सहस्रस्य पणते । अन्ये गुपौ इत्यादिभिः साहचर्यात् पणेर्धादिरेव गृह्यते न तुदादिः इत्याहुः, तेषां शतस्य पणायति इत्यपि भवति । एवं विच्छायति विच्छतीत्यपि ।

कमृतेर्णिङीयङ् ॥ ४ । १ । २ ॥

कमेः ऋतेश्च धातोर्यथासंख्यं णिङीयङौ भवतः स्वार्थे । कमिता कामयिता । अर्तिता ऋतीयता ।

नित्याः शपि ॥ ४ । १ । ३ ।

आयादयो गुपादिभ्यः शपि प्रत्यया नित्या भवन्ति । गोपायति, धूपायति, विच्छायति, पनायति, पणायति, कामयते, ऋतीयते, बहुवचनं प्रत्ययपरिग्रहार्थम् ।

कित्तिज्गुपेर्भिषज्यादिक्षमानिन्दे सन् ॥ ४ । १ । ४ ॥

कित्तिज्गुपेर्भिषज्यादौ क्षमायां निन्दायां चार्थे वर्तमानेभ्यः सन् प्रत्ययो भवति स्वार्थे । भिषक् व्यापारो भिषज्या व्याधेः प्रतीकारस्तत्र ज्वरं चिकित्सति । कुष्टं चिकित्सति । आदिग्रहणात् क्षेत्रे चिकित्स्यानि तृणानि विनाशयितव्यानीत्यर्थः । क्षेत्रे चिकित्स्यः, पारदारिकः निग्राह्य इत्यर्थः । विचिकित्सति संशेते इत्यर्थः । तिजः क्षमायां

तितिक्षते । गुपेर्निन्दायां जुगुप्सते । तिजगुपोरनुबन्धकरण-सामर्थ्यात् सन्यात्मनेपदम् । अन्यत्र सङ्केतः तेजनं गोपयति । सनोऽकारनकारौ "सनीति सामान्यग्रहणार्थौ ।

शान्दान्मान्बधान्निशानार्जवजिज्ञासा वैरूप्यईचैः ॥ ४ । १ । ५ ॥

शान् दान् मान् बध इत्येतेभ्यो यथासंख्यं निशाने आर्जवे जिज्ञासायां वैरूप्ये चार्थे सन्भवति । इकारस्यैषा-मीकादेशः । शीशांसति शीशांसते । दीदांसति दीदांसते । मीमांसते । बीभत्सते । आद्याविदितौ । शेषाविदितौ । अन्यत्र निशानम् अच् दानिता मानिता वाधयति ।

धातोः कण्ड्वादेर्यक् ॥ ४ । १ । ६ ॥

कण्ड्वादिभ्यो धातुभ्यो यक्प्रत्ययो भवति स्वार्थे । कण्डूयति कण्डूयते । वल्गूयति । मन्तूयति । अस्तूयति हृणीयते । धातोरिति किम् ? कण्डूः कण्ड्वौ कण्ड्वः । मन्तुः । वल्गुः ।

चुरादिभ्यो णिच् ॥ ४ । १ । ७ ॥

चुरादिभ्यो धातुभ्यो णिच् प्रत्ययो भवति स्वार्थे चोरयति । लुण्टयति । छर्दयति । लक्षयते । चेतयते । पदयते । इत्यादयः ।

युजादेर्वा ॥ ४ । १ । ८ ॥

युजादिभ्यो धातुभ्यो णिच् वा भवति । योजयति । योजति । पर्चयति । पर्चति । साहयति । सहति । कलनेभ्यः परि-भवमिति ।

भुवेः प्राप्तावेणिः ॥ ४ । १ । ९ ॥

भू इत्यतो धातोः प्राप्त्यर्थे इणिर्वा भवति । भाव-यते । भवते । प्राप्नोतीत्यर्थः । भवतीत्येवान्यत्र । इकारस्तङर्थः

भुवीति इकारनिर्देशेन इणेरभावेऽप्यस्य तङ् सूच्यते तेन सिद्धम् ।

पाचितारश्च नः सन्तु दातारश्च भवामहे ।
आक्रोष्टारश्च नः सन्तु हन्तारश्च भवामहे ॥ १ ॥

अत्याद्येकाज्झलादिभ्योऽरुचिशुभिभ्यां भृशाभीक्ष्ण्ये यङ् ॥ ४ । १ । १० ॥

अत्यादिभ्यो य एकाच्हलादिर्धातुः तस्माच्च रुचिशुभिवर्जितात् भृशे आभीक्ष्ण्ये चार्थे यङ् प्रत्ययो भवति । भृशं पुनः पुनर्वा अटति अटाट्यते । ऋच्छति इयर्तीति वा अरार्यते । अश्नुते अशाश्यते । ऊर्णोनूयते । सूचयति सोसूच्यते । सूत्रयते सोसूत्र्यते । मूत्रयति । मोमूत्र्यते अत्यर्त्यशौर्णु सूचि सूत्रमूत्रयोरत्यादयः । अन्येऽश्नातेरशाश्यते । अपरे जागर्तेर्जाग्रीयते । सर्वस्मात् प्रत्ययात् अवाव्यते दादरिद्र्यते इत्याहुः एकाज्झलादिभ्यो भृशमाभीक्ष्ण्यं वा पचति पापच्यते पापच्यते देदीप्यते जाज्वल्यते वा इत्येवम् । लुनीहि लुनीहीत्येवम् लुनाति । अरुचिशुभिभ्यामिति किम् ? भृशं रोचते । भृशं शोभते । अन्यत्र पचति ।

गॄलुप्सद्दहजप्जभ्चर्दशगत्यर्थाभ्यां गर्ह्ये कुटिलयोः ॥ ४ । १ । ११ ॥

गॄलुप्सद्दह जप् जभ् चर्दशइत्येतेभ्यो गत्यर्थेभ्यश्च धातुभ्यो यथासंख्यं गर्ह्ये कुटिले चार्थे यङ् प्रत्ययो भवति । गर्हितं निगिरति निजेगिल्यते । एवं लोलुप्यते सासद्यते दन्दह्यते जञ्जप्यते जञ्जभ्यते चञ्चूर्यते दन्दश्यते । दशेति दन्शेर्नलोपं कृत्वा निर्दिश्यते यङ् लुप्यपि नलोपार्थः दन्दशीति । गत्यर्थेभ्यः कुटिलं क्रामति चङ्क्रम्यते । दंद्रम्यते आवनिवच्यते । योऽल्पीयस्यध्वनिगतागतानि करोति स एवमुच्यते । नियमार्थो

योगः तेन भृशं निगिरति भृशं क्रामतीति यङ् न भवति । जंगम इति रूढिशब्दोऽयं लक्षणयाऽस्थावरविवक्षामात्रे वर्तते ।

यङो लुग्बहुलम् ॥ ४ । १ । १२ ॥

यङः श्लुग् बहुलं भवति । वोभूयते वोभोति बोभवीति । रोरूयते रोरोति रोरवीति । लालप्यते लालप्ति लालपीति ।

अचि ॥ ४ । १ । १३ ।

अचि प्रत्यये परे यङः श्लुङ् नित्यं भवति । चेच्यः चेक्रियः लोलुवः मरीमृजः सनीस्रन्सः ।

नोतः ॥ ४ । १ । १४ ॥

. उकारान्तोद्विहितस्य यङोऽचि श्लुग् न भवति । योयूयः । रोरूयः ।

प्रयुज्याप्याख्याणिङ्वा ॥ ४ । १ । १५ ॥

प्रयुज्याप्यार्थाद्धातोः प्रयुज्यार्थे णिङ् वा भवति । प्रयोगः प्रकृतिकरणे प्रेरणम् । तत्प्रेषणाध्येषणनिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा भवति । देवदत्तस्य कटस्य करणं प्रयुङ्क्ते देवदत्तं कटं कारयते । देवदत्तस्यासनं प्रयुङ्क्ते देवदत्तमासयति । देवदत्तेनोदनस्य पाकं प्रयुंक्ते देवदत्तेनौदनं पाचयति । अन्यत्र प्रेषणेनाध्येषणेन वा प्रयोगः । भिक्षा वा संप्रयोजयति भिक्षा वासयति । कारीषोग्निरध्यापयति अत्र-निमित्तभावेन । राजागमनं प्रयुंक्ते राजानमागमयति । मृगान् रमयति रात्रिं विवासयति कथकः अत्र आख्यानेन । कंसस्य वधं प्रयुंक्ते कंसं घातयति । बलिं बन्धयति नटः अत्राऽभिनयेन । पुष्येण योगं प्रयुंक्ते पुष्येण योजयति । मेधाभियोजयति गणकः अत्र ज्ञानेन । उज्जयिन्याः प्रदोषे प्रस्थितः ।

माहिष्मत्यां सूर्योद्गमनं प्रयुंक्ते माहिष्मत्यां सूर्यमुद्गमयति । पाटलीपुत्रात् प्रस्थित: उज्जयिन्यां सूर्यं पातयति देवदत्त: । अत्र व्याप्त्या । प्रयुक्तेरिति किम्? ओदनं पचति । आप्यादिति किम्? पाकेन प्रयुंक्ते वेति वाक्यर्थ: ।

कर्म्येककर्तृकात्सन्नतत्सन: ॥ ४ । १ । १६ ॥

कर्मेराप्याद्धातो: कर्मिनैवैककर्तृकात् साधारणकर्तृकात् कर्म्यर्थे इच्छायां सन् प्रत्ययो वा भवति अतत्सन: न चेत्स कर्मे यो: विहित: सन् तदन्तो भवति । कर्तुं कामयते चिकीर्षति । कर्मीति किम्? कर्तुं शक्नोति । कूलं पिपतिषति । श्वामुमूर्षतीत्युपमानात् । एककर्तृकादिति किम्? देवदत्तस्य गमनमिच्छति अतत्सन इति किम्? चिकीर्षतुमिच्छति । तद्ग्रहणं किम्? चिकित्सिषति । मीमांसिषति । सनोऽकार: किम्? प्रतीषिषति ।

सुप: कर्तु: काम्य: ॥ ४ । १ । १७ ॥

सुबन्तात् कर्म्याप्यात्कर्तुरात्मन: कामयितुरेव संबन्धिन: कर्म्यर्थे काम्यप्रत्ययो भवति वा । आत्मन: पुत्रं कामयते पुत्रकाम्यते पुत्रकाम्यति वस्त्रकाम्यति इदंकाम्यति स्व:काम्यति । आत्मार्थो वृत्तावन्तर्भूत: इत्यात्मन्‌शब्दो न प्रयुज्यते । सुप इति किम्? आत्मनो गमनमिच्छति । अत्रात्मोपाधिके धातो: स्यात् । महान्तं पुत्रमिच्छति इत्यत्र सापेक्षसामर्थ्यात् न भवति । महापुत्रकाम्यति इति समासात्प्रत्यय: । कर्तुरिति किम्? दु:खमिच्छति । अत्र परस्येच्छति ॥

क्यच्चांमाव्ययात् ॥ ४ । १ । १८ ॥

सुबन्तात् आप्यादात्मन: काम्ये क्यच् भवति काम्यश्च यद्यसौसुप् मकारान्तादव्ययाच्च न भवति । पुत्रमात्मन:

इच्छति पुत्रीयति । वस्त्रीयति । वाच्यति । स्रुच्यति अमाव्ययछिति किम्? इदमिच्छति स्वरिच्छति ककार: "नं क्ये" इति सामान्यग्रहणार्थः । चकारः सामान्यग्रहणाविघातार्थः ॥

गौणादाधाराच्चाचरि ॥ ४ । १ । १९ ॥

गौणात्—गुणाद्विषयान्तरमागतो गौणः यथा गौर्वाहीक इति । गौणात् सुवन्तादमाव्ययात् आचरे राप्यादाराच्चाचर्यर्थे क्यच् भवति वा । पुत्रमाचरति पुत्रीयति छात्रम् । वस्त्रीयति कम्बलम् । आधारात् प्रासाद इव आचरति प्रासादीयति कुट्यां । पर्यङ्कीयति मञ्चके ॥

कर्तुः क्विप् ॥ ४ । १ । २० ॥

गौणादाचरेः कर्तुः सुप आचर्यर्थे क्विप्प्रत्ययो वा भवति । अयमप्रयोगी धातुसंज्ञार्थः । अश्व इवाचरति । अश्वति । गर्दभति । पुरुषति । कर्तुरिति किम्? पुत्रीयति छात्रम् ।

गल्भक्लीबहोडान्ङित् ॥ ४ । १ । २१ ॥

गल्भादिभ्यः गौणेभ्यः आचरि कर्तृभ्य आचर्यर्थे क्विप् प्रत्ययो ङित् भवति । अवगल्भते अवगल्भाञ्चक्रे । विक्लीबते विक्लीबांचक्रे । विहोडते, विहोडांचक्रे ।

क्यङ् ॥ ४ । १ । २२ ॥

गौणादाचरेः कर्तुःसुपः आचर्यर्थे क्यङ् भवति । काकः श्येन इवाचरति काकः श्येनायते । अश्वायते । पुरुषायते । गल्भायते । विक्लीबायते । होडायते । क्विप्क्यङोरनन्यविषयत्वात् विकल्पः । पित्वादतद्धितेप्यत्र पुम्भावः । एनी एतायते । श्येनी श्येतायते ।

तद्वृत्योजसः ॥ ४ । १ । २३ ॥

ओजस्शब्दाद्यः क्यङ् स तद्वृत्येव ओजस्विन्येव वर्त-

मानात् भवति । ओजस्वीवाचरति ओजायते । ओजस्यते । अनोजा ओजस्वी भवति ओजायते । अन्यत्र ओज इवाचरति अनोजः ओजोभवति ।

सो वा लुक् च ॥ ४ । १ । २४ ॥

सकारान्तस्य गौणस्य कर्तुः सुपः आचरति क्यङ् भवति लोपश्च वा । पयायते, पयस्यते । क्यङ् सिद्धः लुगर्थं वचनम् ।

अप्सरसः ॥ ४ । १ । २५ ॥

अप्सरसः क्यङः सन्नियोगे नित्यं लुग्भवति । अप्सरायते ।

भृशादेश्च्वौ स्तः ॥ ४ । १ । २६ ॥

भृशादेः सुबन्तात् कर्तुः च्वौ च्व्यर्थे क्यङ् भवति तत्सन्नियोगे च स्तः सकारतकारान्तस्य लुग् भवति । अभृशो भृशो भवति भृशायते । उन्मनायते । विहायते । उत्सुकायते । कर्तुरिति किम्? अभृशं भृशं करोति । च्वाविति किम्? क्व भृशा भवन्ति । अत्र ये भृशास्ते क्व भवन्तीत्यर्थः । भृशीभवति इत्यत्र च्विनैव सोऽर्थ उक्त इति न भवति ।

निद्रादिडाज्भ्यो धर्मिणि क्यष् ॥ ४ । १ । २७ ॥

निद्रादिभ्यो डाजन्तेभ्यश्च धर्मिणि वर्तमानेभ्यः च्व्यर्थे क्यष् भवति । अनिद्रो निद्रावान् भवति निद्रायति, निद्रायते । एवं करुणायति, करुणायते । अचर्म चर्म भवति चर्मायति चर्मायते इत्यादयः । डाच् अपटत् पटत् भवति पटपटायति पटापटायते । दमदमायति दमदमायते । अत एव कृभ्वस्तिभिरिव क्यषापि योगे डाच् । ककारः "नं क्ये" इति सामान्यग्रहणार्थः । षकारस्तद्विघातार्थः ।

णिज्बहुलं कृञादिषु ॥ ४ । १ । २८ ॥

सुप इत्येव वर्तते । सुबन्तात् कृञादीनां धातूनामर्थे बहुलं णिच् भवति। सूत्रं करोति सूत्रयति व्याकरणम्। चर्वयति पारायणम् । मुण्डयति माणवकम् । मिश्रयति ओदनम् । श्लक्ष्णयति वस्त्रम् । लवणयति सूपम् । व्रतं करोति व्रतयति । पयो व्रतयति । पय एव भुंक्त इत्यर्थः । सावद्यं व्रतयति सावद्यं न भुंक्ते एवेत्यर्थः । मुण्डं वलीवर्दं करोति इत्युभयधर्मविधाने मुण्डं शुक्लं करोतीत्यनुवादे चानभिधानात् न भवति । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति केशान्. विजटीकरोति इत्यर्थः । पाशं विमोचयति विपाशयति । रूपं दर्शयति रूपयति । लोमान्यनुमार्ष्टि अनुलोमयति । पटुमाचष्टे पटयति । वृक्षमाचष्टे वृक्षयति । तृणान्युत्सातयति उत्तृणयति । वस्त्रेण समाच्छादयति संवस्त्रयति । वीणया उपगायति उपवीणयति । तूलैरनुकुष्णाति अनुतूलयति । श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभियाति अभिषेणयति । वर्मणा सन्नह्यति संवर्मयति। चूर्णैरविकिरति अवध्वंसं सर्पति वा अवचूर्णयति। वास्या छिनत्ति वासयति । पासयति । आसयति । अत्यश्वेनातिक्रामति अत्यश्वयति । अतिहस्तयति । आख्यानमाचष्टे इत्यत्र बहुलवचनान्न भवति ।

श्वेताश्वश्वतरगालोडिताह्वारकस्याश्वतरेतकलुक् च ॥ ४ । १ । २९ ॥

श्वेताश्वअश्वतरगालोडितआह्वरक इत्येतेषां णिच् सन्नियोगे यथासंख्यमश्वतरइतकइत्येषां लुग्भवति । श्वेताश्वमाचष्टे श्वेतयति । अश्वतरमश्वयति । गालोडितं गालोडयति । आह्वरकमाह्वरयति ॥

हलिकल्योरः । ४ । १ । ३० ॥

हलिकल्योर्णिच्सन्नियोगे अकारादेशो भवति । हलिमग्रहीत् अजहलत् । कलिमग्रहीत् अचकलत् । हलिकल्योरिति किम्? अपीपटत्। अलीलघत्। हलकलयोरप्येतत्सिद्धम्। हलिकल्योः रूपान्तरनिवृत्त्यर्थमत्ववचनम्। अत्वे हि अकोनित्यं लुप्यमानः सन्वद्भावो न भवति (?)। अत्वाभावे तु परत्वात् णिचैङेएङौ लुक् नाप्लुग् इति स्यात्। अत एव वचनादत्र अधातुप्रत्ययेऽप्येज्।

सत्यार्थवेदस्याः ॥ ४ । १ । ३१ ॥

सत्यार्थवेदानां णिच् सन्नियोगे आकारो भवति । सत्यमाचष्टे सत्यापयति। अर्थापयति । वेदापयति ।

निरस्यंगेभ्यः कर्मणो णिङ् ॥ ४ । १ । ३२ ॥

अंगेभ्यः शरीरावयववाचिभ्यः सुबन्तेभ्यः कर्मभूतेभ्यो निरसिक्रियायां णिङ्प्रत्ययो भवति ॥ णिजोऽपवादः । हस्तं निरस्यति हस्तयते । पादयते । निरसीति किं ? हस्तं करोत्याचष्टे वा हस्तयति । कर्मण इति किम्? हस्तेन निरस्यति ॥

पुच्छभाण्डादस्समाचौ ॥ ४ । १ । ३३ ॥

पुच्छभाण्डाभ्यां कर्मवाचिभ्यां यथासंख्यमस्यत्यर्थे समाचिनोत्यर्थे च णिङ् भवति ॥ पुच्छमस्यसि पुच्छयते । पुच्छं पर्यस्यते परिपुच्छयते व्यस्यति विपुच्छयते।भाण्डं समाचिनोति संभाण्डयते ।

चीवरात् परिधार्ज्योः ॥ ४ । १ । ३४ ॥

चीवरशब्दात् कर्मणः परिदधातेरर्जयतेश्चार्थे णिङ् भवति। चीवरं परिधत्ते अर्जयति वा संचीवरयते। परिचीवरयते॥

सत्रकक्षकष्टकृच्छ्रगहनात्पापे चिकीर्षा क्यङ् ॥ ४ । १ । ३५ ॥

सत्रादिभ्यः कर्मभ्यः पापे वर्तमानेभ्यश्चिकीर्षा चिकीर्ष्यर्थे क्यङ् भवति ॥ सत्रं चिकीर्षति सत्रायते । पापं कर्तुमिच्छतीत्यर्थः । एवं कक्षायते । कष्टायते । कृच्छ्रायते । गहनायते ॥ ककारो यङो भेदार्थः ॥ पाप इति किम्? सत्रं यज्ञम् चिकीर्षति ॥

वाष्पोष्मफेनादुद्वमि ॥ ४ । १ । ३६ ॥

वाष्पादिभ्यः कर्मभ्यः उद्वम्यर्थे क्यङ् भवति । वाष्पमुद्वमति वाष्पायते । एवमूष्माणमूष्मायते । फेनं फेनायते । धूमाच्चैके । धूमायन्त इवाश्लिष्टा प्रज्वलन्तीव संहताः ।

सुखादेर्भुजि ॥ ,, । १ । ३७ ॥

सुखादिभ्यः कर्मभ्यः भुज्यर्थे क्यङ्भवति । सुखादिमतोऽनुभवो भुज्यर्थः । सुखं भुंक्ते सुखायते । दुःखायते । भुजीति किम्? सुखं वेदयते, प्रसादको देवदत्तस्य ।

शब्दादेः कृञि वा ॥ ४ । १ । ३८ ॥

शब्दादिभ्यः कर्मभ्यः कञि करोत्यर्थे क्यङ् वा भवति । शब्दं करोति शब्दायते शब्दयति । वैरायते वैरयति । इत्यादि ।

रोमन्थादुच्चर्वणे ॥ ४ । १ । ३९ ॥

उच्चर्वणे वर्तमानात् रोमन्थशब्दात् कर्मणः करोत्यर्थे क्यङ् भवति । अभ्यवहृतस्योद्गीर्य चर्वणमुच्चर्वणम् । रोमन्थनं रोमन्थस्तं करोति रोमन्थायते गौः । अन्यत्र रोमन्थं करोति कीटः प्रवृत्तिं करोतीत्यर्थः ॥

नमोवरिवस्तपसः क्यच् ॥ ४ । १ । ४० ॥

नमआदिभ्यः कृञ्यर्थे क्यच् भवति । नमः करोति नमस्यति देवान् । वरिवस्यति गुरून् पूजयतीत्यर्थः । तपः करोति तपस्यति । नमःकरोति, वरिवः करोति । तपः करोति । नम इत्यादि शब्दमुच्चरतीत्यत्र त्वऽनभिधानान्न भवति पृथगवयवाभावात् । नमस्यति देवान् इति नमः शब्दयोगनिबन्धना चतुर्थी न भवति । अन्तरंगत्वाद्वा उपपदविभक्तेः कारकविभक्तिर्बलीयसीति । नमो जिनेभ्योऽस्तीति चतुर्थी सावकाशे इति उरीकरोतीत्यर्थमित्यादिवद्वाक्येऽपि नमस्करोति देवानिति द्वितीया ।

चित्रङो विस्मये ॥ ४ । १ । ४१ ॥

चित्रङित्येतस्मात् कर्मणो विस्मये वर्तमानात् कृञर्थे क्यच् भवति । चित्रं करोति चित्रीयते । विस्मयं करोतीत्यर्थः । अन्यत्र चित्रं करोति । ङकारस्तङर्थः ॥

ह्रस्वस्य तक् पिति कृति ॥ ४ । १ । ४२ ॥

ह्रस्वस्य पिति कृति परे तगागमो भवति । अग्निचित्प्रकृत्य प्रहृत्य स्तुत्वा स्तुत्वा नीग्रामणि कुलमित्यत्राभिद्रुम् बहिरंगमन्तरंगे इति न भवति । सुशूरिति परत्वादिक् दीर्घः ।

द्विर्धातुः श्लुलिड्ङेप्रत्यये प्राक्त्वच्यचः ॥ ४ । १ । ४३ ॥

श्लुप् लिट्ङे च प्रत्यये परे धातुर्द्विर्भवति । प्राक्त्वच्यचः अजादौ तु तन्निमित्तात् अचकार्यात् प्रागेव भवति । जुहोति । बिभेति । इयाय । आर । पपाच । पपाठ । अशिश्रियत् । असुस्रुवत् । धातुरिति किम् ? प्राशिश्रियत् । वेत्तेः क्विद्वचनादाम्नि न भवति दयांचक्रे विदांचकार । लुब्वचनादिह न भवति, बिभयाञ्चकार बिभराञ्चकारेति । प्रागिति किम् ? निनाय । लुलाव । निनयिथ । निन्यतुः । चक्रतुः । जग्मुः । अदधत् । तुशब्दो विशे-

यथार्थः । अचीति किम् ? दिदीवान् जयते । अच इति किम् ? शुशाव । आपीप्ये प्राक्त्वच्यच इत्यधिकारः यावद्द्विर्वचनम् ।

आद्येकाच् ॥ ४ । १ । ४४ ॥

योऽनेकाच् धातुस्तस्यादिरेकाचकोऽवयवः लिट् ङे द्विर्भवति । जजागार । अचीकरत् । अजीहरत् । पूर्वेण सर्वस्य प्राप्ते वचनम् ।

सन्यङश्च ॥ ४ । १ । ४५ ॥

सनन्तस्य यङन्तस्य च धातोरवयवस्याद्येकाच् द्विर्भवति । दिधक्षति । पिपक्षति । पापच्यते । चेक्रीयते । देद्ध्मीयते । प्रतेतीर्यते । निपेपूर्यते । चकारः लिङ्चेत्युत्तरत्र समुच्चयार्थः ।

सुपः ॥ ४ । १ । ४६ ॥

सुबवयवस्य धातोः सन्यङन्तस्य लिट्ङे परतः पूर्वस्य च यः कश्चिदेकाजवयवः स एको द्विर्भवति ॥ पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुत्रीयिषिषति । पुत्रीयन्तं प्रायुंक्त । अपुपुत्रीयत् । अपुतित्रीयत् । अपुत्रीयियत् ॥

नाद्यच् ॥ ४ । १ । ४७ ॥

सुब्धातोरादिरच् न द्विरुच्यते । अशिश्वीयिषति अश्वीयियिषति । अश्वीयिषिषति । पूर्वेण प्राप्तिः प्रतिषिद्ध्यते ।

ततः ॥ ४ । १ । ४८ ॥

तत इत्याद्यच् परामृश्यते न सुप इति नाद्यजिति प्रतिषेधात् । अनेकाचो धातोरजादेः सन्यङन्तस्य लिङ्ङे पूर्वस्य चादेरचः पर एकाज्द्विर्भवति । आदिद्विर्वचनापवादः । अटिटिषति । अशिशिषति । अटाट्यते । अशाश्यते । प्राक्त्वच्यच इत्येव प्रोर्णुनविषति । प्रोर्णुनाव । आटिटत् । आशिशत् । अजादौ सनिति विज्ञानात् इह न भवति पिपरिषति ।

अजादौ सनि परे ततः एकाजिति विज्ञानादिह न भवति । अरिरिषति ।

नबन्द्रा वलि ॥ ४ । १ । ४९ ॥

तत आदेरचः परे बनदरेफा वलग्राः सन्यङन्तस्य लिङ्-ङे पूर्वस्य च न द्विर्भवति । उडिजजिषति । अन्जिजिषति । इन्दि-धिषति । अड्डिषति । अर्चिचिषति । प्रोर्णुनाव । प्रोर्णुनूयते । प्रोर्णुनविषति । औडिजजित् । ऐन्दिधत् । आर्चिचत् । प्रौर्णु-नवत् । बन्द्रा इति किम् ? चिक्षिषते । वलीति किम् ? अरिरिषति । अरार्यते । तत इति किम् ? दिद्राषति । इंदिद्रीयिषति ।

द्विरेकेषाम् ॥ ४ । १ । ५० ॥

एकेषामाचार्याणां मते द्विर्द्विर्न भवति । द्विरुक्तस्य द्विर्व-चनं न भवतीत्यर्थः । लोलूयिषते । पोपूयिषते । अन्येषां भवति । सुसोषुयिते । प्राणिणिनिषत ।

यकस्तृतीयः ॥ ४ । १ । ५१ ॥

यगन्तस्य कंड्वादेर्धातोः सन्यङन्तस्य लिङ्ङे च पूर्वस्य तत आदेरचः तृतीय एकाच् द्विर्भवति ॥ तत इत्यस्यापवादः । असूयियिषति । असूयियत् । केषाञ्चित् तत इति नानुवर्तते ॥ कण्डूयियिषति ॥

ईर्ष्यः ॥ ४ । १ । ५२ ॥

ईर्ष्यतेः सन्यङन्तस्य लिङ्ङे पूर्वस्य च तृतीयो हलेका-च् द्विर्भवति । ईर्ष्यियिषति । ऐर्ष्यियत् ॥

सन्वा ॥ ४ । १ । ५३ ॥

ईर्ष्यतेः सन्वा तृतीय एकाच् द्विरुच्यते । ईर्ष्यिषिषति । ईर्ष्यियिषति ॥

परस्पराश्रयादिदोषप्रसङ्गात्पराभिमतमुत्तेजकलक्षणान्तरमपि निरस्तमित्याह । एतेनेति ।

(उत्तेजकलक्षणान्तरखण्डनम् ।) एतेन कारणीभूताभावप्रयोजकविशेषणाभावत्वमित्याद्यपि प्रत्युक्तम् । विशेषणविशेष्यत्वस्यानियतत्वाच्च । न चोत्तेजकत्वेनाभिमता ये विशेषास्तदभावविशिष्टमण्याद्यभावकूटत्वेन कारणत्वम् । तेषां प्रत्येकव्यभिचारेणाकारणत्वात् ॥

कारणीभूताभावस्य प्रयोजकं निरूपकं प्रतियोगीति यावत् । तत्र यद्विशेषणं तदभावत्वमुत्तेजकत्वमित्यर्थः । आदिपदेन कारणान्यत्वे सति कार्याभावप्रयोजकाभावप्रतियोगित्वं कारणाभावातिरिक्तकार्याभावप्रयोजकाभावप्रतियोगित्वं प्रतिबन्धकाभावेतरसकलसाधनसमवधाने कार्याभावप्रयोजकाभावप्रतियोगित्वमुत्तेजकत्वमित्यादिलक्षणं सूचितम् । तत्र प्रथमलक्षणे किं यत्किञ्चित्कारणान्यत्वं विवक्षितमुत निखिलकारणान्यत्वम् । आद्ये वह्निरप्युत्तेजकः स्यात् । द्वितीये प्रतिबन्धकाभावकारणताग्रहात्पूर्वं निखिलकारणान्यत्वस्य गृहीतुमशक्यतया परस्पराश्रयात् । अत एव न द्वितीयं लक्षणम् । प्रतिबन्धकारणत्वग्रहं विना निखिलकारणाभावान्यत्वस्योत्तेजकाभावे ग्रहीतुमशक्यत्वात् । किञ्च विशिष्टप्रतियोगिकस्य मण्याद्यभावलक्षणस्याभावो विशिष्टयोग्येव विशिष्टं च तन्मते विशेषणविशेष्यतत्संबन्ध एवेति विशेषणीभूतस्योत्तेजकाभावस्यापि कारणाभावात्मत्वान्न तदतिरिक्तम् । तथाच

लक्षणाभावः । तृतीयलक्षणे चक्रकापत्तिदुर्निवारेति द्रष्टव्यम् । किञ्च विशेषणविशेष्यभावस्यानियतत्वान्मण्यादेरप्युत्तेजकाभावं प्रति विशेषणत्वसम्भवात्तदभावो ऽप्युत्तेजकः स्यादित्यभिप्रेत्याह । विशेषणेति । ननु यस्य मण्यादेर्यावन्त उत्तेजकत्वेनाभिमता विशेषाः सन्ति तावदभावान्यान्यविशिष्टतदभावत्वेन कारणता गृह्यते तथाच नान्योन्याश्रयादिरित्यत आह । न चोत्तेजकेति । उत्तेजकाभावेष्वन्यान्यत्वस्यानुगतस्यैकस्याभावाद्भावे भावान्तरानभ्युपगमात्तत्तत्स्वरूपमेव तदन्यान्यत्वम् । तथाच तत्तदभावविशिष्टमण्याद्यभावस्य व्यभिचारेण कारणताग्रहायोग इत्याह । तेषामिति । किञ्चैकैकस्यापि मण्यादेरुत्तेजकानामनन्तत्वेन दुर्ग्रहत्वात्तत्तदभावान्यान्यत्वमपि दुर्ग्रहमेव । ननु यावदुपस्थितोत्तेजकाभावाभान्यान्यत्वमनुगतं सुग्रहमिति चेन्न । उपस्थितोत्तेजकाभाववत्तया निश्चितस्थले ऽप्यन्योत्तेजकसमवधाने कार्यदर्शनादेकोत्तेजकसमवधाने ऽपि प्रतिबन्धकान्तरे सति कार्यादर्शनाच्च व्यभिचारशङ्काया दुष्परिहरत्वेनोक्तरूपाभावविशिष्टमण्याद्यभावकारणताया दुर्ग्रहत्वात् । नन्वेकप्रतिबन्धस्थल एकोत्तेजकः भावाभावाभ्यां कार्यसत्त्वासत्त्वदर्शनात्तदभावविशिष्टमण्याद्यभावः कारणमिति गृह्यते पुनरुत्तेजकान्तरेण कार्यस्थले पूर्वगृहीतरूपेण व्यभिचारे ऽपि गृहीतकारणत्वापरित्यागेन तदुभयाभावान्यान्यत्वविशिष्टाभावत्वेन तदपि संगृह्यते । एवमन्योत्तेजके सति तदभावोऽपि संगृह्यत इति न कश्चिद्दोष इति चेन्न । अनेकोत्तेजकाभावे ऽनुगतरूपाभावेन कार्य्ये च तत्तदुत्तेजकप्रयोज्ये ऽपि विशेषाभावेन च स्फुटव्यभिचारेण

चोक्तसङ्ग्रहायोगात् । इतरथा रासभमहिषादियावद्दृष्टपदार्थान्यान्यत्वेन तेषामपि घटकारणताप्रसङ्गात् । विस्तरस्तु सुन्दरराजीये द्रष्टव्यः ।

उत्तेजकत्वग्रहं विनापि प्रकारान्तरेण मण्याद्यभावकारणताग्रहं दूषयति । न च कार्येति ।

(मण्याद्यभावस्य प्रकारान्तरेणाकारणत्वम्) । न च कार्यानुत्पादप्रयोजकाभावत्वेन प्रतिबन्धकाभावस्य कारणत्वमतो नान्योन्याश्रय इति वाच्यम् । उत्तेजकस्यापि कारणत्वप्रसङ्गात् । तस्य कार्यानुत्पादप्रयोजकत्वस्य दुर्ग्रहत्वात् । तेन रूपेणान्यथासिद्धत्वाच्च । प्रतियोगिनः कार्यविरोधित्वे ज्ञात एव यदभावस्यान्वयव्यतिरेकग्रहस्तस्य विरोध्यभावत्वेनान्यथासिद्धिः । न चैतदन्यथासिद्धिलक्षणमेव न भवतीति वाच्यम् । दण्डत्वादिसङ्ग्राहकत्वेन त्वदुक्तान्यथासिद्धिलक्षणस्याप्यभावप्रसङ्गात् ।

उत्तेजकस्यापि कार्यानुत्पादप्रयोजकस्वाभावाभावत्वेन कारणत्वापातादिति हेतुमाह । उत्तेजकस्यापीति । मण्यादिष्वनुगतधर्माभावेन कार्यानुत्पादप्रयोजकत्वमेव दुर्ग्रहमित्याह । तस्येति । किञ्च कार्यानुत्पत्तिप्रयोजकत्वं तद्व्याप्यत्वमुत तद्व्यापकत्वम् । आद्येऽपि किं मण्यादेः स्वरूपेण व्याप्यत्वमुतोत्तेजकाभावविशिष्टत्वेन । नाद्यः । मणौ सत्यपि सत्युत्तेजके कार्यानुत्पत्त्यदर्शनात् । न द्वितीयः । अभावकारणताग्रहात्पूर्वमुत्तेजकत्वस्यैव दुर्ग्रहत्वात् । नापि प्रथमद्वितीयः ।

कारणाभावप्रयुक्तकार्यानुत्पाददशायां प्रतिबन्धकाभावेन व्यापकत्वायोगादिति भावः । ननु सिद्धान्ते ऽपि सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वमननुगतमण्यादेः कथं गृह्यत इति चेन्न । अत्र ह्युत्तेजकाभावविशिष्टमण्यादेः कार्याभावप्रयोजकत्वं नाम तद्व्याप्यत्वम् । तच्चोत्तेजकाभावविशिष्टाननुगतमणित्वाद्यवच्छेदेनगृह्यते वह्निव्याप्यत्वमिवानेकधूमत्वाद्यवच्छेदेन । उत्तेजकत्वं च सामग्रीकालीनकार्याभावव्याप्याभावप्रतियोगित्वमनुगतमेव । अत्र चोत्तेजकाभावस्य तद्व्याप्यत्वमननुगतेनैव मण्याद्येकैकोपहिततत्तादभावत्वेनावच्छिद्यत इति न कश्चिद्दोष इत्यलमतिविस्तरेण । प्रतिबन्धकाभावस्याकारणत्वे ऽनन्यथासिद्धान्वयव्यतिरेकविरोध इत्याशङ्क्यानन्यथासिद्धत्वमसिद्धमित्याह । तेनेति । सामग्रीकालीनकार्यानुत्पादप्रयोजकाभावत्वेनेत्यर्थः । अन्यथासिद्धलक्षणानाक्रान्तत्वात्कथमेतस्यान्यथासिद्धत्वमित्याशङ्क्य तल्लक्षणमप्यस्तीत्याह । प्रतियोगिन इति । ननु यद्गर्भाविव यस्यान्वयव्यतिरेकावन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एवेत्यादिकमेव तल्लक्षणमित्यत आह । न चैतदिति । किमव्याप्तत्वादिदमलक्षणमुत वाद्यसम्मतत्वात् । नोभयथापि । त्वदुक्तलक्षणानामप्यव्याप्तत्वान्ममासम्मतत्वाच्चालक्षणत्वप्रसङ्गादित्यभिप्रेत्याह । दण्डत्वादीति । दण्डत्वाद्येकैकसङ्ग्राहकत्वेनेत्यर्थः ।

ननु अन्यथासिद्धसामान्यलक्षणाक्रान्तेषु विशेषलक्षणानामव्याप्तिर्न दोषायेति शङ्कते । ननु यस्येति ।

(विशेषलक्षणाव्याप्तेरदूषकत्वपरिहारः ।) ननु यस्य कार्यसम्बन्धित्वं कार-

णत्वमृतेऽपि निर्वहति सोऽन्यथासिद्ध एव भवति। दण्डत्वादेश्च तत्सम्बन्धित्वमन्यथापि भवतीति तत्सङ्ग्राहकं तल्लक्षणमिति चेत् । तर्हि विरोध्यभावत्वेन प्रतिबन्धकाभावस्य कार्यसम्बन्ध आवश्यक इति न कारणत्वं हि सहस्रमपि कारणानि विरोधिनि सति कार्यमुत्पादयितुमीशते । न चैवं दण्डादेरप्यन्यथासिद्धिप्रसङ्गस्तदभावस्य कार्यविरोधित्वमज्ञात्वैव प्रतिबन्धकाभावत्वेन कारणत्वमिति निरस्तम् । दण्डाभावादौ प्रतिबन्धकलक्षणस्यातिव्याप्तेश्च । न च सोऽपि प्रतिबन्धक एव । तथा व्यवहाराभावात् । न हि चक्राद्यसमवहितायां मृदि प्रतिबन्धात् घटं न जनयन्तीति व्यवहरन्ति । लक्षणस्य व्यवहारातिपाते जलस्योष्णस्पर्शो लक्षणं किन्न स्यात् । मृदादेरपि प्रतिबन्धकाभावतया कारणत्वप्रसङ्गेन कार्यविशेषस्याकस्मिकत्वप्रसङ्गात् । मृत्त्वादिनापि कारणत्वे प्रतिबन्धकाभावत्वेन कारणत्वे प्रमाणाभावात् । न च कार्यानुत्पादप्रयोजकाभावत्वं प्रतिबन्धकत्वम् । उत्तेजकाभावे तदभावात् । विनिगमकाभावेन तस्यापि प्रतिबन्धकत्वात् । तस्मात्प्रतिबन्धकाभावो न कारणम् ॥

कार्यसम्बन्धित्वं तन्नियतपूर्वक्षणवर्तित्वं तर्हि-

प्रतिबन्धकाभावस्यापि त्वदुक्तसामान्यलक्षणाक्रान्तत्वात्तत्सङ्ग्राहकमपि लक्षणं युक्तमेवेत्याह । तर्हि विरोधीति । सामग्रीकालीनकार्याभावप्रयोजकाभावत्वेनेत्यर्थः । आवश्यकत्वमेव दर्शयति । न हीति । तर्हि दण्डादेरपि कार्यविरोधिस्वाभावाभावत्वेनान्यथासिद्धिः स्यादिति चेन्न । दण्डाभावस्य सामग्रीकालीनकार्यविरोधित्वे ऽपि तद्ग्रहं विना तर्कावतारे ऽन्वयसहकारदर्शनेनापि दण्डादेः कारणत्वग्रहसम्भवादित्यभिप्रेत्याह । न चैवं दण्डादेरिति । ननु प्रतिबन्धकाभावसङ्ग्राहकत्वेन लक्षणान्तरोक्तौ दण्डादिसङ्ग्राहकत्वेनापि यस्य कार्यात्पूर्वकाले येन सम्बन्धस्तत्तेनान्यथासिद्धमित्यादिलक्षणान्तरस्यापि वक्तुमशक्यत्वात्तदप्यन्यथासिद्धं किन्न स्यादित्याशङ्क्याह । कार्यानुत्पादेति । परमते कार्यानुत्पादप्रयोजकत्वस्य निर्वक्तुमशक्यत्वाद्दुर्ग्रहत्वाच्च लक्षणान्तरमप्यनुपपन्नमित्याह । एतेनेति । अस्मन्मत इव तत्प्रयोजकत्वं तद्व्याप्यत्वं चेदतिव्याप्तिरित्याह । दण्डाभावादाविति । तस्यापि प्रतिबन्धकत्वमिष्टमिति तटस्थशङ्कां निराकरोति । न च सो ऽपीति । व्यवहाराभावे ऽपि तल्लक्षणलक्षितत्वात्तथा किन्न स्यादित्याशङ्क्य व्यवहारातिपातिलक्षणमेव न सम्भवतीत्यभिप्रेत्याह । लक्षणस्येति । किञ्च कारणाभावस्यापि प्रतिबन्धकत्वे मृद्दण्डादेः किं प्रतिबन्धकाभावतयैव कारणतोत मृत्त्वादिरूपेणापि । आद्ये तन्त्वादेरपि प्रतिबन्धकाभावतयैव कारणत्वप्रसङ्गेन कारणवैजात्यस्याप्रयोजकत्वेन घटपटवैजात्यानुपपत्तिरित्याह । मृदादेरपीति । द्वितीये मृत्त्वादिनैव कारणत्वे ऽपि तदन्वयव्यतिरेकयो-

त्तपपत्तेरूपान्तरेण कारणत्वे प्रमाणं नास्तीत्याह । मृत्वादिनापीति । कारणाभावे ऽतिव्याप्तिपरिहाराय विशेषलक्षणान्तरमाशङ्क्याव्याप्त्या दूषयति । न च कार्यानुत्पादेति । विशेषणविशेष्यभावस्यानियतत्वेन मण्यादिविशिष्टोत्तेजकाभावस्यापि प्रतिबन्धकत्वात्तत्राव्याप्तिरेवेत्याह । विनिगमकेति । ननु मण्यादिकालीनकार्यानुत्पादप्रयोजकाभावप्रतियोगित्वमुत्तेजकत्वम् । उत्तेजकाभावविशिष्टमण्याद्यभावत्वेन कारणत्वं कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वमिति नोक्तदोष इति चेन्न । मण्यादिकालीनकारणाभावस्यापि तत्कालीनकार्याभावप्रयोजकतया कारणस्याप्युत्तेजकतापत्तेः । न च मण्यादिकालीनत्वेन विशेषितकार्यानुत्पादे कारणाभावः प्रयोजको न भवतीति वाच्यम् । किं तत्त्वेन विशेषिततत्प्रयोजकत्वं तद्व्याप्यत्वमुत तद्व्यापकत्वम् । न द्वितीयः । मण्युत्तेजकयोःसतोरपि कारणाभावेन तादृशकार्यानुत्पादे सत्यऽप्युत्तेजकाभावाभावात् । न प्रथमः। मण्याद्यभावकाले उत्तेजकाभावे सत्यपि मण्यादिकालीनकार्यानुत्पत्त्यदर्शनात् । न च तत्तन्मण्यादिसहितत्वेनोत्तेजकाभावस्य व्याप्यत्वमिति वाच्यम् । एकोत्तेजकाभावस्य मण्यादिसकलसहितत्वानुपपत्तेः । न च तत्तन्मण्यादिसहिततत्तदुत्तेजकाभावत्वेन व्याप्यत्वमिति वाच्यम् । तथासति कार्यानुत्पादस्यापि तत्तन्मण्यादिकालीनत्वे व्यापकतावच्छेदकनानात्वेन व्याप्यतानानात्वात्तत्प्रतियोगित्वरूपोत्तेजकत्वनानात्वापत्त्या तदभावविशिष्टमण्याद्यभावत्वस्यापि नानात्वेनानुगतरूपाभावाद्व्यभिचारिणां तेषां कारणताग्रहायोगात् । कारणता-

हि व्यापकताविशेषः स चाननुगतेन नावच्छिद्यते। इतरथा रासभत्वादीनामपि तदवच्छेदकत्वप्रसङ्गात्। तस्मात्प्रतिबन्धकाभावस्य कारणत्वमनुपपत्त्योपसंहरति। तस्मादिति। तथा च घटप्रागभावो न प्रतिबन्धकाभावो न वा प्रतिबन्धकाभावत्वेन कारणमिति भावः ॥

किञ्च प्रागभावस्याकारणत्वेन प्रतियोगिन उत्पत्तिसमये सामग्रीसत्वे ऽपि पुनरपि कार्योत्पत्त्यापादनमयुक्तम् । सामग्र्या हि स्वानन्तरक्षणे कार्यसम्बन्धेन व्याप्तिः न तु तदा तस्याद्यक्षणसम्बन्धलक्षणोत्पत्त्यापि गौरवात्। तया विनाऽनुपपत्त्यभावाच्चेत्याह । किञ्चेति ।

(सामग्र्याकार्येण सह-व्याप्तिव्युत्पादनम् ।) किञ्च सामग्र्याः स्वानन्तरक्षणे कार्यसम्बन्धेन व्याप्तिः न तु तदुत्पत्त्याद्यक्षणसम्बन्धेन । अप्रयोजकत्वात् गौरवाच्च । न च सामग्रीकार्योत्पत्तौ प्रयोजिका, अन्यथोत्पत्तेराकस्मिकत्वप्रसङ्गादिति वाच्यम् । उत्पत्तिर्ह्याद्यसमयसम्बन्धः । न च सामग्रीसमयस्याद्यत्वे ऽपि प्रयोजिका, कार्यानाधारक्षणाव्यवहितोत्तरक्षणस्य सामग्र्यप्रयोज्यत्वात्। किन्तु कार्यस्योत्तरक्षणसत्त्वे स चेदादिस्तदोत्पत्तिरिति व्यवह्रियते । किञ्च पूर्वक्षणः कारणं तद्विरहाद्वोत्पन्नस्य पुनरनुत्पादः । न च कारणान्तरविलोपप्रसङ्गः । युगपदुत्पन्नकार्यवैचित्र्यार्थं विचित्रकारणस्यावश्यकत्वादिति केचित्। न च कार्यमात्रभेदप्रयोजकत्वेन प्रागभावकार-

णता । तद्भेदस्य कार्य्यभेदप्रयुक्तत्वादननुगमाच्च ॥

उत्पत्तेरेव सामग्रीप्रयोज्यत्वात्तयैव तद्व्याप्ति-रित्याशङ्क्याह । न चेति । सामग्र्याः स्यानन्तरक्षणे कार्य-सम्बन्धे सति तल्लक्षणस्याद्यत्वं तत्पूर्वक्षणानां कार्यना-धारत्वप्रयुक्तं तदापि कार्यसत्त्वे तदुत्तरस्यैतस्य प्रथमत्वा-योगात् । तथाच कार्याधारक्षणस्याद्यत्वं न सामग्री-प्रयोज्यमित्यभिप्रेत्याह । उत्पत्तिर्हीति । स चेदादि-रिति । कार्यतत्ध्वंसानाधारक्षणाव्यवहितोत्तरक्षणश्चे-त्यर्थः । सामग्र्यनन्तरक्षणे कार्योत्पत्तिनियमे ऽपि तदु-त्पत्तिकाले सामग्र्यभावादेव न पुनरुत्पत्तिः । तदभा-वश्च तदा पूर्वक्षणलक्षणकारणविरहात् । न च पूर्वक्ष-णस्य कारणत्वकल्पकाभावः । पुनरनुत्पत्त्यनुपपत्तेरेव त-त्कल्पकत्वादित्यभिप्रेत्याह । किं चेति । पूर्वक्षणस्य कार-णत्वे तस्मिन्सतीतरस्य व्यतिरेकाभावादकारणत्वप्रसङ्ग इत्याशङ्क्यैकक्षणोत्पन्नघटपटादिवैचित्र्यानुपपत्तेरन्वय-मात्रेणापि तर्कावतारे कारणताग्रहसम्भवाच्चेतरेषा-मपि कारणत्वमित्यभिप्रेत्याह । न च कारणान्तरेति । कार्यभेदस्य प्रागभावभेदप्रयोज्यत्वात्तदकारणत्वे तदनुप-पत्तेस्तत्कारणत्वमित्याङ्क्याह । न च कार्येति । यस्य कार्यभेदो ऽस्ति तस्य सामग्रीभेद एव तत्प्रयोजकः कार्य-भेदे विप्रतिपन्नं प्रति तु प्रागभावभेदात्तद्भेदो वक्तव्य-स्तथाचान्योन्याश्रय इत्यभिप्रेत्याह । तद्भेदस्येति । किञ्च तव मते प्रागभावे भावस्याभावस्य वानुगतधर्मस्याभावा-त्तत्प्रागभावस्य तत्तदुत्पन्नकार्यमात्रे कारणताग्राह्या । तथाच प्रवृत्त्यनुपयोगात्तत्कारणत्वमदृष्टार्थमित्यभिप्रेत्या-ह । अननुगमाच्चेति ॥

एकाग्निसंयोगजरूपरसादीनां भेदप्रयोजकतया प्रागभावभेदो वक्तव्यस्तद्व्यतिरिक्तकारणभेदाभावादित्याशङ्क्याह । एतेनेति ।

(प्रागभावभेदस्य पाकजरूपादिभेदहेतुत्वनिरासः ।) एतेन पाकजरूपादीनां प्रागभावभेदेनैव भेद इति तद्धेतुत्वमिति निरस्तम् । पूर्वरूपादिध्वंसादिनैव तदुपपत्तेः । अपि च प्रागभावस्य प्रतियोगिहेतुत्वे निर्मोक्षो मुमुक्षूणां ब्रह्महत्याद्यनुष्ठानं वा प्रसज्येत । तथा हि प्रागभावो ह्यवश्यं प्रतियोगिजनकः । अन्यथा तत्र मानाभावात्तद्विनाशासम्भवाच्च । प्रतियोग्यजनकेनापि तद्विनाशे पूर्वमपि तत्प्रसङ्गात् । अविनाशे वा न तस्य प्रागभावत्वम् । अदृष्टानाधारसमयानाधाराभावस्यैव प्रागभावत्वात् । ततश्च ब्रह्महत्यादिजन्यदुःखविशेषप्रागभावे सति तत्त्वज्ञानसहस्रेणापि न मोक्षः । दुःखप्रागभावासहकृतस्य दुःखध्वंसस्य सुखस्य वा मोक्षत्वात् । दुःखप्रागभावनिवृत्त्यर्थं मुमुक्षूणां तत्प्रतियोगिजनकब्रह्महत्यादिकं वानुष्ठेयं स्यात् । तेन विना तदसम्भवात् ॥

पूर्वरूपादिध्वंसे सत्येव जायमानत्वात्तद्भेदादग्नितदवयवाद्यनेकतेजःसंयोगभेदाद्वा रूपादिभेदोपपत्तिरित्याह । पूर्वरूपेति । न च परमाणौ तेजःपरमाणुसंयोगादेकस्मादेव रूपादय उत्पद्यन्त इत्यत्र किञ्चिन्मा-

नमस्ति परमाणूनामप्रामाणिकत्वाच्चेति भावः । एवं प्रागभावकारणताऽभावे बाधकं परिहृत्य तत्कारणत्वे बाधकमाह । अपि चेति । ब्रह्महत्यादिदुरितसाध्यदुःखप्रागभावानां मुमुक्ष्वात्मगतानां स्वप्रतियोगिदुःखरूपस्वनाशजनकब्रह्महत्याद्यननुष्ठाने नाशायोगात्तन्नाशाभावे दुःखप्रागभावासहकृतदुःखध्वंसादिरूपमोक्षायोगात्तदर्थं तव मते बुद्धिपूर्वकमुमुक्षुभिर्दुरिताचरणं प्रसज्येतेत्यर्थः । उक्तमुपपादयति । तथा हीति । उत्पन्नस्य पुनरनुत्पत्त्यनुपपत्तेरेव तव प्रागभावे मानत्वात्तस्य प्रतियोग्युत्पादकत्वनियमाभावे स्वसिद्धिरेव न स्यादित्याह । अन्यथेति । स्वप्रतियोगिन एव स्वविनाशत्वाच्च तदुत्पत्तिरावश्यकीत्याह । तद्विनाशेति । अन्यस्मात्कर्मणस्तन्नाशमाशङ्क्याह । प्रतियोगीति । नित्यस्य दुःखप्रागभावस्यानर्थत्वाभावत्तन्नाश एव मास्त्वित्याशङ्क्य त्वन्मते सर्वमुक्त्यनन्तरमसत एवाभावास्य प्रागभावत्वान्न तस्य नित्यतेत्याह । अविनाशे वेति । तन्नाशाभावे तव मोक्षासम्भवश्चेत्याह । ततश्चेति । सुखस्य वेति मतभेदाभिप्रायेणोक्तम् । मोक्षापेक्षायां दुरिताचरणं तवावश्यकमित्याह । दुःखप्रागभावेति ॥

अस्तु तर्ह्यन्येन दुःखसाधनेन तन्निवृत्तिरिति चोदयति । नन्विति ।

(अन्यदुःखेन दुःखनिवृत्त्यभावः ।)

ननु कण्टकादिनापि तद्दुःखप्रागभावः स्वप्रतियोगिनं जनयत्विति चेन्न । तस्या तत्फलत्वात् । निरतिशयदुःखस्य ब्रह्महत्याजन्यस्यान्यतोऽसम्भवात् । दुःखे च तरतमभावस्य सुख

इव सर्वानुभवसिद्धत्वात् । अन्यथा पिपीलिकादंशक्रकचदारणप्रभूतयोरविशेषप्रसङ्गात् । न च प्रागभावो यत्किञ्चित्प्रतियोगिमात्रमुत्पादयति प्रतियोगिविशेषस्तु भावकारणादिति वाच्यम् । तथा सति पाकजस्थल एकस्मादप्यग्निसंयोगाद्रूपादिवैचित्र्यस्य गन्धप्रागभावश्च न रूपं प्रतिहेतुः रूपप्रागभावश्च न वायावित्यादित्वदभ्युपगतस्य व्याघातात् । उत्पन्नघटस्य पुनरुत्पत्त्यापत्तेश्च । घटकालीनकपाले ऽपि यत्किञ्चित्प्रागभावस्य सत्त्वात् । मृदि घटो भविष्यतीति वत् पटो भविष्यतीति प्रतीतिप्रसङ्गाच्च । न च मुमुक्षूणां ब्रह्महत्यादिजन्यदुःखप्रागभाव एव नास्तीति वाच्यम् । तेन दैवात्सम्पादितब्रह्महत्यातत्प्रायश्चित्तयोरफलत्वप्रसङ्गात् । तत्सन्देहे ऽप्यमुमुक्षापत्तेश्च । ततः प्रागभावो न हेतुः ॥

दुःखेष्ववान्तरवैजात्यस्यानुभवसिद्धत्वाद्दुग्धपानसाध्यसुखस्येव यवागूपानेन ब्रह्महत्यासाध्यदुःखस्य कण्टकादिनोत्पत्त्ययोगादित्याह । न तस्येति । दुःखेषु वैजात्यभावे सन्निहिततत्साधनं परित्यज्य तद्विशेषोपादाने प्रवृत्त्यनुपपत्तिरित्यभिप्रेत्याह । अन्यथेति । क्रकचं नामदारुविदारको लोहविशेषः । नन्वेकस्यापि प्रागभावस्य कार्यमात्रसाधारणत्वात्कार्यवैजात्यस्य तद्व्यतिरिक्तकारणवैजात्यप्रयुक्तत्वाद्दुःखप्रागभावस्यापि यत्किञ्चि-

त्कार्यजनने नाशे मुक्तिरिति नेत्याह । न च प्रागभाव इति । रूपादिवैचित्र्यस्येत्यभ्युपगतस्य व्याघातादित्युत्तरेण सम्बन्धः । तत्र प्रागभावव्यतिरेकेण रूपादिषु विजातीयकारणाभावादित्यर्थः । अभ्युपगतस्य चेति चकारो द्रष्टव्यः । अस्मिन्पक्षे प्रागभावकारणता मुधैवेत्यभिप्रेत्याह । उत्पन्नेति । किञ्च मृन्निष्ठाभावस्यापि घटंजनकत्वाद्भविष्यतीति बुद्धेः प्रागभावविषयत्वस्य त्वयाङ्गीकारान्मृदि पटो भविष्यतीति बुद्धिरपि प्रमा स्यादित्याह । मृदीति । ननु मुमुक्ष्वात्मनि तादृशदुःखप्रागभाव एव नास्ति तथाच तन्नाशार्थं न पापाचरणमिति चेन्न । कृतब्रह्महत्याप्रायश्चित्ते मुमुक्षौ तद्दुःखप्रागभावसत्त्वनिश्चयात् । प्रायश्चित्तस्य दुःखप्रागभावपरिपालनफलकत्वेन त्वयाभ्युगमादित्याह । न च मुमुक्षूणामिति । अन्येषामपि मुमुक्षूणां तादृशदुःखप्रागभावसत्त्वनिश्चयाभावात् फलनिश्चयाभावेन शास्त्रीयप्रवृत्तेरनुपपत्तेरित्याह । तत्सन्देहे ऽपीति । साधकाभावाद्बाधकसत्त्वाच्च न प्रागभावः प्रतियोगिकारणमित्युपसंहरति । तत इति ॥

यदर्थं प्रागभावकारणत्वं भग्नं तद्दर्शयति । एव च सतीति ।

(संयोगभेद एव धारावाहिज्ञानभेदप्रयोजकः ।) एवं च सति धारावाहिकज्ञानभेदो न तद्भेदप्रयुक्त इति संयोगभेद एव प्रयोजकः । एवमनुव्यवसाये ऽपि स एव प्रयोजकः । क्लृप्तत्वान्न त्वन्यः तस्याक्लृप्तत्वात् । अन्योऽपि न तावत्सामग्रीभेदस्तत्प्रयोजकः । सामग्रीभे-

दाभेदयोः कार्यभेदाभेदप्रयोज्यत्वात् । कारणभेद-व्यतिरेकेण सामग्रीभेदानिरूपणाच्च । नापि कारणभेद एव प्रतिकार्यमनेककारणजन्यत्वात् । नापि विषयभेदः । समूहालम्बनविशिष्टज्ञानयोरनेकविषयजन्यत्वात् । तस्मात्प्रतिज्ञानं संयोगभेदजन्यत्वादनुव्यवसायायोगादिन्द्रियग्राह्यत्वघटितो गुणत्वहेतुरसिद्धः । एतेन कार्यत्वे सति विभुसमवेतत्वं सामान्यवत्त्वे सति विभुसमवेतत्वं वा ज्ञानगुणत्वहेतू प्रत्युक्तौ । नित्यानुभवस्य गुणत्वे वा तदाश्रये ऽनित्यज्ञानसमवायो ऽपि न स्यात् । प्रत्यक्षद्रव्य एकजातीयप्रत्यक्षविशेषगुणद्वयस्य युगपदेकावच्छेदेनैकत्रासमवायात् । अत एव न शब्दे व्यभिचारः प्रत्यक्षात्मगुणस्य स्वसमानाधिकरणस्वसमानजातीयगुणस्थितिकालीनास्थितिकत्वनियमाच्च दुःखादिवत् ॥

किञ्च मनःसंयोगभेदव्यतिरेकेण व्यवसायभेदप्रयोजकः किं कारणभेद उत सामग्रीभेदः विषयभेदो वा । न मध्यमो ऽनेककारणात्मकसामग्र्यैक्यस्यैककार्यजनकत्वौपाधिकत्ववत् तदनेकत्वस्याप्यनेककार्यजनकत्वप्रयुक्तत्वादन्योन्याश्रयतापत्तेरित्यभिप्रेत्याह । अन्यो ऽपि न तावदिति । प्रथमे कारणत्रितयजन्यकार्यस्यैकत्वानुपपत्तिरित्याह । नापि कारणेति । तृतीये ऽनेकविषयैकज्ञानानुपपत्तिरित्याह । नहीति । संयोगभेदस्य ज्ञान-

भेदे हेतुत्वसाधनफलमाह । तस्मादिति । अनुव्यवसायायोगादिति व्यवसायजनकसंयोगातिरिक्तसंयोगस्यावश्यकत्वात्तत्समये व्यवसायनाशात्तत्कारणकानुव्यवसायानुपपत्तिरित्यर्थः । अनुभवे कार्यत्वपरतन्त्रत्वादिनिराकरणेनान्यदपि हेतुद्वयमसिद्धमित्याह । एतेनेति । प्रतिकूलतर्कपराहतिमप्याह । नित्यानुभवस्येति । साधितनित्यानुभवस्य गुणत्वे तस्यानित्यज्ञानसमवायिद्रव्यहमर्थगुणत्वमेव वक्तव्यम् । तथाच तत्रानित्यज्ञानसमवायो न स्यादित्यर्थः । तत्र हेतुमाह । प्रत्यक्षद्रव्य इति । रूपरसादिव्यावृत्त्यर्थमेकजातीयेत्युक्तम् । गुणत्वव्याप्यैकजातीयेत्यर्थः । धर्मादिव्यावृत्तये प्रत्यक्षेति । द्वित्वैकत्वनिरासाय विशेषगुणेति । क्रमभाविदुःखद्वयनिरासाय युगपदिति । हिंसाद्वयमात्रे युगपद्भाविप्रगलद्वयस्य चित्ररूपस्य वा निरासायैकावच्छेदेनेत्युक्तम् । प्रत्यक्ष इत्यत्र प्रत्यक्षपदव्यावृत्तिमाह । अत एवेति । तत्रैव हेत्वन्तरमाह । प्रत्यक्षात्मगुणस्येति । धारायामुत्तरज्ञानोत्पत्तिकालीनस्थितिकपूर्वज्ञानव्यावृत्तये स्थितिकालीनेत्युक्तम्॥

ननु विशेषगुणद्वयस्य जन्यत्वप्रयुक्ता युगपदेकत्रास्थितिः जन्याजन्ययोस्तु सा किन्न स्यादित्याशङ्क्य तथात्वे जन्यशब्दद्वयस्यैकश्रोत्रदेशे युगपदस्थितिप्रसङ्गादित्यभिप्रेत्याह । न च जन्येति ।

(जन्यज्ञानद्वयस्य युगपदेकत्र स्थित्यभावः ।)

न च जन्यविशेषगुणद्वयस्य तथात्वमिति वाच्यम् । जन्ययोरपि शब्दयोर्युगपदस्थितिदर्शनात् । इतोऽन्यथाकल्पने गौरवात् । किञ्चाहमुपलभ इति त्यक्षे य आत्प्रमन्युपलब्धिस-

म्बन्धो भासते स न तावत्तादात्म्यम्। जडाजड-योर्वास्तवतादात्म्यानुपपत्तेः। नापि समवायः। तस्यैवासिद्धेः। तस्योपलब्धिसम्बन्धाभावाच्च। तत्सम्बन्धमन्तरेण तस्याप्रत्यक्षत्वात्। न च समवायविषयमुपलब्ध्यन्तरमस्तु तत्र च घटादि-रिव समवायो विषयसम्बन्धीति वाच्यम्। उप-लब्धिसमयस्योपलब्ध्यन्तरागोचरत्वात्। एतेन परिशेषादुपलब्धिर्गुण इति परास्तम्। परिशेषा-सिद्धेश्च। उपलब्धेरपि बुद्धितादात्म्येन दुःखा-दिगुणाधिष्ठानतया द्रव्यत्वात्॥

ननु प्रत्यक्षद्रव्यगतत्वे सति जन्यत्वं तत्प्रयोजक-मिति चेत्। लाघवादुक्तगुणद्वयस्य प्रत्यक्षगतत्वस्यैव तत्प्रयोजकत्वादित्यभिप्रेत्याह। इतो ऽन्यथेति। किञ्च नित्योपलम्भस्याहमर्थेन सम्बन्धाभावादपि न तद्गुण-त्वम्। तथाहि किं तत्सम्बन्धस्तादात्म्यमुत समवायः। नाद्यः तव मते तदयोगादित्याह। स न तावदिति। द्वितीयस्त्वप्रामाणिक इत्याह। नापीति। तदभ्युपगमे ऽपि किं घटोपलब्धिसमवायस्तयैव भासते उपलब्ध्यन्त-रेण वा। नाद्यः तत्सम्बन्धाभावादित्याह। तस्येति। स्वरूपसम्बन्धस्यातिप्रसक्तत्वादिति भावः। सम्बन्धा-भावे ऽपि तद्गोचरत्वे ऽतिप्रसङ्गादित्यभिप्रेत्याह। तत्स-म्बन्धेति। द्वितीयमपवदति। न चेति। उपलब्धिसम-वायगोचरस्योपलब्ध्यन्तरस्य नागृहीतविशेषणन्यायेनोप-लब्धिगोचरत्वमपि वक्तव्यम्। तच्च न सम्भवति स्वप्र-काश्यत्वविरोधादित्याह। उपलब्धीति। गुणत्वे ऽप्युक्त-

सुखानुगतबुद्धिविषयतया सुखत्वरूपत्वेन तस्य तद्भेदाभावादिति द्रष्टव्यम्। साध्यान्तरमाह-परमेति। सुखसमवायित्वादेस्तत्प्रयोजकत्वस्य निरस्तत्वात्सुखमेव तत्प्रयोजकमिति तदभेद एव सिध्यतीति भावः। 'मम सुखम्' इत्यादिभेदप्रत्यक्षविरुद्धमनुमानमित्याशङ्क्याह-न चेति। सुखाहङ्कारभेदस्य मयाप्यङ्गीकारादित्यर्थः। हेत्वन्तरमाह-सुखव्यक्तेरिति। तर्कापोद्बलितानुमानस्यैव प्रत्यक्षबाधकत्वादित्यर्थः॥

न केवलं प्रत्यक्षाविरोधः। किं तु तदपि तत्र मानमित्याह-तथेति।

(आत्मनः सुखाभेदे सौषुप्तिकानुभवस्यापि प्रामाण्यनिरूपणम्।)

तथाऽऽत्मनः सुखत्वे "सुखमहमस्वाप्सम्" इति परामर्शकल्प्यसौषुप्तिकानुभवोऽपि मानम्। तथा हि-सर्वानुभवसिद्धस्तावदयं परामर्शः। स च सुखविषय एव। दुःखाभावस्य सुषुप्तौ सतोऽपि प्रतियोगिज्ञानाभावेनानुभवितुमशक्यत्वात्। अननुभूते च परामर्शायोगात्। ननूत्थितस्य स्वापकालीनदुःखाभावानुमितिरियं, न परामर्शो, न वा सुखविषय, इति चेन्न। प्रसिद्धपरामर्शतुल्यत्वात्सुखविषयत्वे बाधकाभावाच्च-असत्यपि बाधेऽन्यतोक्तेरन्यविषयत्वेऽतिप्रसङ्गात्। दुःखाभावानुमितिलिङ्गानिरूपणाच्च परामर्श एवायम्। न तावत्तत्कालीनदुःखवत्ताऽस्मरणं तत्कालीनदुः-

खाभावे लिङ्गम्। अनुभूते स्मृतिनियमाभावेनाप्रयोजकत्वात् । न च स्वसत्तायामवश्यानुभवस्य नियमेनास्मरणमभावव्याप्तमिति वाच्यम् । अनुभूतेऽपि सुखादौ कस्मिंश्चित्तदभावदर्शनात् । किं च तदा दुःखवत्तया या स्मृतिस्तदभावो हेतुः । तदा यद् दुःखं तद्गोचरस्मृतिविरहो वा तदा यो दुःखवत्तया स्मृतिविरहः-स वा ?।

सौषुप्तिकदुःखाभावविषय एवायं परामर्श इत्याशङ्क्याह-स चेति । सुषुप्तौ दुःखस्मरणायोगेन तदभावानुभवाभावात्तत्परामर्शानुपपत्तेरिति। हेतुमाह-दुःखाभावस्येति । सुप्तौ सुखानुभवाङ्गीकारे तद्भङ्गप्रसङ्गात्, तदनुभवाभावे तत्परामर्शस्याप्यनुपपत्तेः "सुखमस्वाप्सम्" इत्युत्थितस्य दुःखाभावानुमितिरेवेति शङ्कते-नन्विति । अनित्यज्ञानोपरमरूपसुषुप्तेः नित्येन सुखानुभवेन विरोधाभावात्तदधीनसुखपरामर्श एवायमित्यभिप्रेत्याह-न प्रसिद्धेति। सुखविषयत्वेन संमतपरामर्शतुल्यत्वादित्यर्थः। सुप्तौ सुखस्याभावात्कथं तद्विषयत्वमस्येत्याशङ्क्याऽनित्यसुखाभावेऽपि नित्यसुखविषयत्वोपपत्तेरित्याह-सुखविषयत्व इति । अनुमितिकरणस्यापि निर्वक्तुमशक्यत्वात्परिशेषादयं परामर्श इत्याह-दुःखाभावेति । "अहं सुषुप्तिकाले दुःखरहितः तत्कालीनदुःखवत्तया स्मरणरहितत्वात्सुख्यहमिव"इत्यादि लिङ्गमस्तीत्याशङ्क्याह-न तावदिति । कदाचिदनुभूतस्य विद्यमानस्यापि घटादेरस्मर्यमाणत्वान्नास्मरणं प्रमेयाभावव्याप्तमित्यर्थः । ननु दुःखस्य ज्ञायमानसत्ताकतया घटादिविल-

क्षणत्वात्तदस्मरणं तदभावमन्तरेणानुपपन्नमिति चेन्न । चिरातीतसुखादेस्तत्कालीनतया स्मरणाभावेऽपि तदा सत्त्वादित्याह-न च स्वसत्तायामिति ।

किं च तत्कालीनत्वं स्मरणस्य विशेषणमुत दुःखस्य किं वा स्मरणविरहस्येति विकल्पयति किं चेति ॥

प्रथमद्वितीययोः प्रतियोग्यप्रसिद्ध्या हेत्वसिद्धिमाह-न प्रथमाविति ।

प्रतियोग्यप्रसिद्ध्या हेत्वसिद्धिः । न प्रथमौ । सुषुप्तिकालीनदुःखतद्गोचरस्मृत्योरसत्त्वेन तद्विरहासिद्धेर्व्यधिकरणतद्विरहयोरलिङ्गाच्च । नापि तृतीयः । दुःखवत्यात्मनि व्यभिचारात् । दुःखानुभवकाले तत्स्मृतिविरहसत्त्वात् । स्वापकालीनतया स्मृतिविरहस्येदानीमवगन्तुमशक्यत्वाच्च । न च तदापि सुषुप्तिकालीनदुःखाभावोऽस्तीति न व्यभिचार इति वाच्यम् । सुषुप्तिकालीनदुःखस्याभावात् । तत्कालीनत्वेन दुःखाभावस्य पूर्वमज्ञानात् । न चैवं प्रातःकालीनतया चत्वरादौ कथं गजाद्यभावानुमितिरिति वाच्यम् । क्वचिद्ध गजविरोधिपदार्थवत्तया स्मरणात् । क्वचित्प्रतियोगिनो देशान्तरसम्बन्धित्वज्ञाने । तदुभयाभावे तु अभावस्मरणं क्वचित् । संभवति हि पूर्वमप्यालोकविशिष्टे देशे योग्यानुपलब्ध्या अभा-

वानुभवः प्रतियोगिज्ञानमप्यभावज्ञानबलात्क-ल्प्यम् । लिङ्गज्ञानव्याप्तिज्ञानपरामर्शानां कल्पनातोऽभावज्ञानकल्पन एव लाघवात् ॥

नन्वेकस्य सुषुप्तिकालेऽपरस्य दुःखतत्स्मरणयोः संभवान्न तदभावोऽसिद्ध इत्यत आह-व्यधिकरणेति । स्वदुःखे सत्यपि परकीयदुःखतत्स्मरणयोर्विरहस्यापि सत्त्वेन व्यभिचारादित्यर्थः । स्वापकालीनो यो दुःखस्मृतिविरहः तस्य दुःखानुभवकालेऽपि सत्त्वाद् व्यभिचारेण दूषयति-नापीति । स्वापकाले दुःखविरहवत्स्मृतिविरहोऽपि दुर्विज्ञेयत्वादसिद्ध इत्याह स्वापेति । यदुक्तं 'दुःखवत्यात्मनि व्यभिचारादिति, तत्परिहारमाशङ्क्याह-न च तदापीति । किं तदापि सुषुप्तिकालीनं यद् दुःखं तदभावोऽस्तीत्युच्यते, किं वा सुषुप्तिकालीनो यो दुखाभावः सोऽस्तीति ?। नोभयथापीत्याह-सुषुप्तीति । पूर्वमज्ञानादिति । तथा च साध्याप्रसिद्धिरिति भावः । अस्मर्यमाणस्याभावानुमापकत्वे प्रसिद्धाभावोऽपि न सिद्ध्येदिति शङ्कां निराकरोति-न चैवमिति । गजावस्थानविरोधिनी गवादिसंकुलता स्मर्यमाणा तदभावानुमापिकेत्याह-क्वचिदिति । तदभावे गजस्यान्यत्र सत्त्वं स्मर्यमाणं चत्वरे तदभावानुमापकमित्याह-क्वचित्प्रतियोगिन इति । उभयस्याप्यनुमापकस्याभावे का गतिस्तत्राह-तदुभयेति । ननु प्रातश्चत्वरं प्रविष्टेनापि तदभावानुभवात्कथं सायं तत्स्मृतिरित्याशङ्क्य सामग्रीसत्त्वात्तदभावो ऽनुभूत एवेत्याह-संभवति हीति । तदा गजस्मरणाभावात्कथं तदभावोपलब्धिसामग्रीत्याशङ्क्य

तदपि कार्यबलात्कल्प्यमित्याह-प्रतियोगीति । अननुभूयमानज्ञानकल्पनमेव दोष इत्याशङ्क्यानुमानपक्षेऽननुभूयमानबहुकल्पनमस्तीत्याह-लिङ्गज्ञानेति ॥

किं चानुमानपक्षे स्मरणाभावेनानुभवाभावमनुमाय तेन गजाभावोऽनुमातव्यः । तत्रापि नानुपलम्भमात्रं प्रमेयाभावे लिङ्गव्यभिचारात् । किं तु योग्यत्वे सति । योग्यत्वं च प्रतियोगितद्व्याप्येतरतदुपलम्भकसमवधानम् । तथा च गजत्वादिविशेषणज्ञानस्यापि तदुपलम्भकत्वात्तदपि प्रातस्त्वया कल्प्यम् । तथा च प्रतियोगिज्ञानं दुर्वारमित्याह-त्वयापीति ।

अनुमानपक्षे प्रत्यक्षानुभवाभावानुमानपूर्वकं गजाभावानुमानम् ।

त्वयाऽप्यननुभूयमानविशेषणज्ञानस्य पूर्वं कल्प्यत्वात् । अन्यथा प्रतियोगितद्व्याप्येतरविशेषणज्ञानाभावेनानुमाने लिङ्गाभावात् । अत एव क्वचित्तत्तुल्यवत्तया ज्ञायमानेऽपि गृहादौ पिपीलिकाद्यभावसंशयो दृश्यते । अनुमाननियमपक्षे तन्न स्यात् । तत्रापि तल्लिङ्गनिश्चयसंभवात् । न चानुभूते प्राणिधनादौ नियमेन स्मर्यमाणत्वमपि लिङ्गविशेषणं पिपीलिकादेस्तदभावात्तत्र संशय इति वाच्यम् । देवदत्तादेरपि तदज्ञानदशायामभावज्ञानदर्शनात् । तत्र च स्मरणकल्पनायामन्यत्रापि तदस्तु । किं च देवदत्तगोचरप्रत्यक्षप्रागभावविरहाद्वा सामग्र्यन्तरप्रतिबन्धाद्वा वि-

द्यमानेऽपि तदननुभवसंभवादप्रयोजकमनुमानम् । स्वीक्रियते खलु त्वया प्रागभावेतरकारणसत्त्वेऽपि तद्विरहात्कार्यानुत्पत्त्यभावः ॥

यत्रास्मदुक्तलिङ्गद्वयं नास्ति । नापि पूर्वानुभवः । तत्राभावनिश्चयोऽपि न नेतव्य इति व्यतिरेकमाह-अत एवेति । तत्तुल्यवत्तयेति । पिपीलिकादितुल्यतुषादिमत्तयेत्यर्थः । प्रातश्चत्वरे गजाभावनिश्चयस्यानुमितित्वनियमपक्षे पिपीलिकाद्यभावसंशयो न स्यात् । तत्तुल्यवत्तया स्मर्यमाणत्वे सति तद्वत्तयाऽस्मर्यमाणत्वलिङ्गस्यात्रापि सत्त्वादित्याह-अनुमानेति । ननु चित्तसमाधाने सत्यनुभूतस्य स्मरणयोग्यत्वमप्युक्तलिङ्गविशेषणं पिपीलिकादेश्चैतदभावान्न तदभावनिश्चय इति चेन्न । उक्तविशेषणविशिष्टलिङ्गाप्रतिसन्धानेऽपि झटिति कालान्तराभावनिश्चयदर्शनादित्याह-न चानुभूत इति । देवदत्ताभावस्य स्मर्यमाणत्वे गजाद्यभावेऽपि तथैव स्यादित्याह-तत्र चेति । परमते कुत्राप्यभावानुमानं न संभवतीत्याह-किं चेति । अधिकरणे प्रतियोगिसत्त्वविरोध्येवानुपलम्भोऽभावानुमापकः । न चात्रानुपलम्भस्य तद्विरोधित्वम् । प्रतियोगिसत्त्वेऽप्युपलम्भप्रागभावाभावात्सामग्र्यन्तरप्रतिबन्धाद्वाऽनुपलम्भोपपत्तेरिति भावः । तत्र प्रागभावाभावेन कार्यासंभवमाह-स्वीक्रियत इति । प्रागभावाभावादेवोत्पन्नस्य पुनरनुत्पत्त्यङ्गीकारादित्यर्थः॥

सामग्र्यन्तरप्रतिबन्धादनुपलब्धावुदाहरणमाह-तुरगादाविति ।

अनुपलब्धौ सामग्रीः तुरगादौ वेगेन गच्छतः पन-प्रतिबन्धकत्वम् । सत्त्वादिस्मृतिमतो धर्मीन्द्रिय-सन्निकर्षे समानेऽपि कस्यचित् ज्ञानं कस्य चि-न्नेति । एकेन्द्रियग्राह्याणामपि कस्य चित्सामग्र्या कस्य चित्प्रतिबन्धश्च । अनुभवेऽपि प्रमुष्टतत्ता-कस्मृतिवदितरस्मरणोपपत्तेश्चाप्रयोजकम् । त-स्मादुक्तलिङ्गद्वयाभावे स्मरणमभावस्य । अन्यथा संशय एव । यदि च प्रागभावोऽपि न कारणम् संशयनियमोऽप्यदृष्टादेव, अर्थे च स्मर्यमाणत्व-नियमस्तर्हि "देवदत्तः प्रातःकालीने सर्वतोऽवलो-किते गृहे वर्त्तमानाभावप्रतियोगी तदानीं गेहनि-ष्ठतत्तुल्यस्मरणसमानकालीनस्मरणाविषयत्वेसति विषयविशेषत्वात्, संप्रतिपन्नवत्" इत्यस्तु ।

कस्य चिदिति । वृक्षविशेषस्येत्यर्थः । एकेन्द्रिय-ग्राह्येष्वपि कस्य चित् ज्ञानसामग्र्या कस्य चित् ज्ञानं प्रतिबध्यते, किमु वक्तव्यं भिन्नेन्द्रियग्राह्येष्वित्यभिप्रे-त्याह-एकेन्द्रियेति । एवमस्मरणमप्यनुपलम्भे न लिङ्ग-मित्याह अनुभवेऽपीति । तद्विरुद्धदार्यवत्तया स्मर्यमाण-त्वादिलिङ्गद्वयाभावेऽप्यभावनिश्चयः स्मृतिरेव । तस्या अप्यभावे संशय एवेत्युपसंहरति-तस्मादिति । प्रातर्ग-जाद्यभावस्यानुमेयत्वेऽपि न सौषुप्तिकदुःखाभावस्य तदिति वक्तुं पूर्वोक्ताप्रयोजकत्वबीजाभावमङ्गीकरोति-यदि चेति । पिपीलिकादिसंशयनियम इत्यर्थः । अर्थे चेति । अनुभूत इति शेषः । देवदत्तः प्रातःकालीनेऽव-

लोकिते गृहे सर्वत्र वर्तमानाभावप्रतियोगी प्रातःकालीनगेहनिष्ठा देवदत्ततुल्या ये स्तम्भादयस्तत्स्मरणैककालस्मरणाविषयत्वे सत्युपेक्षणीयविषयातिरिक्तत्वात् बाह्यवृक्षवदित्यनुमानवाक्यार्थः । समयान्तरे देवदत्तस्य गृहे सत्त्वेन बाधपरिहाराय प्रातःकालीन इति विशेषणम् । गृहैकदेशे देवदत्तसत्त्वेऽपि तन्निष्ठाभावप्रतियोगित्वसम्भवेनार्थान्तरतावारणाय सर्वत इति । सर्वत्र इत्यर्थः । अनवलोकितगृहे देवदत्तस्य सर्वत्र बाधपरिहारायावलोकित इति । गेहनिष्ठोपेक्षणीयविषयेषु व्यभिचारवारणाय विशेषत्वादिति । स्तम्भादौ व्यभिचारवारणायस्मरणाविषयत्वे सतीति । अनुमानकाले देवदत्तस्यापि स्मर्यमाणत्वादसिद्धिवारणाय गेहनिष्ठतत्तुल्यस्मरणकालीनेत्युक्तम् । गेहपदं च सर्वतोऽवलोकितगेहपरम् । तथा च गेहनिष्ठेऽपि गेहानवलोकनप्रयुक्तस्मरणादिविषये न व्यभिचारः । समयान्तरे गेहनिष्ठस्तम्भादिभिः सह स्मर्यमाणत्वादसिद्धिवारणाय तदानीमित्युक्तम् ॥

स्वापकालीनदुःखाभावे पूर्वोक्तलिङ्गद्वयमसिद्धञ्च नास्तीत्याह-न चेति ।

सुषुप्तौदुःखाभावे पूर्वोक्तहेतुद्वय-स्थापनपूर्वकोऽनुमानखण्डनम् ।

न च प्रकृते सुषुप्तिकालीनदुःखविरोधि स्मरणमस्ति न वा दुःखं सुषुप्तिकालीनात्मनिष्ठप्रतियोगि अन्यत्रवर्तमानत्वादित्यनुमानम् । तदभावस्य तत्र सत्त्वेऽपि सकलदुःखाभावस्य तद्वृत्तित्वासिद्धेः । "सुखमहमस्वाप्सम्" इति ज्ञानस्य सकलदुःखाभावविषयकत्वस्यैव वक्तव्यत्वात् ।

in substances and actions; and these latter would be *qualities* and so also as regards the connection of the community of 'Action.' Thus there would be an intermixture or overlapping of the categories."

[Page 328] *Reply*: There can be no overlapping among the categories; as the mere presence of Inherence does not make a *substance*; it is the inherence *of the community of* '*substance*', and that too *in a substance* only; and not in qualities or actions; hence these latter could not be substances. So also with the inherence of qualities and actions.

The author proceeds to explain this statement:—Though Inherence is self-sufficient and does not, like Conjunction, subsist through any other relationship &c., &c., &c.

Another objection is raised: "How do you know that the community of 'substance' resides in substances only, that of 'quality' in qualities only and that of 'Action' in actions only?"

The answer to this is that, as a matter of fact we feel that the idea of the community of 'substance' is concomitant with, or present in, substances only, and is non-concomitant with, or absent from, qualities and actions; similarly the idea of the community of 'quality' is present in qualities, and absent from substances and actions; and so also the idea of the community of 'action' is present in actions, and absent from substances and qualities; and from all these concomitances and non-concomitances we infer that there is a restriction as to the communities of 'substance' &c.

Question: "But whence could you have such a restriction when Inherence is one and the same in the case of all? That is to say, the inherence of the community of 'substance' in Earth and other substances is the same as that of the community of 'quality' in colour and other qualities, and that of the community of 'Action' in 'Throwing upward' and other actions."

Answer : In the case of Conjunction we find that though it is one only, yet we have a restriction; as in the case of the *pit* and the *curd*, we find that it is the *pit* that is the container and the *curd* the contained, this restriction being due to the peculiarity of the capabilities of the objects concerned; and in the same manner, though Inherence is one only, yet there is a restriction as to which among substances, qualities and actions are the container and which the contained,—a distinction that is based upon their manifestiveness and manifestibility. That is to say, the community of 'substance' is manifestible by substances only; and hence it is in substances alone that that community inheres. Similarly with qualities and actions.

Text (161) :—*Even though the members related are transient, the Inherence is not transient, like Conjunction; because like Being, it is not brought about by any cause. That is to say, in the case of Being we have found that it is eternal, because we cannot cognise any cause for it, by any of the valid means of knowledge; and the same may be said to be the case with Inherence also; as by none of the valid means of knowledge can we find any cause for it.*

Objection :—"*By what relation does Inherence subsist in substance &c? This relation can not be that of conjunction; as conjunction being a quality can reside in substances only (and Inherence is not a substance); nor can the relation be that of inherence; as the latter is one only; and there is no third relation by which it can subsist.*"

Reply :—*Not so; as it is itself of the nature of relation or subsistence. In the case of 'Being' with regard to substances, qualities and actions,*

we have seen that it has no connection with any other 'being'; and in the same manner, Inherence, being inseparable (from its substrate) and of the very nature of a subsisting relation, could have no other relation; and hence it is regarded as self-sufficient. For this reason it has been regarded as imperceptible by the sense-organs; specially as it is not found to have an existence in the perceptible substances in the same manner that 'being' &c., have; and as it is not perceptible by itself, we conclude that it is only inferable from the notion that 'this is in that.'

All reverence to that Kaṇâda who, having pleased Maheçvara by the superb character of his meditation and austerities, propounded the philosophy of the Vaiçēshika system!

Thus ends the Padartha-dharmasangraha of Praçastapâda.

Commentary

A question having been raised as to whether Inherence is eternal or transient, the author says—*Even though the members &c, &c.* In the case of conjunction we find that the members in contact being transient, the conjunction also is transient; but not so in the case of Inherence; as in the case of conjunction it is only natural that the destruction of the members should bring about the destruction of the conjunction as the members form the material cause of the conjunction; the case of Inherence however is diffierent; the members are mere related members, and not its cause; as we have shown above; hence Inherence is not destroyed on the destruction

of the members; as we recognise it as present in other substances; just as is the case with 'being' (which also is eternal).

Objection:—" Does Inherence correlate the members through some relation, or without any relation? Nothing could correlate things without being related itself; if it were not so, then we would have most absurd relationships. Then, as for being related, it could not bear the relation of conjunction &c.........and as we cannot find any relation by which Inherence can subsist in substances, we conclude that it does not subsist in them at all."

Reply: It cannot be rightly held that because it has no relationship, therefore it does not exist. Because it is itself of the nature of relation or subsistence. As for conjunction, it is caused; and hence though a relation, it subsits by another relation; the very presence of a cause constituting the nature of an effect; and as for Inherence, it does not stand in need of any other relation; it subsists by itself.

Page 330.—*For this same reason it is imperceptible by the sense-organs etc., etc.* 'Being' etc., are found to subsist in perceptible things; and hence they are regarded as perceptible by the sense, by reason of the organs coming in contact with the things in which 'Being' etc., inhere. Inherence however cannot subsit in the same manner, and hence it is regarded as imperceptible; as the organs of sense are found to have the power of perceiving only such things as are in direct contact with them, or those that inhere in such things.

Objection: " If there is a sensuous cognition of Inherence, then it is a mere absurdity to declare that it has no relation; and if there is no such cognition, then that must be stated clearly".

In view of this objection, the author adds—*It is not perceptible by itself.* That is to say, we have not the same cog-

nition of Inherence that we have of conjunction ; as the members related by inherence are found to constitute a single mass.

Thus then, Inherence should be regarded as that whereby is brought about the coherence of distinct substances, and which serves to set aside independence.

This commentary, the *Nyâyakandalí,* consisting of a combination of excellent letters and surpassing all others, is like the range of the peaks of the mount Meru (which is composed of a mass of gold, and which lies to the north of all things).

This *Nyâyakandalí,* while putting forward the good points of its own unmolested system, refutes the view of the opponents.

Located in the southern part of the *Rāḍhā* (a district in Bengal-Bēhar) is the village of *Bhūrisṛshti* belonging to the Brāhmanas that performed many sacrifices, and inhabitted by many wealthy men.

From out of this village was born, like the moon from the Ocean, the Brahmana who was a moon on the earth, by reason of his being a source of happiness to the people,—he who was respected of all people, like Bṛhaspati himself.

From him was born Baladêva, the great ocean of the gems of good qualities, the sustaining tree of the creepers of learning, of purest intentions, the great propeller of the river of manifold celebrity.

Abhokâ, born of a pure family, having many good qualities, was the wife of him, who was famous and possessed of excellent qualities.

From her was born Çrīdhara, the fulfiller of the wish of all needy men—affording excellent protection (good shade), making excellent presents (producing good fruits), having many children (branches), the refuge of Brahmanas (birds).

This person gave birth to the beautiful Nyâyakandalī, which is fit to be listened to by the most clever among the learned, and serves to explain the six categories.

The Nyâyakandalī was composed in the year 913 of the Çāka era.

Thus ends the Nyâyakandalī, treating of the categories, composed by Bhatta Çrīdhara, at the request of Çri Pandūdâsa.

ERRATA.

Page	Line.	For	Read.
1	23	metempychosis	metempsychosis
37	35	so	to
43	1	to	of
52	17	suc	such
58	4	wehave	we have
66	2	enteral	eternal
74	19	differentation	differentiation
,,	20	,,	,,
81	11	minerials	minerals.
82	3	*quatities*	*qualities*
86	6	much	such
87	14	effeciency	efficiency
105	10	belong	belong to
,,	13	an is	is an
108	31	*aud*	*and*
121	33	thesmoke	the smoke
127	3	bot bayu	about by
129	14	*I*	*It*
132	12	buality of one thng	quality of one thing
133	18	couch	conch
138	32	*af*	*of*
,,	33	,,	,,
140	17	inact	intact
148	25	simle	simple
153	1	*existenc*	*existence*
161	33	of	or
205	8	symultaneity	simultaneity
207	29	poseriority	Posteriority
212	13	*posterority*	*posteriority*
213	17	Allo bjects	All objects
214	23	Infuence	Inference
215	4	knowledgc	knowledge
262	30	auther	author
264	17	another	,,
277	1	pape	paper
283	25	satispurified	satisfied
294	33	our	out
322	5	rusnlts	results
355	3	*wnd*	*and*
,,	5	*ahich*	*which*
356	10	*o*	*of*

Page.	Line,	For	Read.
361	32	noiion	notion
393	12	*pleasant*)	(*pleasant*)
409	13	bought	brought
435	1	Thes	These
445	12	another	author
475	2 foot note	ive	give
513	27	belongs	belongs to
517	26	dalu	dual
525	19	*ro*	*or*
539	25	explicity	explicitly
„	33	a such	such a
552	28	Soon	So on
556	13	*of*	*or*
562	10	affort	effort
563	11	undesirabl	undesirable
„	14	sou	soul
565	20	composit	composite
568	11	Intrinsice	Intrinsic
„	19	pity	ity
570	11	wheredy	whereby
572	19	*serics*	*series*
573	19	our	of our
580	14	ise	rise
584	17	*fiual*	*final*
599	15	vituous.	virtuous
604	11	committee	committing
605	2 foot note	necessar	necessary
606	19	revoling	revolving
„	25	regard	argued
608	9	poseibility	possibility
613	7	*form*	*form of*
616	11	Chapter XI	Chapter VI Section (11)
622	7	*eatering*	*entering*
„	15	*form*	*from*
626	33	*final*	*find*
630	34	*and other*	*an other*
631	28	regious	regions
636	9	*for*	*far*
643	23	partieles	particles
645	7	restructed	restricted
648	29	extenal	external
649	19	ing	ring

क्वचिदन्यत्रापि भवति । ग्रा देवता स्य ग्रः स्थालीपाक इति हि प्रकृत्यैकाजिति भाष्ये दृष्टमिति पदमञ्जर्यां स्पष्टम् ॥

नेन्द्रस्य परस्य ॥ ७ । ३ । २२ ॥

सौमेन्द्रम् । परस्य किम् । ऐन्द्राग्नः ।

दीर्घाच्च वरुणस्य । ७ । ३ । २३ ॥

दीर्घात् परस्य वरुणस्य न वृद्धिः । ऐन्द्रावरुणौ । दीर्घात्किम् । आग्निवारुणीमनड्वाहीम् ॥

प्राचान्नगरान्ते । ७ । ३ । २४ ॥

प्राचां देशे नगरान्तेङ्गे पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धिर्ञिणेति किति च । सुह्मनगरे भवः सौह्मनागरः । पौण्ड्रनागरः । प्राचां किम् । मनगरमुदक्षु तत्र भवो मानगरः ।

जङ्गलधेनुवलजान्तस्य विभाषित-मुत्तरम् । ७ । ३ । २५ ॥

जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य वा ञ्णिति किति च ॥ कुरुजङ्गले भवं कौरुजङ्गलम् । कौरुजाङ्गलम् । वैश्वधेनवम् । वैश्वधैनवम् । सौवर्णवलजम् । सौवर्णवालजम् ।

अर्द्धात्परिमाणस्य पूर्वस्य तु वा । ७ । ३ । २६ ॥

अर्द्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञ्णिति किति च । अर्द्धद्रोणेन क्रीतमर्द्धद्रौणिकम् । आर्द्धद्रौणिकम् । प्राग्वतेष्ठञ् । अर्द्धात्परिमाणस्य पूर्वन्त्विति सुवचम् । विभाषितमित्यनुवृत्तेः ।

नातः परस्य । ७ । ३ । २७ ॥

अर्द्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वस्य तु वा ञिदादौ । अर्द्धप्रस्थिकम् । आर्द्धप्रस्थिकम् । अतः किम् । अर्धकौडविकम् । तपरः किम् । अर्द्धखार्यां भवा अर्द्धखारी अर्द्धखारीभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात् । परस्य किम् । पूर्वस्य मा भूत् । नन्वत इत्येतत्सामर्थ्यादेव पूर्वस्य न भविष्यति । न हि पूर्वस्यार्द्धशब्दस्याकारादन्यो वृद्धिभागस्ति । किञ्च यदि पूर्वस्य प्रतिषेधः स्यात्पूर्वस्य तु वेत्येतदनर्थकं स्यात् । एवं तर्ह्यकारान्तस्योत्तरपदस्येत्येवं तदन्तविधिर्मा भूत् । किञ्च स्यात् इह प्रतिषेधः स्यात् । अर्द्धद्रौणिकमर्द्धकौडविकमिति । पूर्वस्तु विधिरर्धमुष्टिना क्रीतः अर्द्धमौष्टिक इत्यादौ चरितार्थः ॥

प्रवाहणस्य ढे । ७ । ३ । २८ ॥

प्रवाहणशब्दस्योत्तरपदस्याचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे । प्रवाहणस्यापत्यं प्रावाहणेयः । प्रवाहणेयः । प्रवाहयतीति प्रवाहणः । शुभ्रादिः । एयन्ताद्वहेर्नन्द्यादेर्ल्युः । णेर्विभाषेति णत्वम् ।

तत्प्रत्ययस्य च । ७ । ३ । २९ ॥

ढान्तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा । प्रवाहणेयिः । प्रावाहणेयिः । बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुं न शक्यत इति सूत्रारम्भः ॥

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । ७ । ३ । ३० ॥

नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः पूर्वपदस्य तु वा ञिदादौ । अशुचेरागतमशुचौ भवं वा अशौचम् । आशौचम् ।

बहुव्रीहेर्वा भावार्थकोऽण् । अनैश्वर्यम् । आनैश्वर्यम् । ब्राह्मणादित्वात्तत्पुरुषात्ष्यञ् । न नञ्पूर्वात्तत्पुरुषादिति निषेधस्तु न । तत्र तत्पुरुषस्यैव पाठसामर्थ्यात् । अक्षेत्रज्ञम् । आक्षेत्रज्ञम् । पूर्ववदण् । भावार्थको युवाद्यण् तु न तत्र क्षेत्रज्ञस्यैव पाठेन तदन्तविधेरभावात् भावार्थकाणन्तेन नञ्समासे तु अक्षेत्रज्ञमित्येव । एवं कुशलनिपुणयोरपि युवाद्यणि ब्राह्मणादित्वाष्ष्यञि च क्षेत्रज्ञस्यापि ब्राह्मणादित्वात्ष्यञि च बोध्यम् । अक्षेत्रज्ञस्तत्पुरुषो ब्राह्मणादिरिति वृत्त्यादिमते । तस्मात्तत्पुरुषाद्ब्राह्मणादित्वात्ष्यञ् वा तदा उदाहरणे यकारोऽपि बोध्यः । अकौशलम् । आकौशलम् । अनैपुणम् । आनैपुणम् । पूर्ववदण् । एते सर्वे शुच्यादिप्रकृतिकभावार्थकप्रत्ययान्तैरेव नञ्समासाः । वचनसामर्थ्यादनङ्गस्यापि वृद्धिरिति मतं वृत्तिपदमञ्जर्यादिविरोधादुपेक्ष्यम् ।

यथातथयथापुरयोः पर्यायेण । ७ । ३ । ३१ ॥

नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिदादौ । आयथातथ्यम् । अयाथातथ्यम् । आयथापुर्यम् । अयाथापुर्यम् । अयथातथ अयथापुर इति नञ्समासौ ब्राह्मणादिषु द्रष्टव्यौ । प्रत्ययान्तरन्त्वाभ्यां नैवानभिधानात् । यथातथयथापुरशब्दौ तु पदार्थानतिवृत्तावव्ययीभावौ । तथा च नपुंसकह्रस्वः कृतः तथाभावमनतिक्रान्तं यथातथं सत्यमुच्यते । यद्वस्तु पुरा यथाभूतं तदद्यापि तथाभावमनतिक्रान्तं यथापुरमुच्यते । भाष्ये तु अयथातथाभाव इति विग्रहदर्शनात्सुप्सुपेति समासो लक्ष्यते । यथातथेत्ययं विशिष्टो निपातोऽविपरीतार्थवृत्तिरिति केचिदाहुः । एवं चास्मिन्पक्षद्वये सूत्रे दीर्घान्तपाठः ॥

हनस्तोऽचिण्णलोः । ७ । ३ । ३२ ॥

हन्तेस्तकारोऽन्तादेशः स्या च्चिण्णल्वर्जे ञिति णिति । घातो घातकः । अचिण्णलोः किम् । अघानि । जघान ॥

आतो युक् चिण्कृतोः । ७ । ३ । ३३ ॥

आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च अदायि । दायो दायकः । दरिद्रायकः । चिण्कृतोः किम् । ददौ । ज्ञा देवत्तास्य ज्ञः । ञ्णिति किम् । गोदः ।

नोदात्तोपदेशस्य मान्तस्यानाचमेः । ७ । ३ । ३४ ॥

उपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अगमि । अदमि । शमो दमः । शमकः । दमकः । उदात्तोपदेशस्येति किम् । अगामि । यामको रामकः । कथमुद्यमोपरमौ । संज्ञापूर्वकत्वाद्वृद्ध्यभावात् । विश्रम इति त्वपाणिनीयम् । उपदेशग्रहणं किम् । शमी दमी इत्यत्र यथा स्यात् इह च मा भूत् यामको रामकः । मान्तस्य किम् । अवादि । अनाचमेः किम् । आचामि । आचामः । अनाचमिकमिवमीनामिति वक्तव्यम् । अकामि । अवामि । कामः । वामः । आमस्तु अमरोगे इति चुरादिरायन्तस्य बोध्यः । तथामित्वात् । चिण्कृतोः किम् । शशाम ।

जनिवध्योश्च । ७ । ३ । ३५ ॥

अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि । प्रजनः । जनकः । वध हिंसायाम् । हलन्तः । अवधि । वधो वधकः । चिण्कृतोः किम् । जजान ॥

अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ । ७ । ३ । ३६ ॥

एषां पुक् स्याणौ । अर्पयति । ह्रेपयति । व्लेपयति । रेपयति । यलोपः । क्नोपयति । क्ष्मापयति । स्थापयति । दापयति । अदीदपत् ।

शाच्छासाह्वाव्यावेपां युक् । ७ । ३ । ३७ ॥

णौ परे । पुकोऽपवादः । शाययति । छाययति । साययति । ह्वाययति । व्याययति । वाययति । पाययति । पातेर्णौ लुग्वक्तव्यः । पुकोऽपवादः । पालयति । धूञ्प्रीञोर्नुग्वक्तव्यः । धूनयति । केचित्तु धूञ्प्रीणोरिति पठित्वा प्रीणातिसाहचर्याद्धुनातेरेव नुकमाहुः । तन्मते तदन्यस्य धावयति । अयमाधृषीयः स्वादौ क्र्यादौ तुदादौ च । स्वादौ ह्रस्वश्च तथा च कविरहस्ये ॥

धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।

वायुर्विधूनयति चम्पकपुष्परेणून्यत्कानने धवति चन्दनमञ्जरीश्च ।

प्रीणयति । धूञ्प्रीणोरिति हरदत्तोक्तपाठे तु प्रीणात्यन्यस्याधृषीयस्य प्राययति ॥

वो विधूनने जुक् । ७ । ३ । ३८ ॥

जुक् स्याणौ कम्पेऽर्थे । वाजयति । कम्पे किम् । केशान्वापयति ॥

लीलोर्नुग्लुकावन्यतरस्यां स्नेहवि-पातने । ७ । ३ ३९ ॥

लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ स्तो वा णौ स्नेहद्रवे। विलीनयति । विलापयति । विलालयति । विलापयति वा घृतम् । ली ई इति ईकारप्रश्लेषादात्वपक्षे नुग्न । स्नेहद्रवे किम् । लोहं विलापयति विलाययति ॥

भियो हेतुभये षुक् । ७ । ३ । ४० ॥

भी ई इतीकारः प्रश्लिष्यते । ईकारान्तस्य भियः षुक् स्याण्णौ हेतुभये । भीषयते । ईकारान्तस्य किम् । मुण्डो भापयते । हेतुभये किम् । कुञ्चिकयैनं भाययति ॥

स्फायो वः । ७ । ३ । ४१ ॥

णौ । स्फावयति ॥

शदेरगतौ तः । ७ । ३ । ४२ ॥

शदेर्णौ तान्तादेशः स्यान्न तु गतौ । शातयति । गतौ तु गाः शादयति गोविन्दः । गमयतीत्यर्थः ॥

रुहः पोऽन्यतरस्याम् ॥ ७ । ३ । ४३ ॥

णौ । रोपयति । रोहयति । अयं योगः शक्यो ऽवक्तुम् । रुप लुप विमोहने इति दैवादिकस्य रोपयतीति रुहेश्च रोहयतीति च सिद्धेर्धातूनामनेकार्थत्वान्नार्थासङ्गतिरिति पदमञ्जर्यां स्पष्टम् ॥

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः । ७ । ३ । ४४ ॥

प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे स आप्सुपः परो न चेत् ॥ सर्विका । कारिका । अतः किम् । नौका । प्रत्ययस्थात्किम् । शक्नोतीति शका । असुपः किम् । बहु॰ परिव्राजका नगरी । कात्किम् । नन्दना । पूर्वस्य किम् । परस्य मा भूत् । कटुका । तपरः किम् । राका । आपि किम् । कारकः ॥ मामकनरकयोरुपसङ्ख्यानम् । मामिका । नरान्कायतीति नरिका त्यक्त्यपोश्च । दाक्षिणात्यिका । इहत्यिका ॥

न यासयोः । ७ । ३ । ४५ ॥

यत्तदोरस्येन्न स्यात् । यका । सका । यकाम् । तकाम् । त्यकनश्च निषेधः । उपत्यका । अधित्यका । पावकादीनां छन्दस्युपसंख्यानम् । हिरण्यवर्णाः शुचयः पावकाः । असेमकाः । छन्दसि किम् । पाविका । अलोमिका । आशिषि वुनश्च न ॥ * ॥ जीवका । भवका ॥ उत्तरपदलोपे च न ॥ * ॥ देवदत्तिका देवका । क्षिपकादीनां च ॥ * ॥ क्षिपका । ध्रुवका । कन्यका । चटका । तारका ज्योतिषि । अन्यत्र तारिका । वर्णका तान्तवे ॥ * ॥ अन्यत्र वर्णिका । वर्तका शकुनौ प्राचाम् ॥ * ॥ उदीचां तु वर्तिका । अष्टका पितृदेवत्ये । अष्टिकान्या ॥ सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् ॥*॥ इह वा अ इति छेदः । कात्पूर्वस्याकारादेशो वेत्यर्थः । तेन पुत्रि-काशब्दे ङीन इवर्णस्य पक्षे अकारः । अन्यत्रेत्वबाधनार्थमकारस्यैव पक्षे ऽकारः । सूतका सूतिकेत्यादि ॥

उदीचामातः स्थाने यकपूर्वायाः । ७ । ३ । ४६ ॥

यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्व-

स्येद्वा स्यात् आपि परे । केण इति ह्रस्वः । आर्यका । आर्यिका । चटकका । चटकिका । आतः किम् । सांकाश्ये भवा सांकाश्यिका । यकेति । किम् । अश्विका । स्त्रीप्रत्ययः किम् । शुभंयिका । धात्वन्तयकोस्तु नित्यम् ॥ * ॥ सुनयिका । सुपाकिका ॥

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि । ७ । ३ । ४७ ॥

स्वेत्यन्तं लुप्तषष्ठीकं पदम् । एषामत इद्वा स्यात् । तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थम् । भस्त्राग्रहणमुपसर्जनार्थम् । अन्यस्य तूत्तरसूत्रेण सिद्धम् । एषा द्वा एतयोस्तु सपूर्वयोर्नेत्वम् । अन्तर्वर्तिनीं विभक्तिमाश्रित्यासुप इति प्रतिषेधात् । अनेषका । परमैषका । अद्वके । परमद्वके । स्वशब्दग्रहणं संज्ञोपसर्जनार्थम् । इह हि आतः स्थाने इत्यनुवृत्तं स्वशब्दस्यातो विशेषणं न तु द्वैषयोरसम्भवाद् । नाप्यन्येषामव्यभिचारात् । स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः । अर्थान्तरे तु न स्त्री संज्ञोपसर्जनीभूतस्तु कप्रत्ययन्तत्वाद्भवत्युदाहरणम् । एवं चात्मीयायां स्विका परमस्विकेति नित्यमेवेत्वम् । निर्भस्त्रका । निर्भस्त्रिका । एषका । एषिका । कृतषत्वनिर्देशान्नेह विकल्पः । एतिके । एतिकाः । अजका । अजिका । ज्ञका । ज्ञिका । द्वके । द्विके । निःस्वका । निःस्विका ॥

अभाषितपुंस्काच्च । ७ । ३ । ४८ ॥

एतस्माद्विहितस्यातः स्थानेऽत इद्वा स्यात् । गङ्गाका । गङ्गिका । बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यम् । अज्ञाता अखट्वा अखट्विका । शैषिके कपि तु विकल्प एव ॥

आदाचार्याणाम् । ७ । ३ । ४९ ॥

पूर्वसूत्रविषये आद्वा स्यात् । गङ्गाका । उक्तपुंस्कात्तु शुभ्रिका ॥

ठस्येकः । ७ । ३ । ५० ॥

अङ्गात्परस्य ठस्येकादेशः स्यात् । रैवतिकः । रेवत्यादिभ्यष्ठक् ॥

इसुसुक्तान्तात्कः । ७ । ३ । ५१ ॥

इस् उस् उक् त् एतदन्तात्परस्य ठस्य कः स्यात् ॥ सार्पिष्कः । तदस्य पण्यमिति ठक् । धानुष्कः । प्रहरणमिति ठक् नैषादकर्षुकः । शाम्बरजम्बुकः । ओर्देशे ठञ् । कैणः । मातृकम् । ऋतष्ठञ् । औदश्वित्कम् । उदश्वितोऽन्यतरस्यामिति ठक् । इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह । आशिषा चरति आशिषिकः । उषा चरति औषिकः ॥ दोष उपसंख्यानम् ॥ * ॥ दोर्भ्यां चरति दौष्कः ।

चजोः कु घिण्ण्यतोः । ७ । ३ । ५२ ॥

चस्य जस्य च कुत्वं स्याद्घिति ण्यति च परे ॥ पाकः । त्यागः । रागः । वाक्यम् ॥ भोग्यम् ॥

न्यङ्क्वादीनां च । ७ । ३ । ५३ ॥

कुत्वं स्यात् ॥ न्यङ्कुः । नावञ्चुरुः । मद्गुः । मिमस्जिभ्य उरित्युः । जश्त्वेन सस्य दः ॥

हो हन्तेर्ञ्णिन्नेषु । ७ । ३ । ५४ ॥

ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं

स्यात् । घातः । घातकः । घ्नन्ति । नकारे परे कुत्वविधिसामर्थ्याद्‌ल्लोपो न स्थानिवत् ॥

अभ्यासाच्च । ७ । ३ । ५५ ॥

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ । जिघांसति । हन्तेर्यङ्लुकि अभ्यासाच्चेति कुत्वं यद्यपि होहन्तेरित्यनुवर्त्य विहितं तथापि यङ्लुकि भवत्येवेति न्यासकारादयः । श्तिपा शपेति निषेधस्त्वनित्यः । गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः । जङ्घनीति । आङ्पूर्वात्तु आङो यमहन इत्यात्मनेपदम् । आजङ्घते इत्यादि । इदं चाभ्यासाङ्गनिमित्तप्रत्ययैक्ये एव । तेन हननीयितुमिच्छति जिहननीयिषतीत्यादौ न ॥

हेरचङि । ७ । ३ । ५६ ॥

अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय । जिघीषति । जेघायते । अचङि किम् । अजीहयत् । एतदेव हि ज्ञापयति चङोऽन्यत्र ण्यन्तेपि कुत्वं भवतीति । तेन प्रजिघाययिषतीति सिद्धम् ॥

सन्लिटोर्जेः । ७ । ३ । ५७ ॥

जयतेः सन्लिण्निमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात् । जिगीषति । जिगाय । सन्लिटोः किम् । जीयते । यदि च सनि लिटि च परत इति व्याख्यायेत । तदा यङ्लुगन्तात्सनि कुत्वं स्यात् ॥

विभाषा चेः । ७ । ३ । ५८ ॥

अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च ॥ चिकीषति । चिचीषति । चिकाय । चिचाय । सन्लिटोः किम् । चेचीयते ॥

न क्वादेः । ७ । ३ । ५९ ॥

क्वादेर्धातोश्च जोः कुत्वं न । गर्ज्यम् । वार्तिककारस्तु चजोरिति सूत्रे निष्ठायामनिट इति पूरयित्वा न क्वादेरित्यादि प्रत्याचख्यौ । तेन अर्जितर्जिप्रभृतीनां न कुत्वम् । निष्ठायां सेट्त्वात् । शुचुप्रभृतीनां तु क्वादित्वेपि कुत्वं स्यादेव । सूत्रमते तु यद्यपि विपरीतं प्राप्तं तथापि यथोत्तरं मुनीनां प्रामाण्यम् ॥

अजिव्रज्योश्च । ७ । ३ । ६० ॥

न कुत्वम् ॥ समाजः । परिव्राजः । परिव्राज्यम् ॥

भुजन्युब्जौ पाण्युपतापयोः । ७ । ५ । ६१ ॥

एतयोरेतौ निपातौ । भुज्यतेऽनेनेति भुजः पाणिः । हलश्चेति घञ् । न्युब्जन्त्यस्मिन्निति न्युब्जः । उपतापो रोगः । पाण्युपतापयोः किम् । भोगः । समुद्गः ॥

प्रयाजानुयाजौ यज्ञाङ्गे । ७ । ३ । ६२ ॥

एतौ निपात्येते यज्ञाङ्गे । पञ्च प्रयाजाः । त्रयोऽनुयाजाः । यज्ञाङ्गे । किम् । प्रयागः । अनुयागः ॥

वञ्चेर्गतौ । ७ । ३ । ६३ ॥

कुत्वं न । वञ्च्यम् । गतौ किम् । वङ्क्यं काष्ठम् । कुटिलीकृतमित्यर्थः ॥

ओक उचः के । ७ । ३ । ६४ ॥

उचेर्गुणकुत्वे निपात्येते के परे । ओकः शकुन्तवृषलौ । इगुपधलक्षणः कः । घञा सिद्धे अन्तोदात्तार्थमिदम् ॥

ण्य आवश्यके । ७ । ३ । ६५ ॥

कुत्वं न । अवश्यपाच्यम् ॥

यजयाचरुचप्रवचर्चश्च । ७ । ३ । ६६ ॥

ण्ये कुत्वं न । याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यम् । ग्रन्थविशेषः । ऋच अर्च्यम् । ऋदुपधत्वेप्यत एव ज्ञापकाण्ण्यत् । त्यजेश्च ॥ * ॥ त्याज्यम् । त्यजिपूज्योश्चेति काशिका । तत्र पूजे र्ग्रहणं चिन्त्यम् । भाष्यानुक्तत्वात् । ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति हि भाष्यम् । पूज्यमिति तु चुरादिण्यन्तस्य पूजे रूपम् ॥

वचोऽशब्दसंज्ञायाम् । ७ । ३ । ६७ ॥

वच्यम् । शब्दाख्यायां तु वाक्यम् ॥

प्रयोज्यनियोज्यौ शक्यार्थे । ७ । ३ । ६८ ॥

प्रयोक्तुं शक्यः प्रयोज्यो भृत्यः ॥

भोज्यं भक्ष्ये । ७ । ३ । ६९ ॥

भोग्यमन्यत् ॥

घोर्लोपो लेटि वा । ७ । ३ । ७० ॥

दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । पदग्निरग्नये ददात् । लोपपक्षे आटा सिद्धेर्वेति स्पष्टार्थम् ॥

ओतः श्यनि । ७ । ३ । ७१ ॥

लोपः स्यात् । श्यति । छ्यति । स्यति । द्यति ॥

क्सस्याचि । ७ । ३ । ७२ ॥

उत्तरसूत्रादात्मनेपदे इत्यपकृष्यते । अजादौ तङि क्सस्य लोपः स्यात् । अलोन्त्यस्य । अधुक्षाताम् । अधुक्षाथाम् । अधुक्षि । अचि किम् । अधुक्षत । अधुक्षन्त । झावस्थायां लोपाभावेनादादेशो न । तङि किम् । तादक्षानित्यादौ मा भूत् ॥

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । ७ । ३ ।७३॥

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । अदुग्ध । अधुक्षत । अदुग्धाः । अधुक्षथाः । अधुग्ध्वम् । अधुक्षध्वम् । अदुह्वहि । अधुक्षावहि । अदिग्ध । अधिक्षत । अलीढ अलिक्षत । अगूढ । अघुक्षत । दुहादीनां किम् । गृहू ग्रहणे । अघृक्षत । तङि किम् । अधुक्षत् । दन्त्ये किम् । अधुक्षामहि । लुग्ग्रहणं किम् । अदुह्वहि अन्त्यस्य लोपो मा भूत् ॥

शमामष्टानां दीर्घः श्यनि । ७ । ३ । ७४ ॥

शमादीनामित्यर्थः । शाम्यति । ताम्यति । दाम्यति । श्राम्यति । भ्राम्यति । क्षाम्यति । क्लाम्यति । शपीव श्यन्यपि ष्ठिवुक्लमित्येव दीर्घे सिद्धे शमादिपाठो घिनुणर्थः । माद्यति । अष्टानां किम् । अस्यति । श्यनि किम् । शमति ॥

ष्ठिवुक्लमुचमां शिति । ७ । ३ । ७५ ॥

एषामचो दीर्घः स्याच्छिति परे । ष्ठीवति । केचिट्टिवादावपीमं पठन्ति । ष्ठीव्यति । ष्ठीवनमिति । तथा च चान्द्रसूत्रम् । ष्ठिवुसिवे।

दीर्घश्चेति । पक्षे पृषोदरादित्वाद्दीर्घः तेन ष्ठेनमपि । क्लामति । दीर्घत्वमाङि चम इति वक्तव्यम् ॥ * ॥ आचामति । आङि किम् । चमति । विचमति ॥

क्रमः परस्मैपदेषु । ७ । ३ । ७६ ॥

क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति । क्राम्यति । क्रामति । उत्क्राम । सङ्क्राम । न लुमतेति निषेधस्त्विह न । लुप्रप्रत्ययनिरूपिताङ्गे दृश्यककार्ये एव तत्प्रवृत्तेः । परस्मैपदेषु किम् । आक्रमते सूर्यः ॥

इषुगमियमां छः । ७ । ३ । ७७ ॥

एषां छः स्याच्छिति परे । इच्छति । गच्छति । यच्छति । इषेरुदितो ग्रहणमुदितस्तौदादिकस्यैव ग्रहणार्थम् । तेनेह न । इष्यति । इष्णाति । इषाण । हलः श्नः शानज्झौ ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ७ । ३ । ७८ ॥

शितीति कर्मधारयः । पादीनां पिबादयः स्युरित्सञ्ज्ञकशकारादौ प्रत्यये परे ॥ पिबति । अदन्त आद्युदात्तोऽयं निपात्यते । तेन लघूपधगुणो न । आद्युदात्तत्वं च सिध्यति । जिघ्रति । धमति । तिष्ठति । मनति । प्रणियच्छति । पश्यति । ऋच्छति । धावति । शीघ्रगतावेवेममिच्छन्ति । अन्यत्र । सरति । शीयते । सीदति । इत्संज्ञकशकारादावित्युक्तेनेह । पपे । बहुव्रीहौ तु स्यादेव

दोषः। अत एवार्तिसर्त्योर्जोहोत्यादिकयोर्नेह ग्रहणम्। शपः श्लुनापहारात्। चानशः सम्भवेऽपि शकारादित्वाभावात्॥

ज्ञाजनोर्जा। ७। ३। ७९॥

अनयोर्जादेशः स्याच्छिति। जानाति। जायते॥

प्वादीनां ह्रस्वः। ७। ३। ८०॥

शिति परे। प्वादयः क्र्यादिषु पठ्यन्ते। पूञ् पवने इत्यतः प्रभृति प्ली गतौ वृत्त इति यावत्। वृत्करणं ल्वादयो वृत्ता इत्यर्थकम्। प्वादयोऽपीत्येके। पुनाति। लुनाति। लुनीते। स्तृणाति स्तृणीते इत्यादि। व्री वरणे भ्री भये। भरणे इत्येके। क्षीष् हिंसायाम्। एषां त्रयाणां ह्रस्वः। केचिन्मते तु जानातीत्यत्र दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः॥

मीनातेर्निगमे। ७। ३। ८१॥

शिति ह्रस्वः। प्रमिणन्ति व्रतानि॥ लोके प्रमीणाति॥

मिदेर्गुणः। ७। ३। ८२॥

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ। मेद्यति। मेद्यतः। मेद्यन्ति। एश आदिशित्वाभावान्नानेन गुणः। मिमिदे॥

जुसि च। ७। ३। ८३॥

क्सस्याचीत्यतोऽचीत्यनुवर्तते। अजादौ जुसीगन्ताङ्गस्य गुणः स्यात्। अजुहवुः। अबिभयुः। अबिभरुः। अजागरुः। अजादौ किम्। जागृयुः। चिनुयुः। शृणुयुः। केचित्तु नाप्राप्तसार्वधातुकाश्रयङित्वप्रयुक्तनिषेधस्यैवापवादोऽयं गुणः। न तु प्राप्ताप्राप्तयासुडाश्रयङित्वप्रयुक्तनिषेधस्येत्याहुः॥

सार्वधातुकार्धधातुकयोः । ७ । ३ । ८४ ॥

अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात् । भवति । भविष्यति । अनयोः किम् । अग्निकाम्यति ॥

जाग्रोऽविचिण्णल्ङित्सु । ७ । ३ । ८५ ॥

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च ॥ जागरयति । जागरकः । साधुजागरी । जागरं जागरम् । जागरो वर्तते । जागरितः । जागरितवान् । जजागरतुः । जागर्यात् । अविचिण्णल्ङित्सु किम् । जागृविः । जृशृस्तृजागृभ्यः क्विन् । अजागारि । जजागार । जागृतः । जागृथः । त्वं रयिं जागृवांसो अनुग्मन् इत्यत्र तु असंयोगाल्लिट् किदिति सिद्धे कित्वं क्वसोः कित्वप्रतिषेधविषयस्यापि गुणस्य प्रतिषेधार्थमित्याहुः ॥ ननु जागरयतीत्यादौ गुणे कृते उपधावृद्धिः कस्मान्न वृद्धिविषये गुणविधानसामर्थ्यादिति चेन्न । ह्यन्तेति सूत्रे जागृग्रहणवैयर्थ्यापत्तेरजागरीदित्यत्रापि हि त्वदुक्तरीत्या वृद्ध्यप्राप्तेः । अत्राहुः वृद्धिविषये गुणविधानसामर्थ्येनोपधावृद्धेरेवाभावः कल्प्यते न तु वृद्धिमात्रस्य चिण्णल्प्रतिषेधस्य सजातीयापेक्षज्ञापकत्वादिति ॥

पुगन्तलघूपधस्य च । ७ । ३ । ८६ ॥

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्द्धधातुकयोः ॥ ह्रेपयति । क्नोपयति । भेदनम् । छेदनम् । कथं भेत्ता सेत्स्यति । क्नोः कित्करणसामर्थ्येन भूतपूर्वलघूपधग्रहणात् । कुण्डिता हुण्डितेत्यादौ तु धातूपदेशावस्थायामेव नुम्प्रवृत्तेर्लघु-

करिष्यामीति व्रजति । हरिष्यामीति व्रजति । लट्ग्रहणं किम् । त्यान्तरत्वं मा विज्ञायि ।

अनद्यतने लुट् ॥ १४ ॥

वर्त्स्यतीति वर्तते । वर्त्स्यत्यनद्यतने ध्वर्थे वर्तमाना-द्धोर्लुट् भवति । श्वः कर्ता । श्वोऽध्येता । अनद्यतन इति बसनिर्देशादद्य श्वो भैाक्ष्यामहे इत्यत्र न भवति । विभाषानुवर्तनात् परिदेवने लृटविषयेपि लुट भवति । इयन्तु कदा गन्ता एवं निदधती पादौ । अयं तु कदाध्येता एवमनभियुक्तः ॥

पदरुजविशस्पृशो घञ् ॥ १५ ॥

पद रुज विश स्पृश इत्येतेभ्यो घञ् भवति । पद्यतेऽसौ पादः । एवुतृचोरयमपवादो न पचाद्यचः सुप्मिडंतं पदमिति पदनिर्देशात् । रुजत्यसौ रोगः । विशत्यसौ वेशः । इगुङ्लक्षणस्यापवादः । स्पृश उपतापेऽभिधानम् । स्पृशतीति स्पर्शो रोगः । उपतापादत्यत्र स्प्रष्टा स्पर्शकः ॥

सृ स्थिरे ॥ १६ ॥

सरतेः स्थिरे कर्तरि घञ् भवति । कालान्तरं सरतीति सारः । मधूकसारः । विभाषानुवर्तनात् स्थिरव्याधिमत्स्यबलेष्वभिधानम् । अतिसारो व्याधिः । विसारो मत्स्यः । सारो बलम् । एतेष्विति किम् । सर्ता । सारकः ॥

भावे ॥ १७ ॥

भावे धोर्घञ् भवति । भाव इति क्रियासामान्यं धवर्थः तद्यद्यपि पूर्वापरिभूतमपरिनिष्पन्नमलिङ्गसख्यं प्रकृत्यैवोच्यते तथापि यस्तस्यासिद्धताधर्म्मः स लिङ्गसंख्यावानिति तत्र घञादयः । पाकः । त्यागः । रागः ॥

अकर्तरि ॥ १८ ॥

कर्तुरन्यस्मिन् कारके घञ् भवति । नञ्युक्तमिव युक्तं वा यत्कार्यं संप्रतीयते तुल्याधिकरणे ऽन्यस्मिन् लोके ऽप्यर्थगतिस्तथा प्रास्यन्ति तं प्रासः । प्रसीव्यंति तं प्रसेवः । आहरन्ति तस्मादाहारः । संज्ञायामसंज्ञायामपि दृश्यते । को भवता दायो दत्तः । को भवता लाभो लब्धः । कर्तव्यः कटः । कृतः कटः इत्येवमादिषु अनभिधानात् भवति ।

परिमाणाख्यायां सर्वेभ्यः ॥ १९ ॥

आख्याग्रहणात्परिमाणमिह संख्यादिके गृह्यते । परिमाणस्याख्यायां गम्यमानायां सर्वेभ्यो घञ् भवति । एकस्तण्डुलनिचायः । एकस्तण्डुलावचायः । द्वौ केदार लावौ । वीजकारौ ग्रहवृद्गमोजिति अचि प्राप्ते इदम् । परिमाणाख्यायामिति किम् । निश्चयः । सर्वग्रहणं वाधकबाधनार्थम् । एकस्तृणविघासः । अन्यथा पुरस्तादपवादो ऽयमिति अनन्तरमेवाचं वाध्येत न व्यवहितं नौ णश्चेति णम् । घञि घस्लभावः सिद्धः । इहाकर्तरीत्येवाभिसंबध्यते । स्त्रीलिङ्गे भावे घञ् भवेत् । एका तिलोच्छ्रितिः । द्वे श्रुती । सर्वग्रहणं बाधकबाधनार्थमुक्तंक्तरवाध्येत ॥

इङः ॥ २० ॥

इत उत्तरं भावे अकर्तरीति च वर्तते । इङश्च धोर्घञ् भवति । अधीयते इत्यध्यायः । उपेत्याधीयतेऽस्मादित्युपाध्यायः । अपादाने यो घञ् तदन्ताद्वा ङीर्वक्तव्यः । उपाध्यायी । उपाध्याया । वृद्धकुमारीवरवाक्यन्यायेनास्मिन्विषये क्तिमपि घञ् बाधते । शृणातेर्वायुवर्णयोर्घञ् वक्तव्यः । शारो वायुः । शारो वर्णः ॥

गौ रुवः ॥ २१ ॥

गिसंज्ञे वाचि रौतेर्घञ् भवति । विरावः । संरावः । अचोऽपवादोऽयम् । गाविति किम् । रवः ॥

समि युद्रुदुवः ॥ २२ ॥

संपूर्वेभ्यः युद्रु दु इत्येतेभ्यो घञ् भवति । संयावः । संद्रावः । संदावः । समीति किम् । यवः ॥

यज्ञे स्तुवः ॥ २३ ॥

समीति वर्तते । सम्पूर्वात् स्तौतेर्घञ् भवति यज्ञविषये । समेत्य स्तुवन्ति अस्मिन्निति संस्तावः छन्दोगानम् । यज्ञ इति किम् । सतां संस्तवः ॥

श्रिणीभुवोऽगौ ॥ २४ ॥

अगिपूर्वेभ्यः श्रि णी भू इत्येतेभ्यः घञ् भवति । श्रायः । नायः । भावः । अगाविति किम् । प्रश्रयः । प्रणयः । प्रभवः । कथं प्रभावो धर्मस्य । प्रकृष्टो भावः प्रभावः इति प्रादिसः । कथं षाड्गुण्यस्य यथावत्प्रयोगो यथावत्प्रयोगोनयः पुंस्वैघः । प्रायेणेति करणे घो द्रष्टव्यः ॥

नियोऽवोदोः ॥ २५ ॥

अव उद् इत्येतयोर्वाचोर्नयतेर्घञ् भवति । अवनायः । उन्नायः । कथमुन्नयः । शब्दानां पूर्ववत्करणे घो विधेयः ॥

निरभ्योः पूल्वोः ॥ २६ ॥

निस् अभि इत्येवंपूर्वाभ्यां पू लू इत्येताभ्यां यथासंख्यं घञ् भवति । पू इति सामान्येन ग्रहणम् । निष्पावः । अभिलावः । निरभ्योरिति किम् । पवः । लवः ॥

उन्न्योर्ग्रः ॥ २७ ॥

उद् नि इत्येवंपूर्वात् गृ इत्येतस्मात् घञ् भवति । गृइति सामान्येन ग्रहणम् । उद्गारः । निगारः ॥

कॄ धान्ये ॥ २८ ॥

उन्न्योरिति वर्त्तते । कॄ इत्येतस्माड्डोः उद्निपूर्वात् घञ् भवति धान्यविषये । उत्कारो धान्यस्य । निकारो धान्यस्य । धान्य इति किम् । पुष्पोत्करः । पुष्पनिकरः ॥

प्रे द्रुस्तुस्रुवः ॥ २९ ॥

प्रशब्दे वाचि द्रु स्तु स्रु इत्येतेभ्यो घञ् भवति । प्रद्रावः । प्रस्तावः । प्रस्रावः । प्र इति किम् । द्रवः ॥

स्त्रोऽयज्ञे ॥ ३० ॥

प्र इति वर्तते । प्रपूर्वात् स्तॄइत्येतस्मात् घञ् भवति अयज्ञविषये । शंखप्रस्तारः । मणिप्रस्तारः । ऋकारान्तत्वादभिप्राप्ते इदम् । अयज्ञ इति किम् । बर्हिष्प्रस्तरः । इट्द्रवोत्यप्युम्नुहुस इति सम्बध्यते ॥

प्रथने वावशब्दे ॥ ३१ ॥

प्रथनं विस्तीर्णता विपूर्वात्स्तॄ इत्येतस्मात् घञ् भवति अशब्दविषये प्रथने। पटस्य विस्तारः । गृहस्य विस्तारः । प्रथन इति किम् । तृणविस्तरः । अशब्द इति किम् । वाक्यविस्तरः ॥

छन्दः खौ ॥ ३२ ॥

छन्दः पद्ये वर्णविन्यासः । छन्दःसंज्ञायां च विपूर्वात् स्तृणातेः घञ् भवति । विस्तारः पंक्तिछन्दः । विस्तारः बृहतिछन्दः । षत्वप्रकरणे विस्तार इति निपातनादेव सिद्धे छन्दःसंज्ञाज्ञापनार्थमिदम् ॥

क्षुश्रुवः ॥ ३३ ॥

वाविति वर्तते । क्षु श्रु इत्येताभ्यां विपूर्वाभ्याँ घञ् भवति । विक्षावः । विश्रावः । वावित्येव । क्षवः । श्रवः ।

उदि ग्रहः ॥ ३४ ॥

उत्पूर्वाद् ग्रहेर्घञ् भवति । उद्ग्राहः । अचोऽपवादोऽयम् ॥

समि मुष्टौ ॥ ३५ ॥

संपूर्वाद् ग्रहेर्घञ् भवति मुष्टिविषये । शाकमुष्ट्यादौ परिमाणवचनः मुष्टिशब्दः । तत्र परिमाणाख्यायामित्येव सिद्धं ततोन्यदुदाहरणम् । अहो मल्लस्य संग्राहः । अहो मौष्टिकस्य संग्राहः । मुष्टेर्दार्ढ्यमित्यर्थः । मुष्टाविति किम् । संग्रहः शास्त्रस्य ॥

न्यायपरिणायपर्य्यायः ॥ ३३ ॥

न्यायादयः शब्दाः निपात्यन्ते । निपूर्वादिणः अभ्रेषे घञ् निपात्यते । अभ्रेषो युक्तकरणमकुत्सा वा । एषोऽत्र न्यायः । अभ्रेष इति किम् । न्ययं गतश्चौरः । परिपूर्वात् नयतेर्द्यूतविषये घञ् निपात्यते । परिणायेन सारान् हन्ति । द्यूतविषयादन्यत्र परिणयः । परिपूर्वादिणः अनुपात्यये गम्यमाने घञ् निपात्यते । अनुपात्ययः क्रमप्राप्तस्यानतिवृत्तिः । तव पर्यायो भोक्तुम् । अनुपात्यय इति किम् । स्वाध्यायकालस्य पर्य्ययः । अतिक्रम इत्यर्थः ॥

व्युपे शीङोन्त्ये ॥ ३७ ॥

अन्त इति पूर्वसूत्रे विन्यासापेक्षया पर्यायो ऽभिप्रेतः वि उप इत्येतयोर्वाचोः शीङः घञ् भवति पर्याये गम्ये । तवविशायो मम विशायः । तव राजोपशायः । राजानमुपशाययितुमवसर इत्यर्थः । अन्त इति किम् । विशयः । उपशयः ॥

हस्तादाने चेरस्तेये ॥ ३८ ॥

हस्तादाने गम्यमाने चिनोतेर्घञ् भवति न चेत्स्तेय भवति । पुष्पप्रचायः । फलप्रचायः । हस्तादानशब्देन निकटस्य गुच्छादेर्ग्रहणं लक्ष्यते । हस्तादान इति किम् । पुष्पप्रचयः । अस्तेय इति किम् । पुष्पप्रचयं करोति चौर्येण ॥

निवासचितिशरीरोपसमाधाने चः कः ॥ ३९ ॥

चेरिति वर्तते । निवास चिति शरीर उपसमाधान इत्येतेष्वर्थेषु चिनोतेर्घञ् भवति चकारस्य च ककारः । निवासे । साधुनिकायः । उत्कृष्टनिकायः । अधिकरणे घञ् । चीयतेऽसौ चितिः । यज्ञे अग्निविशेषः । अकायमग्निं चिन्वीत । शरीरे । चीयते इति कायः । उपसमाधानमुपर्युपरि राशीकरणम् । महान् गोमयनिकायः । उपर्युपरीति विशेषणादिह न भवति । महान् काष्ठनिचयः । एतेष्विति किम् । चेयः ॥

सङ्घेऽनूर्द्ध्वे ॥ ४० ॥

संघः प्राणिविशेषसमुदायः । अनूर्द्ध्वे संघे वाच्ये चिनोतेर्घञ् भवति चकारस्य च कत्वम् । निचीयते इति निकायः । पण्डितनिकायः । प्राणिविशेषस्य ग्रहणादिह न भवति । काष्टचयः । पदसमुच्चयः । विशेषग्रहणं किम् । प्राणिसमुच्चयः । सामान्येन समुदायोऽयम् । अनूर्द्ध्वे इति किम् । उपर्युपरि सूकरनिचयः ।

आक्रोशे वन्योर्ग्रहः ॥ ४१ ॥

आक्रोशः शपनम् । अव नि इत्येतयोर्वाचोर्ग्रहेर्घञ् भवति आक्रोशे गम्ये । अवग्राहो ह ते वृषल भूयात् । निग्राहो ह ते वृषल भूयात् । आक्रोश इति किम् । अवग्रहः पदस्य । निग्रहो दुष्टस्य ॥

प्रे लिप्सायाम् ॥ ४२ ॥

प्रशब्दे वाचि लिप्सायां गम्यमानायां ग्रहेर्घञ् भवति । प्रग्राहेण चरति भिक्षुः । पात्रं प्रगृह्य अन्नं लिप्सु-

अमतीत्यर्थः । लिप्सायामिति किम् । प्रग्रहो देवदत्तस्य राज्ञा ॥

परौ यज्ञे ॥ ४३ ॥

परिपूर्वाद्ग्रहेर्घञ् भवति यज्ञविषये । उत्तरः परिग्राहः । यज्ञ इति किम् । परिग्रहो देवदत्तस्य ।

नौ वुर्धान्ये ॥ ४४ ॥

निशब्दे वाचि वृ इत्येतस्मात् घञ् भवति धान्यविशेषे वाच्ये । वृ इति वृङ्वृञोर्ग्रहणम् । नीवारा नाम व्रीहयो भवन्ति । धान्य इति किम् । निवृत इति निवरा कन्या ॥

उदि पूद्रुयौतिश्रिञः ॥ ४५ ॥

उत्पूर्वेभ्यः पू द्रु यौति श्रिञ् इत्येतेभ्यः घञ् भवति । उत्पावः । उद्द्रावः । उद्यावः । उच्छ्रायः ॥

वाङि रुप्लुवोः ॥ ४६ ॥

आङ्पूर्वाभ्यां रु प्लु इत्येताभ्यां वा घञ् भवति । आरावः । आरवः । गौरुव इति नित्यं घञ् प्राप्तः । आप्लावः । आप्लवः ॥

ग्रहो ऽवे वर्षप्रतिबन्धे ॥ ४७ ॥

वेति वर्त्तते । अवशब्दे वाचि ग्रहेर्वा घञ् भवति वर्षप्रतिबन्धे वाच्ये । अवग्राहो देवस्य । अवग्रहो देवस्य । वर्षप्रतिबन्ध इति किम् । अवग्रहः पदस्य ॥

प्रे वणिजाम् ॥ ४८ ॥

वेति वर्तते । प्रशब्दे वाचि ग्रहेर्वा घञ् भवति समुदायेनाभिधेयं वणिजां सम्बन्धि चेद्भवति । तुला-

LXXV.

[1]यमेवदिवसं राजा चक्रे गोदान[2]सत्क्रियाम् ।
तमेव दिवसं तत्र युधाजित् प्रत्यदृश्यत ॥ १ ॥
[3]पुत्रः कैकेयराजस्य शूरो भरतमातुलः ।
दृष्ट्वा पृष्ट्वा च कुशलं राजा तं परिषस्वजे ॥ २ ॥
युधाजिच्चापि सम्पूज्य पर्यपृच्छदनामयम् ।
पृष्ट्वा चानामयं पश्चादिदं वचनमब्रवीत् ॥ ३ ॥
केकयाधिपती [4]राजन् स्नेहात् कुशलमब्रवीत् ।
येषां कुशलकामोऽसि तेषां [5]कुशलमुत्तमम् ॥ ४ ॥
[6]स्वस्रीयं द्रष्टुकामोऽहं त्वां च राजन् सबान्धवम् ।
स्वपुरादागतः शीघ्रमयोध्यां रघुनन्दन ॥ ५ ॥
[7]श्रुत्वा चाहमयोध्यायामिहस्थं त्वां [8]सहात्मजम् ।
त्वरावानुप[9]जातोस्मि द्रष्टुं ते वृद्धिमीप्सिताम् ॥ ६ ॥
[10]तं स राजा दशरथः प्रियातिथिमुपागतम् ।
दृष्ट्वा परमसत्कारैः पूजार्हं प्रत्यपूजयत् ॥ ७ ॥

1 For this SL, B. LXXIII. 1. यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमं । तस्मिंस्तु दिवसे वीरो युधाजित् समुपेयिवान् ॥ 2 G. 1. मंगलं । P. is worm eaten here, 3 For this and the following SL. B. 2. पुत्रः केकयराजस्य साक्षाद्भरतमातुलः । दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ 4 B- 3. राजा &c. 5 B 3. संप्रत्यनामयं । 6 For this SL. B. 4. स्वस्रीयं मनराजेन्द्र द्रष्टुकामो महीपतिः । तदर्थमुपयातोहमयोध्यां रघुनन्दन ॥ 7 For this SL. B. 5.-6. श्रुत्वात्वहमयोध्यायां विवाहार्थे तवात्मजान् । मिथिलामुपयातांस्तु त्वया सह महीपते ॥ त्वरयाभ्युपयातोहं द्रष्टुकामः स्वसुः सुतं । 8 G. 6. सबान्धवं । 9 G. 6. यातोहं &c. 10 For this SL. B. 6-7. अथ राजा

[1]ततस्ता[2]मुषितां रात्रिं सह पुत्रैर्महीपतिः ।
पुरस्कृत्य वसिष्ठादीन् मुनीन् यज्ञमुपाययौ ॥ ८ ॥
[3]युक्ते मुहूर्ते वैवाहे महार्हाभरणाम्बराः ।
प्रययू राघवास्तेऽथ कृतकौतुकमङ्गलाः ॥ ९ ॥
[4]वसिष्ठं पुरतः कृत्वा तांश्चैवान्यान् महामुनीन् ।
यथान्यायमुपागम्य राजा वैदेहमब्रवीत् ॥ १० ॥
[5]प्राप्ताः [6]स्मो राजन् भद्रं ते विवाहार्थं सदस्तव ।
तत् साधु चिन्तयित्वास्मान् प्रवेशयितुमर्हसि ॥११॥
[7]स्थिता हि ते वशे सर्वे वयमद्य सबान्धवाः ।
स्ववंशधर्मा[8]ध्युषितं कुरु वैवाहिकं क्रमम् ॥ १२ ॥
[9]इत्युक्तः परमोदारं वाक्यं वाक्यविशारदः ।
प्रत्युवाच ततो राजा मैथिलस्तं नराधिपम् ॥१३॥

दशरथः प्रियातिथिमुपस्थितं ॥ दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् । 1 For this SL. B. 7-8. ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ॥ प्रभाते पुनरुत्थाय कृत्वा कर्म्माणि तत्त्ववित् । ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ 2 G. 8. मुषितो &c. 3 For this SL. B. 9. युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः । भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ G 9. युक्ते मुहूर्ते वैवाहे महार्हाम्बर-भूषणैः । कृतकौतुकमङ्गलैः पुत्रैर्दशरथो वृतः ॥ 4 For this SL. B. 10. वसिष्ठं तु पुरस्कृत्वा महर्षीनपरानपि । वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ 5 For this SL. B. 11. राजादशरथो राजन् कृतकौतुकमङ्गलैः । पुत्रैर्नरवरश्रेष्ठो दातारमभिकाङ्क्षते ॥ 6 G. 11. स्म &c. 7 For this SL. B. 12. दातृप्रतिग्रहीतृभ्यां सर्वार्थाः (a) संभवन्ति हि । स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमं ॥ (a) V. and S. have प्रभवन्ति &c. 8 G. 12. भ्युषितं &c., P. is worm-eaten here 9 For this SL. B. 13. इत्युक्तः परमोदारो वसिष्ठेन महात्मना ।

[1]कः स्थितः प्रतिहारो मे कस्याज्ञा प्रतिपाल्यते ।
[2]स्वे गृहे को विचारस्ते विश्रम्भेण प्रविश्यताम् ॥१४॥
[3]यज्ञभूमि[4]मनुप्राप्ताः कृतकौतुकमङ्गलाः ।
मम कन्याश्चतस्रो[5]ऽपि वह्नेर्दीप्ता इवार्चिषः ॥ १५ ॥
[6]सज्जोऽहं [7]त्वामुदीक्षामि वेद्यामस्यां स्थितो नृप ।
अविघ्नं कुरु राजेन्द्र किमर्थं त्वं विलम्बसे ॥ १६ ॥
[8]श्रुत्वैतज्जनकेनोक्तं वाक्यं दशरथो नृपः ।
प्रवेशयामास तदा वसिष्ठादीन् द्विजर्षभान् ॥ १७ ॥
[9]ततो राजा विदेहानामुवाच रघुनन्दनम् ।

प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ 1 For this SL. B. 14. कः स्थितः प्रतिहारो मे कस्याज्ञां संप्रतीक्षते । स्वगृहे को विचारोऽस्ति यथा राज्यमिदं तव ॥ 2 G. 14. स्वगृहे &c. 3 For this SL. B. 15. कृतकौतुकसर्वस्वा वेदिमूलमुपागताः । मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेरिवार्चिषः ॥ 4 G. 15. मिमां &c. 5 G. 15. हि &c. 6 For this SL. B. 16. सज्जोऽहं (a) त्वत्प्रतीक्षोऽस्मि वेद्यामस्यां प्रतिष्ठितः । अविघ्नं क्रियतां सर्वं किमर्थं (b) हि विलंब्यते ॥ (a) S. त्वां प्रती &c. (b) S. अवलंब्यते । 7 G. 16. त्वत्प्रतीक्षश्च &c. 8 For this SL. B. 17. तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा । प्रवेशयामास सुतान् सर्वानृषिगणानपि ॥ 9 For this SL. B. 18-26. ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् । कारयस्व ऋषे सर्वामृषिभिः सह धार्मिक ॥ रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो । तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ॥ विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकं । प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥ अलञ्चकार तां वेदिं गन्धपुष्पैः समन्ततः । सुवर्णपालिकाभिश्च (a) चित्रकुम्भैश्च साङ्कुरैः ॥ अङ्कुराढ्यैश्च शरावैर्धूपपात्रैः सधूपकैः । शङ्खपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ॥ लाजपूर्णैश्च पात्रीभिरक्षतैरपि संस्कृतैः । दर्भैः समैः समास्तीर्य विधिवन्मन्त्रपूर्वकं ॥ अग्निमाधाय (b) तां वेद्यां विधिमन्त्रपुरस्कृतं । जुहावाग्नौ महातेजा वसिष्ठो मुनिपुङ्गवः ॥ ततः सीतां समानीय सर्वाभरणभूषितां । समक्षमग्नेः संस्थाप्य

रामं कमलपत्राक्षं पूर्वं[1] वेद्यामुपानयत् ॥ १८ ॥
इयं सीता मम सुता [2]सहधर्म्मचरी तव ।
[3]अद्य तु राम गृहाणास्याः पाणिं त्वमिह पाणिना ॥१९॥
[4]लक्ष्मणागच्छ [5]पुत्रेमामुर्म्मिलां तु मयोद्यताम् ।
गृहाणापेत्य धर्म्मेण पाणिं राघव पाणिना ॥ २० ॥
[6]तमेवमुक्त्वा जनको भरतं केकयीसुतम् ।
चोदयास धर्म्मात्मा माण्डव्याः पाणिसंग्रहे ॥ २१ ॥
[7]शत्रुघ्नमपि [8]चापीदं जनको वाक्यमब्रवीत् ।
श्रुतकीर्त्या गृहाण त्वं पाणिना पाणिमु[9]त्तमम् ॥ २२ ॥
[10]सर्वे भवन्तः सदृशैर्द्दारैर्युक्ता यतव्रताः ।

राघवाभिमुखे तदा ॥ अब्रवीज्जनको राजा कौसल्यानन्दवर्धनं । (a) V. & S. छिद्रकुम्भे &c. (b) V. &c. S. वेद्यां तु विधि &c. which is a better reading. 1 *G.* 18. वेदीमुपानय; P. has. वेदीमुपानयन् । 2 P. सधर्म्मचारिणी तव । 3 B. 27-30. प्रतीच्छ चैनां भद्रन्ते पाणिं गृह्णीष्व पाणिना । पतिव्रता महाभागा छायेवानुगता सदा ॥ इत्युक्त्वा प्राक्षिपद्राजा मंत्रपूतं जलं तदा । साधु साध्विति देवानामृषीणां वदतां तदा ॥ देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् । एवं दत्त्वा सुतां सीतां मन्त्रोदकपुरस्कृतां ॥ अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः । *G.* 19. गृहाण पाणिना पाणिं त्वमस्या रघुनन्दन ॥ 4 For this SL. B. 30-31. लक्ष्मणागच्छ भद्रन्ते ऊर्म्मिलामुद्यतां मया ॥ प्रतीच्छ पाणिं गृह्णीष्व मा भूत् कालस्य पर्ययः । 5 *G.* 20. पुत्रेमामूर्म्मिलाया मयोद्यतं । &c. P is worm-eaten here. 6 For this SL. B. 31-32. तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ॥ गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥ 7 For this SL. B. 32-33. शत्रुघ्नं चापि धर्म्मात्मा अब्रवीन्मिथिलेश्वरः ॥ श्रुतकीर्त्तेर्महाबाहो पाणिं गृह्णीष्व पाणिना । 8 *G.* 22. चासीने &c., but P. has चापीदं &c. 9 *G.* 22. व्रतं &c. 10 For this SL. B. 33-34. सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ॥ पत्नीभिः सन्तु काकुत्स्था मा भूत्कालस्य पर्ययः ।

कुलोचितं [1]शुभं धर्म्मं [2]चरध्वं शिवमस्तु वः ॥ २३ ॥
[3]जनकस्य वचः श्रुत्वा[4]पाणीन् संजगृहुस्तदा ।
चत्वारस्ते चतसृणां शता[5]नन्दसुमन्त्रिताः ॥ २४ ॥
[6]अग्निं प्रदक्षिणं चक्रुस्ततः सर्वे यथाक्रमम् ।
[7]ऋषींश्च सुमहात्मानः सभार्या रघुनन्दनाः ॥ २५ ॥
[8]राज्ञा कृतस्वस्त्ययनास्तैश्च सर्वैर्महर्षिभिः ।
पपात पुष्पवृष्टिश्च लाजोन्मिश्रा नभश्च्युता ॥२६॥
तेषामुपरि सर्वेषां विवाहे पुण्यकर्मणाम् ।
देवदुन्दुभयो नेदुरम्बरे मधुर[9]स्वराः ॥ २७ ॥
[10]शुश्रुवे मधुरश्चैव वीणावेणुस्वनो महान् ।
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
विवाहे रघुमुख्यानां तदद्भुतमिवाभवत् ॥ २८ ॥
[11]ईदृशे वर्त्तमाने तु काले रतिकरे शुभे ।

1 P. वै चरत धर्म्यं...(worn eatn bere). 2 *G.* 23. कुरुध्वं &c. 3 For this SL. B. 34-35. जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् ॥ चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः । 4 G. 24. पाणींस्तान् जगृ &c., P. is worm-eaten here. 5 G. 24. नन्दानुमन्त्रिताः। 6 For this SL. B. 35-36. अग्निं प्रदक्षिणं कृत्वा वेदिं राजानमेव च ॥ ऋषींश्चापि महात्मानः सहभार्या रघूद्वहाः । 7 This line is wanting in G. 8 For this and the following SL. B. 36-37. यथोक्तेन ततश्चक्रुर्विवाहं विधिपूर्वकं ॥ पुष्पवृष्टिर्महत्यासीदन्तरीक्षात्सुभास्वरा । दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ 9 G. 27 स्वनाः । 10 For this SL. B. 38. ननृतुश्चाप्सरःसंघा गन्धर्वाश्च जगुः कलं । विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ 11 For this SL. B. 39. ईदृशे वर्तमाने तु(a)तूर्योद्घुष्टनिनादिते । त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः॥

[1]त्रीनग्नीन् त्रिः परिक्रम्य तत ऊहुर्बधूः पृथक् ॥२९॥
[2]स्वानि यानानि चारोप्य दारांस्ते प्रययुस्ततः ।
राजाप्यनुययौ पश्चात् [3]सहर्षिः सहबान्धवः ॥ ३० ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते रामलक्ष्मण
भरतशत्रुघ्नानां विवाहः ॥

LXXVI.

[4]तस्यां रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ।
[5]तौ च पृष्ट्वा नरपती जगामोत्तरपर्वतम् ॥ १ ॥
[6]विश्वामित्रे गते तस्मिन् जनकं मिथिलाधिपम् ।
आपृच्छ्य [7]तं ययौ चापि राजा दशरथः पुरम् ॥ २ ॥
[8]अथ राजा विदेहानां तत्र कन्याधनं ददौ ।

(a) V. has तूर्यात्कृष्ट &c. 1 G. 29. त्रिरग्निं ते &c. 2 For this SL. B. 40. अथोप (a) कार्यं जग्मुस्ते(b)सभार्या रघुनन्दनाः । राजाप्यनुययौ पश्यन् सर्षिसंघः सबान्धवः ॥ (a) S. कार्यं &c. (b) S. सदारा &c. 3 G. has सर्षिसंघः सबान्धवः । 4. B. LXXIV. 1. and G. LXXVI. 1. अथ रात्र्यां &c. 5 B. 1. आपृष्ट्वा तौ च राजानौ &c. G. 1. आमन्त्र्य तौ नरव्याघ्रौ &c P. is worm-eaten here. 6 For this SL. B. 2. विश्वामित्रे गते राजा वैदेहं मिथिलाधिपं । आपृच्छ्यैव जगामाशु राजा दशरथः पुरीं ॥ 7 G. 2. प्रययौ &c. 8 For this and the following 5. Seokas. B. 3.-7. अथ राजा विदेहानां ददौ कन्याधनं बहु । गवां शतसहस्राणि बहूनि मिथिलेश्वरः ॥ कम्बलानां च मुख्यानां(a) क्षौमान् कोट्यं बराणि च । हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतं ॥ ददौ कन्याशतं तासां दासीदासमनुत्तमं ॥ हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥ ददौ राजा सुसंहृष्टः कन्याधनमनुत्तमं । दत्त्वा राजा बहुविधं समनुज्ञाप्य पार्थिवं ॥ प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः । (a) V. &. S. ददौ कोट्यंबराणि &c.

कम्बलाजिनरत्नानि दुकूलानि मृदूनि च ॥ ३ ॥
नानारागाणि वासांसि शुभान्याभरणानि च ।
रत्नानि च महार्हाणि यानानि विविधानि च ॥ ४ ॥
गवां शतसहस्राणि चत्वारि पृथगेव च ।
ददौ राजा [1]प्रीयमाणः कन्याधनमभीप्सितम् ॥ ५ ॥
चतुरङ्गबलं चान्यदनुयात्रं महद् ददौ ।
दासीनां निष्ककण्ठीनां सहस्रमपि चाददात् ॥ ६ ॥
सुवर्णस्यायुतं पूर्णं हिरण्यस्य च मैथिलः ।
ददौ प्रीतेन मनसा कन्याधनमनुत्तमम् ॥ ७ ॥
एवं दत्वा बहुविधं तमनुज्ञाप्य [2]पार्थिवः ।
प्रविवेश पुरीं रम्यां मिथिलां मिथिलेश्वरः ॥ ८ ॥
राजाप्ययोध्याधिपतिः सहपुत्रैर्महात्मभिः ।
[3]पुरस्कृत्य वसिष्ठादीन् गुरूंस्तान् प्रययौ [4]पुनः ॥ ९ ॥
[5]तं गच्छन्तं कृतोद्वाहं स्वपुरं सपदानुगम् ।
अपसव्यं [6]तदा चक्रुः पक्षिणो भयवेदिनः ॥ १० ॥
[7]मृगाश्चादक्षिणं जग्मुर्वाताः शर्करवर्षिणः ।
तान् दृष्ट्वा व्यथितो राजा वसिष्ठं पर्यपृच्छत ॥११॥

1 G. 5. महार्हाणि &c. 2 G. 8. पार्थिवं । 3 B. 8. ऋषीन् सर्वान् पुरस्कृत्य जगाम सबलान्वितः । 4 G. 9. ततः । 5 For this SL. B. 8-9. गच्छन्तं तु नरव्याघ्रं सर्षिसंघं सराघवं ॥ घोरास्तु पक्षिणो वाचो व्याहरन्ति समन्ततः । 6 G, 10. ततो जग्मुः &c. 7 G. 11. मृगाश्च शमयन्तस्तान् प्रतिजग्मुः प्रदक्षिणं । &c., &c. B 9.-10. भीमाश्चैव मृगाः सर्वे गच्छन्तिस्म प्रदक्षिणं ॥

[1]भगवन् पश्यतामेतानुत्पातांश्च सुदारुणान् ।
दिशश्च सर्वा भगवन् धूमोत्पातसमाकुलाः ॥ १२ ॥
परिवेशस्तथा सूर्ये दृश्यते च महानपि ।
तमसा च नभश्छन्नं न प्रज्ञायत किञ्चन ॥ १३ ॥
दृष्टं भयमुपस्थितं हृदयं मम चाव्ययम् ।
किमनिष्टमिदं ब्रह्मन् पश्यामि सुमहद् भयम् ॥ १४ ॥
ब्रूहि मे यदि ते ज्ञानं भगवन् कोन्वयं विधिः ।
नान्यो वक्तुमिदं शक्तस्त्वदृते मुनिसत्तम ॥ १५ ॥
[2]असौम्याः पक्षिणः कस्मान्मृगाश्चेमे प्रदक्षिणाः ।
अकस्माच्चैव सोत्कम्पं हृदयं केन मे मुने ॥ १६ ॥
[3]राज्ञो दशरथस्येदं वाक्यं श्रुत्वा [4]महामुनिः ।
वसिष्ठस्तमुवाचेदं श्रूयतामस्य यत् फलम् ॥ १७ ॥
[5]उपस्थितं भयं घोरं पक्षिणो वेदयन्ति नः ः
प्रदक्षिणा मृगाः सौम्या[6]स्तदिमे शमयन्ति ते ॥ १८ ॥
[7]तयोः संवदतोरेवं वायुः प्रादुरभून्महान् ।

तान्दृष्ट्वा राजशार्दूलो वसिष्ठं पर्यपृच्छत । 1 This, and the following 6. Slokas are wanting in P. This and the following 3 Slokas are wanting in G. and B. 2 B. 10-11. असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ॥ किमिदं हृदयोत्कम्पि मनो मम विषीदति । 3 B. 11-12. राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महानृपिः ॥ उवाच मधुरां वाणीं श्रूयतामस्य यत्फलं । 4 G. 13. तदा मुनिः । 5 B. 12-13. उपस्थितं भयं घोरं दिव्यं पक्षि(a)मुखाच्च्युतं ॥ मृगाः प्रशमयन्त्येते सन्तापस्त्यज्यतामयं । (a) V. मुखाच्छ्रुतं &c. 6 G. 14. स्तदेते &c. 7 B. 13-14. तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥

प्रचण्डः शर्कराकर्षी कम्पयन्निव मेदिनीम् ॥ १९ ॥
[1]दिशः सतिमिराश्चासन् न तताप दिवाकरः ।
रजसा च जगत् कृत्स्नं भस्मनेवावकीर्यते ॥ २० ॥
[2]सर्वे चाप्यभवंस्तत्र सैनिका मूढचेतसः ।
वर्जयित्वा वसिष्ठादीनृषींस्तांश्चैव राघवान् ॥ २१ ॥
[3]ततो रजसि संशान्ते सैनिका लब्धचेतसः ।
आयान्तं ददृशुस्तत्र जटामण्डलधारिणम् ॥ २२ ॥
[4]महेन्द्रमिव दुर्द्धर्षं कालान्तकयमोपमम् ।
दुर्निरीक्ष्यं [5]जनैरन्यैस्तपन्तमिव भास्करम् ॥ २३ ॥
[6]स्कन्धे परशुमादाय [7]धनुश्चेन्द्रायुधोपमम् ।
[8]साक्षादिव महादेवमायान्तं त्रिपुरान्तकम् ॥ २४ ॥
प्रगृह्यैकशरं घोरं [9]ज्वलितानलवर्चसम् ।
रोषामर्षसमाविष्टं सधूममिवपावकम् ॥ २५ ॥

कम्पयन्मेदिनीं सर्वां पातयंश्च महाद्रुमान् । 1 B. 14-15. तमसा संवृतः सूर्यः सर्वं नावेदिपुर्दिशः ॥ भस्मना चावृतं सर्वं संमूढमिव तद्बलं । 2 B. 15-16. (a) वसिष्ठ ऋषयश्चान्ये राजा च ससुतस्तदा ॥ ससंज्ञा इव तत्रासन् सर्वमन्यद्विचेतनं । (a) V. & S. वसिष्ठो &c. 3 B. 16-17. तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥ ददर्श भीमसंकाशं जटामण्डलधारिणं ॥ 4 B. 17-18. भार्गवं जामदग्न्येयं राजा राजविमर्दनं ॥ कैलासमिव दुर्धर्षं कालाग्निमिव दुःसहं । ज्वलन्तमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥ 5 G. 19. नरैरन्यैर्ज्वलितानलवर्चसं । P. is worm-eaten here. 6 For this and the following Sloka, B. 19. स्कन्धे (a)चासज्य परशुं धनुर्विद्युद्गणोपमं । प्रगृह्य(b)शरमुग्रं च त्रिपुरघ्नं यथा शिवं ॥ (a)V. वासज्य &c. (b) S. शस्त्र &c. 7 G. 20. धनुश्चेन्द्रायुधप्रभं । P. is illegible here. 8 This line is wanting in G. 9 G. 20. रुद्रं साक्षादिवागतं ।

[1]जमदग्निसुतं रामं दृष्ट्वा[2]भ्यासमागतम् ।
वसिष्ठप्रमुखा विप्रा जेपुः शान्तिपरायणाः ॥ २६ ॥
सङ्गता[3]ऋषयः सर्वे सञ्जजल्पुरथो मिथः ।
कच्चित् पितृवधा[4]मर्षी [5]पुनर्नोत्सादयिष्यति ॥ २७ ॥
[6]क्षत्रं रामोऽयमागत्य शान्तमन्युरपि प्रभुः ।
सर्वक्षत्रवधं घोरमसकृत् [7]कृतवांस्तदा ॥ २८ ॥
कच्चिदद्यापि सक्रोधः क्षत्रं नोत्सादयिष्यति ।
इति मत्वार्घ्यमुद्यम्य भार्गवं ते ततोऽब्रुवन् ॥ २९ ॥
वसिष्ठप्रमुखा विप्राः सामपूर्वमिदं वचः ।
राम सुस्वागतं तेऽस्तु गृहाणार्घ्यमिदं प्रभो ॥
मुने भार्गव[8]वंशोऽसि न क्रोधं पुनरर्हसि ॥ ३० ॥
[9]प्रतिगृह्य स तां [10]पूजां तथेत्युक्त्वा च तानृषीन् ।
[11]रामं दाशरथिं वाक्यमुवाचेदमनन्तरम् ॥ ३१ ॥
इत्यार्षे रामायणे आदिकाण्डे बालचरिते जामदग्न्यदर्शनम्

---

1 B. 20. तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकं । वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ 2 G. 21. ..भ्यासं &c. 3 B. 21, मुनयः &c. 4 G. 23....मर्षात् &c. P. is worm-eaten here. 5 B. 21. क्षत्रं नोत्सा &c. 6 For this, and the following 2 Slōkas, B. 22. and 23. पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः । क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितं ॥ एवमुक्त्वा-र्घ्यमादाय भार्गवं भीमदर्शनं । ऋषयो रामरामेति मधुरं वाक्यमब्रुवन् ॥ 7 G.24. कृतवान् पुरा । 8 G. 26. संशाम्य न क्रोद्धुं &c. P. is worm-eaten here. 9 B. 24. प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् । रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ 10 G, 27, पूजामप्रत्युक्त्वा च &c., P. isworm-eaten here. 11 G. 27. रामो दाशरथिं राममुवाचेद &c.

LXXVII.

राम दाशरथे [1]शूर वीर्यन्ते श्रूयतेऽद्भुतम् ।
[2]धनुः किल त्वया भग्नं दिव्यं यत् तच्छ्रुतं मया ॥१॥
[3]अद्भुतं तत् कृतं राम [4]भेदेन धनुषस्त्वया ।
[5]श्रुत्वैवाहमिह प्राप्त इदं गृह्यापरं धनुः ॥ २ ॥
[6]अनेन धनुषा क्षत्रमसकृत् सादितं मया ।
पूरयेदमपि क्षिप्रं धनुर्गृह्य ममाग्रतः ॥ ३ ॥
[7]विकर्ष[8]चापं सन्धाय बाणेनानेन राघव ।
गृहाणेदं धनुर्दिव्यं [9]शरञ्चेमं मयोद्यतम् ॥ ४ ॥
[10]यदि सन्धास्यसीदं त्वं बाणेनानेन कार्मुकम् ।
ततो दास्यामि [11]ते युद्धं वीर्यश्लाघ्यमहं भुवि ॥ ५ ॥
[12]तस्येदं वचनं श्रुत्वा राजा दशरथस्तदा ।

---

1 B. LXXV. 1. and G. LXXVII. 1. वीर &c. 2 B. 1. धनुषो भेदनं चैव निखिलेन मया श्रुतं ॥ 3 For this SL. B. 2. तदद्भुतमचिन्त्यं च (a) भेदनं धनुषस्तथा । तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभं ॥ (a) S. has भंजनं &c. 4 G. 2. धनुषो भेदनं त्वया । 5 G. 2. (a) श्रुत्वैवाहमनुप्राप्त आदायेदं महद्धनुः ॥ (a) P. श्रुत्वाचाहमनु &c. 6 For this SL. B. 3. तदिदं घोरसङ्काशं जामदग्न्यं महद्धनुः । पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ G. 3. अनेन धनुषा राम मया कृत्स्ना मही जिता । पूरयेदमपि क्षिप्रं बलं दर्शय राघव ॥ 7 This SL. is wanting in B. 8 G. चापं &c. 9 G. शरञ्चेनं, but P. agrees with our text. 10 For this SL. B. 4. तदहं ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे । द्वन्द्वं युद्धं प्रदास्यामि वीर्यश्लाघ्यमहं तव ॥ 11 G. 5, युद्धं ते &c. P. has भद्रन्ते वीर्यश्लाघ्यमनुत्तमं ॥ 12 B. 5. तस्य तद् &c.

विषण्णवदनो[1]भूत्वा प्राञ्जलिः [2]प्रणतोऽब्रवीत् ॥ ६ ॥
[3]राम रोषः प्रशान्तस्ते ब्राह्मणस्त्वं [4]दयात्मकः ।
बालानां ममपुत्राणामभयं दातुमर्हसि ॥ ७ ॥
[5]ऋचीकच्यवनादीनां पितॄणां सन्निधौ पुरा ।
[6]न योत्स्यामीति संन्यस्य शस्त्रं न क्रोद्धुमर्हसि ॥८॥
[7]तपोदमपरो भूत्वा कश्यपाय वसुन्धराम् ।
दत्त्वा वनमुपागम्य [8]संन्यासं कृतवान् कथम् ॥ ९ ॥
मम सर्वविनाशाय [9]भूयो योद्धुं त्वमिच्छसि ।
[10]न ह्येकस्मिन् हते रामे सर्वे जीवामहे वयम् ॥१०॥
[11]प्रसीद भृगुशार्दूल [12]त्राहि मां शरणागतम् ।
[13]राम पुत्रं नमे बालं [14]रामं सन्दग्धुमर्हसि ॥ ११ ॥
[15]श्रुत्वा दशरथस्येदं जामदग्न्यः प्रतापवान् ।

---

1 B. 5. दीनः &c 2 B. 5. वाक्यमब्रवीत् । 3 For this SL. B. 6. क्षत्ररोषात् प्रशान्तस्त्वं ब्राह्मणश्च महातपाः । &c. 4 G. 7. शमात्मकः ; P. is worm-eaten here. G. (8.) then reads the SL. भृगूणां हि कुले जातः प्रशान्तानां महात्मनां । तपः स्वाध्यायशीलानां न क्रोद्धुं पुनरर्हसि ॥ which is wanting in our Text. 5. For this SL. B. 7. भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनां । सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवानसि ॥ 6 G. 9. न योत्स्य इति संन्यस्य शस्त्रं न स्रष्टुमर्हसि ॥ 7 B. 8. स त्वं धर्मपरो भूत्वा &c. 8 B. 8. महेन्द्रकृतकेतनः ॥ 9 B. 9. सम्प्राप्तस्त्वं महामुने । G. 11. भूयो योद्धुमिहेच्छसि । P. is wom-eaten here. 10 B. 9. न चैकस्मिन् &c. G. 11. नह्येतस्मिन्हते रामे जीवामः सर्व एव हि ॥ 11 This *SL*. is wanting in B. 12 G. 12. त्रायस्व शरणागतम् । 13 G. 12. रामं &c. 14 G. 12. राम &c. 15 *F*or this SL. B. 10. ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् । अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ G. 13. वदत्येवं दशरथे &c.

अनादृत्यैव तद्वाक्यं [1]रामं भूयोऽभ्यभाषत ॥ १२ ॥
[2]द्वे इमे धनुषी राम दिव्ये लोकत्रये श्रुते ।
[3]दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ १३ ॥
[4]तयोरेकं त्र्यम्बकाय दत्तं राम युयुत्सवे ।
[5]जघान त्रिपुरं राम भग्नं काकुत्स्थ यत्त्वया ॥ १४ ॥
[6]इदं द्वितीयं परमं विष्णोर्दत्तं पुरा सुरैः ।
द्रव्यसारबलप्राणप्रमाणाकृतिभिः समम् ॥ १५ ॥
[7]ब्रह्माणं यत्र पप्रच्छु[8]र्जातकौतूहलाः सुराः ।
शितिकण्ठस्य विष्णोश्च धनुषश्च [9]बलाबले ॥ १६ ॥
[10]अभिप्रायं विदित्वा[11]थ देवतानां पितामहः ।
विरोधयामास मिथो विष्णुं शङ्करमेव च ॥ १७ ॥

---

1 G. 13. भूयो राममभाषत ॥ 2 G. 14, इमे द्वे &c. B. 11. इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते । 3 G. 14. विश्वकर्मकृते सारे अल्पवीर्यदुरानमे ॥ P. is worn-eaten here. B agrees with our text. 4 For this SL. B.12. अनुसृष्टं सुरैरेकं त्र्यंबकाय युयुत्सवे । त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ 5 G. 15. त्रिपुरं जघ्नुषे देवैर्भग्नं &c. P. is illegible here. 6. G. 16. इदं द्वितीयमपरं विष्णवे यद्ददुः सुराः । &c. B. 13-14. इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः । तदिदं वैष्णवं राम धनुः परपुरञ्जयं ॥ समानसारं काकुत्स्थ रौद्रेण धनुषात्विदं । 7 For this SL. B. 14-15. तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहं ॥ शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया । 8 G. 17. (a) सुराः कौतूहलान्विताः । (a) P. has पुरा &c. 9 G. 17. बलाबलं ॥ 10 For this SL. B. 15-16. अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ विरोधं जनयामास तयोः सत्यवतांवरः । This SL. is wanting is S. 11 G. 18. तु &c.

[1]विरोधे च [2]महद्युद्धमभवत्तत्र देवयोः ।
शितिकण्ठस्य विष्णोश्च परस्परजिगीषया ॥ १८ ॥
[3]तस्य तत् पूरितं शैवं धनुर्भीमपराक्रमः ।
हूङ्कारेण महादेवः स्तम्भितोऽथत्रिलोचनः ॥ १९ ॥
[4]देवतैस्तु समागम्य सर्षिसंघैः सचारणैः ।
याचितो न प्रहृतवान् विष्णुः [5]सत्यपराक्रमः ॥ २० ॥
[6]विजृम्भितं तत्र दृष्ट्वा सर्वे विष्णुबला[7]त्तदा ।
अधिकं मेनिरे विष्णुं विबुधा धनुषा सह ॥ २१ ॥
[8]धनुस्तज्जृम्भितं रुद्रो [9]विदेहस्य महायशाः ।
देवरातस्य राजर्षेर्ददौ न्यासमनुत्तमम् ॥ २२ ॥
[10]इदं च वैष्णवं राम धनुरभ्यधिकं ततः ।
ऋचीके भार्गवे न्यासं न्यदधाद्विष्णुरूर्जितम् ॥ २३ ॥

1 For this SL. B. 16-17. विरोधे तु महद्युद्धमभवद्रोमहर्षणं ॥ शितिकण्ठस्य विष्णोश्च परस्परजये पणोः । 2 G. 19. महायुद्ध &c. 3 For this line B. 17. तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमं । G. 20. तत्र तज्जृम्भितं शैवं धनुर्भीमपराक्रमं । P. तत्र तत्पतितं शैवं धनुर्भीमपराक्रमं । 4 For this SL. B. 18-19. देवैस्तदा समागम्य सर्षिसंघैः सचारणैः ॥ याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ । 5 G. 21. बलवतां वरः ॥ 6 For this SL. B. 19-20. जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ अधिकं मेनिरे विष्णुं देवाः सर्षिगणा (a) स्तथा । (a) S. स्तदा । 7 P....दिव । 8. For this SL. B. 20-21. धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ॥ देवरातस्य राजर्षेर्ददौ हस्ते ससायकं । Before this SL. in B., S. reads the SL. पूजयित्वा ततो विष्णुमामन्त्र्य च पिनाकिनं । ब्रह्मेन्द्राग्नीन् पुरस्कृत्य नाकपृष्ठं ययुस्तदा ॥ 9 G. 23. विदेहेषु &c. 10 For this SL. 21-22. इदं च वैष्णवं राम धनुः परपुरञ्जयं ॥ ऋचीके भार्गवे

[1]ऋचीकोऽपि महातेजाः पुत्रायामिततेजसे ।
[2]पित्रे मे व्यददद्राम सुप्रीतो जमदग्नये ॥ २४ ॥
[3]न्यस्तशस्त्रे च पितरि तस्मिन् वै शममास्थिते ।
अर्ज्जुनो विदधे मृत्युं प्राकृतां [4]बुद्धिमास्थितः ॥ २५ ॥
[5]तं रामासदृशं श्रुत्वा पितुस्तत्र वधं मया ।
असकृत् [6]सूदितं क्षत्रं जातं जातमनेन हि ॥ २६ ॥
[7]पृथिवी चापि विजिता मयास्य धनुषो बलात् ।
दत्ता चेयं विनिर्ज्जित्य कश्यपाय महात्मने ॥ २७ ॥
[8]कश्यपाय च दत्त्वेमामखिलां सागराम्बराम् ।
न्यस्तशस्त्रस्तपस्तप्तुं गतोऽहं मेरुपर्वतम् ॥ २८ ॥

प्रादाद्विष्णुः सन्यासमुत्तमं । 1 For this SL. 22-23. ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः ॥ पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः ॥ 2 G. 25. पित्रे मम ददौ दिव्यं कार्मुकं जमदग्नये । 3 For this SL. B. 23 24. न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते ॥ अर्ज्जुनो &c. G. 26. न्यस्तशस्त्रे तु पितरि मदीये शममास्थिते । &c. 4. P. बुद्धिमाश्रितः । 5 For this SL. B. 24. वधम· प्रतिरूपं तु पितुः श्रुत्वा सुदारुणं ॥ क्षत्रमुत्सादयं रोषाज्जातं जातमनेकशः ॥ 6 P. स्वादितं क्षत्रं धर्मयानेन वीर्यवत् ॥ 7 For this SL. B. 25. पृथिवीं चाखिलां प्राप्य कश्यपाय महात्मने । यज्ञस्यान्ते ददं राम दक्षिणां पुण्यकर्मणे ॥ 8 For this, and the following SL. B. 26. दत्त्वा महेन्द्रनिलयस्तपोबलस· मन्वितः। श्रुत्वा तु धनुषो भेदं ततोऽहं द्रुतमागतः ॥

तत्र संन्यस्तशस्त्रोऽपि तपस्यभिरतोऽप्यहम् ।
[1]श्रुत्वा तद्धनुषो भङ्गं द्रष्टुं त्वां समुपागतः ॥ २९ ॥
[3]तदिदं वैष्णवं राम [2]पितृपर्यागतं मम ।
[4]क्षात्रं वीर्यमुपाश्रित्य गृहाण धनुरुत्तमम् ॥ ३० ॥
[5]योजयस्व गृहीत्वा च शरेण रघुनन्दन ।
यदि शक्तोऽसि सन्धातुं युद्धं दास्यामि ते ततः ॥३१॥

[6]इत्यार्षे रामायणे आदिकाण्डे परशुरामदर्शनम् ॥

---

1 G. 30. श्रुत्वेव धनुषोभङ्गं &c. 2 For this SL. B. 27. तदेवं वैष्णवं राम पितृपैतामहं महत् ! क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमं ॥ 3 G. 31. पितृपैतामहं मम, but P. agrees with our text 4 G. 31. क्षत्रधर्ममुपाश्रित्य &c., P. in worm-eaten here. 5 For this SL. B. 28. योजयस्व धनुःश्रेष्ठे शरं परपुरञ्जयं । यदि शक्तोऽसि काकुत्स्थ द्वन्द्वं दास्यामि ते ततः ॥ 6. B., like our text, ends the chapter here; but G. has the subject of our next chapter in this very chapter.

कृताकृते निष्प्रयोजने नैनं कृताकृते तपत इति श्रुतेः तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुत्या देवा अपि तस्य मोक्षाभवनाय न समर्था इत्युक्तेन विघ्नाभावार्थमपि देवाराधनरूपकर्मानुष्ठानमित्याशयः । एतादृशो ब्रह्मविद्भूमिकासप्तकभेदेन निरूपितो वसिष्ठेन—

ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता ।
विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥
सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ॥ इति ।

तत्र नित्यानित्यवस्तुविवेकादिपुरस्सरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा ततो गुरुमुपसृत्य वेदान्तवाक्यविचारः श्रवणमननात्मको द्वितीया । ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तृतीया एतद्भूमिकात्रयं साधनरूपं जाग्रदवस्थेोच्यते जगतोऽभेदेन भानात् । ततो वेदान्तवाक्यान्निर्विकल्पको ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका फलरूपा सत्त्वापत्तिः स्वप्नावस्थोच्यते स्वप्नवत्सर्वस्य जगतो मिथ्यात्वेन स्फुरणात् एतां भूमिं प्राप्तो ब्रह्मविदित्युच्यते । पञ्चमीषष्ठीसप्तम्यस्तु भूमिका जीवन्मुक्तेरेवावान्तरभेदाः तत्र सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्था सा संसक्तिरिति सुषुप्तिरिति वोच्यते ततः स्वयमेव व्युत्थानात् तद्वान्योगी ब्रह्मविद्वरः ततस्तदभ्यासपरिपाकेण या चिरकालावस्थायिनी सा पदार्थाभाविनीति गाढसुषुप्तिरिति चोच्यते ततः स्वयमनुत्थितस्य योगिनः परप्रयत्नेनैव व्युत्थानात् सोऽयं ब्रह्मविद्वरीयान् । यस्तु समाध्यवस्थाया न स्वतो न परतो व्युत्थितो वा भवति सर्वथा भेददर्शनाभावात् किन्तु सर्वदा तन्मय एव स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुवशात् अन्यैर्निर्वाह्यमानदैहिकव्यवहारः परिपूर्णपरमानन्द एव सर्वतास्तिष्ठति सा सप्तमी तुरीयावस्था तां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते तद्यथा हि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरो मृतः प्राणो ब्रह्मैव तेजएवेति श्रुतेः । अत्र प्रथमभूमित्रयमारूढोऽज्ञोपि न कर्माधिकारी किं पुनस्तत्त्वज्ञानी तद्विशिष्टो जीवन्मुक्तो वेत्याशयः॥ १८ ॥

यो योगारूढस्तस्यैव मुक्तयतेरात्मारामस्य कर्म न कर्तव्यं तव त्वारुरुक्षोर्मोक्षार्थिनः कर्म कर्तव्यमेवेति बोधयितुमाह—

तस्मादसक्तः सततं कार्यं कर्म समाचर ।

असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १८ ॥

तस्मादिति। हि यस्मात्कारणान्मुमुक्षुः पुरुषः स्वयमसक्तः फलाभिसन्धिरहितो भूत्वा विहितं कर्माचरन् सम्यगनुतिष्ठन्नेव परं परमपुरुषार्थं मोक्षमाप्नोति यथाऽयमात्मरतिरस्मिन् जन्मनि जन्मान्तरेषु च वैदिकं कर्म कृत्वैव चित्तशुद्धिं प्राप्यात्मज्ञानेन मुक्तिं प्राप्तवान् तथाऽन्योऽपि कर्मभूमिष्ठः कर्म कृत्वैव ज्ञानं प्राप्य मुक्तो भवति नैवान्यथा तस्मात्त्वमपि मुमुक्षुरसक्तो निष्कामः सन् सन्ततं कार्यं कर्तव्यं वैधं नित्यं नैमित्तिकं च कर्म समाचर श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या सम्यक्कुरु कर्मणैव चित्तशुद्धिं प्राप्य ज्ञानञ्च मोक्षञ्च प्राप्स्यसीत्यर्थः।

अन्ये तु तत्त्वज्ञाननिष्ठत्वाभावे निष्कामकर्मानुष्ठानमावश्यकं चित्तशुद्धिहेतुत्वात्तस्येत्याह तस्मादिति। यस्मान्न त्वमेवम्भूतो ज्ञानी किन्तु कर्माधिकृतो मुमुक्षुरेव तस्माज्ज्ञाननिष्ठत्वाभावादसक्तः फलकामनारहितः सततं सर्वदा कार्यं अवश्यकर्तव्यं यावज्जीवमग्निहोत्रं जुहोतीत्यादिश्रुतिविहितं तमेतं वेदानुवचनेनेत्यादिना ज्ञाने विनियुक्तं च कर्म नित्यनैमित्तिकलक्षणं समाचर यथाशास्त्रं कुरु। मोक्षमेवापेक्षमाणस्य कथं कर्मणि नियोगः स्यादित्याशङ्क्याह असक्तो हीति। हि यस्मादसक्तः कर्माचरन्नीश्वरप्रीत्यर्थं कुर्वन् सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण परं मोक्षमाप्नोति पूरुषः पुरुषः स एव सत्पुरुषो नान्य इत्याशय इत्याहुः ॥ १९ ॥

ननु न केवलं ज्ञानिन एव कर्मानधिकारः किन्तु ज्ञानार्थिनोऽपि विरक्तस्य ज्ञाननिष्ठाफलभूतमोक्षप्राप्त्यर्थं श्रवणमनननिदिध्यासनानुष्ठानाय सर्वकर्मसंन्यासस्यावश्यकत्वात्तथाच मयापि विरक्तेन ज्ञानार्थिना कर्माणि त्याज्यान्येवेत्यर्जुनाशङ्कां क्षत्रियस्य संन्यासानधिकारप्रतिपादनेन निराकरोति—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्त्तुमर्हसि ॥ २० ॥

कर्मणैवेति। हि यस्माज्जनकादयो जनकाजातशत्रुप्रमुखा क्षत्रियाः कर्मणैव शुद्धसत्त्वाः विरक्ताः सन्तः संसिद्धिं श्रवणादिसाध्यज्ञाननिष्ठाद्वारा मोक्षलक्षणां संसिद्धिमास्थिताः प्राप्ताः तस्मात्त्वमपि क्षत्रियो विविदिषुः सन् तदर्थं कर्म कर्तुमर्हसीत्यन्वयः। ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति संन्यासविधायके वाक्ये

ब्राह्मणत्वस्य विवक्षितत्वेन क्षत्रियवैश्ययोः संन्यासाभावोक्तेश्च कर्म कर्तुमर्हसि वार्तिककृता तु प्रौढिवादमात्रेण ब्राह्मणत्वस्योपलक्षणत्वं मत्वा क्षात्रयवैश्ययोरपि सन्न्यासोऽस्तीत्युक्तमिति बोध्यम् । जनकादयो यदि प्राप्तसम्यग्दर्शनास्तदापि यथा तैः कर्म कृतं तथा त्वयापि सम्यग्दर्शनवता कर्म कर्तव्यमित्याह लोकेति । लोकानां स्वे स्वे धर्मे प्रवर्तनमुन्मार्गान्निवर्तनञ्च लोकसङ्ग्रहस्तं सम्पश्यद्भिर्यथा तैः कृतकृत्यैरपि प्रारब्धवशात्कर्मैव कृतं तथा त्वमपि प्रारब्धकर्माधीनो लोकसङ्ग्रहं सम्पश्यन्कर्म कर्तुमर्हसीत्यर्थः ।

अन्ये तु धर्मेण पापमपनुदतीति, 'ज्ञानमुत्पद्यते पुम्सां क्षयात्पापस्य कर्मणः' इति ज्ञानादेव तु कैवल्यमित्यादिश्रुतिस्मृतिभिर्धर्मानुष्ठानादेव पापक्षयः पापक्षयादेव ज्ञानं ज्ञानादेव मोक्ष इति प्रतिपाद्यते ततो ज्ञातात्मतत्त्वस्य मुमुक्षोरवश्यं कर्मैव कर्त्तव्यमित्युपदिश्यास्मिन्नर्थे वृद्धाचारं प्रमाणयति कर्मणैवेति । जनक आदिर्येषां ते जनकादयोऽश्वपतिभर्गारथादयः क्षत्रियाः कर्मणैव श्रौतस्मार्तकर्मानुष्ठानेनैव चित्तशुद्धिं प्राप्य ज्ञानेन संसिद्धिं मुक्तिमास्थिताः प्राप्ताः कृतार्था जाता इत्यतस्त्वमपि कर्मैव कृत्वा तदुत्पन्नचित्तशुद्ध्या ज्ञानं प्राप्य मुक्तो भूत्वा सुखेन तिष्ठेत्यर्थः । यद्वा जनकादयो निरूढया ज्ञानयोगनिष्ठया संसिद्धिं मुक्तिं प्राप्य स्वयं कृतार्था अपि मूढजनतारणार्थं कर्मणैव सह स्थिताः कर्म कुर्वन्त एव स्थिता इत्यर्थः । आरूढानामेवैवं सति किमुतानात्मज्ञेनारुरुक्षुणा त्वया मोक्षार्थं कर्म कर्त्तव्यमेवेति निर्द्धार्येदानीमुक्तेनाप्याधिकारिकेण लोकहितार्थं कर्म कर्तव्यमेवेति बोधयितुं तद्दृष्टान्तत्वेन जनकादीनां ज्ञानवृद्धानां प्रवृत्तिमुदाहृत्य तवाप्येतादृशोऽधिकारो यद्यस्ति तिष्ठतु तथापि जनकादिवत्त्वया लोकहितार्थमपि कर्मावश्यं कर्तव्यमेव महापुरुषप्रवृत्त्या खलु शास्त्रस्य प्रामाण्यं कर्मणः प्राशस्त्यमज्ञतरणं च पारम्पर्येणाचारप्रचयोऽपि च सिद्ध्यत्यतो मुक्तेनापि महताऽवश्यं कर्म कर्त्तव्यमित्याशयेनाह लोकसङ्ग्रहमिति । लोकः पामरजनस्तस्य सङ्ग्रहः सत्कर्ममार्गप्रदर्शनेन तारणमुन्मार्गान्निवारणं च तमिमं लोकसङ्ग्रहमेवार्थं सम्पश्यन् मया क्रियमाणं कर्म लोकोपकाराय भवतीति पश्यन्नपि कर्म कर्तुं त्वमर्हसीत्यर्थ इत्याहुः ॥ २० ॥

मत्कर्तृकं कर्म कथं लोकस्योपकाराय भवतीति उच्यते—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

वेदशास्त्राध्ययनाध्यापनयोः तदर्थज्ञानज्ञापनयोस्तदुक्तकर्मानुष्ठानानु-

ष्ठापनयोश्च दक्षिणः कुलशीलादिमहत्त्वसम्पन्नश्च यो द्विजः श्रेष्ठः यद्य-च्छ्रौतं स्मार्तं वा अन्यद्वाऽऽचरति नियमेनानुतिष्ठति मुमुक्षुरितरः पामरोऽपि तत्तदेव कर्माचरति न तु स्वयमप्यन्यत्करोति शास्त्रतज्ज्ञानतदुक्तकर्मपरिज्ञानाभावात्किञ्चोक्तलक्षणः श्रेष्ठो यद्यत् शास्त्रं प्रमाणं कुरुते इदमेव प्रमाणमिति व्यवहरति लोको मूढजनस्तदेव तेन प्रमाणीकृतमेव शास्त्रमनुवर्तते तदेव शास्त्रं स्वयं प्रमाणं करोति श्रेष्ठानुसारी पामरो जनो भवतीत्यर्थः एतेन कृतार्थस्यापि श्रेष्ठस्य लोकाहितार्थं कर्म कर्त्तव्यमेवेति सिद्धम् ।

अन्ये तु एवं कृतार्थेनापि लोकसङ्ग्रहार्थं विहितं कर्म कर्तव्यमित्युक्त्वाऽथ मयि कर्मणि प्रवृत्ते कथं लोकसङ्ग्रहो भविष्यतीत्याशङ्क्य तत्प्रकारं दर्शयति यद्यदिति। श्रेष्ठः प्रधानभूतो राजादिर्यद्यत् शुभमशुभं वा कर्माचरति इतरः प्राकृतस्तदनुसारी जनस्तत्तदेवाचरति न त्वन्यत्स्वातन्त्र्येण, श्रेष्ठाचारानुविधायित्वाल्लोकस्येत्यर्थः । तथाच कृतार्थेनापि लोकमर्यादास्थापनार्थं हितं कर्म कर्तव्यमेवेति भावः। श्रेष्ठानुसारित्वमितरेषामाचारे दर्शयित्वाऽथ ननु स्वयमेव लोकः शास्त्रमालोक्याशास्त्रीयश्रेष्ठाचारं परित्यज्य शास्त्रीयमेव कुतो नाचरतीत्याशङ्क्याचारवत्प्रतिपत्तावपि श्रेष्ठानुसारितामितरजनस्य दर्शयति स यदिति। स श्रेष्ठो यल्लौकिकं वैदिकं वा प्रमाणं कुरुते प्रमाणत्वेन मन्यते लोकोऽपि तदेवानुवर्तते प्रमाणं कुरुते न तु स्वातन्त्र्येणेत्यर्थः तथा च प्रधानभूतेन त्वया लोकसंरक्षणार्थं विहितं कर्म कर्तव्यमेव प्रधानानुयायिनो जनव्यवहारा भवन्तीति न्यायादित्याशय इत्याहुः॥ २१॥

अहमिव त्वमपि लोकसङ्ग्रहं कुर्विति स्वदृष्टान्तेनोक्तमेव दृढयति—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

नेति। हे पार्थ मम परमेश्वरस्य त्रिष्वपि लोकेषु किमपि कर्तव्यं नास्ति कुतो यतोऽनवाप्तमप्राप्तफलं किञ्चिन्मयाऽवाप्तव्यं नास्ति तथापि कर्मणि वर्त एवाहं कर्म करोम्येवेत्यर्थः । त्वमपि मत्सम्बन्धित्वादहमिव कर्माणि वर्तितुमर्हसीति सूचनार्थं सम्बोधनम्। शुद्धवंशोद्भवस्त्वं मन्मतमेव कर्तुमर्हसीति वा ।

अन्ये तु ननु महात्मनः कृतार्थस्य कर्मणा साध्यमपश्यतः कर्मकरणं कुत्रापि न दृष्टमित्याशङ्कायामस्मिन्नर्थे त्वहमेव प्रमाणमित्याह न मे इति । हे पार्थ षड्गुणैश्वर्यसम्पन्नस्यावाप्तसर्वकामस्य सर्वेश्वरस्य मे

यीत्कञ्चित्कार्यमाप्तव्यमर्थमुद्दिश्य कर्त्तव्यं कर्म नास्ति तत्कुतो यतोऽनवाप्तमप्राप्तं सत्तु मम क्रिययाऽवाप्तव्यं प्राप्तव्यं वस्तु त्रिषु लोकेषु किञ्चिदपि न विद्यते गृहस्वामिनो गृहस्थश्चातद्रव्यवद्ब्रह्माण्डस्थं सर्वं वस्तु ब्रह्माण्डस्वामिनो मे प्राप्तमेव न तु प्राप्तव्यं किञ्चिदस्ति एवं महाभाग्यवैराग्यज्ञानसमृद्धोऽप्यहं लोकसङ्ग्रहात्मके कर्मणि वर्त एव हि चकारो ह्यर्थ मम लौकिके वैदिके च कर्मणि प्रवर्तनं भवता प्रत्यक्षसिद्धमिति हिः प्रसिद्धिबोधनार्थ इत्याहुः ॥ २२ ॥

लोकसङ्ग्रहोऽपि न कर्तव्यो विफलत्वादित्याशङ्क्याह—

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

यदीति । हे पार्थ यदि पुनरहमतन्द्रितोऽनलसः सन्कर्माणि जातु कदाचिन्न वर्तेयं नानुतिष्ठेयं कर्माणि तदा मम श्रेष्ठस्य सतो वर्त्म मार्गं मनुष्याः कर्माधिकारिणः सन्त अनुवर्तन्ते अनुवर्तेरन् सर्वशः सर्वप्रकारैरित्यर्थः इतर जना अपि मम मार्गमनुवर्तन्ते त्वन्तु मत्सम्बन्धी सन् नानुवर्तसे इत्यत्याश्चार्यमिति सूचनाय पार्थेति स.बोधनम् ॥ २३ ॥

श्रेष्ठस्य तव मार्गानुवर्तित्वं मनुष्याणामुचितमेव को दोष इत्यतआह—

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

उत्सीदेयुरिति । अहमीश्वरश्चेद्यदि कर्म न कुर्यां तदा मदनुवर्तिनां मन्वादीनामपि कर्मप्रवृत्त्यनुपपत्तेः लोकस्थितिहेतोः कर्मणो लोपेनेमे लोका उत्सीदेयुर्विनश्येयुः ततश्च वर्णसङ्करस्य च कर्ताऽहमेव स्यान्तेन चेमाः सर्वाः प्रजा अहमेवोपहन्यां धर्मलोपेन विनाशयेयं कथं च प्रजानामनुग्रहार्थं प्रवृत्त ईश्वरोऽहं ताः सर्वा विनाशयेयमित्याशयः तथाच यथाऽहमीश्वरोऽपि सन् लोकोपकारार्थं कर्म करोमि तथान्यैरपि तदर्थं तत्कर्तव्यमिति भावः । यद्वा न केवलं लोकसङ्ग्रहं सम्पश्यन्कर्म कर्तुमर्हसि अपि तु श्रेष्ठाचारत्त्वादपीत्याह यद्यदिति । तथाच मम श्रेष्ठस्य यादृश आचारस्तादृशएव मदनुवर्तिना त्वयाऽनुष्ठेयो न स्वातन्त्र्येणान्य इत्यर्थः । कीदृशस्तवाचारो यो मयाऽनुवर्तनीय इत्याकाङ्क्षायां न मे पार्थेत्यादिभिस्त्रिभिस्तत्प्रदर्शनमिति योजना।

अन्ये तु ननु सर्वेश्वरस्य तव लोकसङ्ग्रहोऽपि न कर्तव्य अनर्थाभावादित्याशङ्क्याश्रेष्ठः श्रेष्ठानुसारीति न्यायेन सर्वज्ञोऽयं कृष्ण इति

सर्वे मदनुसारिणो भवन्ति मय्यकर्मणि सति सर्वेऽप्यकर्माणो भवेयुस्तेन लोकक्षतिरूपोऽनर्थो भवेदतः कर्म मम कर्तव्यमेवेत्याशयेनाह यदीति द्वाभ्यां। अहं कृतार्थोऽस्मीति वा न कर्मणा मम साध्यमस्तीति वाप्यहमतन्द्रितः मन्त्रतन्त्रप्रयोगादावप्रमत्तो भूत्वा जातु क्वचित्कदाचिदपि कर्मणि विहिते न वर्तेयं यदि विहितकर्मकर्त्ता न स्यां चेन्मामकर्माणं दृष्ट्वा सर्वे मनुष्या अप्यकर्माणो भवेयुर्हि यस्मान्मनुष्याः सर्वे भगवानयं सर्वज्ञ इति मयि सर्वज्ञत्वबुद्ध्या मम वर्त्म मदीयमेव मार्गमनुवर्तन्ते अश्रेष्ठस्य श्रेष्ठानुसारित्वनियमान्मया कर्मणि त्यक्ते स्वयमपि कर्म त्यजेयुरित्यर्थः। ननु तैरपि कर्म त्यज्यतां ततः कोऽनर्थ इत्यत आह उत्सीदेयुरिति। सर्वैः कर्मणि परित्यक्ते अन्नाद्भवन्ति भूतानीत्युक्तरीत्या हविर्भागाद्यभावाद्देवाः प्रक्षीणा भवेयुर्वृष्ट्याद्यभावान्मनुष्यादीनामनुत्पत्तिरुत्पन्नानां च विनाशः स्यादेतावानेवानर्थो न भवति किन्तु वर्णसाङ्कर्यमपि च स्यादित्याह सङ्करस्येति। कृतकृत्यत्वाभिमानेनाहं लोकस्थितिकारणं वैदिकं कर्म त्याजयित्वा सङ्करस्य च कर्ता स्यां तत्तद्वर्णजातिभेदव्यवस्थापककर्माभावे सर्वेषामेकरूप्यापत्तौ वर्णाः सङ्कीर्यन्ते सोऽपि वर्णसङ्करो मत्कर्तृक एव स्यादेवं साङ्कर्यसम्पादनेनाहं सर्वाः प्रजा उपहन्यां सर्वासां प्रजानामुपहतिकर्ता च स्यां उपहतिर्दुर्गतिप्राप्तिः सद्गतिहेतोः सत्कर्मानुष्ठानस्याभावात्सर्वे नरकभाजो भवेयुरित्यर्थः यत एषोऽनर्थपरम्परापत्तिस्ततः कृतकृत्यस्यापि मम तव चाप्यात्मविदोऽन्यस्य च लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धमित्याहुः ॥ २४ ॥

तर्हि लोकहितार्थं कर्मणि प्रवृत्तेन विदुषा कथं कर्म कर्तव्यमित्याकाङ्क्षायामाह—

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांस्तथा सक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ २५ ॥

सक्ता इति। अविद्वांसोऽनात्मज्ञाः कर्मणि कर्मजन्यफले स्वर्गपुत्रधनादौ सक्ता आसक्तिमन्तो भूत्वा नियमेन श्रद्धाभक्तिभ्यां यथा विहितं कर्म कुर्वन्ति तथैव वर्तमानः सन् लोकसङ्ग्रहं चिकीर्षुर्विद्वान् ब्रह्मविदधिकारिकः स्वयमसक्तः कर्तृत्वाभिनिवेशरहितः फलापेक्षारहितोऽपि भूत्वा कर्म कुर्यादेवं कुर्वन् स्वयं तीर्णः परानपि तारयतीति भावः। कर्तृत्वाभिनिवेशराहित्यत्वं साकल्यवैकल्ययोर्हर्षविषादशून्यत्वं च तज्ज्ञानयोर्वैलक्षण्यं नियमेन कर्मकरणं तूभयत्र सममेव ॥ २५ ॥

किञ्च—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तस्समाचरेत् ॥ २६॥

विद्वान्ब्रह्मवित्स्वयं युक्त आत्मनो देहादितादात्म्याभावदर्शनयोगनिष्ठो भूत्वा समाचरन् कालोचितं कर्म कुर्वन् कर्मसङ्गिनां कर्मासक्तानां फलापेक्षया नियमेन कर्म कुर्वतामित्यर्थः । यद्वा देहेन्द्रियादिभिरेव क्रियमाणेषु कर्मस्वहङ्कर्ता भोक्तेत्यभिमानः सङ्गः स येषां तेषां कर्मसङ्गिनामतत्त्वविदां मूढानां स्वयं पण्डितत्त्वाभिमानेन बुद्धिभेदं ज्योतिष्टोमेन स्वर्गकाम इति वचनाज्ज्योतिष्टोमं कृत्वा स्वर्गफलं भोक्ष्य इत्यादि फलविषया या कामना बुद्धिस्तस्याः भेदं चालनं न जनयेत् न कर्माणि कामनया कर्तव्यानीति वा स्वर्गादिफलमसदिति कर्त्रादि सर्वं मिथ्येति वा तेषां बुद्धेर्वैकल्यं न सम्पादयेत्किन्तु अक्षय्यं ह वै चातुर्मास्ययाजिन इति पश्यति पुत्रं पश्यति पौत्रमिति तस्माद्धर्मं वदन्तीत्यादिना च सर्वाणि वैदिकानि जोषयेत् प्रीणयेत्कर्मफलस्तुत्या कर्माणि कर्तुमिच्छामेव सम्पादयेदित्यर्थः ।

अन्ये तु इदं द्वयमित्थं योजयन्ति तदेवमीश्वरस्य कृतार्थतया कर्माकरणे तदनुवर्तिनामपि तदकरणादेव स्थितिहेत्वभावात्पृथिव्यादिभूतानां विनाशप्रसङ्गाद्वर्णाश्रमधर्मव्यवस्थानुपपत्तेश्चाधिकृतानां प्राणिनां पापापहतत्वप्रसङ्गात्परानुग्रहार्थमीश्वरस्य कर्मणि प्रवृत्तिरित्युक्तम् । सम्प्रति तवेश्वरस्य लोकसङ्ग्रहार्थं कर्माणि कुर्वाणस्यापि कर्तृत्वाभिमानाभावान्न कापि क्षतिर्मादृशस्य तु जीवस्य लोकसङ्ग्रहार्थं कर्माणि कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिभवः स्यादित्याशङ्क्याह सक्ता इति । हे भारत कर्मण्यासक्ताः कर्तृत्वाभिमानेन फलाभिसन्धिना च कर्मण्यभिनिविष्टा अविद्वांसोऽज्ञा यथा कुर्वन्ति तथा लोकसङ्ग्रहं कर्तुमिच्छुर्विद्वानात्मविदपि कुर्यात् किन्त्वसक्तः कर्तृत्वाभिमानं फलाभिसन्धिञ्चाकुर्वन्नित्यर्थः तथा च यथाऽहं कृतार्थोऽपि सन् लोकसङ्ग्रहार्थं कर्म करोमि तथा त्वमन्यो वा विद्वांस्तदर्थं कर्म कुर्यादिति भावः । तव तु भरतवंशोद्भूतत्वादपि लोकसङ्ग्रहोऽवश्यं सम्पाद्य इति सूचनाय सम्बोधनं । भा ज्ञानम् तस्यां रतत्वेन यथोक्तशास्त्रार्थबोधयोग्योऽसीत्यपरे ॥ २५ ॥

ननु कर्मानुष्ठानेनैव लोकसङ्ग्रहः कर्तव्यो न तु तत्त्वज्ञानोपदेशेनेत्यत्र को हेतुरित्यत्राह नेति । अज्ञानामविवेकिनां कर्मसङ्गिनां कर्तृत्वाभिमानफलाभिसन्धिभ्यां कर्मण्यभिनिविष्टानां बुद्धेरहमेतत्कर्म करिष्ये एत-

त्फलं च भोक्ष्य इत्येवं रूपायाः भेदं विवाचनं न जनयेदकर्त्रात्मोपदेशेन न कुर्यात् किन्तु युक्तः सावधानः सन् विद्वान् लोकसङ्ग्रहं चिकीर्षुः सर्वकर्माणि समाचरन् तेषां श्रद्धामुत्पाद्य जोषयेत् प्रीत्या सेवयेत् अनधिकारिणामकर्त्रात्मोपदेशेन बुद्धिविचालने कृते तु कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य वानुत्पत्तेरुभयभ्रष्टत्वं स्यात्।

अज्ञस्यार्द्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्।
महानिरयजालेषु स तेन विनियोजित;

इतिस्मृतेः ॥ २६ ॥

विद्वदविदुषोः कर्मानुष्ठानसाम्येपि कर्त्तृत्वाभिमानतदभावाभ्यां विशेषं दर्शयन् सक्ताः कर्मणीति श्लोकार्थं स्पष्टयति प्रकृतेरित्यादिद्वाभ्यां—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ २७ ॥

प्रकृतेः सत्त्वरजस्तमोगुणात्मिकायाः मूलप्रकृतेरीश्वरशक्तेर्गुणैर्विकारैः कार्यकरणरूपैः क्रियमाणानि लौकिकवैदिकानि कर्माणि सर्वशः सर्वप्रकारैः कार्यकरणसङ्घातेऽहम्प्रत्ययोऽहङ्कारः स्तेन विमूढः स्वरूपविवेकासमर्थ आत्मा चित्तं यस्य सोऽहङ्कारविमूढात्माऽनात्मन्यात्माभिमानी कर्ताहमिति करोम्यहमिति मन्यते कर्त्रध्यासेनानात्मधर्माण्यात्मन्यारोपयतीत्यर्थः।

मूढानामेव कर्म न तु पण्डितानामिति सूचयितुमज्ञानां कर्मसङ्गिनामिति यदुक्तं तदेव विस्पष्टयति प्रकृतेरिति। प्रकृतिर्माया सत्त्वादिगुणद्वाराऽऽकाशादिमहाभूतरूपेण परिणता तस्याः प्रकृतेर्गुणाः कार्यभूता देहेन्द्रियादयस्तैरेव न क्वचिदप्यात्मना क्रियमाणानि सर्वाणि कर्माणि प्रत्यविद्वानहङ्कारविमूढात्मा स्वाविद्यया देहेन्द्रियादावनात्मन्यहमितिबुद्धिरहङ्कारस्तेन विमूढो विपरीतग्रहणपर आत्मा मनो यस्य सोऽहङ्कारविमूढात्मा, यद्वा विमूढ इत्यत्रान्तर्गर्भित णिच् देहेन्द्रियादिष्वहङ्करणेन हि मोहितः द्रष्टाऽहं स्प्रष्टाहं श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता भोक्तेति तत्तदुपाधिसंम्बन्धसम्भावितविपरीतवृत्तीनां विषयतां गमित आत्मा प्रत्यग्रूपो येन सोऽहङ्कारविमूढात्मा, यद्वा देहेन्द्रियादिष्वहङ्करणेन विमोहितोहम्प्रत्ययेऽर्थत्वेनाविहित आत्मा येन सोहङ्कारविमूढात्मा कर्ताहमिति मन्यते दुष्टादुष्टप्रारब्धवशाद्देहेन्द्रियैः कृतेषु दुष्टेष्वदुष्टेष्वपि कर्मस्वकर्त्तारमेवात्मानं मया पापं कृतं पुण्यं कृतमिति तत्तत्क्रियायाः कर्तारमेव पश्यतीत्यर्थ इत्यन्ये ॥ २७ ॥

विद्वांस्तु न तथा मन्यत इत्याह—

चरिचलिपतिवदोऽचि ॥ ४ । १ । ५४ ॥

चरि चलिपति वद इत्येते धातवः अचि प्रत्यये परे वा द्विर्भवन्ति । चरतीति चरः । चराचरः । चलतीति चलः । चलाचलः । पततीति पतः । पतापतः । वदतीति वदः । वदावदः ।

घनाघनपटूपटम् ॥ ४ । १ । ५५ ॥

घनाघनपटूपटौ वा निपात्येते ॥ हन्तेरचि घत्वं द्विर्वचनं च निपात्यते । अकारस्त्वचयानित्येव सिद्धः । हन्तीति घनाघनः । पाटेरचि णे श्लुग् द्विर्वचने ऊगागमः । आगपवादः । पाटयतीति पटूपटः पाटः ॥

चिक्लिदचक्नसदाश्वत्साह्वन्मीढ्वत् ॥ ४ । १ । ५६ ॥

चिक्लिदादयः शब्दाः कादौ प्रत्यये द्विवचनादिभावाभावाभ्यां निपात्यन्ते ॥ क्लिद्यतीति चिक्लिदः इगुपान्त्यलक्षणः कः । चक्नस्यतीति चक्नसः ववुलच् । दाश्रृञ् दाने इत्यस्य क्सविड् द्वित्वाभावाद्दाश्वान् । सहेः परस्मैपदोपान्त्यदीर्घत्वे च साह्वान् । मिहेरद्वित्वमनिट्त्वं दीर्घढत्वे च मीढवान् ।

सीदीर्त्सीप्सन्यृधाव्ज्ञपेर्न च ॥ ४ । १ । ५७ ॥

ऋध् आप् ज्ञप् इत्येतेषां धातूनां सकारादौ सनि परे यथासंख्यं ईर्त्स् ईप् ज्ञीप् इत्येते आदेशा भवन्ति । न च द्विः । द्विश्चैषामेकाज् न भवति न चेत्यादेशे कृते द्विर्वचनं प्राप्नोतीति निषेधः । ईर्त्सति । ईप्सति । ज्ञीप्सति । सीति किम्? अर्दिधिषति । जिज्ञपयिषति ।

धिब्धीप्दम्भः ॥ ४ । १ । ५८ ॥

दम्भेः सकारादौ सनि परे धिप् धीप् इत्येतावादेशौ भवतः । न चास्य द्विर्भवति । धिप्सति । धीप्सति । सीति किम्? दिदम्भिषति ।

वौन्मुचोऽनाप्येऽचः ॥ ४ । १ । ५८ ॥

मुचेर्धातोः सकारादौ सनि परे अचः ओकारादेशो वा भवति । न चास्य द्विः । अनाप्ये न चेदस्याप्यं कर्म विवक्षते । मोक्षयते वत्सः स्वयमेव । वा ग्रहणात् "मुमुक्षयते वत्सः स्वयमेवेत्यपि । अनाप्य इति किं? मुमुक्षति वत्सं देवदत्तः ।

घुमीमारभलभशकपतपदामिस् ॥ ४ । १ । ६० ॥

घुसंज्ञानां म्यादीनां चाचस्सकारादौ सनि परे इसादेशो भवति । एषामेकाच्च न द्विः । मीति मिञ्मीञ्मीङां ग्रहणम् । घु—दाण् प्रदित्सति दानम् । देङ् दित्सते पुत्रम् । डुदाञ् डुधाञ् दित्सति । दित्सते । धित्सति । धित्सते वस्त्रम् । दो दित्सति दण्डं । धेट् धित्सति स्तनम् । मिञ् मित्सति शतम् । मीञ् प्रमित्सति शत्रुम् । मीङ् मित्सते । मा इति मेङ्माङोर्ग्रहणम् । निमित्सते । न मातेरादादिकत्वात् मिमासति । अन्ये त्रयाणामाहुः मीत्सति । रभ् आरिप्सते । लभ् आलिप्सते । शक् शिक्षते । पत पित्सते । पद् प्रपित्सते । सीति किम् ? पपतिषति ।

राधेर्वधे ॥ ४ । १ । ६१ ॥

राधेर्वधे हिंसायामर्थे सकारादौ सनि परे अच इस् भवति न च द्विः । प्रतिरित्सति । अपरित्सति । अन्यत्र आरिरात्सति गुरुम् ।

लिटीडप्येत् ॥ ४ । १ । ६२ ॥

राधेर्धातोः वधेऽर्थे इटि इडादावपिति च लिटि परे अच एकारो भवति न च द्विः । रेधतुः । रेधुः । रेधिथ । अपरेधतुः । अपरेधुः । अपरेधिथ । लिटीति किम्? अपराराध्यते । इडपीति किम्? अपरराध । वधे इति किम्? आरराधतुः । आरराधिथ ।

त्रप्फलिभजत्रझट्क्वज्हादिददिशसिकृतस्याऽतोऽन्तर्हलोः ॥ ४ । १ । ६३ ॥

त्रप् फलि भज तृ इत्येतेषां यो ऽकारः यश्च झट्क्वज्हकारवकारादि ददि शसि कृतवर्जितस्य द्वयोरसहाययोर्हलोऽन्तरमध्ये वर्तते तस्यापीडादौ च लिटि परे एकारादेशो भवति। न च द्विः। त्रेपे। त्रेपाते। त्रेपिरे। फेलतुः। फेलुः। फेलिथ। फलीति फलनिष्पत्तौ। ञिफला विशरण इत्युभयोर्ग्रहणम्। भेजतुः। भेजुः। भेजिथ। तेरतुः। तेरुः। तेरिथ। एवं येमतुः रेणतुः लेभे। लेभाते। लेभिरे। नेमतुः। नेमुः। नेमिथ। पेचतुः पेचुः। पेचिथः। झट्क्वह्वादिपर्युदासः किम्? झहादि जझटतुः। जझटिथ। बभणतुः। बभणुः। बभणिथ। क्वादि चकणिथ। अजादि इयजिथ। ह्वादि जहसिथ। वादि ववणिथ। ददि ददे। शसि विशशसतुः। कृत विशशरतुः। अत इति किम्? दिदेविथ। ररासे। अन्तर्हलोरिति किम्? आटतुः। आटुः। हलोरिति द्वित्वनिर्देशादिह न भवति—ततक्षतुः। तत्सरतुः।

फणादिजॄत्रस्भ्रस्वमां वा ॥ ४ । १ । ६४ ॥

फणादीनां सप्तानां जॄ त्रस् भ्रम वम इत्येतेषां चातः इडादावपिति च लिटि परे एकारो वा भवति न च द्विः। फेणतुः। फेणुः फेणिथ। पफणतुः। पफणुः। पफणिथ। स्येमतुः। सस्यमतुः। स्वेनतुः सस्वनतुः। रेजतुः रराजतुः। भ्रेशे भ्रेशाते भ्रेशिरे। बभ्राशे बभ्राशाते बभ्राशिरे भ्लेशे बभ्लाशे। भ्रेजे बभ्राजे। जॄ जेरतुः जजरतुः। जेरुः जजरुः। त्रस् त्रेसतुः। तत्रसतुः। भ्रम भ्रेमतुः बभ्रमतुः। वम् वेमतुः ववमतुः।

श्रन्थग्रन्थोर्लुक् च ॥ ४ । १ । ६५ ॥

श्रन्थग्रन्थोरिडादावपिति च लिटि परे अत एकारो वा

भवति न द्विः । नकारस्य चानयोर्लुक् च भवति । श्रेथतुः श्रेथुः । श्रेथिथ । शश्रन्थतुः शश्रन्थुः शश्रन्थिथ । ग्रेथतुः ग्रेथुः ग्रेथिथ । जग्रन्थतुः जग्रन्थुः जग्रन्थिथ । इडपीति किम् ? शश्रन्थ । जग्रन्थ ॥

दन्भः ॥ ४ । १ । ६६ ॥

दन्भेरपिति लिटि परे अच् एकारो नित्यं भवति न च द्विः । नलुक् च । देभतुः देभुः ।

थे वा ॥ ४ । १ । ६७ ॥

थे परे दन्भेरच एकारो वा भवति न च द्विः । नलुक् च । देभिथ ददम्भिथ ।

घोर्हि ॥ ४ । १ । ६८ ॥

घुसंज्ञकस्य धातोः इकारादौ प्रत्यये परे हि इत्येतस्मिन् लेडादेशे परे अच एकारो भवति न च द्विः । देहि धेहि । हीति किम् ? दत्तात् । धत्तात् ।

देर्लिटीगिः ॥ ४ । १ । ६९ ॥

देः देङ् रक्षण इत्येतस्याच लिटि परे इगि इत्यादेशो भवति न च द्विः । अवदिग्ये । अवदिग्याते । अवदिग्यिरे ।

पिबस्येव्ङे ॥ ४ । १ । ७० ॥

पा पाने इत्यस्याचो ङे परतः ईप् इत्यादेशो भवति न च द्विः । अपीप्यत् अपीप्यताम् अपीप्यन् । शब्निर्देशः किम् ? अपापयत् । ङ इति किम् ? पाययति ।

हिहनोऽङे कुः पूर्वात् ॥ ४ । १ । ७१ ॥

ङवर्जिते प्रत्यये परे हि हनोर्धातोः द्विर्भावे पूर्वस्मात् परयोरादेः कुः कवर्गादेशो भवति । हि—प्रजिघाय प्रजि-

घीषति । प्रजेघीयते । प्रजेघेति । हन् जघनिथ । जघान । जिघांसति । जङ्घन्यते । जङ्घनीति । अङे इति किम् ? प्राजीहयत् । ङपर्युदासात् णिव्यवधानेऽपि भवति प्रजिघाययिषति ।

जेर्लिट्सनि ॥ ४ । १ । ७२ ॥

जि इत्येतस्य लिटि परे सनि च परे द्विर्भावे पूर्वस्मात्परस्य कुर्भवति । जिगाय जिग्यतुः जिग्युः । विजिग्ये । जिगिषति विजिगिषते । लिट्सनीति किम् ? जेजीयते । जिज्यतुः जिज्युरिति जिनातेर्जिरूपस्य लाक्षणिकत्वान्न भवति ।

चेर्वा ॥ ४ । १ । ७३ ॥

चिनोतेर्धातोः लिट्सनोः परतः द्विर्भावे पूर्वस्मात्परस्य कुर्वा भवति । चिकाय चिकीषति । चिचाय चिचीषति ।

संजेष्षिषण्षणि ॥ ४ । १ । ७४ ॥

सञ्जे सञ्ज संग इत्येतस्य ण्यन्तस्य षणि षत्वभूते सनि सति द्विर्भावे पूर्वात्परस्य षिर्वा भवति । सिसञ्जयिषति षिषञ्जयिषति ।

न स्विदिस्वदिसह्यणिस्तोः ॥ ४ । १ । ७५ ॥

स्विदि स्वदि सहि इत्येतेषां ण्यन्तस्तौतिवर्जितानां षणि सति द्विर्भावे पूर्वात्परस्य षिर्न भवति । सिस्वेदयिषति सिस्वादयिषति । सिसाहयिषति । सुसूषति । सिसिक्षति । अणिस्तोरिति किम् ? सिषेचयिषति तुष्टूषति । षणीति किम् ? सिषेच । षत्वं किम् ? सिषासति सुसुप्सति । नकारः किम् ? व्यतिसुषुषिषे । पूर्वादिति किम् ? प्रतीषिषति । षणा पूर्वविशेषणं किम् ? सुसोषुषिषते ।

पूर्वस्यास्वेऽचीयुव्योः ॥ ४ । १ । ७६ ॥

द्विर्भावे पूर्वस्य यो इवर्णोवर्णस्तयोरस्वेऽचि परे यथा-

संख्यं इयुवौ भवतः । इयर्ति इयृतः इयृति इयेष । उवोष अरियर्ति अरियरीति अर्यर्ति अर्यरीति । इत्येतेषां पूर्वस्य इति योरित्वस्य समानाधिकरणविशेषणम् । अस्व इति किम्? ईषतुः । ऊषतुः ।

आणुजश्रभ्रुषः ॥ ४ । १ । ७७ ॥

द्विर्भावे पूर्वो य ऋवर्णोऽच् यश्च ऋष् तेषां यथासंख्यमश्च अण् च जश् च भवति ॥ चकार, जहार, पपौ, निन्ये, लुलूषति, सिस्रीकिषते, तुत्रीकिषते, ॥ जश्–जिझकारीयिषति, बभार, डुढौकिषते, दधौ, ॥

द्युतेरिः ॥ ४ । १ । ७८ ॥

द्युतेर्द्विर्भावे यः पूर्वस्तस्य इकारो भवति ॥ व्यदिद्युतत, विदिद्युते, विदिद्युतिषते, विदिद्योतिषते, विदेद्युत्यते ॥

खरश्चर् ॥ ४ । १ । ७९ ॥

द्विर्भावे पूर्वस्य खरश्चर् भवति ॥ पफाण, पफणतुः, पफणुः, चिच्छेद, चिच्छिदतुः, टिठकारीयिषति, तिष्ठासति, ॥

ष्ठिवेष्टो वा ॥ ४ । १ । ८० ॥

ष्ठिवेर्धातोर्द्विर्भावे पूर्वस्य खरः टकारो वा भवति ॥ तिष्ठेव, टिष्ठेव, तेष्ठीव्यते, टेष्ठीव्यते ॥

लुक्खयि ॥ ४ । १ । ८१ ॥

द्विर्भावे पूर्वस्य खरः खयि परे लुग्भवत्यनादि लुचोऽपवादः । चुश्च्योतिषति, तिष्ठासति, पिस्पन्दिषते ॥ खयीति किम्? सस्नौ ॥

हलोऽनादेः ॥ ४ । १ । ८२ ॥

द्विर्भावे पूर्वस्यानादेर्हलो लुग्भवति ॥ जग्लौ, मम्लौ, पपाच, पपाठ, आट, आटतुः, आटुः, पापच्यते, पापठ्यते, डुढै-

क्षिषते, तुत्रौक्षिषते, अटाट्यते, अटिटिषति, उचिच्छिषति ॥

अच्याक् ॥ ४ । १ । ८३ ॥

अचि प्रत्यये द्विर्भावे पूर्वस्यागागमो भवति ॥ चराचरम् ॥

कुहोश्चुः ॥ ४ । १ । ८४ ॥

द्विर्भावे पूर्वस्य कुहोः कवर्गहकारयोः चुः चवर्गो भवति । कुः—चकार, चखान, जगाम, जघास, जिङ्कारीयिषति । ह ज-हौ जहास जिहीर्षति ॥

यङोकवतेः ॥ ४ । १ । ८५ ॥

यङन्तस्य द्विर्भावे पूर्वस्य कुहोः कवतिवर्जितस्य चुर्भवति ॥ चिक्रीयते ॥ जेह्रीयते ॥ अकवतेरिति किम्? उष्ट्रः कोकूयते । विकरणनिर्देशः कौतिकुवतिनिवृत्त्यर्थः । चेकूयते ॥ कवतिरव्यक्ते शब्दे कुवतिरार्तस्वरे कौतिः शब्दमात्रे । यङ्लुचि च न निषेधः चोकवीति ॥

ऐङमिदाहाकोः ॥ ४ । १ । ८६ ॥

यङन्तस्य द्विर्भावे पूर्वस्यामित अमिद्भाविनः आकारान्तहाकुवर्जितस्य चाकारः एङ्चादेशो भवति ॥ पापठ्यते । चेचीयते । बेभिद्यते । लेलूयते । बोभुज्यते । डोढौक्यते । तोत्रौक्यते ॥ पापच्यते पापचीति । बेभिदीति । लालवीति ॥ अमिदाहाकोरिति किम्? यंयम्यते । रंरभ्यते । जहाति । जहेति । अमिद् ग्रहणात् द्विर्भावे पूर्वविधौ बाधको न बाधकः तेन "अतोऽनुनासिकस्य मम्" इत्यनेन ऐङ् न बाध्यते । ऐङा "हलोऽनादेः" इति न बाध्यते ॥ अन्यथा बेभिद्यते इत्यादौ दकारादेरैङ् स्यात् । आकारविशेषणं किम्? जेह्रीयते ॥

वञ्चस्रन्सध्वंसभ्रन्शकस्पतपदिस्कन्दान्नीम् ॥ ४ । १ । ८७ ॥

वञ्चादीनां यङन्तानां द्विर्भावे पूर्वस्य नीमागमो भवति ॥

वनीवच्यते । वनीवञ्चीति । संनीस्रस्यते । सनीस्रंसीति । दनीध्वस्यते । दनीध्वंसीति । बनीभ्रश्यते । बनीभ्रंशीति । चनीकस्यते । चनीकसीति । पनीपत्यते । पनीपतीति । आपनीपद्यते आपनीपदीति । चनीस्कद्यते । चनीस्कन्दीति ॥

अतोऽनुनासिकस्य मम् ॥ ४ । १ । ८८ ॥

अकारात्परो योऽनुनासिकस्तदन्तस्य धातोर्यङन्तस्य द्विर्भावे पूर्वस्य मम् भवति । यंयम्यते । यंयमीति । रंरम्यते । रंरमीति । जंगम्यते । जंगमीति । बंभण्यते । बंभणीति । तंतन्यते । तन्तनीति । चञ्चलः । तंतयः ममव्यते । लादीनामनुनासिकत्वे चाचलः तातयः । मामव्यते ।

जब्जभदहदशभञ्जपसाम् ॥ ४ । १ । ८९ ॥

जपादीनां यङन्तानां द्विर्भावे पूर्वस्य मम् भवति । जंजप्यते । जंजभ्यते । दन्दह्यते । दंदश्यते । जञ्जपीति । जंजभीति । दन्दहीति । दन्दशीति । दशेति लुप्तनकारनिर्देशात् श्लुच्यपि नकारो न श्रूयत इति सिद्धम् । बंभज्यते बम्भजीति । पंपस्यते । पम्पसीति । पसिः सौत्रो धातुः ।

चर्फलाम् ॥ ४ । १ । ९० ॥

चर् गतिभक्षणयोः फल निष्पत्तौ ञिफला विशरणे इत्येतेषां यङन्तानां द्विर्भावे पूर्वस्य मम् भवति । चञ्चूर्यते । चञ्चुरीति । पंफुल्यते । पंफुलीति । धान्यं पुष्यते । बहुवचनं सानुबन्धकार्थम् । अन्यथा हि निरनुबन्धग्रहणे सति न सानुबन्धस्येति फलनिष्पत्तावित्यस्यैव स्यात् ।

तिचातोर्ल्युत् ४ । १ ९१ ॥

चर्फलां यङन्तानां रेफलकारपरस्याकारस्य ति च तकारादौ च प्रत्यये उकारादेशो भवति । चंचूर्यते । चंचुरीति । पंफुल्यते । पंफुलीति । चरणं चूर्तिः । ब्रह्मचूर्तिः । प्रफुल्तिः ।

प्रफुल्तः । प्रफुल्तवान् । प्रफुल्तमनसः । अत इति किम्? फालयतेः क्विपि ततः "कर्तुः क्विप् ।" यङ् पंफाल्यते पंफालीति । एकदेशविकृतत्वात्प्राप्तिः ।

रीमृत्वताम् ॥ ४ । १ । ८२ ॥

ऋकारवतो धातोर्यङन्तस्य द्विर्भावे पूर्वस्य रीमागमो भवति ॥ वृतूङ् वरीवृत्यते । वरीवृतीति ॥ वृधूङ् वरीवृध्यते वरीवृधीति । नृतै नरीनृत्यते । नरीनृतीति ॥ दृशृ दरीदृश्यते । दरीदृशीति । दृज् दरीदृज्यते । दरीदृजीति ॥ परीपृच्छ्यते । परीपृच्छीति । वरीवृश्च्यते । वरीवृश्चीति ॥ ऋत्वतामिति किम्? चेक्रीयते । जेह्रीयते । अत्र लित्वे द्विर्वचनम् ॥ बहुवचनं लाक्षणिकार्थम् ॥

रम् रिम् च श्लुचि ॥ ४ । १ । ८३ ॥

ऋत्वतो धातोर्यङि श्लुचि सत्यां द्विर्भावे पूर्वस्य रम्-रिमौ रीम् चागमा भवन्ति ॥ कृ चर्कर्ति चरिकर्ति-चरीकर्ति ॥ बर्भर्ति-बरिभर्ति-बरीभर्ति ॥ नर्नर्ति-नरिनर्ति-नरीनर्ति ॥ वर्वर्ति-वरिवर्ति-वरीवर्ति ॥ श्लुचीति किम्? नरीनृत्यते ॥ ऋतस्तकारात् कॄ चाकर्ति-गॄ जागर्ति-तॄ तातर्ति ॥

निजामेत् ॥ ४ । १ । ८४ ॥

निजादीनां श्लुचि ह्वादेः श्लुपि द्विर्भावे पूर्वस्यैकारो भवति ॥ नेनेक्ति-नेनिक्तः-नेनिजति ॥ वेवेक्ति-विवेष्टि ॥ श्लुपीति किम्? निनेज-निनिक्षति ॥ णिजृञ् विजृञ् विषृञ् इति त्रयो निजादयः ॥

पॄभृहाङ्माङामित् ॥ ४ । १ । ८५ ॥

पॄ ऋ भृ हाङ् माङ् इत्येतेषां श्लुचि श्लुपि विहिते

द्विर्भावे पूर्वस्य इकारो भवति ॥ पिपर्ति । इयर्ति । बिभर्ति । जिहीते मिमीते ॥ हाङिति ङकारात् ओहाको न भवति जहाति ॥ श्लुचीति किम् ? पपा पर्पर्ति-परिपर्ति-परीपर्ति ॥ यङन्तस्य द्विर्भावे श्लुचि न भवति ॥

सन्यतः ॥ ४ । १ । ८६ ॥

धातोः सनि परे द्विर्भावे पूर्वस्याकारस्य इकारो भवति ॥ पिपक्षति यियासति-प्रतीषिषति ॥ अत इति किम् ? लुलूषति पापचिषते ॥

ओः पुयञ्ज्ये ॥ ४ । १ । ८७ ॥

सनि परे द्विर्भावे पूर्वस्य उवर्णस्य पुयञ्ज्ञि पवर्गे यञि जकारे च ए अवर्णपरे इकारादेशो भवति ॥ पु । पूञ् पिपावयिषते । भू बिभावयिषते । मूङ् बन्धने मिमावयिषते ॥ यञ् । यु यियावयिषते । रु रिरावयिषते । लू लिलावयिषते । जः जुः सौत्रोधातुः । जिजावयिषति । असम्भवात् णिज्व्यवधाने भवति ॥ पुयञ्जीति किम् ? दुदावयिषते । नुनावयिषते । इदमेवेत्ववचनमाज्ञापकं णिनिमित्तादपि प्राग्द्विर्वचनमिति । अन्यथा पूर्वेणैव सिद्धम् । एतच्च पुयाञ्ज्ववदवर्णपर एव । अन्यथा अचिकीर्तदिति न सिद्ध्येत् ॥

श्रुस्रुद्रुप्रुप्लुच्योर्वा ॥ ४ । १ । ८८ ॥

श्रुवादीनां सनि परे द्विर्भावे पूर्वस्योवर्णस्य यञि ए अवर्णपरे इकारो भवति वा ॥ शिश्रावयिषति । शुश्रावयिषति । सिस्रावयिषति । सुस्रावयिषति । दिद्रावयिषति । दुद्रावयिषति । पिप्रावयिषति । पुप्रावयिषति । पिप्लावयिषति पुप्लावयिषति । चिच्यावयिषति । चुच्यावयिषति ॥ ए इति किम् ? सुस्रूषति ॥ ओरिति किम् ? सोस्रविषते ॥ इत्यादि ॥

स्वपेर्णावुः ॥ ४ । १ । ९९ ॥

स्वपेधातोर्णौ परे द्विर्भावे पूर्वस्य यञि उकारो भवति ॥ सुष्वापयिषते । असुष्वापयिषत् ॥ यञीति किम् ? चोषोपयिषति ॥

सन्वल्लघौ ङेऽनग्लुचि ॥ ४ । १ । १०० ॥

न विद्यतेऽको लुग्यस्मिन् तस्मिन् णौ ङेपरे द्विर्भावे पूर्वस्य लघौ धात्वक्षरे–सनि द्विर्भावे पूर्वस्य यथा तथा कार्यं भवति ॥ "सन्यतः" इतीत्वम् ! अचीकरत् । अजीहरत् ॥ "ओः पुञ्ज्ये" । इति अपीपवत् । अबीभवत् । अमीमवत् । अयीयवत् । अरीरवत् अलीलवत् । अजीजवत् । "स्रुवादि" विकल्पः अशिश्रवत् । अशुश्रवत् । असिस्रवत् । असुस्रवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत । अचिच्यवत् ॥ अचुच्यवत् लघाविति किम् ? अततक्षत् । अररक्षत् । अजजागरत् ॥ अचिक्षणत् । अचिक्रमत् । इत्यादौ हल्सङ्घात व्यवायेऽपि स्वादीनामत्ववचनाद्भवति ॥ णाविति किम् ? अचक्रमत् ॥ अनग्लुचीति किम् ? स्तनगदौ देवशब्दे कथादिः । अतस्तनत् । अजगदत् । दृशदमाख्यत्' अददृशत् ॥ वादनं प्रायुङ्क्त अवीवददिति णिजातेर्निमित्तत्वेनाश्रयणात् ततोऽन्यस्याको लुचि प्रतिषेध इति भवति ॥

लघोर्दीर्घोऽनजादेः ॥ ४ । १ । १०१ ॥

ङे परे ऽनग्लुचि णावनजादेर्धातोर्द्विर्भावे पूर्वस्य लघोर्लघौ धात्वक्षरे परे दीर्घो भवति ॥ अचीकरत् । अजीहरत् । अबूबुधत् । अबूभुजत् । लघोरिति किम् ? अचिक्षणत् । अचिक्रमत् । अजिग्रहत् । अबिभ्रमत् ॥ अनजादेरिति किम् ? प्रोर्णुनवत् । औरिरत् ॥ लघाविति किम् ? अततक्षत् ॥

स्मृदृस्तृत्वम्रदप्रथस्पशोऽत् ॥ ४ । १ । १०२ ॥

स्म्रादीनां धातूनां ङे परे ऽनग्लुचि णौ परतः द्विर्भावे पूर्वस्याकारादेशो भवति ॥ सन्वद्भावापवादः ॥ असस्मरत्-अददरत् ॥ अदिति तपरकरणात् अददरदित्यत्र "लघोर्दीर्घोऽनजादेः" इति दीर्घो न भवति ॥ असस्मरत् । अतत्वरत् । अमम्रदत् । अपप्रथत् । अपस्पशत् ॥

वेष्टिचेष्टो वा ॥ ४ । १ । १०३ ॥

वेष्टि चेष्टि इत्येतयोर्ङे परेऽनग्लुचि णौ द्विर्भावे पूर्वस्याकारादेशो भवति वा ॥ अववेष्टत्–अविवेष्टत्-॥ अचचेष्टत् अचिचेष्टत् ॥

गणश्चेः ॥ ४ । १ । १०४ ॥

गणयतेर्ङे परे द्विर्भावे पूर्वस्य ईकारो भवति वा ॥ अजीगणत् । अजगणत् ॥ चशब्दो वानुकर्षणार्थः ॥ चशब्दात् "भूरिदाक्षिण्यसंयुक्तं यत्वं सान्त्वमचीकथः" इत्येके ॥ अदन्तत्वाद्प्राप्तौ वचनम् ॥

लिट्यादादेरतः ॥ ४ । १ । १०५ ॥

लिटि धातोर्द्विर्भावे पूर्वस्यादेरकारस्याकारो भवति ॥ आटतुः । आटुः । आटिथ ॥ "एदे" इति लुको बाधनार्थम् वचनम् ॥

नक्चाश्नवृदाद्यनेकहलः ॥ ४ । १ । १०६ ॥

अशौङ् व्याप्तावित्यस्य ऋकारादेवानेकहलश्च धातोर्लिटि द्विर्भावे पूर्वस्यादेरकारस्य आकारो भवति ॥ नक्चास्यागमः ॥ अश्नु-आनशे । आनशाते । आनशिरे ॥ श्नुविकरणोपादानात् अश भोजन इत्यस्य न भवति ॥ आशतुः । आशुः ॥ ऋदादि

ऋधू आनृधतुः आनृधुः । ऋजि आनृजे । आनृजाते । आनृजिरे ॥ अनेकहलः आनर्च । आनर्चतुः-आनर्चुः ॥ आनर्छ आनर्छतुः-आनर्छुः ॥ एवं-आनङ्क । आनङ्ग । आनञ्ज ॥ अनेकग्रहणं किम् ? आट-आटतुः-आटुः ॥

भूव्यथोरदित् ॥ ४ । १ । १०७ ॥

भू व्यथ इत्येतयोर्लिटि द्विर्भावे पूर्वस्य यथासंख्यम् अत् इत् इत्येतावादेशौ भवतः ॥ बभूव-बभूवे देवदत्तेन । अनुबभूवे कम्बलो देवदत्तेन ॥ विव्यथे । विव्यथाते । विव्यथिरे ॥ केचित् "भवति व्यथोरदित्" इति निर्देशमिच्छन्ति । तत्र किं भवतीति कर्तृनिर्देशात्कर्तर्येव लिटि भुवोऽकारः न भावकर्मणोः बुभूवे देवेन । अनुबुभूवे कम्बलो देवदत्तेन ॥

इग्यजस्साचोर्य्याज्यम् ॥ ४ । १ । १०८ ॥

आज्यमित्याज्या इत्यतो यो निर्देक्ष्यते धातुस्तस्य लिटि द्विर्भावे पूर्वस्य साचः परेणाचा सहितस्यार्यरेफयकारपरस्य यजः स्थाने इगादेशो भवति । उवास-उवसिथ । उवाद उवदिथ । इयाज-इयजिथ । उवाप उवपिथ । उवाह-उवहिथ । उवाय-उवयिथ । संविव्याय-संविव्ययिथ । सुष्वाप-सुष्वपिथ । उवाच-उवचिथ । उवाश उवशिथ । विव्याच-विव्यचिथ । विव्याध-विव्यधिथ । जिज्यौ-जिज्यिथ । अर्योदिति किम् ? विव्याय-विव्याच विव्याध । वकारस्य मा भूत् । अर्यीति वचनात् "हलोऽनादेः" लुग्बाधया यज इग् ग्रहणम् ॥ यग्रहणमुत्तरार्थम् ॥ आज्यमिति किम् ? सस्याम-सस्यमतुः ॥

न वः ॥ ४ । १ । १०९ ॥

द्विर्भावे पूर्वस्य इति निवृत्तम् ॥ वः वेरिजादेशस्य वयो यो यज् लिटि परे तस्य इगादेशो न भवति ॥ "ज्ये च" इति

वयो वप्राप्त्यर्थं वचनमुत्तरार्थं च ॥ उवाय ऊयतुः-ऊयुः ॥

वा । ४ । १ । ११० ॥

वेञादेशस्य वयो यो यञ् लिटि परे तस्य इगादेशो न भवति वा ।। ऊयतुः ऊयुः । ऊवतुः—ऊवुः ॥

ण्ये च ॥ ४ । १ । १११ ॥

वेञ्धातोः ण्ये च लिटि च परे यञ इग् न भवति ।। प्रवाय उपवाय ववौ । ववतुः । ववुः ॥

ज्यः ॥ ४ । १ । ११२ ॥

ज्या इत्येतस्य ण्ये च परे इग् न भवति । प्रज्याय । उपज्याय ॥

व्यः ॥ ४ । १ । ११३ ॥

व्येञःण्ये च परे यञः इग् न भवति । प्रव्याय उपव्याय योगविभाग उत्तरार्थः ।

परेर्वा ॥ ४ । १ । ११४ ॥

परेः परस्य व्यः ण्ये च परे यञ इगादेशो वा भवति । परिव्याय । परीवीय ।

श्व्यादिष्ठ्यवचः क्किति ॥ ४ । १ । ११५ ॥

इग्यञः साचोर्य्यीति वर्तते । श्व्यादीनां ष्ठ्यवचि इत्येतयोश्च क्किति प्रत्यये साचः अर्य्यंपरस्य यञ इगादेशो भवति । श्व्यादि—शूनः, शूनवान् । उषितः, उषितवान् । उदितः उदितवान् । इष्टः इष्टवान् । उप्तः उप्तवान् । ऊढः ऊढवान् । उतः उतवान् । संवीतः संवीतवान् । हूतः हूतवान् । स्वप् सुप्तः सुप्तवान् । वच्—वच परिभाषणे ब्रुवो वचि उक्तः उक्तवान् । क्कितीति किम् ? श्वयिता यायज्यते । अर्य्यीति किम् ? संवीतः । वकारस्य मा भूत ।

वशिव्यचिव्यधिज्याग्रहिव्रश्चिप्रच्छिभ्रज्जां-क्ङिति ॥ ४ । १ । ११६ ॥

वश्यादीनां धातूनां क्ङिति ङिति च प्रत्यये परे साचः अय्यंपरस्य यञ इगादेशो भवति । वशि उष्टः उशन्ति, उशितः उशितवान् । व्यचि-विचति, वेविच्यते, विचितः, विचितवान् । व्यधि, विध्यति, वेविध्यते, विद्धः, विद्धवान् । ज्या जिनाति, जेजीयते, जीनः, जीनवान् । ग्रहि गृह्णाति, जरीगृह्यते, गृहीतः गृहीतवान् । व्रश्चि, वृश्चति । वरीव्रश्च्यते व्रक्णः । वृक्णवान् । प्रच्छि पृच्छति, परीपृच्छ्यते, पृष्टः, पृष्टवान् । भ्रज्ज: भृज्जति, बरीभृज्जते, बरीभृज्यते भृष्टः भृष्टवान् । अर्यीति किम् ? विद्यति वृश्चति ।

स्वापेर्ङे ॥ ४ । १ । ११७ ॥

स्वापित्येतस्य ण्यन्तस्य ङे प्रत्यये परे साचो यञ इग् भवति । स्वपेर्णौ असूषुपत्, असूषुपताम् असूषुपन् । स्वाप इति घञन्तात्णौ असुषुपत् असुषुपताम्, असुषुपन् । ङ इति किम् ? स्वाप्यते, । सोसुप्यते ।

वशो न यङि ॥ ४ । १ । ११८ ॥

वशेर्धातोः यङि परे यञ इग्न भवति । वावश्यते ।

स्वप्स्यमः ॥ ४ । १ । ११९ ॥

यङिति वर्तते । न नेति । स्वप्स्यास्यम इत्येतेषां यङि प्रत्यये परे साचो यञ इग् भवति । सोषुप्यते, सम्वेवीयते, सेसिम्यते ।

चायः की ॥ ४ । १ । १२० ॥

चायृञ् इत्येतस्य धातोः यङि की इत्येवमादेशो भवति । चेकीयते । कीति दीर्घात् यङश्लुचि चेकितः ।

द्व्युक्तौ ह्वः ॥ ४ । १ । १२१ ॥

द्वे उक्ती अस्मिन्निति द्व्युक्तिस्तस्मिन् द्विर्वचननिमित्त् प्रत्यये विषयभूते ह्वः ह्वा इत्येतस्य धातोः साचो यज इगे भवति । जुहाव जुहुवतु जुहुवुः जुहूषति । जोहूयते ।

णौ सन्ङे ॥ ४ । १ । १२२ ॥

सन्परे ङेपरे च णौ ह्व धातोः साचो यज इग् भवति ॥ जुहावयिषति, अजूहवत् ॥ सन्ङ इति किम् ? ह्वाययति ॥ णावित्युत्तरार्थं वचनम् ॥

श्वेर्वा ॥ ४ । १ । १२३ ॥

श्विइत्येतस्य धातोः सन्परे ङपरे च णौ साचो यज इग्वा भवति ॥ शुशावयिषति, शिश्वायिषति, अशूशवत्, अशि-श्वियत् ॥

लिड्यङि ॥ ४ । १ । १२४ ॥

श्वेर्धातोः लिटि यङि च परे साचो यज इग्वा भवति ॥ शुशाव, शिश्वाय, शुशविथ, शिश्वयिथ, शुशुवतुः शिश्वियतुः शुशुवुः, शिश्वियुः, शोशूयते, शेश्वीयते ॥

न ॥ ४ । १ । १२५ ॥

श्वेर्धातोः लिड्यङोः परतः साचो यज इग् न भवति ॥ शिश्वियतुः, शिश्वाय, शिश्वयिथ ॥ विकल्पः पिति सावकाश इत्यपिति परत्वात् किद्भावेन नित्यमेवेक्स्यात् पूर्वस्य च इति प्रतिषेधः ॥

प्यायः ॥ ४ । १ । १२६ ॥

प्याय इत्यस्य धातोर्लिड्यङोः परतः साचो यज इग् भवति ॥ आपिप्ये, आपिप्याते, आपिप्यिरे । आपेपीयते ॥ आकारेण सह परस्य यस्येकि कृते पूर्वस्येक् ॥

क्तयोरनुपसर्गस्य ॥ ४ । १ । १२७ ॥

अनुपसर्गस्य प्यायः क्तयोः क्तक्तवत्वोः प्रत्यययोः परतः साचो यञ इग् भवति ॥ पीनं मुखम् । पीनवत् मुखम् । पीने अंसे । पीनवति अंसे । पीनोऽन्धुः । पीनवानन्धुः । पीनमूधः । पीनवदूधः ॥ अनुपसर्गस्येति किम् ? प्रप्यानमूधः ।

आङोन्धूधसोः ॥ ४ । १ । १२८ ॥

आङ एव परस्य प्यायः क्तयोरन्धूधसोरभिधेययोः साचो यञ इग् भवति ।। आपीनोऽन्धुः, आपीनमूधः । आपीनवानन्धुः, आपीनवदूधः ॥ आङ इति किम् ? प्राप्यानमूधः । अन्यत्र आप्यानश्चन्द्रमाः । अन्धुर्व्रणम् ॥

स्फायः ॥ ४ । १ । १२९ ॥

स्फायैङित्यस्य धातोः क्तयोः साचः पूर्वणाचः यञ इग् भवति ।। स्फीतः, स्फीतवान् । संस्फीतः, संस्फीतवान् । क्तयोरिति किम् ? स्फातिः ।।

स्त्यः प्रपूर्वस्य ॥ ४ । १ । १३० ॥

प्रपूर्वः यःस्त्या इति धातुस्तस्य क्तयोः साचो यञ इग् भवति। प्रस्तीतः, प्रस्तीतवान्, प्रस्तीमः, प्रस्तीमवान् ॥ प्रपूर्वस्येति किम्? संस्त्यानः, संस्त्यानवान्। प्रस्त्य इत्यनुक्त्वा पूप्रवंग्रहणमधिकपूर्वनिवृत्यर्थं, संप्रस्त्यानः, संप्रस्त्यानवान्। अन्यत्राधिकपूर्वस्याप्यभिनिविशते। केषाञ्चित्प्रपूर्वस्य धातूपसर्गसमुदायस्य योऽवयवः स्त्या इति तस्य क्तयोर्यञ इग् भवति। प्रसंस्तीतः प्रसंस्तीतवान् ।।

द्रवमूर्तौ श्यः ॥ ४ । १ । १३१ ॥

द्रवस्य मूर्तिः काठिन्यं द्रवमूर्तिः । द्रवमूर्तौ वर्तमानस्य श्यैङो धातोः क्तयोः साचो यञ इग् भवति ॥ शीनं शीनवत्

घृतम् । शीनं शीनवत् मेदः । शीना शीनवती वसा द्रवावस्थायाः काठिन्यं गतमित्यर्थः ॥ अन्यत्र संश्यानो वृश्चिकः शीतेन । शीतं वर्तते, शीतो वायुरिति "शीतोष्णतृप्रादिति निपातनात्सिद्धम् ॥"

प्रतेः ॥ ४ । १ । १३२ ॥

प्रतेः परस्य श्यैङः क्तयोः साचो यञ इग् भवति । प्रतिशीनः । प्रतिशीनवान् । अद्रवमूर्त्यर्थ आरम्भः ।

वाऽभ्यवपूर्वस्य ॥ ४ । १ । १३३ ॥

अभि अव इत्येवं पूर्वस्य श्यः क्तयोः परतः साचो यञ इग् भवति वा । अभिशीनः अभिशीनवान्, अभिश्यानः अभिश्यानवान् । अवशीनः अवशीनवान्, अवश्यानः अवश्यानवान् । द्रवमूर्तावपि परत्वादयमेव विकल्पः । अवशीनं घृतमवश्यानम् । अभ्यवपूर्वस्येति किम्? संश्यानः संश्यानवान् । पूर्वग्रहणं किम्? समभिश्यानः । समवश्यानः ॥ अभिसंशीनः अभिसंशीनवान्, अभिसंश्यानः अभिसंश्यानवान् । अवसंशीनः अवसंशीनवान्, अवसंश्यानः अवसंश्यानवान् । इत्यपरे ॥

शृतं पक्वे हविःक्षीरे ॥ ४ । १ १३४ ॥

पक्वशब्देनैकिकृतोऽर्थः पक्वः, पचेः कर्म कर्ता कर्म च श्रा इत्येतस्य श्रपयतेश्च प्रथमण्यन्तस्य क्ते शृभावो निपात्यते योऽसौ पक्वार्थः स चेत् हविः क्षीरं वा भवति ॥ श्रा इति हि कर्मकर्तृविषयमाह -श्रपिः प्रथमण्यन्तः कर्तृविषयम् । शृतं हविः क्षीरं वा स्वयमेव । शृतं हविः शृतं क्षीरं देवदत्तेन ॥ पक्व इति किम्? श्रपितं हविः क्षीरं वा देवदत्तेन, जिनदत्तेन, पाचितमित्यर्थः । द्वितीयण्यन्तात् क्तः अन्यत्र श्राणा श्रपिता यवागूः ॥

दीर्घोऽचोऽवः ॥ ४ । १ । १३५ ॥

अजन्तस्य वेञ्वर्जितस्य धातोः साचो यञ इक् प्रत्यये

परे दीर्घो भवति॥ जीनः । संवीतः । हूनः । शूनः॥ अच इति किम्? सुप्तः । उप्तः ॥ अव इति किम्? उतः । उतवान् । निरुतं दुरुतम् ॥

क्विजलि क्ङित्यनुनासिके ॥ ४ । १ । १३६ ॥

क्वौ किति ङिति च जलादौ प्रत्यये परे योऽनुनासिकस्तस्मिन् परे योऽच्धातुस्तस्य दीर्घो भवति ॥ प्रशान्, प्रतान्, प्रदान्, प्रतामौ, प्रतामः, प्रदामौ, प्रदामः, प्रतान्भिः, प्रदान्भिः । प्रशानिति स्वरादिः ॥ जलिकिति शान्तः, शान्तवान्, शान्त्वा, शान्तिः, तान्तः, दान्तः, ङिति—शंशान्तः, तन्तान्तः दन्दान्तः । किति ङिति किम्? यन्ता, रन्ता ॥

सनि ॥ ४ । १ । १३७ ॥

अजन्तस्य धातोः जलादौ सनि परे दीर्घो भवति ॥ चिचीषति, तुष्टूषति, चिकीर्षति ॥ अज इति किम्? रिरंसते ॥

इङनः ॥ ४ । १ । १३८ ॥

एः इणिगिङादेशस्य गमेः हन्तेश्चाचो जलादौ सनि परे दीर्घो भवति ॥ संजिगांस्यते, अधिजिगांस्यते, माता । अधिजिगांसते, जिघांसति । इ इति गमिग्रहणात् गच्छतेर्न भवति । संजिगंसते वत्सो मात्रा ॥ जलीति किम्? जिगमिषति, अधिजिगमिषति ॥

तनो वा ॥ ४ । १ । १३९ ॥

तनूञ् विस्तारे इत्यस्य धातोर्योऽच् तस्य जलादौ सनि परे दीर्घो वा भवति ॥ संतितांसति, संतितंसति ॥ जलीति किम्? संतितनिषति ॥ यङ्लुचः तंतनिषति ॥

क्रमस्त्वि ॥ ४ । १ । १४० ॥

क्रमेर्धातोरचः जलादौ क्त्वाप्रत्यये परे दीर्घो वा भवति ॥ क्रान्त्वा, क्रन्त्वा । जलीति किम्? क्रमित्वा, प्रक्रम्य ॥

शूठ्वोऽनुनासिके च ॥ ४ । १ । १४१ ॥

धातोः छकारवकारयोरनुनासिकादौ क्विपि जलादौ च प्रत्यये यथासंख्यं श ऊच् इत्यादेशौ भवतः । प्रश्नः । विश्नः, शब्दप्राशौ, शब्दप्राशः, गोविट्, गोविशौ, गोविशः, प्रष्टा, प्रष्टुम्, प्रष्टव्यम्, पृष्टः, पृष्टवान्, पृष्ट्वा, । ऊच् अक्षद्यूः, हिरण्यष्ठ्यूः, स्यूतः, स्यूतवान्, स्यूत्वा. स्यूतिः, स्यूमः, स्यूनः, सुस्योमा । वनिक्वनिपोर्वकारस्यानुनासिकत्वे सुस्योवा, सुस्यूवा । धातोरिति किम्? द्युभ्याम्, द्युभिः । इह केषाञ्चिज्जलिक्वीत्यनुवर्तते । तेषां दिवेर्यङ्लुचि देदेति, देदेषि । येषां नानुवर्तते तेषां देद्योति, देद्योषि ।

त्वर्ज्वर्मव्यविस्त्रिवोऽचश्च ॥ ४ । १ । १४२ ॥

त्वर् ज्वर् मवि अवि स्त्रिव इत्येतेषामचो वकारस्य चानुनासिके क्वौ जलि च प्रत्यये ऊजादेशो भवति । त्वर् तूः, तूरौ, तूरः, तूर्तिः, तूर्णः, तूर्णवान्, तातूर्ति । ज्वरः—जूः, जूरौ जूरः, जूर्तिः, जाजूर्ति । मवि मूः मुवौ मुवः मूतिःमामोति । अवि ऊः उवौ उवः ऊतिः ओतुः । स्त्रिव् सुस्त्रोमा स्त्रूः । स्त्रुवौ स्त्रुवःस्त्रूतः स्त्रूतवान् स्त्रूत्वा स्त्रूतिः ।

राल्लुक् ॥ ४ । १ । १४३ ॥

रात्परयोर्धातोः छकारवकारयोरनुनासिके क्वौ जलि च लुक्लोपो भवति । शूचोऽपवादः । हुर्च्छा—हूःहुरौ हुरः हूर्णः हूर्णवान् हूर्तिः । मूर्च्छा मूः मुरौ मुरःमूर्तिः । तूर्वै–तूः तुरौ तुरः तूर्णः तूर्णवान् तूर्तिः । धुर्वै—धूः धुरौ धुरः धूर्णः धूर्णवान् धूर्तिः ।

गाङ्कुटां ङिद्वदञ्णि ॥ ४ । १ । १४४ ॥

गाङित्येतस्य कुटादीनां च धातूनां अञ्णित प्रत्यये परे ङिद्वत् ङितीव कार्यं भवति । गाङः अध्यगीष्ट अध्यगीषाताम्, अध्यगीषत । कुटां—कुटिता, कुटितुम्, कुटितव्यम्,

कुटित्वा । घुटिता, घुटितुम् । घुटितव्यम्, घुटित्वा । गाङिति । ङकारात् कै गै शब्दे इत्यस्य गाता गातुमिति भवति । गाङ्गतावित्यस्य त्वनभिधानादग्रहणम् । तस्यापीत्येके । अञ्णीति किम् ? उत्कोटः । उत्कोटकः ।

इटि विजः ॥ ४ । १ । १४५ ॥

विजेर्धातोरिडादौ प्रत्यये ङित्कार्यं भवति । उद्विजिता उद्विजितुम् । उद्विजितव्यम् । इटीति किम् ? उद्वेगः । उद्वेजनीयः ।

वोर्णोः ॥ ४ । १ । १४६ ॥

ऊर्णोरिडादौ प्रत्यये ङित्कार्यं भवति वा ॥ प्रोर्णुविता । प्रोर्णुवितुम् । प्रोर्णुवितव्यम् । प्रोर्णविता प्रोर्णवितव्यम् ॥

शल्यबलौ ॥ ४ । १ । १४७ ॥

श इति शकारावयवकः शित् । एवं प् इति पित् । लौलिङ्लिटोर्ग्रहणम् । धातोर्विहिते प्रत्यये शिति लादेशे चापित्यपरे ङितीव पूर्वस्य कार्यं भवति । चिनुते । विध्यति । वृश्चति गृह्णाति । जागृहि । कुरुतः । हतः । कुर्वन्ति । घ्नन्ति । शिदिति किम्? कर्ता कर्तुम् । अबलाविति किम् ? जागर्ति । हन्ति । करोति । करोषि करोमि । लौ लिङि चेषीष्ट वलिषीष्ट । लिटि—सस्रंसे दध्वंसे इत्यादौ ङित्वादयाथासंख्यम् ॥

किद्वल्लिटीन्धेश्चासंयोगात् ॥ ४ । १ । १४८ ॥

इन्धेरन्यस्माच्च धातोरसंयोगादपिति लिटि किद्वत्किलीव कार्यं भवति । समीधे । समीधाते । समीधिरे । निन्यतुः निन्युः । बिभिदतुः । बिभिदुः । चक्रतुः । चक्रुः । ववृते । ववृधे । ईषतुः ईषुः सुषुपतुः सुषुपुः । असंयोगादिति किम् ? सस्रंसे दध्वंसे । अपिति किम् ? निनाय निनयिथ । बिभेद बिभेदिथ । इयाज इयजिथ । ङिद्वदिति प्रकृतेः किद्वद्वचन यादीति यज

स्वगर्थं जागृतेरगर्थं च ङिति हि तन्न भवति । स्वपिता स्वपन्ति जागृत: । जाग्रति ।

स्वञ्जेर्वा ॥ ४ । १ । १४८ ॥

स्वञ्जेर्लिटि परे किद्वत्कार्यं वा भवति । परिषस्वजे । परिषस्वञ्जे ।

नशजस्ति त्वि न्युपान्त्ये ॥ ४ । १ । १५० ॥

नश: जान्ताच्च धातोर्नकार उपान्त्ये सति तकारादौ क्त्वाप्रत्यये परे किद्वत्कार्यं वा भवति । नष्ट्वा नंष्ट्वा । रक्त्वा रंक्त्वा भक्त्वा भंक्त्वा । मक्त्वा मंक्त्वा । तीति किम् ? विभज्य प्रसज्य । परिष्वज्य । न्युपान्त्य इति किम् ? भुक्त्वा । इष्ट्वा । भृष्ट्वा ।

थफवञ्चिलुञ्च्यृतितृषिमृषिकृश इटि ॥ ४ । १ । १५१ ॥

न्युपान्त्ये सति थका फकारान्तयो: वञ्च्यादीनां च इडादौ क्त्वाप्रत्यये किद्वत्कार्यं वा भवति । त्वीतिनिषेधे विकल्प: । श्रथित्वा श्रन्थित्वा । ग्रथित्वा ग्रन्थित्वा गुफित्वा गुम्फित्वा । वचित्वा वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतित्वा अर्तित्वा । तृषित्वा तर्षित्वा । मृषित्वा मर्षित्वा । कृशित्वा कर्शित्वा न्युपान्त्य इति किम् ? कोथित्वा रेफित्वा । इटीति किम् ? वक्त्वा मृष्ट्वा । वञ्चिमृषिविकल्पते टौ ऊदित्वात् ।

यौ हलादेरल:संस्त्वो: ॥ ४ । १ । १५२ ॥

यौ इकारे उकारे चोपान्त्ये सति रलन्तस्य हलादेर्धातोरिडादौ सनि क्त्वायां च प्रत्यये किद्वत्कार्यं वा भवति । लिलिखिषति लिलेखिषति । लिखित्वा । लेखित्वा दिद्युतिषते दिद्योतिषते । द्युतित्वा द्योतित्वा । यावति किम् ? विवर्तिषते वर्तित्वा । हलादेरिति किम् ? एषिषिषति । एषित्वा । रल इति किम् ? दिदेविषति देवित्वा । इटीति किम् ? बुभुक्षते भुक्त्वा ।

उति शपः क्त्वोर्भावारम्भे ॥ ४ । १ । १५३ ।

शपवान् शपथः श्लेले शपमुत्पादयति तस्य धातोरुति उपकारोपान्त्ये सति भावे आरम्भे आदिकर्मणि च इडाद्योः क्तयोः क्तक्तवत्वोः कित्कार्यं वा भवति । कुचशब्दे तारे कुचितमनेन कोचितमनेन । प्रकुचितः प्रकुचितवान् । प्रकोचितः प्रकोचितवान् । द्युति दीप्तौ, द्युतितमनेन द्योतितमनेन । प्रद्युतितः प्रद्योतितः । लुटितमनेन प्रलुटितः । लोटितमनेन । प्रलोटितः । रुदितमनेन रोदितमनेन । प्ररुदितः प्ररोदितः । प्ररोदितवान् प्ररुदितवान् । उतीति किम् ? श्विलितमनेन प्रश्विलितः । शप इति किम् ? गुधितमनेन प्रगुधितः । भावारम्भे इति किम् ? रुचितः कार्षापणः इटीति किम् ? रूढमनेन प्ररूढः, प्ररूढवान् ।

शीङ्डीङ्पूङ्स्विद्मिदिक्ष्विद्धृषो न ॥ ४ । १ । १५४ ॥

शीङादीनामिडाद्योः क्तयोः कित् कार्यं न भवति । शयितः, शयितवान् । डयितः डयितवान् । पवितः, पवितवान् । प्रस्वेदितः, प्रस्वेदितवान् । प्रमेदितः प्रमेदितवान् । प्रक्ष्वेदितः प्रक्ष्वेदितवान् । धर्षितः धर्षितवान् । शीङ्डीङ्पूङामनुबन्धोच्चारणं यङ्लुग्निवृत्त्यर्थम् । शेश्यितः शेश्यितवान् । डेड्यितः डेड्यितवान् । पोपुवितः । पोपुवितवान् । इटीत्येव पूतः पूतवान । स्विन्नः स्विन्नवान् ।

मृषः क्षान्तौ ॥ ४ । १ । १५५ ॥

मृष इत्येतस्य क्षान्तौ वर्तमानस्य इटि क्तयोः कित्कार्यं न भवति । मर्षितः, मर्षितवान् । क्षान्ताविति किम् ? अपमृषितं वाक्यमाह । उपश्लिष्टमित्यर्थः । इटीति किम् ? मृष्टः मृष्टवान् ।

त्वि ॥ ४ । १ । १५६ ॥

इडादौ क्त्वाप्रत्यये कित्कार्यं न भवति । देवित्वा सेवित्वा वर्तित्वा वर्धित्वा स्रंसित्वा ध्वंसित्वा व्रश्चित्वा । इटीत्येव कृत्वा हृत्वा दृष्ट्वा शान्त्वा ।

स्कन्दस्यन्दः ॥ ४ । १ । १५७ ॥

स्कन्दस्यन्दोर्धातोः क्त्वाप्रत्यये कित्कार्यं न भवति । स्कन्त्वा । स्यन्त्वा । त्वीति तकारप्रश्लेषात्तकारादावेवायं प्रतिषेधस्तेन प्रस्कद्य प्रस्यद्य । इत्येके । अन्ये अवस्कन्द्य अवस्यन्द्य । इत्यप्युदाहरन्ति ।

मृडमृद्गुधकुषक्लिशवदवसः ॥ ४ । १ । १५८ ॥

नेति निवृत्तम् । मृडादीनां क्त्वाप्रत्यये कित्कार्यं भवति । मृडित्वा, मृदित्वा, गुधित्वा, कुषित्वा, क्लिशित्वा, उदित्वा, उषित्वा "त्वीति" प्रतिषेधे "यौ हलादेरलः संस्त्वोः" इति विकल्पे च प्राप्ते वचनम् ।

रुद्विन्मुषिग्रहिस्वप्प्रच्छां सनि च ॥ ४ । १ ।१५९ ॥

इटीति निवृत्तम् । रुधादीनां सनि सकारात् क्त्वाप्रत्यये च किद्वत्कार्यं भवति । रुदित्वा रुरुदिषति । विदित्वा विविदिषति । मुषित्वा मुमुषिषति । गृहीत्वा जिघृक्षति ! रुद्विद्मुषीणां त्विविकल्पे, ग्रहेः प्रतिषेधे च प्राप्ते वचनम् । सुषुप्सति पिपृच्छिषति । स्वपिपृच्छेः सनर्थमेव क्त्वा हितयोः किदेव अनिष्टम्[1] ।

सीकः ॥ ४ । १ । १६० ॥

इगन्तस्य धातोः सकारादौ सनि परे कित्कार्यं भवति । चिचीषति । निनीषति । तुष्टूर्षति । चुकूषते । चिकीर्षति । जिहीर्षते । तितीर्षति । सीति किम् ? शिशयिषते ।

---

१ अनिट्त्वादित्यपि पुस्तकान्तरे पाठः

हलि ॥ ४ । १ । १६१ ॥

सकारो सनि परे यो हल् तस्मिन्परे य इक् तस्य किद्वत्कार्यं भवति । बिभित्सति । बुभुत्सते विवृत्सति । सीति किम्? विवर्तिषते । इक इति किम् ? यियक्षति । विवत्सति ।

सि लौ तङि ॥ ४ । १ । १६२ ॥

तङि परे सकारादौ सिप्रत्यये सकारादौ लौ लिटि किद्वद्भावस्य सिद्धत्वात्, लीति लिङो ग्रहणम् । लङि च परे यो हल् तस्मिन् परे य इक्तस्य कित्कार्यं भवति ॥ अभित्त । अबुद्ध । असृष्ट । भित्सीष्ट । भुत्सीष्ट । सृक्षीष्ट ॥ तङीति किम् ? अस्राक्षीत् । अद्राक्षीत् ॥ सीति किम् ? अवर्तिष्ट । वर्तिषीष्ट ॥ इक इति किम् ? अयष्ट । यक्षीष्ट ॥ हलीति किम् ? अचेष्ट । चेषीष्ट ॥

उः ॥ ४ । १ । ४६३ ॥

ऋवर्णान्तस्य धातोस्तङि सकारादौ सि लौ परे किद्वत्कार्यं भवति । अकृत । अहृत कृषीष्ट । हृषीष्ट । आस्तीर्ष्ट । न्यमूर्ष्ट । आस्तीर्षीष्ट । न्यमूर्षीष्ट । सीति किम्? आकारिषाताम् । कारिषीष्ट । अवरिष्ट । वरीषीष्ट ॥

गमो वा ॥ ४ । १ । १६४ ॥

गमेर्धातोस्तङि सकारादौ सि लौ परे किद्वत्कार्यं वा भवति । समगत । समगंस्त देवदत्तः । आगसाताम् । आगंसाताम् ग्रामौ देवदत्तेन । संगसीष्ट । संगंसीष्ट ॥

यमस्सौ विवाहे ॥ ४ । १ । १६५ ॥

यमः विवाहे दारकर्मणि वर्तमानस्य तङि सकारादौ सिप्रत्यये किद्वत्कार्यं वा भवति । उपायत । उपायंस्त कन्याम् । साविति किम्? उपयंसीष्ट कन्याम् । अन्यत्र आयं-

स्त पादौ । आयंस्त कूपाद्रज्जुम् ॥

गन्धने ॥ ४ । १ । १६६ ॥

वेति निवृत्तम् । गन्धनं सूचनम् । तस्मिन् वर्तमानस्य यमेस्तङि सकारादौ सिप्रत्यये किद्वत्कार्यं भवति । उदायत । उदायसाताम् । उदायसत । सूचितवानित्यर्थः ॥

हनः ॥ ४ । १ । १६७ ॥

हनोर्धातोस्तङि सकारादौ सिप्रत्यये किद्वत्कार्यं भवति । आहत, आहसाताम्, आहसत ॥

घुस्थोरि च ॥ ४ १६८ ॥

घुसंज्ञकस्य स्था इत्यस्य च धातोस्तङि सकारादौ सिप्रत्यये इकारादेशो भवति । किद्वच्च । घु–दाण्, व्यत्यदित अदिषातां वस्त्रे । देङ् अदित पुत्रम् । डुदाञ् अदित दानम् । दो व्यत्यदित । अदिषाताम् दंडौ । धेट् व्यत्यधित । अधिषाताम् स्तनौ । डुधाञ् अधित भारम् । स्था प्रास्थित प्रास्थिषाताम् प्रास्थिषत । घुस्थोरिति किम्? दावदैवोः व्यत्यदास्त अदासाताम् अदासत । तङीति किम्? अधासीत् स्तनम् । सीति किम्? अदायिषाताम् ॥

अन्त्योपान्त्यर्तामिर् ॥ ४ । १ । १६९ ॥

धातोरन्त्यस्योपान्त्यस्य च ऋकारस्य प्रत्यये इरादेशो भवति। किरति । गिरति । तीर्णम् । आस्तीर्णम्। चिकीर्षति जिहीर्षति । उपान्त्यस्य कीर्तयति । कीर्तयतः । कीर्तयन्ति । अन्त्योपान्त्यग्रहणं किम्? ऋकारीयति । बहुवचनं लाक्षणिकार्थम् ॥

पुवादुर् ॥ ४ । १ । १७० ॥

पवर्गाद्वकाराच्च धात्ववयवात् परस्य अन्त्योपान्तस्य ऋकारस्य उरादेशो भवति ॥ इरोऽपवादः । पूर्तः पूर्तवान् पोपुरति बुभूर्षति । मुमूर्षति । प्रावुवूर्षति कंबलम् । परिपूर्णः ।

परिभूर्णः ! आस्तरणं आस्तारकः । निपरणम् निपारकः । इत्यत्र अङ्कृति परत्वादर् ॥

क्तेऽनिट्चजः कुघिंति ॥ ४ । १ । १७१ ॥

क्तेऽनिटो धातोश्चजान्तस्य कवर्गादेशो भवति घिति प्रत्यये परे । पाकः । योगः । पाक्यं । योग्यम् । क्तेऽनिटो ग्रहणं किम् ? संकोचः, कूजः, गर्जः, उदाजः, समाजः, शोच्यम् ॥

वाक्यार्घनिदाघावदाघं नाम्नि ॥ ४ । १ । १७२ ॥

वाक्यादयः शब्दाः कृतकुत्वाः नाम्नि निपात्यन्ते । वाक्यम् । अधिवाक्यम् । अर्घः अर्हतेर्घञ् । निदाघः । अवदाघः, न्यवपूर्वाद्दहेर्घञ् । नाम्नीति किम् ? वाच्यं, अधिवाच्यम् अर्हः निदाहः अवदाहः ॥

उद्गादयः ॥ ४ । १ । १७३ ॥

उद्गादयश्शब्दाः कृतकुत्वादिकार्या निपात्यन्ते । उद्गः । समुद्गः । उब्जेर्घञ् कुर्दश्च निपात्यन्ते । शोकः । श्वपाकः । मांसपाकः । सर्गः । मेघः । मद्गुः । भृगुः । अविहितलक्षण कुत्वमुद्गादिषुद्रष्टव्यम् ॥

न गतौ वञ्चः ॥ ४ । १ । १७४ ॥

वञ्चेर्गतौ वर्तमानस्य कुर्न भवति । वंच्यं वंचन्ति वणिजाः गन्तव्यं गच्छन्तीत्यर्थः । गताविति किम् ? वङ्क्यं काष्ठं कुटिलमित्यर्थः ॥

याजादयो यज्ञांगे ॥ ४ । १ । १७५ ॥

याजादयः कुत्वाभावेन यज्ञागे भवन्ति । याजः । प्रयाजः । ऋतुयाजः । एवं प्रकाराः याजादयः । यज्ञांग इति किम् ? यागः । प्रयागः । भुनक्तीति भुजः । कः न घञ् ॥

व्यण्यावश्यके ॥ ४ । १ । १७६ ॥

आवश्यके घ्यणि कुत्वं न भवति । अवश्यपाच्यम् । अवश्यसेच्यम् । अन्यत्र पाक्यम् । सेक्यम् ॥

निप्राद्युजः शक्तिः ॥ ४ । १ । १७७ ॥

निप्राभ्यां परस्य युजः शक्यर्थे गम्यमाने घ्यणि कुत्वं न भवति । नियोज्यः । प्रयोज्यः । शकीति किम् ? नियोग्यः प्रयोग्यः ।

भुजोऽद्दौ ॥ ४ । १ । १७८ ॥

भुज अद्यर्थे अभ्यवहारे घ्यणि कुत्वं भवति । भोज्यः ओदनः । भोज्या यवागूः । अदाविति किम् ? भोग्यः कंबलः । भोग्या अपूपाः । पाल्या इत्यर्थः ॥

त्यज्यजः ॥ ४ । १ । १७९ ॥

त्यज् यजोर्घ्यणि कुत्वं भवति । त्याज्यम् । याज्यम् ।

एचोऽश्याः ॥ ४ । १ । १८० ॥

एजन्तस्य धातोराकारादेशो भवति अशि आ शकारादौ प्रत्यये विषयभूते भविष्यति बुद्धिस्थे भवति । तेनात्वे कृते प्रत्ययो भवति । वेञ् वाता वानीयम् शो शाता शानीयम् । ग्लै ग्लाता ग्लानीयम् । सुत्रः । सुग्लः । सुम्लः । सुत्राणम्, सुग्लानम्, सुम्लानम् । अशीति किम् ? वयंति । ग्लायन्ति । जग्ले । मम्ले इत्येश् न शादिरिति भवत्येव । चेता स्तोता इह लाक्षणिकत्वान्न भवति ।

व्योऽलिटि ॥ ४ । १ । १८१ ॥

व्यः व्येञो धातोरलिटि अशि विषये आकारो भवति । संव्याता संव्यानम् संव्यासीष्ट । अलिटीति किम् ? संविव्याय संविव्ययिथ । संविव्यय ॥

स्फुरस्फुलोर्घञि ॥ ४ । १ । १८२ ॥

स्फुरस्फुलोर्धात्वोरेचः घञि आकारो भवति । विस्फारः विस्फालः ॥

अस्यपगुरो वा ॥ ४ । १ । १८३ ॥

अपपूर्वस्य गुरैञ् धातोरेचः स्थाने अमि-खमुञि णमि च प्रत्यये आकारो वा भवति । अपगारमपगारम् । अपगोरमपगोरम् । असयपगारम् युध्यन्ते । अस्यपगोरं युध्यन्ते ॥

डीङस्सनि ॥ ४ । १ । १८४ ॥

दीङः सन्याकारो वा भवति । दिदासते दिदीषते । उपदिदासते उपदिदीषते ॥

प्याक्ङि ॥ ४ । १ । १८५ ॥

दीङो धातोर्नित्यमाकारो भवति । प्ये अक्ङिति च प्रत्यये विषयभूते । तेनात्वे कृते प्रत्ययो भवति । प्ये-उपदाय अपदाय । अक्ङिति उपदाता । उपदातुम् । उपदातव्यम् । उपदायः अवदायः । उपदायो वर्तते । अवदायो वर्तते । ईषदुपदानम् ईषदवदानम् । अक्ङिति किम्? दीनः । उपदीयते । उपदेदीयते । सानुबन्धनिर्देशात् यङश्लुचि न उपदेदिति ।

मिञ्मीञोरखचि ॥ ४ । १ । १८६ ॥

मिञ्मीञोर्धात्वोः खलज्वर्जिते प्याक्ङिति विषयभूते अकारो भवति । निमाय गतः । निमाता । निमातुम् । निमातव्यम् । निममौ । प्रमाय गतः । प्रमाता । प्रमातुम् । प्रमातव्यम् । प्रममौ । अखचीति किम्? ईषन्निमयः दुष्प्रमयः । अचि निमिनोति निमानं वा निमयः । आमिनाति आमीनं वा आमयः प्याक्ङिति किम्? निमिम्यतुः । निमिम्युः । मेमीयते ।

सानुबन्धनिर्देशात् इह न भवति । मेमेति । अकारोपादानात् मीञ् हिंसायामित्यस्यैवदैवादिकस्य न भवति । मेता । मेतुम् ॥

लीङ्लिनात्योर्वा ॥ ४ । १ । १८७ ॥

प्याक्ङिति अखाचीति वर्तते । लीङ्लिनात्योर्धात्वोः खाज्वर्जिते प्याक्ङिति च प्रत्यये विषयभूते आकारो वा भवति । विलाय । विलीय । विलाता । विलेता । विलास्यते । विलेष्यते । विलास्यति । विलेष्यति । विललौ । विलिलाय । प्याक्ङितीति किम् ? । विलीयते । विलेलीयते । विलिलीषते ! विलीषति । लीनः । अखाचीति किम् ? ईषल्लयः विलयः । ङित्तिन्निर्देशात यङ्श्लुचि न भवति । लेलेति । ली द्रवीकरण इत्यस्य च न भवति । विलयति विलीय ॥

पूजाप्रलम्भाभिभवे णौ ॥ ४ । १ । १८८ ॥

लीङ् लीनात्योर्णौ परतः पूजायां प्रलम्भे वंचने अभिभवे चार्थे नित्यमाकारो भवति । जटाभिरालापयते पूजयति । आत्मानं पूजां प्रापयतीत्यर्थः । प्रलम्भे कस्त्वामुल्लापयते वञ्चयते प्रलम्भं प्रापयतीत्यर्थः । अभिभवे श्येनो वर्तिकामपलापयते अभिभवति न्यग्भावं प्रापयतीत्यर्थः । अन्यत्र विलाययति ॥

क्रीङ्जेः ॥ ४ । १ । १८९ ॥

क्रीञ् इङ् जीनां णौ परे आकारो भवति । क्रापयति । अध्यापयति । जापयति ॥

सिध्यतेरज्ञाने ॥ ४ । १ । १९० ॥

सिद्ध्यतेर्णौ परे एचः आकारो भवति अज्ञाने न चेत स ज्ञानार्थो भवति । अन्नं साधयति, पक्षं साधयति देवदत्त

जिनदत्तः । कांपिल्ये साधयति । राजनि साधयति । अज्ञानमिति किम् ? तपस्तपस्विनं सेधयति, स्वान्येवैनं कर्माणि सेधयन्ति, सिद्ध्यति तपस्वी, जानीते ज्ञानेन । आविर्भूतप्रकाशो भवतीत्यर्थः । तत्र ज्ञाने प्रयोजने णिज्यात्वं न भवति । श्येननिर्देश ऐधादिकनिवृत्यर्थः ॥

प्रयोक्तुस्स्मिङः ॥ ४ । १ । १८१ ॥

स्मिङः णौ परतः आकारो भवति । प्रयोक्तुः स चेत् स्मिङ् णिकर्तुः कारकाद् भवति नान्यस्मात् । मुण्डो विस्मापयते । जटिलो विस्मापयते । प्रयोक्तुरिति किम् ? कुञ्चिकयैनं विस्माययति । करणादत्र विस्मयो न प्रयोक्तुः । अनुबन्धनिर्देशाद्यङ श्लुचि न भवति । विसेष्माययति ॥

बिभेतेर्भीष्च ॥ ४ । १ । १८२ ॥

बिभेतेर्णौ परतः आकारो भवति । भीषादेशश्च । प्रयोक्तुस्स चेत् बिभेतेर्णिकर्तुः कारकाद्भवति । मुण्डो भापयते जटिलो भापयते । मुण्डो भीषयते । जटिलो भीषयते । प्रयोक्तुरिति किम् ? कुञ्चिकयैनं भाययति । तिन्निर्देशाद्यङ्श्लुचि न भवति । बेभाययति ।

चिस्फुरोर्वा ॥ ४ । १ । १८३ ॥

चिस्फुरोर्धात्वोरेचः णौ परतः आकारो वा भवति । चापयति चाययति । स्फारयति स्फोरयति ॥

वेतेः प्रजने ॥ ४ । १ । १८४ ॥

वी गतिप्रजनकान्त्यादौ वर्तते । तस्य प्रजनेऽर्थे णौ परे आकारो वा भवति । पुरोवातो गां प्रवापयति । प्रवाययति गर्भं ग्राहयतीत्यर्थः । प्रजनं गर्भग्रहणम् ।

लीलोर्नग्लक्स्नेहद्रवे ॥ ४ । १ । १८५ ॥

स्नेहद्रवे ऽर्थे वर्तमानयोः ली द्रवीकरणे ला आदाने इत्येतयोर्धात्वोः णौ परे यथासंख्यं नग् लग् इत्येतावागमौ वा भवतः । घृतं विलीनयति घृतं विलालयति । घृतं विलाययति घृतं विलापयति । अन्यत्र अयो विलापयति जटाभिरालापयते पूर्वान्तकरणं ह्रस्वार्थं घृतं व्यलीलिनत् । व्यलीलत् एवमुत्तरत्रापि ।

रुहः पः ॥ ४ । १ । १८६ ॥

रुहेर्णौ परे पकारादेशो वा भवति । रोपयति रोहयति व्रीहीन् । आरोपयति, आरोहयति ।

कथादिपातिस्फायेोऽग्लग्वम् ॥ ४ । १ । १८७ ॥

वेति निवृत्तम् । कथादीनाम्, पा रक्षणे स्फायैङ् वृद्धावित्येतयोश्च धात्वोर्णौ यथासंख्यं अक्लक् आगमौ वकारादेशश्च भवन्ति । कथयति । वरयति । अचकथत् । अववरत् । अवशशारत् । अशुशूरत् । वण्डापयति, लज्जापयति, पालयति अपीपलत्, स्फावयति । पातेर्लग्वचनं रूपान्तरनिवृत्त्यर्थम् । पलरक्षण इति पठ्यते एव तन्निर्देशो यङश्श्लुङ्निवृत्त्यर्थः ।

प्रीञ्धूञोर्नक् ॥ ४ । १ । १८८ ॥

प्रीञ् धुञोर्णौ परे नगागमो भवति । प्रीणयति । अपिप्रीणत् । धूनयति , अधूधुनत् ॥

वाशद्योर्विधूननागत्योर्जक्तौ ॥ ४ । १ । १८९ ॥

वाशद्योर्णौ परे यथाक्रमम् विधूनने अगतौ चार्थे जगागमः तादेशश्च भवति । (तः) पुष्पाणि प्रवाजयति । पत्रकेण उपवाजयति । उपावीवजत् । फलानि शातयति । अन्यत्र केशानावापयति शोषयतीत्यर्थः । षष्ट्या गाः शादयति गमयतीत्यर्थः ॥

वे व्यापाह्वाशाच्छासो यिक् ॥ ४ । १ । २०० ॥

वे इत्यादीनां णौ परे यिगागमो भवति । वे—वाययति शाटकम् । अवीवयत् । वेञो नात्वेन निर्देशः ओवै शोषणे निवृत्यर्थः । आवापयति केशान् । व्या-संव्याययति । पा पाने पाययति उदकम् । ह्वा ह्वाययति । शा निशाययति । छा अवच्छाययति । सा अवसाययति ॥

ह्रीब्लीरीक्नूयीक्ष्माय्यत्यर्तां पक् ॥ ४ । १ । २०१ ॥

ह्रीत्यादीनामाकारान्तानां च धात्ववयवानां णौ परे पगागमो भवति । ह्री ह्रेपयति । व्ली व्लेपयति । री रेपयति । बहुवचनात्सानुबन्धपरिभाषेह नाश्रियते । इति रीति रीरीङो-र्ग्रहणम् । क्नूयी क्नोपयति । क्ष्मायी क्ष्मापयति । अर्ति अर्पयति । तिङिनिर्देशाद्यङ्लुग्निवृत्तिः । अरारयति । अरिरयति आताम् दापयति । धापयति । अदीधपत् । जटाभिरालापयते । क्षापयति । अध्यापयति । सत्यापयति । अर्थापयति । वेदापयति ॥

घटादिकगेवनूजनैङ्जॄष्क्नसूरञ्जयमोऽकमिचम्यम्यपपरिस्खदउपान्त्यस्याचोऽणञ्ञौ तु दीर्घो वा ॥ ४ । १ । २०२ ॥

अपपरिपूर्वस्खदवर्जितानां घटादीनां कगे वनू जनैङ् जॄष् क्नसू रजि इत्येतेषां कमिचम्यमिवर्जितानां चामन्तानां धातूनामुपान्त्यस्याचो णौ परे अणह्रस्वो भवति । अणि परे तु णौ अस्याचः स्थाने दीर्घो वा भवति । घटादि घटयति, घटंघटम्, घाटंघाटम् । अघटि अघाटि । व्यथयति व्यथंव्यथम् । व्याथंव्याथम्, अव्यथि अव्याथि । हिडयति, हिडंहिडम्, हीडंहीडम् । अहिडि अहीडि । कगे-कगयति, कगं कगम् कागंकागम्, अकगि-

अकाणि । वनू-उपवनयति उपवनमुपवनम्, उपवानमुपवानम् उपावानि उपावनि । जनैङ्-जनयति, जनंजनम्, जानंजानम्, अजनिअजानि जृष् जरयति, जरंजरम्, जारंजारम्, अजरि अजारि । क्नसू क्नसयति, क्नसंक्नसम्, क्नासंक्नासम् अक्नसि अक्नासि । रंजि-रजयति मृगान् व्याधः, रजंरजम्, राजंराजम्, अरजि अराजि ॥ अम्-गमयति, गमंगमम्, गामगामम्, अगमि । अगामि दमयति, दमंदमम्, दामंदामम्, अदमि अदामि । द्वयङ्गुलोत्क्रमम् २, द्व्यंगुलोत्क्रामम् २ । अन्तरंगत्वादणि कृते अणोत्र वा दीर्घः इति ह्लोडावदोषः । कगे इत्येकार एदित्कार्यार्थः । अकगीत् कगादिष्विहार्थविशेषानुपादानम् । घटोदयः पुनः पठितार्थ एवेति तेषां पृथगुपादानम् । तेन उद्घाटयति, नाटयति, स्मारयति, दारयति, श्रापयति, चालयति, छादयति, लालयति, प्रमादयति, श्यानयति, इत्यन्यत्र भवति । अक्म्यादीति किम्? कामयते, कामंकामम्, अकामि । आचामयति, आचाममाचामम् आचामि । आमयति, आममामम्, आमि । अपस्खादयति, अपस्खादमपस्खादम् । अपास्खादि परिस्खादयति, परिस्खादंपरिस्खादम्, पर्यस्खादि । अपपरिग्रहणं किम्? स्खदयति, प्रस्खदयति । उपान्त्यस्येति किम्? आ अपयति, आपं आपम्, अपं अपम्, अआपि अआपि । क्रन्दयति, क्रन्दं क्रन्दम् । कान्दं क्रान्दम् । अक्रन्दि अक्रान्दि । इति क्रन्दिरञ्जिक्षंदिदक्षीणां घटादिषु पाठसामर्थ्याद्भवति ॥

शमोऽदर्शने ॥ ४ । १ । २०३ ॥

शमः अदर्शने वर्तमानस्योपान्त्यस्याचो णौ परे ह्रस्वो भवति । अम् ञिपरे तु दीर्घो वा भवति । शमयति रोगान्,

निशमयति श्लोकान्, शमं शमम् । शामं शामम् अशमि अशामि । अदर्शन इति किम्? निशामयति रूपम् । समः दर्शने इत्येके ॥

यमोऽपरिवेषे णिचि च ॥ ४ । १ । २०४ ॥

यमः अपरिवेषणेऽर्थे वर्तमानस्योपान्त्यस्याचो णिचि अणि चिणौ ह्रस्वो भवति अञ्जि परे तु दीर्घो वा । यमयति. यमं यमम्, यामं यामम्, अयमि अयामि । अन्यत्र यामयत्यतिथीन्, यामयति चन्द्रमसम् । यमः परिवेषे इत्येके । णाविति सिद्धेऽस्य णिचि चेति वचनादन्येषां णिचि न भवति । स्यमि वितर्कणे स्यामयते, स्यामं स्यामम्, अस्यामि । शमि आलोचने निशामयति, निशामं निशामम्, न्यशामि ॥

मारणतोषणनिशाने ज्ञश्च ॥ ४ । १ । २०५ ॥

मारणादावर्थे वर्तमानस्य जानातेरुपान्त्यस्याचः णिचि चाणि चिणौ ह्रस्वो भवति । अञ्जि परे तु दीर्घो वा । संज्ञपयति मृगान् व्याधः । संज्ञपयति गुरून् शिष्यः । ज्ञपयति शरान् व्याधः । ज्ञपं ज्ञपम्, ज्ञापं ज्ञापम्, अज्ञपि अज्ञापि । अन्ये "निशामन" इति पठन्ति । निशामनमालोचनम् । चकारः णिचि चेत्यनुकर्षणार्थः ॥

चहश्शाठ्ये ॥ ४ । १ । २०६ ॥

चहेर्धातोः शाठ्ये वर्तमानस्योपान्त्यस्याचः णिचि णौ ह्रस्वो भवति । अञ्जि तु दीर्घो वा । चहयति । चहं चहम्, चाहं चाहम् । अचहि, अचाहि । अन्यत्र चाहयति, चाहम् चाहम् । अचाहि ॥

वानुपसर्गाज्ज्वलह्वलह्मलवनूवमनमग्लास्नाम् ॥ ४ । १ । २०७ ॥

ज्वलादीनां धातूनामुपान्त्यस्याचो णौ ह्रस्वो वा भवति । न चेदुपसर्गास्ते परे भवन्ति । ज्वलति, ज्वालयति । ह्वलयति, ह्वालयति । ह्मलयति, ह्मालयति । वनयति, वानयति । वमयति, वामयति । नमयति, नामयति । ग्लपयति । ग्लापयति । स्नपयति स्नापयति । ज्वलं ज्वलम् । ज्वालं ज्वालम् । अज्वलि, अज्वालि इति दीर्घविकल्पः सिद्ध एव घटादित्वात् । अनुपसर्गादिति किम् ? प्रज्वलयति । प्रह्वलयति । प्रह्मलयति । प्रवनयति । प्रवमयति । प्रणमयति । प्रग्लापयति । प्रस्नापयति । वेति योगविभागः कर्तव्यस्तेन संक्रामयतीत्यादि सिद्धम् ॥

खचि ॥ ४ । १ । २०८ ॥

खचि परे यो णिच् तस्मिन्परे धातोरुपान्त्यस्याचो ह्रस्वो भवति । द्विषंतपः । परन्तपः । पुरन्दरः । युगंधरः । वसुन्धरा । चकारः किम् ? दुर्विभावम् । सुविभावम् ॥

छदेर्मन्क्वौ ॥ ४ । १ । २०९ ॥

छदेर्धातोर्मन्परे क्विपरे च णौ परे उपान्त्यस्याचो ह्रस्वो भवति । छद्म । दामच्छद् । परिच्छद् । छदिरिति छदेर्वलेहुर्ढण् । छत्रमिति छत्रादेरञ् इति निपातनात् सिद्धम् ।

घेऽद्व्याद्युपसर्गस्य ॥ ४ । १ । २१० ॥

छदेरुपान्त्यस्याचः घप्रत्यये णौ परतः ह्रस्वो भवति । न चेत्तस्य द्व्यादय उपसर्गा भवन्ति । छाद्यतेऽनेनेति छदः । सप्त छदा अस्येति सप्तच्छदः । उरश्छदः । दन्तच्छदः । प्रच्छाद्यतेऽनेनेति प्रच्छदः । उपच्छदः । परिच्छदः । घ इति किम् ? प्रच्छादनं प्रच्छादः । अद्व्याद्युपसर्गस्येति किम् ? समुच्छादः । समुपाच्छादः ।

ङेऽशास्वग्नाश्यृदितः ॥ ४ । १ । २११ ॥

शासू अको नाशो निवृत्तिर्यस्यास्तीति सोऽग्नाशी, ऋकार इद्यस्य स ऋदित्, एतद्वर्जितस्य धातोर्येऽच् तस्य ङपरे णौ परतः पूर्वभागेोपान्त्यस्य ह्रस्वो भवति । अयीयवत् । अपीपठत् । अचीकरत् । अजीहरत् । अनीनयत् । अलीलवत् । अपीपवत् । अदीदपत् । अचीकमत् । गोनामाख्यात् अजूगुनत् । नैरायमाख्यात अनूनुरत् । ङ इति किम् ? कारयति । हारयति । अशास्वग्नाश्यृदित इति किम् ? शासू-अन्वशशासत् । अशशासत् । अग्नाशी-अशशारत् । अशुशूरत मालामाख्यात् । अममालत् । मातरमाख्यात अममातत् राजानमतिक्रान्तवान् अत्यरराजत् । लोमान्यनुमृष्टवान्-अन्वलुलोमत् । अलघुसमुदायनाशेप्यग्नाशोऽस्तीति । परैव: प्राच:०-इत्येव सिद्धे अग्नाशिग्रहणं स्थानिवद्भावाभावार्थम् तेन अजूगुनदित्यादि सिद्धम् । ऋदित्-वाधृङ्-अबबाधत् । याचृ-अययाचत् । ढौकृ-अडुढौकत् । मा भवानोचिखत् मा भवानोणिणत् । मा भवानेजिजत् । उपान्त्यस्येति किम् ? अचकांक्षत् अववांछत् । मा भवानटिटत् । इत्यादावोणयादेरिदित्करणान्नित्यादपि द्विर्वचनात्पूर्वं ह्रस्वो भवति । वादनां प्रयोजितवान् अवीवदत् । वीणां परिवादकेनेति णिजाति परिग्रहात्सिद्धम् ।

भ्राज्भाष्भास्दीप्पीड्मीलजीवकणण्अणवणलुटां वा ॥ ४ । १ । २१२ ॥

भ्राजादीनां धातूनामुपान्त्यस्याचो ङपरे णौ परतः ह्रस्वो वा भवति । अबिभ्रजत्, अबभ्राजत् । अबिभसत् अबभासत् । अबीभषत्, अबभाषत् । अदीदिपत्, अदिदीपत् । अपीपिडत्, अपिपीडत् । अमीमिलत्, अमिमीलत् । अजी-

जिवत्, अजिजीवत् । अचीकणत्, अचकाणत् । अरीरणत्, अरराणत् । अशिश्रणत्, अशिश्राणत् । अवीवणत्: अववाणत् । अलूलुटत् अलुलोटत् ।

उऋत् ॥ ४ । १ । २१३ ॥

ङपरे णौ परतः धातोरृवर्णस्य उपान्त्यस्य ऋकारादेशो वा भवति । अचीकृतत्, अचीकीर्तत् । अवीवृतत् अववर्तत् अमीमृजत् अममार्जत् । उपान्त्यस्येति किम् ? अचीकरत् ।

जिघ्रतेरिः ॥ ४ । १ । २१४ ॥

जिघ्रतेर्घ्रा इत्येतस्य उपान्त्यस्याचः ङपरे णौ परतः इकारादेशो वा भवति । अजिघ्रिपत् अजिघ्रपत् । तिन्निर्देशो यङ्लुग्निवृत्यर्थः—अजाघ्रपत् ॥

तिष्ठतेः ॥ ४ । १ । २१५ ॥

स्था इत्येतस्य उपान्त्यस्याचः ङपरे णौ परतः इकारो नित्यं भवति । अतिष्ठिपत् । अतिष्ठिपताम् । अतिष्ठिपन् तिन्निर्देशात् अतास्थपत् ॥

ऊद्दुषो णौ ॥ ४ । १ । २१६ ॥

दुषेर्धातोरुपान्त्यस्याचः णौ परे ऊकारादेशो भवति । दूषयति । दूषयतः । दूषयन्ति । णाविति किम् ? दोषः । ऊदिति तकारो निर्देशार्थः । ङे ह्रस्वबाधनार्थं इत्येके । अदुदूषत् इति ।

चित्ते वा ॥ ४ । १ । २१७ ॥

चित्तकर्तृकस्य दुषेर्णौ परे उपान्त्यस्याचः ऊकारो वा भवति । चित्तं दुष्यति तदन्यो दूषयति दोषयति वा मनो दूषयति, दोषयति वा । प्रज्ञां दूषयति, दोषयति वा ।

लुङ्लिटि भुवः ॥ ४ । १ । २१८ ॥

भू इत्येतस्य धातोरुपान्त्यस्याचः लुङ् लिटि च परे ऊकारो वा भवति । अभूवन् । अभूवम् । अभूव । बभूवतुः । बभूवुः । उववादेशयोः कृतयोरूकारः । लुङ्लिटीति किम् ? व्यतिभविषीष्ट । अच इति किम् ? अभूत् । अभूताम् ॥

गोहोऽचि ॥ ४ । १ । २१९ ॥

गोह्भूतस्य गुहेरजादौ प्रत्यये उपान्त्यस्याचः ऊकारो भवति । निगूहति । निगूहयति । निगूहकः । साधू निगूही । निगूहम् । निजुगूह । निगूहो वर्तते । गोह इति किम् ? निजुगुहतुः । निजुगुहुः । अचीति किम् ? निगोढा निगोढुम् ॥

गम्हन्जन्खन्घासोऽनङ्यचि लुक्क्ङित ॥ ४।१।२२० ॥

गमादीनामुपान्त्यस्याचः क्ङिति ङिति चाङ्वर्जितेऽजादौ प्रत्यये परतः लुग्भवति । जग्मतुः । जग्मुः । जघ्नतुः । जघ्नुः । जज्ञे । जज्ञाते । जज्ञिरे । चख्नतुः । चख्नुः । जक्षतुः । जक्षुः । ङिति घ्नन्ति । क्ङितीह निघ्नानाः । अनङीति किम् ? अगमत् । अघसत् । अचीति किम् ? गम्यते । हन्यते । इहाचीत्युत्तरत्रानुवृत्त्यर्थम् । क्ङितीति किम् ? गमनम् । हननम् ॥

हलोनोऽनर्चाञ्च्युदितोः ॥ ४ । १ । २२१ ॥

हलन्तस्य धातोरुपान्त्यस्य नकारस्य क्ङिति ङिति च प्रत्यये परे लुग्भवति । अनर्चां च्युदितोः—अर्चापूजा तस्यां वर्तमानमञ्चतिमुदितं च वर्जयित्वा । स्रस्तः । ध्वस्तः । स्रस्यते । ध्वस्यते । अस्तभत । अग्लुचत् । हल इति किम् ? नीयते । नेनीयते । अनर्चाञ्च्युदितोरिति किम् ? अञ्चिता गुरवः । नन्द्यते । नानन्द्यते । अर्चाग्रहणं किम् ? उदक्तमुदकं कूपात् उद्धृतमित्यर्थः । उपान्त्यस्येति किम् ? नह्यते । नानह्यते । क्ङितीति किम् ? स्रंसिता । ध्वंसिता ।

लंगिकम्प्योरुपतापांगविकृत्योः ॥ ४ । १ । २२२ ॥

लगुवगिवति लंगि पठ्यते कपुङ् चलने । अनयोरुपान्त्यस्य नकारस्य कृङिति प्रत्यये यथासंख्यमुपतापे अङ्गविकृतौ चार्थे लुग्भवति । विलगितः । विकपितः अन्यत्र विलंगितः । विकंपितः ॥

भञ्जेर्ञौ वा ॥ ४ । १ । २२३ ॥

भञ्ज इत्येतस्य धातोरुपान्त्यस्य नकारस्य ञि प्रत्यये लुग् भवति वा । अभाजि । अभञ्जि ॥

दन्शसन्जश्शपि ॥ ४ । १ । २२४ ॥

दन्शसन्जोर्नकारस्य शपि परे लुग् भवति । दशते । सजति । दशन्ती । सजन्ती ॥

रञ्जः ॥ ४ । १ । २२५ ॥

रञ्जश्शपि नकारस्य लुग् भवति । रजति । रजतः । रजन्ति ॥

णौ मृगरमणे ॥ ४ । १ । २२६ ॥

रञ्जेरुपान्त्यस्य नकारस्य णौ परतः मृगाणां रमणे क्रीडायामर्थे लुग् भवति । रजयति मृगान्व्याधः । अन्यत्र रञ्जयति रजको वस्त्रम् । रञ्जयति नरः परिषदम् ॥

घञि भावकरणे ॥ ४ । १ । २२७ ॥

रञ्जेरुपान्त्यस्य नकारस्य भावे करणे च घञि लुग्भवति । रञ्जनं रंज्यतेऽनेनेति वा रागः । घञीति किम् ? रञ्जनम् । भावकरण इति किम् ? अन्यत्र रजत्यस्मिन्निति रंगः । रजनम् रजः । रजनीत्युणादय अमोघवृत्ताावुक्तं ॥

स्यदो जवे ॥ ४ । १ । २२८ ॥

स्यद इति स्यंदतेर्घञि नलोपाकाराभावौ निपात्येते ।

जवे वेगे गतिविशेषेऽभिधेये । गोस्यदः । जव इति किम् ? घृतस्यन्दः । तैलस्यन्दः ॥

प्रश्रथहिमश्रथैधावोदौद्मदशनम् ॥ ४ । १ । २२९ ॥

प्रश्रथादयः घञादौ कृतनलोपादयो निपात्यन्ते। प्रश्रथः । हिमश्रथाः । प्रहिमपूर्वस्य श्रन्थेर्घञि नलुगात्वाभावश्च निपात्यते । एधः इन्धेर्घञि नलोपः एत्वं च । अवोदः अवपूर्वस्य उन्देर्घञि नलोपः । ओद्म उन्देर्मनि नलोपः ओत्वं च । दशनम्, दन्शेरनटि नलोपः ॥

ञ्णित्यस्याः ॥ ४ । १ । २३० ॥

ञिति णिति च प्रत्यये परे धातोरुपान्त्यस्याकारस्य आकारो भवति । अपाचि । अनायि । अलावि । अकारि । पाचयति । नाययति । लावयति । कारयति । पाचकः । नायकः । लावकः । कारकः । अस्येति किम् ? अभेदि । भेदकः । उपान्त्यस्येति किम् ? चकासकः ॥

जागुर्ञिणे ॥ ४ । १ । २३१ ॥

जागृ इत्येतस्य धातोर्ञौ णे [1]च ञ्णिति प्रत्यये उपान्त्यस्याकारस्याकारो भवति । अजागारि । जागारिष्यते । जजागार । ञिण इति किम् ? जागरयति । जागरकः । नियमार्थो योगः ।

मृजुः ॥ ४ । २३२ ॥

अस्येति वर्तते न ञ्णितीति । मृजेर्धातोरृवर्णस्य स्थाने योऽकारस्तस्याकारो भवति । मार्ष्टि । मार्ष्टा । सम्मार्जकः । सम्मार्जनम् । उरिति किम् ? स्रष्टा । स्रष्टम् ।

आर्वाचि ॥ ४ । २३३ ॥

[1] णिशि चेत्यपि पाठः तालपुस्तके ।

मृजेः ऋकारस्य अजादौ प्रत्यये आरादेशो वा भवति । परिमृजन्ति । परिमार्जन्ति । परिमृजन् । परिमार्जन् । परिममृजतुः । परिममार्जतुः । अचीति किम् ? मृष्टः । ऋरिति किम् ? मार्जनम् । मार्जकः ॥

विश्रमो घञि ॥ ४ । १ । २३४ ॥

विपूर्वस्य श्रमेः घञ्युपान्त्यस्याकारस्याकारो वा भवति। सूर्यविश्रमा भूमिः, विश्रामहेतोः । "अविश्रमं यावदिदं शरीरम्"। वीति किम्? श्रमः । आश्रमः । घञीति किम्? विश्रमी ॥

नोद्यमोपरमः ॥ ४ । १ । २३५ ॥

उद्यमेरुपरमेश्च घञ्युपान्त्यस्याकारस्याकारो न भवति । उद्यमः । उपरमः । उदुपादिति किम् ? यामः । संयामः । रामः । विरामः ॥

मजन्वधेऽयंरंनंगंवंकंचमः कृञ्णौ ॥ ४ । १ । २३६ ॥

यमादिवर्जितस्य मान्तस्य धातोर्जनेर्वधेश्चोपान्त्यस्याकारस्य कृति णौ च ञिणति प्रत्यये आकारो न भवति । शमः । तमः । दमः । शमी । तमी । दमी । शमकः । तमकः । दमकः । अशमि । अतमि । अदमि । प्रजनः । जन्यः । जनकः । अजनि । वधः । वध्यः । वधकः । अवधि । वधिर्हनादेशोव्यञ्जनान्तः प्रकृत्यन्तरम् । यमादिप्रतिषेधः किम् ? नियामः । नियामकः । अभिरामकः । विनामकः । आगामुकः । वामः । कामः । कामुकः । आचामकः । केचिदाचम इति पठन्ति । चमकः । विचमकः इति च । आङः प्रत्युदाहरन्ति । आमतीति णिच्याकारः । कृञ्णाविति किम्? शशाम । निशामयते ।

आतो यम् ॥ ४ । १ । २३७ ॥

आकारान्तस्य धातोः कृति णौ च ञिणति प्रत्यये यमा-

गमो भवति । दायः । धायः । दायकः । धायकः । दरिद्रायकः । अदायि । अधायि । दायिष्यते । धायिष्यते ॥

हनो नस्तोऽञ्णिणे ॥ ४ । १ । २३८ ॥

हन्तेर्ञिणश्च वर्जिते ञ्णिति प्रत्यये नकारस्य तकारो भवति । घातयति । घातकः । साधुघाती । घातंघातम् । घातो वर्तते । घ इति योगविभागेन आकारः । अञिण इति किम् ? अघानि । घानिषीष्ट । जघान 'धातुकार्यं तत्प्रत्यये' इतीह न भवति । वार्त्रघ्नम् ॥

हो घः ॥ ४ । १ । २३९ ॥

हन्तेर्ञ्णिति प्रत्यये हकारस्य घकारो भवति । अघानि घातयति । घातकः । साधुघाती ।

शासः क्ङित्यङ्हलोत् ॥ ४ । १ । २४० ॥

शासो धातोरङि क्ङिति हलादौ च प्रत्यये उपान्त्यस्य इकारो भवति । अङि—अशिषत् । अशिषताम् । अशिषन् । क्ङिति हलि—शिष्टः शिष्टवान् । शिष्टिः । शिष्ट्वा । अनुशिष्य । शिष्यः शिष्यते । शेशिष्यते । शिष्टः । शिष्वः । शिष्मः । शाशिष्टः । क्ङितीति किम् ? शास्ति । अङि हलीति किम् ? शशासतुः । शशासुः । शासति ॥

क्वौ ॥ ४ । १ । २४१ ॥

शासेर्धातोः क्वावुपान्त्यस्य इकारो भवति । आर्यशीः । मित्रशीः ॥

आङः ॥ ४ । १ । २४२ ॥

आङः परस्य शासेः क्वावेवोपान्त्यस्य इकारो भवति । आशीः । पूर्वेण सिद्धे नियमार्थो योगः । इह न भवति : आयुराशास्ते ।

क्तिन्यपचायः ॥ ४ । १ । २४३ ॥

अपपूर्वस्य चायतेः क्तिनि प्रत्यये उपान्त्यस्येत्वं भवति अपचितिः ।

ह्लादोऽः क्ति ॥ ४ । १ । २४४ ॥

ह्लादतेरुपान्त्यस्य क्ति—तकारादौ किति प्रत्यये अकारो भवति । ह्लन्नः । ह्लन्नवान् । ह्लत्तिः । क्तीति किम् ? ह्लादित्वा । ककारः किम् ? जाह्लात्ति । जाह्लात्तः । तकारः किम् ? प्रह्लाद् ह्लाद्यते । जाह्लादानः ।

ॠल्वादेः क्तक्तिनां नो अप्रः ॥ ४ । १ । २४५ ॥

ॠकारान्ताल्ल्वादिभ्यश्च परयोः क्तक्तवत्वोः क्तिन श्चादेर्नकारादेशो भवति, अप्रः पृइत्येतद्वर्जयित्वा । तीर्णः । तीर्णवान् । तीर्णिः । कीर्णः । कीर्णवान् । कीर्णिः । निगीर्णः । निगीर्णवान् । निगीर्णिः । लूनः । लूनवान् । लूनिः । धूनः । धूनवान् । धूनिः । अप्र इति किम् ? पूर्तः । पूर्तवान् । पूर्तिः ।

क्तयोर्द्रश्यौदित्सूयत्यादेर्दस्य चामन्मूर्च्छः ॥ ४ । १ । २४६ ॥

तीति वर्तते । दकारान्तात् रेफान्तात् श्यायतेरोदितः सूयत्यादेश्च मन्मूर्च्छिवर्जिताद्धातोः परयोः तकाराद्योः क्तयोः क्तक्तवत्वोरादेर्नकारो भवति । तत्सन्नियोगे पूर्वदकारस्य च नकारः । दः—भिन्नः । भिन्नवान् । छिन्नः—छिन्नवान् । रः—आगूर्णः । आगूर्णवान् । श्या—शीनम् घृतम् । प्रतिशीनम् । ओदित्—ओविजैङ् उद्विग्नः । उद्विग्नवान् । ओलजैङ्—लग्नः, लग्नवान् । ओप्यायैङ्—पीनः । पीनवान् । टुओश्वि—शूनः । शूनवान् । सूयत्यादयः प्रसूनः प्रसूनवान् । दूनः । दूनवान् । दीनः । दीनवान् । व्रीणः । व्रीणवान् । क्तयोरिति किम् ? छित्तिः । चूर्तिः । "ॠणं धारयति" इति "ॠणे" इति निपातना-

त्सिद्धम् । तीति किम् ? विदितम् । चरितम् । अमन्मूर्च्छ इति किम् ? मत्तः । मत्तवान् । मूर्तः । मूर्तवान् ॥

हलो यण्व आतोऽध्याख्यः ॥ ४ । १ । २४७ ॥

ध्याख्यावर्जितस्य धातोर्हलः पराद्यण्वः परो यः आकारः तस्मात् परयोस्तकारादयोः क्तयोर्नकारो भवति । संस्त्यानः । संस्त्यानवान् । निद्राणः । निद्राणवान् । म्लानः म्लानवान् । ग्लानः । ग्लानवान् । हल इति किम् ? यातः । यातवान् । रातः । रातवान् । यण्व इति किम् ? प्रश्नातम् । स्नातम् । ध्यातम् । अध्याख्य इति किम् ? ध्यातः । ध्यातवान् । ख्यातः । ख्यातवान् । क्तीति किम् ? दरिद्रितः । दरिद्रितवान् ॥

पूदिव्यञ्चेर्नाशाजिगीषापादाने ॥ ४ । १ । २४८ ॥

पूदिवि अञ्चि इत्येतेभ्यो यथासंख्यं नाशे अजिगीषायामपादाने च वाच्ये क्तयोर्नकारो भवति । पूनाः यवाः । आद्यूनो देवदत्तः । परिद्यून वस्त्रम् । समक्नौ शकुनेः पक्षौ ॥ अन्यत्र पूतम् धान्यम् । द्यूतं वर्तते । उदक्तमुदकं कूपात् ॥

सेः कर्मकर्तरि ग्रासे ॥ ४ । १ । २४९ ॥

षिञ् बन्धन इत्येतस्मात्परयोः क्तयोर्नकारो भवति । ग्रासे कर्मणि कर्तृत्वेन विवक्षिते । सीनो ग्रासः स्वयमेव । कर्मकर्तरीति किम् ? सितो गलो ग्रासेन । सितो ग्रासो देवदत्तेन । सितवान् ग्रासं देवदत्तः । ग्रास इति किम् ? सितं कर्म स्वययेव ॥

निर्वाणो वाते ॥ ४ । १ । २५० ॥

निर्वाण इति निस्पूर्वात् वातेरुत्तरस्य क्तस्य नत्वं निपात्यते अवाते कर्तरि । निर्वाणो मुनिः । निर्वाणः प्रदीपः । अवात इति किम् ? निर्वातो वातः । निर्वातं वातेन ॥

दुग्वोर्दीर्घश्च ॥ ४ । १ । २५१ ॥

दुगुभ्यां परयोः क्तयोर्नकारो भवति । तत्सन्नियोगे च तयोर्दीर्घो भवति । आदूनः । आदूनवान् । विगूनः । विगूनवान् । गूनो वत्सः ॥

क्षेरध्ये ॥ ४ । १ । २५२ ॥

क्षेः परयोः क्तयोर्नकारो भवति । तत्सन्नियोगे चास्य क्षेः दीर्घो भवति । अध्ये–ध्यणप्रत्ययस्यार्थौ भावकर्मणी ततोऽन्यत्र चेत्तौ क्तौ भवतः । क्षीणो देवदत्तः । क्षीणमिदं देवदत्तस्य । अधिकरणेऽयं क्तः । अध्य इति किम्? क्षितमस्य । भावे क्तः ।

दैन्याक्रोशे वा ॥ ४ । १ । २५३ ॥

क्षेरध्यणर्थे क्तयोर्नकारो वा भवति । तत्सन्नियोगे चास्य- दीर्घः । दैन्य आक्रोशे च गम्यमाने । क्षितः । क्षीणः तपस्वी क्षितकः क्षीणकः । आक्रोशे–क्षितः । क्षीणः । क्षितायुः । क्षीणायुः जाल्मः । अध्येति किम्? क्षितं तपस्विनः । क्षितं जाल्मस्य ॥

ह्रीत्राद्राघ्रोन्दनुद्विन्तेः ॥ ४ । १ । २५४ ॥

ह्रियादिभ्यो विन्तेश्च विचारणार्थात् विदेः परयोः क्तयो र्नकारो वा भवति । तत्सन्नियोगे पूर्वदकारस्य च नकारः ह्रीणः । ह्रीणवान् । ह्रीतः । ह्रीतवान् । त्राणः । त्राणवान् । त्रातः । त्रातवान् । द्राणः । द्राणवान् । द्रातः । द्रातवान् । घ्राणः । घ्राणवान् । घ्रातः । घ्रातवान् । समुन्नः । समुन्नवान् । समुत्तः । समुत्तवान् । नुन्नः । नुन्नवान् । नुत्तः । नुत्तवान् । विन्नः । विन्नवान् । वित्तः । वित्तवान् ॥

प्रस्त्यो मः ॥ ४ । १ । २५५ ॥

प्रपूर्वात् स्त्यायतेः क्तयोः मकारो वा भवति । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीतः । प्रस्तीतवान् ॥

क्षः ॥ ४ । १ । २५६ ॥

क्षै क्षय इत्येतस्मात् क्तयोस्तकारस्य नित्यं मकारो भवति । क्षामः । क्षामवान् ॥

शुष्पचः क्वम् ॥ ४ । १ । २५७ ॥

शुष्पचिभ्यां क्तयोः यथासंख्यं ककारवकारौ भवतः । शुष्कः । शुष्कवान् । पक्वः । पक्ववान् ॥

अनुपसर्गाः क्षीबोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः ॥ ४ । १ । २५८ ॥

अनुपसर्गाः क्षीबादयः क्तान्ता निपात्यन्ते । क्षीबृङ् मदे क्षीबः । लाघृङ् सामर्थ्ये उल्लाघः । कृश तनूकरणे कृशः परिकृशः । ञिफला विशरणे—फुल्लः । उत्फुल्लः संफुल्लः । फुल्लः । अनुपसर्गा इति किम्? प्रक्षीबितः । प्रोल्लाघितः । अपरे क्षीबवानित्याद्यपि रूपमिच्छन्ति ॥

भित्तं शकलम् ॥ ४ । १ । २५९ ॥

भिदेः क्तस्य नत्वाभावो निपात्यते । शकलं शकलपर्यायो यदि भित्तशब्दो भवति । भित्तं शकलमित्यर्थः । अन्यत्र भिन्नं शकलं । भिन्नं भित्तम् ॥

वित्तं धनप्रतीतम् ॥ ४ । १ । २६० ॥

धनञ्च प्रतीतश्च धनप्रतीतम् । वित्तमिति विदेः लाभार्थात्परस्य क्तस्य नत्वाभावो निपात्यते स चेद् धनपर्यायः प्रतीतपर्यायो वा भवति । वित्तं धनमित्यर्थः । वित्तः प्रतीत इत्यर्थः । अन्यत्र विन्नम् । वेत्तेर्विदितम् । विन्तेर्विन्नं वित्तं च । विद्यतेर्विन्नं वित्तं धने प्रतीते च । विन्दतेर्विन्नमन्यत्र ॥

हन्मन्यरंगंनंवनांततनादेर्लुग्जलि ॥ ४ । २६१ ॥

क्ङितीति वर्तते । हनादीनां वनतेस्तनादीनां च धातूनां

जनादौ क्ङिति प्रत्यये लुग्भवति । हन्–हतः । हतवान् । हत्वा । हतिः । आहत । अहथाः । मन्–मतः । मतवान्, मत्वा, मतिः । यम्–यतः, यतवान्, यत्वा, यतिः । रम् । रतः, रतवान्, रत्वा, रतिः । गम्–गतः, गतवान्, गत्वा, गतिः । नम्-नतः । नत्वा, नतवान्, नतिः । वनतिः–वतिः । तनादिः–तनूञ् ततः । ततवान् तत्वा–ततिः । अतत अतथाः । सनूञ् आत्वं वक्ष्यते । क्षणूञ् क्षतः । क्षतवान्, क्षत्वा । क्षतिः । अक्षथाः । ऋणूञ् ऋतः । ऋतवान् । ऋत्वा ऋतिः । आर्त । आर्थाः । हनादीनामिति किम् ? शान्तः दान्तः । तिब्गणनिर्दिष्टेषु यङ्लुचि न भवति । क्षम् वान्तः । तम्-तान्तः । अन्यत्र भवति । जंघतः । सम्मतः । यंयतः । रंरतः । जलीति किम् ? तन्यते । तंतन्यते ॥

प्ये ॥ ४ । १ । १६२ ॥

हनादीनां प्ये लुग्भवति । प्रहत्य । प्रमत्य । प्रवत्य । प्रतत्य । प्रक्षत्य ॥

मो वा ॥ ४ । १ । २६३ ॥

हनादीनां मकारान्तानां प्ये लुग्वा भवति । नियत्य । नियम्य । निरत्य । निरम्य । आगत्य । आगम्य । प्रणत्य । प्रणम्य । हनादीनामिति किम् ? उपशम्य ॥

गमादीनां क्वौ ॥ ४ । १ । २६४ ॥

गमादीनां हनादीनां क्वौ परे लुग्भवति । जनपदगत् । कलिङ्गत् । संनत् । सुनत् । सुवत् । परीतत् । प्रतीतत् । सत् । सुक्षत् । अग्रेगूः । अग्रेभ्रूः भूरित्यैणादिको डूः ॥

न क्वौ दीर्घश्च ॥ ४ । १ । २६५ ॥

हनादीनां नाम्नि क्वौ प्रत्यये लुग्दीर्घश्च न भवतः ।

"क्ङिजलि क्ङित्यनुनासिके" । इति प्राप्तो दीर्घः । हन्तिः । सन्तिः । यन्तिः । रन्तिः । गन्तिः । नन्तिः । वन्तिः । तन्तिः । मन्तिः । हनादीनामिति किम्? शान्तिर्भगवान् ॥

वन्यनुनासिकस्याः ॥ ४ । १ । २६६ ॥

अनुनासिकान्तस्य धातोः वनि प्रत्यये आकारो भवति । जन्—विजावा । खन्—विखावा । कम्—दधिकावा । गम्—अग्रेगावा । घुण् घवावा । नित्यत्वादेङः पूर्वमाकारः । घूर्णि—घूरावा । ओण्—अवावा । इवु यावा ॥

जन्सन्खनाम् ॥ ४ । १ । २६७ ॥

जलि क्ङितीति वर्तते । जनादीनां जलादौ क्ङिति प्रत्यये परे आकारो भवति । जातः । जातवान् जातिः । जात्वा । सातः । सातवान् । सात्वा । सातिः । खातः । खातवान् । खात्वा । खातिः ॥

सनि ॥ ४ । १ । २६८ ॥

जनादीनां जलादौ सनि परे आकारो भवति । सिषासति । जलीति किम्? जिजनिषते । सिषनिषते । चिखनिषते । एवं च सनीति सनर्थमेव ॥

ये वा ॥ ४ । १ । २६९ ॥

जनादीनां ये क्ङिति प्रत्यये आकारो वा भवति । जायते, जन्यते । जाजायते, जंजन्यते । सायते, सन्यते, सासायते, संसन्यते । खायते, खन्यते, चाखायते, चंखन्यते । क्ङितीति किम्? जन्यम् । सान्यम् । य इति प्रत्ययनिर्देशः न वर्णनिर्देशः । तेन खन्यात् । सन्यात् । केचिदत्राप्याहुः—सायात् । खायात् ॥

तनो यकि ॥ ४ । १ । २७० ॥

तनोतेर्धातोः यकि आकारो वा भवति । तायते तन्यते ॥

सनस्तौ क्तौ ॥ ४ । १ । २७१ ॥

सनो धातोः क्तिप्रत्यये तौ लुगाकारौ वा भवतः । सतिः, सातिः, सन्तिः । सान्तिरिति सनत्वे ॥

इति श्रीश्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने चिन्तामणौ वृत्तौ चतुर्थस्याध्यायस्य प्रथमः पादः ।



ह्रिणोऽचीकः श्लेलेयञ् ॥ ४ । २ । १ ॥

हु इण् इत्येतयोर्धात्वोरिकः शिति लेटि लेङि लटि लङि च क्ङिति अजादौ परे यञादेशो भवति । इयुवपवादः । क्तीह जुह्वानाः । जुह्वतुः । व्यतिजुह्वीरन् । जुह्वति । व्यत्यजुह्वताम् । व्यत्यजुह्वत । यन् । यन्तौ । यन्तः । यन्तु । यन्ति । मा स्म यन् । ह्रिण इति किम् ? युवन्ति । योयुवन्ति अचीति किम् ? जुहुनः । जुहुथ । इतः । इथः । इक इति किम् ? अजुहवुः । श्लेल इति किम् ? जुहुवतुः । जुहुवुः ॥

वेकः ॥ ४ । २ । २ ॥

इक् इत्येतस्य धातोरजादौ श्लेले यञ् वा भवति । इयुवपवादः । क्तीह अधियानाः । अधीयानाः । अधियन्तु । अधीयन्तु । व्यत्यधियीरन् । व्यत्यधीयीरन् । अधियन्ति । अधीयन्ति । मा स्माधियन् । मा स्माधीयन् ॥

एच्छीङः ॥ ४ । २ । ३ ॥

शीङो धातोरिकः श्लेले परे एकारो भवति । क्तीह शयानाः । शेताम् । शयाताम् । शेरताम् । शयीत । शयीयाताम् । शयीरन् । शेते । शयाते । शेरते । अशेत । अशयाताम् । अशेरत । सानुबन्धोपादानात् न यङ्श्लुचि । शेशीतः । शेश्यति ॥

अयय् ॥ ४ । २ । ४ ॥

शीङः इकः किति ङिति यकारादौ प्रत्यये अय् भवति । शय्यते । शाशय्यते । संशय्य । शय्या । यीति किम् ? शिश्ये । क्ङितीति किम् ? शेयम् । अनुबन्धात् न यङ्श्लुचि—संशेशीयः ॥

उपसर्गादुदूहः ॥ ४ । २ । ५ ॥

उपसर्गात्परस्य ऊहतेरिकः क्ङिति यकारादौ प्रत्यये परे उकारो भवति । समुह्य । समुह्यते । समुह्यात् । पर्युह्य । पर्युह्यते । पर्युह्यात् । उपसर्गादिति किम्? ऊह्यते । क्ङितीति किम्? समूह्य । अभ्यूह्योऽर्थः । इक इति किम्? आ ऊह्यते–ओह्यते–समोह्यते । समौह्यत ॥

ल्येतेरित् ॥ ४ । २ । ६ ॥

उपसर्गात्परस्य एतेरिणो धातोरिकः क्ङिति यकारादौ लिङादेशे परे इकारो भवति । समियात् । समियास्ताम् । समियासुः । उदियात् । उदियास्ताम् । उदियासुः । अन्वियात् । अन्वियास्ताम् । अन्वियासुः । यङ् लेङिति दीर्घो ह्रस्वः । लीति किम्? समीयते । उदीयते । इक इति किम्? आईयात्–एयात्–समेयात् ॥

श्वयत्यस्वचपतोऽङ्यथवुम्पम् ॥ ४ । २ । ७ ॥

श्वयते रिकः असादीनां च अङि परतः यथासंख्यम् अ, थक, उम्, पम्, इत्यादेशागमा भवन्ति । श्वयतेरः–अश्वत् । अश्वताम् । अश्वन् । अश्वः । अस्यते स्थक्—आस्थत् । आस्थताम् । आस्थन् । निरास्थत् । वच उम्—अवोचत् । अवोचताम् अवोचम् । अवोचत । पतः पम् —अपप्तत् । अपप्तताम् । अपप्तन् । तिन्निर्देशान्नयङ्श्लुचि–अशेश्वियत्–अशोशुवत ॥

नशो वेम् ॥ ४ । २ । ८ ॥

नशेर्धातोरङि इमागमो वा भवति । अनेशत् । अनशत् । अनेशम् । अनशम् ॥

ऋद्दृशोऽर् ॥ ४ । २ । ९ ॥

ऋवर्णान्तानां दृशेश्च धातोरिकः अङि परे अर् इत्यय-

मादेशो भवति । मा भवानरत् । अरताम् । अरन् । असरन् । अजरत् । जरा । अदर्शत् । अदर्शताम् । अदर्शन् ॥

जागुः क्ङिति ॥ ४ । २ । १० ॥

जागृइत्येतस्येकः क्ङिति प्रत्ययेऽर् भवति । जागरितः । जागरितवान् । जागर्यते । जागः । क्ङितीति किम्? जागृतः । जाग्रति । जागृहि । जागरितेत्युत्तरेण ॥

शृदृप्रां लिट्यवा ॥ ४ । २ । ११ ॥

शृदृपृणां धातूनामिकः लिटि ऋकारो वा भवति । विशश्रतुः । विशश्रुः । विशशरतुः । विशशरुः । विदद्रतुः विदद्रुः । विददरतुः, विददरुः । निपप्रतुः, निपप्रुः । निपपरतुः । निपपरुः । शश्रवान्, शिशीर्वान् । दद्रुवान्, दिदीर्वान् । पपृवान्, पुपूर्वान् ।

स्कृच्छ्रतः ॥ ४ । २ । १२ ॥

अनुवर्तते स्कृ, ऋच्छोः-ऋकारान्तानां च धातूनामिकः लिटि अर् भवति । स्कृ—संचस्करतुः । संचस्करुः । ऋच्छ—आनर्च्छ । आनर्च्छतुः । ऋत्—कृ, निचकरतुः । निचकरुः । गृ—निजगरतुः निजगरुः । उत्तरेणैव सिद्धे संग्रहणं हल्द्वयग्रहणेषु स्कृञः अग्रहणार्थम् । क्ङिद्वाधवेऽयं सावकाशः । क्त्वो क्त्वेन अधिकेन अक्ङिदिति निषिध्यते तितीर्वान् ॥

हल्भ्यामृदत्तेः ॥ ४ । २ । १३ ॥

हल्द्वयात्परो यः ऋकारः तदन्तस्य अर्तेश्च धातोरिकः लिटि परे अर् भवति । स्मृ—सस्मरतुः, सस्मरुः । द्वृ—दद्वरतुः, दद्वरुः । ध्वृ—दध्वरतुः, दध्वरुः । ह्वृ—जह्वरतुः, जह्वरुः । स्वृ—सस्वरतुः, सस्वरुः । अर्त्तेः—आरतुः आरुः । हल्भ्यामिति किम्? चक्रतु, चक्रुः ॥

यङ्यक्क्याश्शे ॥ ४ । २ । १४ ॥

हल्द्वयात्परो यः ऋकारस्तदन्तस्य अर्त्तेश्च धातोरिकः यङ्, यक् क्यास्, श, इत्येतेषु परतः अर् भवति । यङ्—सास्मर्यते । दाद्धर्यते । दाध्वर्यते । जाह्वर्यते । सास्वर्यते । अरार्यते । यक्—स्मर्यते । स्वर्यते । अर्यते । क्यास् । स्मर्यात् । स्वर्यात् । अर्यात् । शग्रहणमुत्तरार्थम् । यङ्यक्क्याश्श इति किम्? स्मृयात् । संक्रियते । सांक्रियात् । इति लिटि पृथक् स्कग्रहणान्न भवति । वितेस्तीर्यते । विस्तीर्यात् इति तकारान्न भवति । अरियृयात् । अर्यृयात् । इति तिन्निर्देशात ।

रिः ॥ ४ । २ । १५ ॥

ऋत् इति वर्तते । धातोरृकारस्य यङ्यक्क्यास् शे रिशब्द आदेशो भवति । क्रियते । ह्रियते । क्रियात् । ह्रियात । "तुद्स्पृशः" मृ—म्रियते । दृङ्—आद्रियते । दृङ्—द्रियते । पृङ—व्याप्रियते । निचरीकृत्यते । निकृत्यते । निकृत्यात् । निकृन्तति । इति ऋतो व्यवधानन्न भवति । रीविधौ रिबाधनार्थं यङ्ग्रहणात् यङि रिभावाऽभावः ॥

जुस्पक्येङर् ॥ ४ । २ । १६ ॥

धातोरिकः जुसि पकि च परे एङरो भवन्ति—अबिभयुः । अजिह्रयुः । अजुहवुः । अबिभरुः । अजागरुः । पकि—ह्रेपयति । व्लेपयति । रेपयति । क्नोपयति । ङिद्वद्भावं बाधित्वाऽयं सावकाशः ङ्यात् क्यासटोरक्ङिदिति निषिध्यते । इयुः । स्तुयुः । रीयासुः । स्तूयासुः । अविदुः अनेनतुः । इत्यत्र इको जुसो व्यवधानान्न भवति ॥

अक्ङिल्लुग्घेतौ ॥ ४ । २ । १७ ॥

धातोर्विहिते प्रत्यये परे पूर्वस्येकः एङरो भवन्ति । नंक्ङि-

ल्लुग्घेतौ च । जेता । जयति । भविता भवति । सुनोति । तनोति । कर्ता । करोति । तरिता । तरति । धातुनेकः अविशेषणात् प्रत्ययेकोऽपि भवत्येव । अक्ङिल्लुग्घेताविति किम् ? चित्तः । चित्तवान् । कृतः । कृतवान् । अशिश्रियत् । अदुद्रुवत् । निन्ये । लुलुवे । इतः । सुनुतः । तनुतः । जागृतः । जाजाग्रति । लोलुवः । पोपुवः । देद्यः । चेच्यः । चेक्षियः । अलावीत् । हेतुग्रहणं किम् ? रेट् । वेट् । प्रसज्यप्रतिषेधोयं तेन-तितीर्वान् इत्यादौ च न भवति ।

ह्रस्वस्य हलः ॥ ४ । २ । १८ ॥

हलन्तस्य धातोः प्रत्यये परे पूर्वस्येकः ह्रस्वस्य एङरो भवन्ति अक्ङिल्लुग्घेतौ । भेत्ता । गोप्ता । वर्तनम् । वर्तते । ह्रस्वस्येति किम् ? शीकते । पूरयति । कीर्तयति । अक्ङिल्लुग्घेताविति किम् ? भिन्नः । भिन्नवान् । सुत्वा । सुत्वानौ । सुत्वानः । बेभिदः । मरीमृजः । प्रसज्यप्रतिषेधादिह न भवति-आनृच्छान् । एकवर्णव्यवधाने कृतार्थत्वाद्विधेरनेकवर्णव्यवधाने न भवति । भिन्ते । संधुक्षते । वृन्ते । भिनत्ति । इको धातुनेह विशेषणादिह न भवति । अकणिषम् । अरणिषम् । कणितास्वः । रणितास्वः ।

द्व्युक्तेर्नाचिल्यलौ ॥ ४ । २ । १९ ॥

द्वे उक्ती अवृत्ती यस्य सः तस्य द्व्युक्तेः द्विरुक्तस्य धातोरिकः अजादौ लिवर्जितलादेशे परे एङरो न भवन्ति । बेभिदीति । अबेभिदम् । मोमुदीति । असोमुदम् । नेनिजानि । अनेनिजम् । वेविषाणि । अवेविषम् । नर्नृतीति । अनर्नृतम् । द्व्युक्तेरिति किम् ? वेद । वेदानि । अवेदम् । अचीति किम् ?

नेनेक्ति । लीति किम् ? विवर्तिषते । विवर्धिषते । अलाविति किम् ? निनेज । विवेच । वेभेदिषीष्ट ॥

भूस्वोऽद्वे ॥ ४ । २ । २० ॥

न स्तः द्वे आवृत्ती यस्य तदद्विः तस्याद्वेः भू सू इत्येतयोरद्विरुक्तयोरिकः लिवर्जितलादेशे परे एङ् न भवति । अभूत् । अभूः । सुवै । सुवावहै । सुवामहै । भूप्रतिषेधादबोभोत् । अद्वेरिति किम् ? बोभोति । सोषोति । बोभवीति । सोषवीति । लीति किम् ? भवति । अलाविति किम् ? व्यतिभविषीष्ट । आढ्येन भविषीष्ट । योगविभागोऽचीत्येतन्निवृत्त्यर्थः ॥

हल्योरौत् ॥ ४ । २ । २१ ॥

उवर्णान्तस्य अद्विरुक्तस्य धातोरक्ङिल्लुग्घेतौ हलादौ लिवर्जितलादेशे परे इकः औकारो भवति । यौति । रौति । स्तौति । यौषि । रौषि । स्तौषि । यौमि । रौमि । स्तौमि । अयौत् । अरौत् । हलीति किम् ? ब्रवीति । यवानि । रवाणि । इहोकारान्तस्य धातोर्विधानादिह न भवति । सुनोति । सुनोषि । तनोति । तनोषि ॥

वोर्णो ॥ ४ । १ । २२ ॥

ऊर्णोतेरद्विरुक्तस्य अक्ङिल्लुग्घेतौ हलि लयलौ इकः औकारो वा भवति । प्रोर्णोति । प्रोर्णौति । प्रोर्णोषि प्रोर्णौषि । प्रोर्णोमि । प्रोर्णौमि । अद्वेरिति किम् ? प्रोर्णोनोति । पूर्वेण नित्ये प्राप्ते विकल्पः ॥

अल्योत् ॥ ४ । १ । २३ ॥

ऊर्णोतेर्धातोरद्विरुक्तस्य अक्ङिल्लुग्घेतौ हलि लयलौ अलि अल्मात्रे इकः ओकारो भवति । औत्वापवादः । प्रोर्णोत् ।

प्रोर्णोः । अलीति किम् ? प्रोर्णौति ॥

तृणेह् ॥ ४ । १ । २४ ॥

तृणेह् इति तृह् हिसु हिंसायामित्यस्य अक्ङिति हलि श्नमि कृते नकारस्यैत्वं निपात्यते । तृणेढि । तृणेक्षि । तृणेह्मि । तृणेढु । अतृणेट् । अक्ङितीति किम् ? तृढः । हलीति किम् ? तृणहानि । अतृणहम् ॥

ब्रुव ईट् ॥ ४ । २ । २५ ॥

ब्रुवः इगन्तात्परस्य अक्ङितो हलादेर्लिंवर्जितलादेशस्य ईडागमो भवति । ब्रवीति । ब्रवीषि । ब्रवीमि । अब्रवीः । इक इति किम् ? आत्थ । अक्ङित इति किम् ? ब्रूतः । ब्रूते । हलीति किम् ? अब्रवम् । ब्रवाणि ।

यङ्तुरुस्तोर्बहुलम् ॥ ४ । २ । २६ ॥

यङ् श्लुगन्तात्तुरुस्तुभ्यश्च धातुभ्यः परस्य अक्ङितो हलादेर्लिंवर्जितलादेशस्य ईडागमो भवति बहुलम् । प्रियं मयूरः परिनर्नर्तीति । यश्च त्वं नरवर नर्नर्तीषि हृष्टः । नर्नर्त्ति । नर्नर्त्सि । बोभवीति बोभोति । लालपीति । लालप्सि । तौति । तवीति । उत्तौति । उत्तवीति । रौति । रवीति । उपरौति । उपरवीति । स्तौति । स्तवीति । उपस्तौति । उपस्तवीति । भूयो भूयःस्तवीमि क्षितेरुत्तया । तु वृत्तिहिंसापूरणेषु इत्यादिषु स्मरन्ति । अक्ङित इति किम् ? लालप्तः । स्तुतः । स्तुमः । हल इति किम् ? लालयामि । स्तवानि ॥

स्यस्तेस्सोऽलः ॥ ४ । २ । २७ ॥

सिप्रत्ययादस्तेश्च धातोस्सकारान्तात्परस्य अक्ङितो हलादेर्लिंवर्जितलादेशस्य अलमात्रस्य ईडागमो भवति । अकार्षीत् । अकार्षीः । अलावीत् । अलावीः । आसीत् । आसीः ।

स इति किम् ? असेषेत् । अभूत् । स इति विशेषणात्सिः प्रत्ययो गृह्यते न धातुः । अल इति किम् ? अकार्ष्टाम् । अस्ति ॥

अदोऽट् ॥ ४ । २ । २८ ॥

अदेर्धातोः परस्याक्ङितो हलादेर्लिंवर्जितलादेशस्याऽलमात्रस्य अडागमो भवति । आदत् । आदः । अल इति किम् ? अस्ति । अत्सि ॥

ईट् चाजक्षरूद्भ्यः ॥ ४ । २ । २८ ॥

आजक्ष् जक्षीत्यन्तेभ्यः रुद्भ्यः रुदादिभ्यः परस्य क्ङितो हलादेर्लिंवर्जितलादेशस्याटीटावागमौ भवतः । अरोदत् । अरोदित् । अस्वपत् । अस्वपीत् । प्राणत् । प्राणीत् । अश्वसत् । अश्वसीत् । अजक्षत् । अजक्षीत् । अजक्षीति किम् ? अजागः ॥

वल इट् ॥ ४ । २ । ३० ॥

रुदादिभ्यो जक्षन्तेभ्यो धातुभ्यो वलादेर्लिंवर्जितलादेशस्य इडागमो भवति । रोदिति । रुदितः रोदिषि । रुदिथः । रोदिमि । रुदिवः । रुदिमः । स्वपिति । प्राणिति । श्वसिति । जक्षिति । वल इति किम् ? रुदन्ति । अलाविति किम् ? सुप्स्यथ । व्यतिस्वप्सीष्ट ॥

ईशीड्भ्यां स्ध्वे ॥ ४ । २ । ३१ ॥

ईश्ईड्भ्यां परस्य सकारादेर्ध्वे इत्यस्य च वलादेर्लिंवर्जितलादेशस्य इडागमो भवति । ईशिषे । ईशिध्व । ईशिध्वे । ईशिध्वम् । ईडिषे । ईडिध्व । ईडिध्वे । ईडिध्वम् । वचनभेदाद्याथासंख्यं नास्ति । ध्वे इति कृतेत्वस्य ग्रहणात् लङि न भवति । ऐड्ढ्वम् ॥

जल्होर्हो धिः ॥ ४ । २ । ३२ ॥

झलन्तात् हु इत्येतस्माच्च धातोः परस्य लिवर्जितलादेश-हकारस्य धकारादेशो भवति । इकार उच्चारणार्थः । झल्—अद्धि । विद्धि । छिन्दि । भिन्दि । हुः—जुहुधि । जल्होरिति किम् ? एहि । ह इति किम् ? छिन्तात्त्वम् । जुहुतात्त्वम् । जल्होः पर-त्वेन हकारस्य विशेषणादिह हि न भवति-रुदिहि । स्वपिहि ॥

शाध्येधिजहि ॥ ४ । २ । ३३ ॥

शाधि, एधि, जहि इति हौ निपात्यन्ते । शाधीति शास्तेः प्रकृतेः यङ्श्लुगन्तस्य च ह्रासाभावः हेधश्च निपा-त्यते । एधीति अस्तेर्हौ एत्वं हेधश्च । जहीति हन्तेर्हौ जभावः यङ्श्लुगन्तस्यापि । अन्ये यङ्श्लुगन्तस्य नेच्छन्ति जंघहि इति ॥

अद्व्यतः ॥ ४ । २ । ३४ ॥

धातोर्विहिते मकारादौ वकारादौ च लिवर्जितलादेशे परे अकारस्य आकारो भवति । वावामि । वावावः । वावामः । पचामि । पचावः । पचामः । पचावहे पचामहे । वत्स्यामि वत्स्यावः । वत्स्यामः । पत्स्यावहे पत्स्यामहे । अत इति किम् । चिनुवः । चिनुमः ।

इय्यः ॥ ४ । २ । ३५ ॥

धातोर्यो लिवर्जितलादेशस्तस्य यो याशब्दस्तस्यातः परस्य इयादेशो भवति । पचेत् । पचेताम् । पचेयुः । दीव्येत् दीव्येताम् । दीव्येयुः । तुदेत् । तुदेताम् । तुदेयुः । अत इति किम् ? चिनुयात् । पायात् । यायात् । ल इति किम् ? अयात् अयासीत् ॥

आतोऽपः ॥ ४ २ । ३६ ॥

धातोर्य अपि लिवर्जितलादेशस्तस्य य आकारस्तस्यातः परस्य इयादेशो भवति। पचेते।पचेथे। पचेताम् पचेथाम्। अपचेताम्।अपचेथाम्। पक्ष्येते। पक्ष्येथे। अपक्ष्येताम् अपक्ष्येथाम्। आत इति किम्? पचतः। अप इति किम्? पचावहै पचामहै। अत इति किम्? मिमाते मिमाथे॥

श्लुगुसि ॥ ४ । २ । ३७ ॥

धातोर्य उस्तस्मिन्परतः आकारस्य श्लुग्भवति। भिन्द्युः। छिन्द्युः। अपुः। अदुः। उसीति किम्? भिन्द्यात्।

ञेः ॥ ४ । २ । ३८ ॥

धातोर्यो ञिस्ततः परस्य लिवर्जितलादेशस्य श्लुग्भवति। अभावि। अकारि। लीति किम्? कारिष्यते। अकारितमाम्। अलाविति किम्? कारिषीष्ट॥

अतो हः ॥ ४ । २ । ३९ ॥

धातोः परो योऽकारान्तप्रत्ययस्तस्मात्परस्य हकारादेर्लिवर्जितलादेशस्य श्लुग्भवति। भव। दीव्य। तुद। अत इति किम्? युहि। रुहि। याहि। वाहि। अतः प्रत्ययादितीह न भवति-पाहि। वावहि॥

असंयोगादोः ॥ ४ । २ । ४० ॥

असंयोगात्परो य उकारस्तदन्तो यः प्रत्ययो धातोस्ततः परस्य हकारादेर्लिवर्जितलादेशस्य श्लुग्भवति। कुरु। तनु। सुनु। चिनु। असंयोगादिति किम्? अश्नुहि। तक्ष्णुहि अक्ष्णुहि।तक्ष्णुहि। ओरित्यस्य विशेषणादिहापि न भवति-आप्नुहि।राध्नुहि। प्रत्ययविशेषणादिह न भवति। युहि-रुहि॥

म्वि लुग्वा ॥ ४ । २ । ४१ ॥

असंयोगात्परो य उकारस्तदन्तो यः प्रत्ययो धातोस्तस्य

मकारादौ वकारादौ च अपिति लिवर्जितलादेशे परे लुग्वा भवति। तन्वः। तनुवः। सुन्वः। सुनुवः। तन्मः। तनुमः। सुन्मः। सुनुमः। तन्वहे। तनुवहे। सुन्वहे। सुनुवहे। तन्महे। तनुमहे। सुन्महे। सुनुमहे॥ अपीति किम्? तनोमि सुनोमि॥

कुर्यि च॥ ४। २। ४२॥

करोतेः परस्य उकारस्य मकारवकारादावपिति यकारादौ च लिवर्जितलादेशे परे नित्यं लुग्भवति। कुर्वः। कुर्मः। कुर्वहे। कुर्महे। कुर्यात् कुर्याताम् कुर्युः। कृञ् हिंसायाम् कृणुवः कृणुमः। कृणुयात् इत्यत्रोकारो न कुः पर इति न भवति। अपीति किम्? करोमि॥

अतश्शि चोत्॥ ४। २। ४३॥

शित्यपिति यि च लिवर्जितलादेशे य उकारस्तन्निमित्तकस्तस्य कार्यभूतो योऽकारः कृञवयवस्तस्य उदादेशो भवति। कुर्वाणः। कुरुतः। कुर्वन्ति। कुर्वः। कुर्मः। कुर्यात् अत्र उतः कार्यत्वेन विज्ञानादुकारलोपेऽपि भवति। करिष्यते इत्यत्रापि न भवति। अकुरुताम्, अकुरुत इत्यडागमस्य च न भवति। उदिति तकारकरणादस्योकारो न भवति। अपीति किम्? करोति। करोषि। करोमि। लादेशस्योत्वम्। प्रतिनिमित्तविज्ञानात् हेर्लोपेऽपि कुरु॥

मगाने॥ ४। २। ४४॥

धातोर्विहिते आने परे अतः अकारस्य मगागमो भवति। पचमानः। पञ्चयमानः। शिखण्डं वहमानः। करिष्यमाणः। अत इति किम्? अपह्नुवानः॥

आसीनः॥ ४। २। ४५॥

आसेः परस्यानस्य इकारो निपात्यते। आसीनः॥

नमस्त्योर्लुक् ॥ ४ । २ । ४६ ॥

नमोऽविकरणस्य अस्तेश्चाकारस्य ङित्यपिति यि च लिवर्जितलादेशे परे लुग्भवति । रुन्धानः । रुन्धः । रुन्धन्ति । रुन्ध्यात् । भिन्दमानः । भिन्तः । भिन्दन्ति । भिन्द्यात् । सानः । स्तः । सन्ति । स्थः । स्थ । स्वः । स्मः । स्यात् । अपीति किम् ? रुणद्धि । रुणत्सि । रुणध्मि । अस्ति । असि । अस्मि । अत इति किम् ? अन्यस्य मा भूत् । तकारः किम् ? आस्ताम् । आसन् ॥

श्नाज्भेरातः ॥ ४ । २ । ४७ ॥

आप्रत्ययस्य अज्भेः द्व्युक्तेः दरिद्रातेश्च धातोराकारस्य अपिति यि च लिवर्जितलादेशे परे लुग्भवति । क्रीणन्ति । क्रीणन्तु । अक्रीणन् । लुनते । लुनताम् । अलुनत । पुनते । पुनताम् । अपुनत । ददति । ददतु । दद्यात् । मिमते । मिमताम् । अमिमत । उज्जिहते उज्जिहताम् । उदजिहत । यायति । यायतु । बाभति । बाभतु । दरिद्रति । दरिद्रतु । आज्भेरिति किम् ? यान्ति । वान्ति । अपीति किम् ? अक्रीणाम् । अजहाम् ॥

हल्यघोरीः ॥ ४ । २ । ४८ ॥

आप्रत्ययस्य अज्भेश्च घुसंज्ञकस्य धातोराकारस्य अपिति यि च हलादौ रिवर्जितलादेशे परे ईकारो भवति । लुनीतः लुनीथः । लुनीथ । लुनीवः । लुनीमः । लुनीते । लुनीषे । लुनीध्वे । लुनीवहे । लुनीमहे । लुनीयात् । मिमीते । मिमीषे । मिमीध्वे । मिमीवहे । मिमीमहे । दाबदैपोर्यङ्श्लुचि दादीतः । दादीथः । हलीति किम् ? लुनते । मिमते । अघोरिति किम् ? दत्तः । धत्तः । दद्मः दध्मः । दध्यात् । अपीति किम् ? लुनाति । ददाति ॥

इद्दरिद्रः ॥ ४ । २ । ४९ ॥

दरिद्रातेराकारस्य अपिति यि च हलादौ लिवर्जितलादेशे

परे इकारो भवति । दरिद्रितः दरिद्रिथः दरिद्रिथ दरिद्रिवः दरिद्रिमः दरिद्रियात् । अपीति किम्? दरिद्राति दरिद्रासि दरिद्रामि । हलीति किम्? दरिद्रति । लीति किम्? दिदरिद्रसति ॥

भ्यो वा ॥ ४ । २ । ५० ॥

भी इत्येतस्य धातोरपिति यि च हलादौ लिवर्जितलादेशे परे इकारो वा भवति । बिभितः बिभीतः । बिभिथः बिभीथः । बिभिथ बिभीथ । बिभीवः बिभीवः । बिभिमः बिभीमः । बिभियात् बिभीयात् । अपीति किम्? बिभेति । हलीति किम्? बिभ्यति । लीति किम्? भीतः ॥

हाकः ॥ ४ । २ । ५१ ॥

ओहाक् त्याग इत्येतस्य धातोरपिति यि च हलादौ लिवर्जितलादेशे इकारो वा भवति । जहितः जहीतः । जहिथः जहीथः । जहिथ जहीथ । जहिवः जहीवः । जहिमः जहीमः । अपीति किम्? जहाति । हलीति किम्? जहति । सानुबन्धनिर्देशात् हाङः उज्जिहीते संजिहीते । यङ्लुचः जाहीतः ॥

आ च हौ ॥ ४ । २ । ५२ ॥

हाकः हौ परतः इकाराकारौ वा भवतः । जहिहि जहाहि जहीहि ॥

यि लुक् ॥ ४ । २ । ५३ ॥

हाकः लिवर्जितलादेशे यकारादौ प्रत्यये परे लुग्भवति । जह्यात् । जह्याताम् जह्युः । लुगेवेति नियमार्थो योगः । तेन जहियादिति इकारो मा भूत् ॥

क्यस्याचि ॥ ४ । २ । ५४ ॥

धातोः क्सप्रत्ययस्य अजादौ लिवर्जितलादेशे परे लुग्भवति । अधुक्षाताम् अधुक्षाथाम् अधुक्षि । अधिक्षाताम् अधिक्षाथाम् अधिक्षि । अचीति किम् ? अधुक्षत् अधिक्षत् ॥

दुहदिहलिहगुहस्तङि तुवि श्लुग्वा ॥ ४।२।५५॥

दुहादिभ्यः परस्य क्सस्य तवर्गवकारादौ तङि परे श्लुग्वा भवति ॥ अदुग्ध अधुक्षत । अधुग्धाः अधुक्षथाः । अधुग्ध्वम् अधुक्षध्वम् । अदुह्वहि अधुक्षावहि । अदिग्ध अधिक्षत । अदिग्धाः अधिक्षथाः । अधिग्ध्वम् अधिक्षध्वम् । अदिह्वहि अधिक्षावहि । अलीढ अलिक्षत । अलीढाः अलिक्षथाः । अलीढ्वम् अलिक्षध्वम् । अलिह्वहि अलिक्षावहि । न्यगूढ न्यघुक्षत । न्यगूढाः न्यघुक्षथाः । न्यगूढ्वम् न्यघुक्षध्वम् । न्यगुह्वहि न्यघुक्षावहि । तङीति किम् ? अधुक्षत् अधिक्षत् । तुवीति किम् ? अधुक्षामहि ॥

ओतश्श्ये ॥ ४ । २ । ५६ ॥

धातोरोकारस्य श्यप्रत्यये परे श्लुग्भवति । निश्यति । अवच्छयति । अवस्यति । अवद्यति । श्य इति किम् ? गौरिवाचरति गवति ॥

यमगमिषोश्शि च्छः ॥ ४ । २ । ५७ ॥

यम् गम् इषू इत्येतेषां धातूनां शिप्रत्यये छकारादेशो भवति । यच्छति गच्छति इच्छति । शीति किम् ? यन्ता गन्ता एष्टा । यमे गमे ईषे । इषे ऊदितो ग्रहणादिह न भवति इष्यति । इष्णाति ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिश्रौतिधिन्वकृण्वशदसदः पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशृधिकृशीयसीदम् ॥ ४ । २ । ५८ ॥

एकदुःखवति दुःखाभावे सुखारोपादर्शनात् । नापि स्मरणं पूर्वं तदनुभवाभावात् । कालविशेषनिष्ठसकलज्ञानाभावज्ञानं विना सुषुप्तित्वज्ञानासंभवाच्च । न हि पूर्वकालस्य सकलज्ञानाभाववत्त्वं केन चिदनुभवं विना ज्ञातुं शक्यते । न च सकलज्ञानाभावादेः किञ्चिल्लिङ्गादिकमस्ति । उदासीनपदार्थज्ञानानां नियमेन स्मरणाजनकानामभावस्यानुमातुमशक्यत्वात् । व्यवहाराभावस्य ज्ञानाभावानियतत्वात् । तस्यापि दुर्ग्रहत्वात् । करणव्यापाराभावस्य प्रागसिद्धेः दुःखाभावत्वेन दुःखाभावोपस्थितौ वा तत्सुखारोपासंभवेन सुखाकारपरामर्शो न स्यात् । अस्ति च दुःखाभावस्य सुखविरुद्धत्वज्ञानवतामपि तदाकारपरामर्शः ।

दुःखविरोधीत्युपलक्षणं दुःखतुल्यविषयकस्मरणमपि । नास्तीति नेदमप्यनुमानमित्यर्थः । प्रतियोगिनोऽन्यत्र वर्तमानत्वलिङ्गं दूषयति—नवेति । दुःखम्-अन्यकालीनं दुःखमित्यर्थः । सुषुप्तौ दुःखसत्त्वेऽपि कालान्तरीयदुःखाभावस्यापि संभवान्नानेन सकलदुःखाभावसिद्धिरित्याहतदभावस्येति । माऽस्तु सकलदुःखाभावसिद्धिरित्यत आहसुखमहमिति । एतस्यानुमितत्वायोगेन स्मृतित्वेऽपि दुःखाभावविषयतया तत्स्मृतित्वमेव किन्न स्यादित्यत आह नाहीति । स्वापे दुःखाभावानुभवायोगेन तत्स्मरणस्याप्ययोगादित्यर्थः । सुषुप्तिकालीनोऽहं सकलदुःखरहित इति

पक्षविशेषणमपि दुर्ग्रहमित्याह-कालविशेष इति । सकलज्ञानाभावः प्रत्यक्षेणैव ज्ञायत इत्याशङ्क्य तस्य वर्तमानमात्रग्राहकत्वान्मैवमित्याह-न हीति। अनुभवं विनेति। नित्यसाक्षिरूपानुभवं विनेत्यर्थः। अस्तु तर्हि लिङ्गेन तदवगमस्तत्राह-न चेति। किं स्मरणाभावो ज्ञानाभावे लिङ्गमुत व्यवहाराभावः, किं वा सामग्र्यभावः ? । नाद्यः । उपेक्ष्यज्ञानाभावासिद्धेरित्याह-उदासीनेति । न द्वितीयः । मौनिनां व्यवहाराभावेऽपि ज्ञानसत्त्वादित्यभिप्रेत्याह-व्यवहारेति । स्वापे व्यवहाराभावज्ञानायोगादपि न तल्लिङ्गमित्याह-तस्यापीति । तृतीये सामग्र्यभावः किं कार्याभावगम्य उत करणव्यापाराभावगम्यः ?। नाद्यः । परस्पराश्रयात् । अत एव न द्वितीय इत्याह-करणेति । दुःखाभावानुमितिमङ्गीकृत्यापि तस्याः सुखाकारत्वमनुपपन्नमित्याह-दुःखाभावेति । दुःखाभावसुखयोरितरेतरानात्मत्वाज्ज्ञानदशायामेवायमारोप इत्याशङ्क्याह-अस्ति चेति । किं च येन रूपेणाधिष्ठानप्रतीतिः, तत्समानाधिकरणस्यैवारोप्ये प्रतीतिनियमात् दुःखाभावः सुखमित्येवारोपः स्यादित्याह-भवन्नपीति ।

भवन्नपि वा सुखारोपो दुःखाभावः सुखमित्येव स्यात् । एतेन सुषुप्तित्वलिङ्गेन दुःखाभावानुमानं प्रत्युक्तम् । निखिलविशेषविज्ञानविरहलक्षणसुषुप्तित्वस्य ग्रहीतुमशक्यत्वादित्युक्तत्वात् । व्याप्तिलिङ्गादिप्रतिसन्धानं विनापि वर्णितपरामर्शदर्शनाच्च । अत एव पूर्वदिने स्वप्ने चानुभूतजन्यसुखविषयो भवत्विति प्रत्युक्तम् ।

'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति स्वापकालीनत्वनिखिलविषयाज्ञानकालीनत्वयोरपि परामृश्यमानत्वात् तच्च सुखजन्यं न भवति, तदा तत्कारणाभावात् । अजन्ये चात्मधर्मे सुखे प्रमाणाभावादात्मैव तत्सुखम् । कथं तर्हि निर्दुःखमहमस्वाप्समिति परामर्श इति चेत् नायं परामर्शः । तद्धेत्वनुभवाभावादित्युक्तम् । किं तु सुप्तावहं निर्दुःखमासं परामर्शजनकसंस्कारकारणानन्दाभिव्यक्तिरूपत्वात् । परामृश्यमानसुखकालीनजाग्रत्कालीनोऽहमित्येवानुभूयत इति । स चात्मा स्वप्रकाशः । "आत्मैवास्य ज्योतिः । अत्रायं पुरुषः स्वयं ज्योतिः" इति श्रुतेः । एवकारेण स्वयमित्यनेन चात्मव्यवहारानुकूलज्योतिषः प्रकाशस्यान्यात्मत्वाव्यावर्तनात् ।

सुषुप्त्यवस्था दुःखरहिता सुषुप्तित्वाद्व्यतिरेकेण जाग्रद्वदित्यनुमानं दूषयति—एतेनेति । अनुपलब्धिविरुद्धं चेदमनुमानमित्याह-व्याप्तीति । नन्वस्य परामर्शस्य सुखविषयत्वेऽपि न स्वापकालीनसुखसिद्धिः । तदितरकालीनसुखविषयत्वादस्येत्यत आह-अत एवेति । अतःशब्दार्थमाह-सुखमहमिति । ननु स्वापकालीनं सुखं परामृश्यमानमात्मभिन्नमेवेत्याशङ्क्य तत्किं जन्यमुताजन्यम्? उभयथाप्यनुपपत्तिरित्याह-तच्चेति । स्वापे दुःखाभावानुभवाभावे कथं तत्परामर्श इति शङ्कते-कथं तर्हीति । यद्यप्यन्तःकरणतद्वृत्तिविशेषतदभावानां केवलसाक्षि-

वेद्यत्वेन दुःखाभावस्यापि स्वापेऽनुभवान्न तत्परामर्शा-नुपपत्तिः । न च तदा प्रतियोगिज्ञानाभावात्कथं तद-भावानभव इति वाच्यम् । नित्यानुभवस्य तदनपेक्षत्वा त् । इतरथा धाराकाले तदितरज्ञानाभावानुभवायोगात् । तथापि तदनुभवाभावमङ्गीकृत्य परिहारान्तरमाह-नाय-मिति । असौ तर्हि को वानुभव इत्याशंक्यानुमितिरे-वेत्याह—किं त्विति । सर्वविषयाभावरूपाज्ञानलक्षण-सुप्तेः साक्षिसिद्धत्वान्न पक्षविशेषणासिद्धिः । सुखपरा-मर्शो हेतौ परामर्शशब्दार्थः । आनन्दाभिव्यक्तिरूप-त्वादित्युक्ते दुःखकालीनात्मनि व्यभिचारः । तन्निवा-रणाय परामर्शेति । सुषुप्तावानन्दरूपात्मनोऽनुभूयमा-नत्वे वेद्यतयाऽनात्मत्वप्रसङ्ग इत्याशङ्क्याह- स चेति । नन्वत्रात्मनो ज्योतिष्ट्वमेवोच्यते न तु ज्योतिरन्तरा-विषयत्वमित्यत आह—एवकारेणेति । ज्योतिष इत्यस्य व्याख्या प्रकाशस्येति ।

एवकारादेर्द्रष्ट्रन्तरव्यावर्तकत्वान्नात्मनः स्वव्य-वहारानुकूलप्रकाशात्मत्वसिद्धिरिति शङ्कते-नन्विति ।

ननु घटादिज्ञानवदात्मज्ञानेऽपि विषया-तिरिक्तकर्तृकारकत्वशङ्कायां तदेव वार्यते न तु ज्योतिरन्तरमिति चेन्न । ज्योतिष एव विशेष्य-त्वात् । मुख्ये संभवत्युपचारस्यान्याय्यत्वाच्च । लाघवेन चैतन्यमात्रस्यैव लक्ष्यत्वाच्च ।

(नवीनमतम्) अत्राह-नवीनः । अत्र नात्मस्वप्रकाश-त्वमुच्यते । आदित्यादिज्ञानसाधनानामभावे किं ज्ञानसाधनं जीवस्येतिपृष्टे आत्मैवेत्युत्तरम् ।

आत्मा च परमात्मैव । स्वप्नेन शरीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीतीति तल्लिङ्गात् । द्युभ्वाद्यधिकरणन्यायेनात्मशब्दस्य परमात्मनि मुख्यत्वाच्च । अस्यायं पुरुषः स्वयं ज्योतिरित्युपसंहरेऽप्यस्येत्यनुषङ्गेणायमीश्वरोऽस्य जीवस्य स्वयमेव ज्योतिर्ज्ञानहेतुरित्येवं परः । ज्ञानसाधनप्रायपाठात् । आत्मैवास्य ज्योतिरिति ज्योतिरात्मनोर्भेदनिर्देशाच्चेति । तन्न । तथा सति एवेति स्वयमिति च श्रुतिद्वयविरोधात् ।

द्रष्टुः श्रवणे तस्यान्यत्वं व्यावर्त्येत । न च स श्रूयते । ज्योतिष एव विशेष्यतया श्रवणादित्याह-नेति । मुख्यवृत्त्याऽश्रवणेऽपि जघन्यवृत्त्या श्रूयत इत्यत आह-मुख्य इति । तेजोवाचिनो ज्योतिःशब्दस्य सिद्धान्तेऽपि ज्ञाने लक्षणैवेत्याशङ्क्य तत्कर्तृलक्षणातस्तन्मात्रललक्षणैव लघीयसीत्याह-लाघवेनेति । ज्योतिःपदस्य चैतन्यकर्तृपरत्वाभावेऽपि न तत्परत्वं प्रश्नप्रायपाठाभ्यां ज्ञानसाधनपरत्वस्यैव वक्तव्यत्वादित्यर्वाचीनमतमनुवदति- अत्राहेति । आदित्यादीति । अस्तमिते आदित्ये याज्ञवल्क्यः । चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इति याज्ञवल्क्यं प्रति जनकेन पृष्टे इत्यर्थः । ज्ञानाश्रयस्य जीवस्य कथमादित्यादिवत् ज्ञानसाधनत्वमित्यत आह-आत्मा चेति । आत्मशब्देन कथमीश्वरपरिग्रह इत्यत आह-स्वप्नेनेति । असुप्त एव सुप्तानभिचाकशीति । सर्वज्ञः

पश्यतीत्यमुप्तत्वादिपरमात्मलिङ्गस्यैवोत्तरश्रवणादि-त्यर्थः । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथात्मानमिति श्रुतावात्म-शब्दः परमात्मनि मुख्य इति "द्युभ्वाद्यायतनं स्वश-ब्दात्" अ० १ पा० ३ अधि० १ ब्र० सू० १ इत्यधि-करणे निर्णीतत्वात्, अत्रापि स एवात्मशब्दार्थः । तथा च ज्ञानसाधनमेव ज्योतिःपदार्थ इत्याह-द्युभ्वा-दीति । नन्वत्रायं पुरुषः स्वयं ज्योतिरित्युत्तरवाक्ये प्रत्यक्षसिद्धजीवस्य श्रवणात्तद्विरुद्धः परमात्मपरिग्रह इत्यत आह-अन्यमिति । "आदित्येनैवायं ज्योति-षाऽऽस्ते, चन्द्रमसैवायं ज्योतिषास्ते" इत्यादिना ज्ञान-साधनेषु ज्योतिःशब्दश्रवणादात्मैवेत्यत्रापि स एव तदर्थ इत्याह-ज्ञानसाधनेति । इदं शब्दार्थस्य तमनो ज्योतिः-शब्दार्थस्य ज्ञानस्य च श्रुत्या भेदनिर्देशान्न तयोरभेद इत्याह-आत्मैवेति । परमात्मा जीवज्ञानसाधनमित्यर्थ-परत्वकल्पनायामेवकारादिवैयर्थ्यप्रसङ्ग इति दूषयति-तन्नेति ॥

किमनयोरयोगव्यवच्छेदकत्वं उतान्ययोगव्यव-च्छेदकत्वम् ? । उभयथाऽप्यसंभव इत्याह-नह्येते इति ।

(एवस्वयंश्रुत्योरयोगान्ययोग-व्यवच्छेदकत्वा-सम्भवः ।)

न ह्येते श्रुती ईश्वरस्यायोगं व्यव-च्छिन्तः । निखिलजगन्निर्मातुस्तस्य जैवज्ञानेऽ-योगशङ्काभावात् । नाप्यन्ययोगं, स्वप्नेऽपि मनः-प्रभृतीनां विज्ञानसाधनानां भूयसां सत्त्वात् ।

बाह्यार्थविशेष्यप्रमारूपस्वप्नज्ञानस्य मनःकरणत्वायोगात् । ईश्वरस्यैव करणत्वे ईश्वराख्यप्रमाणान्तरप्रसङ्गाच्च । मनःपदसाधारणसहकारितया बाह्यप्रमां जनयेत् तस्य प्रमाणान्तरत्वनियमात् । ईश्वरस्य साधारणत्वे वा तदतिरिक्तासाधारणकारणाभावात्स्वप्नप्रमाऽयोगात् । अस्त्वीश्वरस्यापि प्रमाणत्वमिति चेन्न । धर्मिग्राहकश्रुतया सर्वोपादानकर्त्रात्मना स्थितस्य करणत्वायोगात् । ज्ञानसाधनप्रायपाठाभावाच्च ।

तथा हि—नित्यज्ञानस्य करणानपेक्षणादुपक्रमेऽपि व्यवहारनिमित्तप्रकाशविषय एव प्रश्नः । ज्योतिषास्ते पल्ययत इत्याद्युत्तरे तथैव दर्शनात् । न त्वमुकेन जानातीत्युत्तरमस्ति ॥

ननु मनसो बहिरस्वातन्त्र्यात्स्वप्ने कारणान्तरस्योपरमाद्बाह्यार्थविशेष्यकज्ञाने परमात्मैव कारणमित्यन्ययोगव्यवच्छेदेनार्थवत्त्वमित्यत आह-बाह्यार्थेति । तत्र हेतुमाह-मन इति । यन्मानानपेक्षप्रमां यदसाधारणकारणसहकारितया मनो जनयति । ततस्तन्मानान्तरमिति नियमादीश्वरस्यापि प्रत्यक्षाद्यनधीनस्वप्नप्रमायामसाधारणकारणत्वे ततः प्रमाणान्तरत्वं दुर्वारमित्यर्थः । बाह्यप्रमायामेव मनसः करणसहकारित्वं न त्वान्तरप्रमायामिति दर्शयितुं बाह्यप्रमामित्युक्तम् । तर्हीश्वरोऽसाधारणकारणमेव न भवतीत्याशङ्क्याह-ईश्वरस्येति । प्रमायोगादिति । न चेष्टापत्तिः । तस्य

नवीनमते प्रमात्वादिति भावः । ईश्वराख्यप्रमाणान्तरं नानिष्टमिति शङ्कते-अस्त्विति । स्वप्नसृष्टेः परमार्थत्वात्तत्र मानान्तरत्वाभावाच्चेति भावः । "तदैक्षत यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्या जगत्कर्तृत्वोपादानत्वरूपेण सिद्धस्य कर्तृपरतन्त्रकरणभावो विरुद्ध इत्यभिप्रेत्याह-न धर्मीति । यदुक्तं ज्ञानसाधनप्रायपाठादात्मनो ज्ञानसाधनत्वमेव ज्योतिःपदेनोच्यत इति तदप्यसिद्धमित्याह-ज्ञानसाधनेति । किं नित्यज्ञानसाधनत्वेनादित्यादिप्रायपाठ उत वृत्तिज्ञानसाधनत्वेन ? । नाद्य इत्याह-नित्येति । न द्वितीयः स्वप्ने वृत्तिज्ञानसाधनप्रायपाठ इत्याह-उपक्रमेऽपीति । पल्ययते—परितो गच्छतीत्यर्थः ।

ननु आदित्यादिज्योतिषः स्वतो व्यवहाराजनकत्वेन वृत्तिद्वारेणैव तद्वक्तव्यम् । तद्वदात्मनोऽपीत्यत आह-एवमिति ।

(आत्मशब्दस्य द्युभ्वाधिकरणेन परमात्ममात्रपरत्वाशङ्कानिरसनम् ।) एवं परंपरानिमित्तेषूक्तेषु साक्षाद्व्यवहारनिमित्तप्रश्नस्योत्तरमात्मैवास्य ज्योतिरिति । तथा चात्मैवात्मादिव्यवहारनिमित्तम्—प्रकाश इत्येवार्थः । न त्वस्य ज्ञानकरणमीश्वर इति । आत्मैवास्येति भेदनिर्देशोऽपि अहमर्थातिरिक्तात्मप्रकाश इति न विरुध्यते । अत एवोपसंहारेऽपि नानुषङ्गगौरवम् । अयमिति च प्रश्नेष्विव जीवपरामर्शोऽप्युपपद्यते । यच्चात्मशब्दस्य परमात्मन्येव मुख्यत्व-

यथा नात्रत्यासन्नतिदुरासु भ्रमणादिको विषयदोषः, नापि चलनादिरूप आधारदोषः, न तिमिराद्युपप्लवोऽक्षाणां, नापि मनसो मिद्धाद्युपहतत्वमिति कारणगुणपर्यालोचनादबाधितत्वं निश्चीयते तथा नायं शास्ता रागद्वेषोपहतो नाप्यज्ञ इति। आप्तगुणपर्यालोचनात्। अनुज्ञानस्याप्यबाधितत्वं निश्चित्या-संवादेऽपि प्रेक्षावन्तः प्रवर्तन्त इति युक्तम्। कारणगुणगुणनिश्चयश्च यश्च क्वचिदबाधितत्वेन। न चेतराश्रयत्वम्। व्यक्तिभेदात्। अनादित्वाच्च संसारस्य ।यदप्यभ्यधायि—इन्द्रियाणामतीन्द्रियत्वाद् गुणानां कथं प्रत्यक्षादिना ग्रहणमिति। तदेतद्दोषेष्वपि समानम्। तेऽपि हि न प्रत्यक्षादिना प्रतीयन्ते। अथ मिथ्यात्वात्तन्निश्चयः। सम्यक्त्वाद् गुणानां किं न भवति। अथ घटस्योदकाहरणलक्षणशक्तिमृत्तिपिण्डान्न भवति। तच्छक्तिविकलत्वात्तस्य तथाऽर्थतथात्वप्रकाशनशक्तिः प्रमाणरूपा कारणेष्वसती भवन्ती उत्पत्तौ स्वत इत्युच्यते। किमयथार्थप्रकाशनशक्तिः कारणेष्वस्ति, न वा?। नेति चेत्। कथमप्रमाण्यं परतः?। अपि च सा शक्तिः सतो भिन्ना, किं वाऽभिन्ना, अथ भिन्नाभिन्ना, अथोभयनिषेधः?। यद्यभिन्ना, अप्रमाण्यशक्तिरपि शक्तिमत्स्वरूपवन्न दोषेभ्यः स्यात्। अथ भिन्ना तर्हि प्रामाण्यजननशक्तिरपि कारणेभ्यो भिन्ना। न चात्र व्यवस्थितविभाषा। अथ सा नास्ति। कारणेष्वशक्तादुत्पद्यमानं प्रमाण्यं सर्वस्मादुत्पद्येत अहेतुं वा स्यात् ततश्च सर्वत्र स्यात् न वा क्वचिदिति। किंच सा शक्तिमति सम्बद्धा, असम्बद्धा वा?। यद्यसंबद्धा न तस्य सा। अथ संबद्धा तदा कार्यकारणभावान्नापरो व्यतिरिक्तस्य सम्बन्धः। तत्र यदि शक्तिमता शक्तिर्जन्यते इति पक्षस्तदा किं तेन शक्तेन जन्यते, किं वा ऽशक्तेन?। यद्यशक्तेन

तदाऽन्येनापि जन्येत । अथ शक्तेन तदाऽपि यदि सा शक्तिरभिन्ना तदा पूर्वोऽपि तथैवास्तु किं भेदकल्पनया । अथ भिन्ना तदा तदेव वाच्यं तदेवोत्तरमित्यनवस्था सम्बन्धान्तरं च निषेत्स्यमानमास्त इत्यास्ताम् । व्यतिरेकाव्यतिरेके च प्रामाण्यं स्वतः परतश्च स्यात् । उभयनिषेधस्तु वस्तुनो नोपपद्यते इति । नहि तदेव तदानीमेव विधीयते निषिध्यते चेति युक्तम् । तन्नोत्पत्तौ स्वतः प्रामाण्यम् । स्वकार्यपरिच्छेदे तु प्रवर्त्तमानमप्रमाणमपि न किंचित् परमपेक्षत इति स्वतः स्यात् । अस्वसंवेदनवादिनस्तु ज्ञानस्वरूपमपि न स्वतः सिद्धं कुत एव तद्गतं प्रमाण्यमिति । यच्चोक्तम्—किं बाध्यं किं बाधकं कश्च तदभावइति । तन्नासत्प्रकाशनसामर्थ्यं मिथ्यात्वं वाच्यम् । तथाहि—ज्ञानस्य सदर्थप्रकाशनशक्तिरिवासदर्थप्रकाशनशक्तिरप्यस्ति । किं नामन्तं सर्वमेव प्रकाशयतीति चेत् । न, नियतविषया हि भ्रान्तयो भवन्ति । यदपि क्वचित् किंचित् प्रकाशयतीति । तच्च क्वचिद्बाह्यसादृश्याद् भ्रमहेतोः, क्वचिद्विचित्रानुभवाहितवासनाप्रबोधविपर्यासादिति । तथा बाधकमपि समानजातीयं वा समानकालं भिन्नकालं वा एकसन्तानवर्त्ति वा एकविषयं मन्यन्ते । ननु यदेव बाध्ये विज्ञाने वस्तु प्रतिभातं तदेव यद्यतं बाधकेऽपि प्रतिभाति तत्कथं तद्बाधकं संवादकमेव स्यादित्युक्तम् । नाद्यतं प्रतिभाति किंतु यदेव हि मिथ्याज्ञानेनासदाकारारोपेण वस्तु प्रतिपन्नं तदेव बाधकेन तदाकारनिरासेनान्यथा प्रतीयत इति । अथैकवस्तु उभयविज्ञानगोचरचारि । अन्यथा प्रतिभासे इति नास्तीत्युच्यते । क्षणिकाद्वा । तत्र यतो विज्ञानप्रतिभासभेदवदभेदप्रतिभासोऽपि आत्मनोऽस्ति । तथाहि—तदेवेदं वस्तु

मरुमरीचिकारूपेणेदानीं चकास्ति । जलात् पूर्वं जलरूपेण प्रतिभातमासीदिति । एतच्च क्षणिकत्वनिराकरणप्रस्तावे प्रतिपादयिष्यामः । तथा तुच्छरूपमनभ्युपगच्छतां सदसदात्मकवस्तुवादिनां न तत्पक्षक्षेपः क्षतिमावहतीति । ततो वस्तुग्राहि प्रमाणं प्रमाणान्तरशून्यमात्मानं वेदयमानं स्वग्राह्यमारोपितासदाकारविविक्तं च प्रतिपद्यमानं ज्ञानं ज्ञेयाभावव्यवहारं प्रवर्तयतीति कथं न बाधकाभावनिश्चय इति । तस्मात् स्थितमबाधितं प्रमाणमिति । ततः साधूक्तं बाधविवर्जितमिति । सूक्तमिति । प्रमाणोपपन्नं लक्ष्यते व्याप्यते प्रामाण्यं तादात्म्यादनेनेति लक्षणमिति । अत एव तद्भावस्तद्भावे तदभावे बाऽभाव इति दर्शयितुमाह-वेदे स्वरोदय इति ।

वेदे स्वरादयो नैव प्रमाणं बाधसंभवात् ।
प्रमाणं बाधवैकल्यादर्हंस्तत्त्वार्थदर्शिनः ॥

वेदेस्वरश्चादिग्रहणात्प्रधानान्तरज्ञानपरिग्रहस्तेन प्रमाणं व्यापकाभावात्तदभावश्च विरोधिसन्निधेस्तदेवाह—बाधसंभवादिति । बाधनं बाधस्तदसंभवात् । बाधाबाधयोः परस्परविरोधात् । निमित्तेन निमित्तिनं दर्शयति—प्रमाणमित्यादि । शक्रादिभ्यः पूजामर्हतीति यद्वा रागादीनरीन् हन्तीत्यर्हन् । तत्त्वं जीवादयः सप्त पदार्थास्तान् वेदयतीति नन्द्यादिभ्यो युः । तत्त्ववेदनेन हिं हेतोः सिद्धिं दर्शयति । यत एव तत्त्ववेदनोऽत एव तज्ज्ञेयेऽतत्त्वारोपनिरास इति । एतच्च सर्वज्ञसिद्धौ दर्शयिष्यते । चोदनायास्तावदपौरुषेयत्वनिबन्धनं प्रामाण्यं समूलमुन्मूलयितुमाह । वचस इत्यादि । अनेन हि प्रयोगार्थो दर्शितः । प्रयोगस्तु यद्येनासंभवद्विशेषस्वरूपं तत् तेन सकलमेव समानहेतुकः । यथाऽसंभवद्विशेषः पटः पटान्तरेणासंभवद्विशेषाणि

वा पौरुषेयत्वेनाभिमतानि बाध्यानि पौरुषेयैर्वाच्यैरिति । न तावदयमसिद्धो हेतुः । यतः सविशेषो दृश्यो वा स्याददृश्यो वा । दर्शनाभावान्न दृश्यदुर्भगत्वादिः । दृश्यतद्वतिचेत् । न, जैनेन्द्रघृषितेत्यादिष्वपि पौरूषेयेषु तस्य भावात् । विषापनयनादिको विशेष इति चेत् । न, तस्य शाबरेष्वपि मन्त्रेषु भावात् । न च सत्यतपः प्रभावतां सङ्केतमात्रतयाऽस्य मन्त्रत्वमुपलभ्यते । ते हि कांचन देवतां समाराध्य यामिमामस्मद्ग्रथितां वर्णपदक्रमरचनामध्येष्यते । तस्मै त्वयेदं फलं दातव्यमिति सङ्केतयन्ति । अन्यथा नित्यान्मन्त्रात् सर्वदा फलदा न प्रवृत्तिः स्यात् । यतो हि भावशक्तेः फलोत्पत्तिः साऽविकलेति न फलवैकल्यं कदाचिदपि स्यात् । न हि कारणसाकल्ये कार्यवैकल्यं युक्तिमत् । तस्याकारणत्वप्रसङ्गात् । अथ न केवलान्नित्यमन्त्रादिष्टफलसिद्धिः, किं तर्हि विधानादिसहकारिकारणसव्यपेक्षादिति । ननु यदि मन्त्राः विधानादन्यतो वा क्वचित् स्वभावातिशयमासादयेयुस्तदाऽपेक्षतां सहकारि कारणम् । न चासादयन्ति । तथाहि—स सहकारिणा विधीयमानो विशेषस्तेभ्यो व्यतिरिक्तो वाऽव्यतिरिक्तो वा स्यात्? । व्यतिरेके ते स्वरूपेण निरतिशया एव । विधानादिसहकारिसन्निधानेऽपि पूर्वकालवन्न फलं दद्युः । अव्यतिरेके तेषामनित्यताप्रसक्तेः । तथा च पौरुषेयत्वमेव स्यात् । किञ्च यदि भावशक्त्यैव संस्कार्या मन्त्राः फलं प्रयच्छन्ति तदा तदा यजमानस्येवान्यस्यापि सिद्धिविधायिनो भवेयुः । न ह्यन्यं प्रत्यविचलितरूपो भावोऽतद्भावो भवति । तेन तस्य कस्यचित् स्वभावस्यानपाकरणात् । अन्येन वा कस्यचित् स्वभावस्यानुत्कर्षणात् । तन्नापौरूषेया मन्त्राः । अवैदिकानां च जैनादियन्त्रकल्पानां पुरूषप्रणीतानां दर्शनात् । तन्नाप्यपौरुषेयत्वकल्प-

नायां नापौरुषेयमवितथ्यं स्यात् । तथाहि—जैनेतरयोर्मन्त्रकल्पयोर्हिंसामैथुनमिथ्यादर्शनादयोऽनभ्युदयहेतवोऽन्यथा च वर्ण्यन्ते तत्कथमेकत्र विरूद्धाभिधायि द्वयं सत्यं स्यात् । जैनानाममन्त्रत्वे तदन्यत्रापि कोशपानं करणीयं स्यात् । विषकर्म्मादिकृतोऽपि हि जैनाद्यमन्त्रास्तदन्यत्रापि मन्त्रत्वं न स्यात् । मुद्रामण्डलध्यानेन रचनक्षरैः कर्म्माणि विषापनयनादीनि क्रियन्ते । नैव तान्यपौरुषेयाणि नित्यानि वा युज्यन्ते । तेषां पुरुषक्रियासंभवे ऽक्षररचनायाः कः प्रतिघातः पुरुषाणां येन मंत्रत्वं विशेषो भवेत् । अथ यदि सत्यतपःप्रभाववत् पुरुषप्रभावौ मन्त्रकल्पौ कथं परस्परविरोधिनौ । न वै सर्वत्र नौ सत्यतपःप्रभाववत् पुरुषप्रभावः किन्तु क्षुद्रदेवताप्रतिज्ञालक्षणोऽपि हिंसाद्यनुष्टानसाध्यफलः कश्चिदिति न पौरुषेयत्वे विरोधः । अथ वेदेतरयोस्तल्लक्षणोऽस्त्येव विशेषः । सत्यम् । अस्ति न केवलं तयोरेव न, किं तर्हि डिंडिकपुराणेतरयोरपि । न स क्रियाभेददीपनो नाम भेदः पुरुषकृतिं बाधते । अन्यत्रापि प्रसङ्गात् । यदि च तादृशीं रचनां पुरुषाः कर्तुं न शक्नुयुः कृतां वाऽकृतसङ्केतो विवेचयेदियं पुरुषकृता नेयमिति तदा व्यक्तमपौरुषेयो वेदः स्यात् । तन्न दृश्यो विशेषः । नापि द्वितीयः । अनुपलभ्यमानस्य विशेषकत्वात् । नागृहीतं विशेषणं विशेष्यं विशेषयति । अथ यथा विषं नागरस्वरूपादनुपलभ्यमानशक्तिकमविशिष्यते तथा लौकिकवैदिकयोः स्वरूपभेदानुपलक्षणे महान् विशेषः । ननु विषस्वरूपान्न काचिदपरा शक्तिरस्ति या भेदिका स्याद्भवतु वा । तत्र व्यतिरिक्ता, अव्यतिरिक्ता वा शक्तिः सा कार्यदर्शनाद्व्यवस्थाप्यते । अत्र किञ्चित् कार्यमस्ति यद्दर्शनाद्भेदव्यस्था स्याद् । अथात्रापि प्रमाणलक्षणे विशेषेऽपौरुषेयत्वं सत्यपौरुषेयत्वे वि-

शेष इतीतरेतराश्रयत्वम् । किञ्च किल गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयत्वात् तदभावे तन्निबन्धनस्याप्रमाण्यस्य निवृत्तेः प्रमाण्यं वेदे भविष्यतीति परस्याशयः । तर्हि गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयत्वात्तदभावे तन्निबन्धनस्य प्रामाण्यस्य निवृत्तावनर्थत्वमेव वेदस्य स्याद्विपर्ययो वा । तथाहि—ज्योत्स्नादयोऽपौरुषेया अपि रात्रौ पीते वस्त्रादौ रक्तज्ञानहेतुतां प्रतिपद्यमानाः मिथ्याज्ञानहेतवो दृश्यन्ते । तन्नापौरुषेयत्वात् प्रामाण्यम् । किं चापौरुषेयत्वं प्रत्यक्षेण वा व्यवस्थाप्यते अनुमानेन वा ? । न तावत् प्रत्यक्षेण । तस्याक्षानुसारितया प्रवृत्तेः । अक्षं च वर्त्तमानकालभाविनि वस्तुनि प्रत्यासीदति । अतस्तदनुसारिणी धीस्तावत् कालस्यैवार्थस्य व्यवस्थापिका, नातीतानादिकालस्य । भावकालस्य पौरुषेयता दुर्निवारा स्यात् । अनादिकाललिङ्गितस्य वेदस्यापौरुषेयत्वमध्यक्षग्राह्यमभ्युपगच्छतो मीमांसकस्य सार्वज्ञाभ्युपगमो विरुद्धवचः स्यात् । तन्नाध्यक्षग्राह्या पौरुषेतया । नाप्यनुमानग्राह्या । यतोऽनुमानं लिङ्गबलेनोदयमासादयति । नचापौरूषेयत्वप्रतिबद्धं किञ्चनापि लिङ्गमस्ति । यद्बलेनानुमानमुदयमासादयेत् । कर्त्तुरस्मरणं लिङ्गमिति चेत् । ननु तदस्मरणं वादिनो लिङ्गत्वेनोपपादीयेत, सर्वस्य वा ? । न तावद्वादिनः । तस्य सकर्तृकेऽपि सद्भावेनानैकान्तिकत्वात् । नापि सर्वस्य । तस्यासिद्धत्वात् । तथाहि—स्मरन्त्येव बौद्धाः वेदस्य कर्तृत्वम् । अष्टकादीन् काणाश्चहिरण्यगर्भवन्तं न तदस्मरणं हेतुः । अथ छिन्नमूलं वेदे कर्तुरस्मरणम् । तथाहि—अनुभवो मूलं स्मरणस्य । न च वेदे कर्तुरनुभवः । ननु केन कर्तुरनुभवः ? । किं प्रत्यक्षेण उतानुमानेन ? । तत्र यदि प्रत्यक्षेण कर्तुरननुभवाद्वेदे छिन्नमूलं स्मरणं

तदाऽऽगमान्तरेऽपि प्रत्यक्षेण वादिप्रतिवादिभ्यां कर्तुरननुभवा-च्छिन्नमूलमस्मरणं स्यादिति । तदप्यपौरुषेयत्वं प्रसज्यते । अथा-नुमानेन तदाऽनुमानस्य वेदकर्तृसाधकस्य प्रतिपादितत्वात् कथं च्छिन्नमूलमस्मरणम् । अथानुमानमनेन बाध्यते तदेत-रेतराश्रयत्वम् । तथाहि-तद्बाधेऽऽगमस्य प्रामाण्यम् । अस्य च प्रामाण्ये तद्बाध इति । अथागमान्तरे प्रयोजनाभावात् कर्तुरु-पलम्भे यत्नं वादी न कृतवात् तेनानुपलम्भः । तन्न, कृतयत्ने-नापि केषांचिद्वटे वटवैश्रवणादिना कर्तुरनुपलम्भात् । अथ वैदिकेषु कर्म्मसु प्रचुरव्ययेषु बह्वायासेषु च प्रवर्त्तमानो यत्ने-नापि कर्त्तारमुपलम्भं कृतवान् न चोपलब्धवान् । ततो ज्ञायते नास्ति कर्ता । तत्रानुलब्धिलक्षणप्राप्तेषु देशकालस्वभावविप्रकृष्टेषु यत्नवतोऽप्यनुपलम्भो नासतां शोधयतीति । नास्मर्यमाणकर्तृ-त्वमनुमानं नाप्यर्थापत्तिरभावप्रमाणं वा । तयोर्निराकरिष्य-माणत्वात् । नापि "यद्वेदाध्ययनं तदध्ययनपूर्वम् । वेदाध्ययनत्वा-त् । इदानीन्तनाध्ययनवत्" इत्यव्यभिचारि साधनम् । अन्य-था "यः पथिकाग्निः सकलापूर्वको नारणिनिर्मथनपूर्वकः । पथिकाग्नित्वात्" इदानीन्तनपथिकाग्निवदित्यादेरपि साध-नता स्यात् । एवमन्यदपि यदपौरुषेयतासाधनं तदविद्यमानप्रति-बन्धं सर्वमनैकान्तिकमेव । तन्नानुमानावसेयाऽप्यपौरुषेयतेति । किञ्चायमपौरूषेयवाद्याह—

समयः प्रतिसत्यं वा प्रत्युच्चरणमेव वा ।
क्रियते जगदादौ वा सकृदेकेन केनचित् ॥

अयं हि पुरुषेण बन्धः क्रियमाणः प्रतिसत्यं किमेकः क्रियते, किं वाऽनेक इति? । एकत्वे कृतको न स्यात् । पूर्वमेव सिद्धत्वात् । अनेकेऽपि किं सर्वे वाचकाः, किं वा

तेषां मध्ये एकः कश्चिदिति ?। यद्येकस्तदा तदभावे शेष-संबन्धसद्भावे ऽपि प्रतीतिर्न स्यात्। सर्वेऽपि वाचकाः किं समु-दिता, अथान्यथा ?। तत्र सर्वसंबन्धानां समुदायाभावान्न किञ्चित् केनचित् प्रतीयते। अथ किमनेन यस्य यः संबन्धः स तेन प्रति-पत्स्यत इत्यस्तु नाम्नैवम्। यदा पुनर्बहुभिः पुंभिरेकस्य समानार्थाः बहवः संबन्धाः क्रियन्ते तदा किं प्रावृत्तिकन्यायेन किं विकल्पेन किं वा समुच्चयेन प्रतिपादयेयुः ?। तत्र प्रावृत्तिक-क्रमो यदा पशूनां पत्त्यास्थितानामालम्भनार्थं शलाकया चतुरञ्जनं क्रियते तदा यस्य प्रथमं नयनाञ्जनकृतस्तस्यैव वध इति तेन न्यायेन यः प्रथमः संबन्धः कृतस्तेनैवार्थप्रतिपत्ति-रिति तर्हि शेषाणामानर्थक्यमिति। अथ विकल्पो भवति। यत्रैकमुपादाय परोपादाने यत्ने स्यादिह तु प्रथमेनैव प्रतिप-न्नत्वात् किमन्येन। व्यवहारस्याप्रतीतेः। समुच्चयोऽपि नैवास्ति। तदुक्तम्—समुच्चयोऽपि नैवेषामिति। तदेवमाद्यस्यापि पौरुषे-यसंबन्धस्य पाश्चात्यसंबन्धवन्नार्थं प्रतिपादकत्वमिति। किं च पुरुषः किं प्रतिपन्नार्थं पूर्वसंबन्धः करोति किं वाऽप्रतिपन्ना-र्थमिति ?। पूर्वस्य कृतत्वात् किं तस्य करणेन। अपूर्वस्य करणे नार्थप्रतीतिः स्यात्। श्रोतुस्तदेव भविष्यतीति चेत् कथं वक्ताऽप्रतिपन्नार्थं करोति। तस्मान्न पौरूषेयः संबन्धः किंत्वर्थ-प्रतिपत्त्यन्यथानुपपत्त्या शब्दस्य वाचिका शक्तिरर्थस्य तद्वा-च्यशक्तिरयमेवासौ संबन्ध इति। नित्यत्वेऽपि यस्यैव प्रतीत-स्तस्यैव प्रतीतिं जनयति नान्यस्येति तदेतदविदितपरमार्थस्य प्रलपितम्। तथापि-न नित्यः संबन्धः पुरूषेण कश्चित् क्रियते किं तु सङ्केतमात्रादक्षिनिकोचवच्छब्दादर्थप्रतीतिरिति। तन्न कश्चिन्नित्यः संबन्धः। शब्दस्य नित्यत्वात् तस्यापि नित्य-

REPRINT FROM THE PANDIT.

THE
PADĀRTHADHARMASANGRAHA
OF PRAÇASTAPĀDA
WITH THE NYĀYAKANDALĪ OF ÇRĪDHARA.

TRANSLATED INTO ENGLISH

BY

MAHAMAHOPADHYAYA

GANGANATHA JHA, M. A., D. LITT.,

Professor of Sanskrit, Muir Central College,

ALLAHABAD.

PRINTED BY AMBIKA CHARAN CHAKARVARTI AT THE
MAHAMANDAL SHASTRA PRAKASHAK SAMITI PRESS, LTD.

AND

PUBLISHED BY BHAGAVATI PRASAD B. A.,
FOR PUBLISHERS,
E. J. LAZARUS & Co.,
MEDICAL HALL PRESS, BENARES.

1916.

CONTENTS.

DEDICATORY ÇLOKA.

पित्रोस्तीर्थलतालीथनाथयोः पादयोरिदम् ।
भ्रातुः श्रीविन्ध्यनाथस्यार्पितं लक्ष्मीश्वरस्य च ॥

INTRODUCTION.

According to the custom current among modern writers, it should be my duty here to deal with the date of the work here translated. But the most unfortunate thing is, as I have often said, that I have no faith in the methods of reasoning employed in fixing the dates of old writers. I shall therefore make no attempt at this unncongenial task. I might have supplied my readers with what other people have said on this subject. But this has been already done—and done in a manner very much better than I could ever do—by the learned translator of the *Vaishesika-Sutras* in the 'Sacred Books of the Hindus' series.

I shall therefore content myself with brief notes on some of the ideas that have struck me in course of my work on Praçastapāda's *Bhāsya*.

The first point to notice in this connection is the exact nature of the work. It is known, and has been known, as the '*Bhāsya*' on Kanāda's Sutras. But the name 'Bhāsya' has been explained as :—

सूत्रार्थो वर्ण्यते येन पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

'The *Bhāsya* is that which explains the meaning of the Sutra by means of words in accordance with the Sutra, and which also offers explanations of its own statements'.

Judged by this definition, Praçastapāda's work is not entitled to the title of 'Bhāṣya.' It does not explain the Sutras at all; in fact it does not deal with the several subjects in the order of the Sutras. It has the form of an independent manual; it re-arranges the whole system, and adopts its own arrangement of topics. And yet we find that it has always

been regarded as '*Bhāsya*'. We find Vardhamāna Upādhyāya—who lived at least 500 years ago—in his *Nyāyanibandhaprakāça*, propounding the following definition of 'Bhāsya'.

सूत्रं बुद्धिस्थीकृत्य तत्पाठनियमं विना तद्व्याख्यानम्भाष्यम् । अतएव सूत्रपाठं विनाऽपि तद्विवरणं वैशेषिके प्रशस्तकराचार्यस्य भाष्यम् । यद्वा सूत्रव्याख्यानान्तरमनुपजीव्य तद्व्याख्यानम्भाष्यम्, व्याख्यानान्तरमुपजीव्य सूत्रव्याख्यानं वृत्तिरिति ।

The *Bhāsya*, according to this, is that which gathers the topics dealt with in the Sūtras and explains them, without taking into account the order of the Sūtras.—Or it may be defined as an explanation of the Sūtras not depending upon any other explanation; and thus differing from the '*Vṛtti*' which is an explanation dependent upon another explanation.

Vardhamāna cites the name of *Praçastakara*, who is the same as our author *Praçastapāda*. And it is clear that Vardhamāna has propounded those definitions simply with a view to bring Praçastapāda's work under the category. However that be, this quotation shows that at least 500 years ago, our author's work was known as '*Bhāsya*.'

One other point that has struck me in this work is the bold and confident manner in which the *Bhāsyakāra* has propounded his explanation of the processes of Creation and Dissolution. Writers as a rule are either silent on these topics, or deal with them in a halting half-hearted manner.

We cannot do better than refer the reader to Sec. 40 of the translation for a graphic account of the processes of Dissolution and Creation.

Hindus have been taxed with postulating five 'elements'. It seems that the charge is not well founded. People who make this charge apparently use the term 'element' in the chemical sense of a substance that cannot be further analysed. Are the 'Earth, Water, Fire, Air and Ākāça' of the *Vaiçesika* such

unanalysable substances? On refering to any Vaiçēsika manual it will be clear that what is ordinarily known as 'Earth' is not regarded by the Vaiçesika to be an 'element' in the technical sense; if it were so regarded then alone could the Vaiçēsika view be stygmatised as primitive and unscientific? The touch of 'Earth' in its pure state is said to be 'neither hot nor cold,' so also the touch of 'Air,'—and when asked why the ordinary Earth and ordinary Air are found to be very far from 'neither hot nor cold,' the Vaiçesika explains that this is due to the Earth and Air being mixed up with particles of fire or water, which make them feel hot or cold. From this it is clear that what is regarded as 'element' is not the Earth &c, as we know and see them; but as they exist in their pristine and pure state, unmixed with any other substances; that is to say, in their atomic condition. Is it, then very unscientific to regard the atoms of Earth, Fire &c., to be 'elements'? What is the 'atom of Earth' but an ultimate material substratum of odour? Can this be analysed further? Further the name that the Hindu gives to these substances is only '*bhūta*'; and it is not fair to translate 'bhuta' as 'element' and then tax him with being unscientific. What the Vaiçesika means by saying that these are the 'five *bhūtas*,' is that there are five states of matter—*solid* (Earth), *liquid* (water) *gaseous* (Air), *Luminious* (Fire) and *Etheric* (?) (Ākāsha). Is this division absolutely unscientific?

Having thus briefly indicated a few of the points that occurred to me in course of my study, I now record my gratitude towards my venerable *Guru*, Mahamahopadhyaya Pandit Shivakumara Miçra of Benares. without whose help readily accorded, the *Bhāsya*, and still more the *Nayāyakandali*, would have remained unintelligible; and then to my friend Babu Govinda-Dasa of Benares and to Pandit Vindhyeshvari Parsad Divivedin, who have done much, and are doing still more, towards bringing to light the long lost treasures of Indian philosophical literature; and last, but by no means least, to my late honoured colleague,—Dr. G. Thibaut, at whose instance this translation was undertaken, and who, if alive, would have rejoiced at its completion.

One word of apology is due to the reader. The time that the printing has taken—more than 10 years—and the vicissitudes through which my health has passed during all these years—have made it impossible for any careful revision of the work, either in manuscript or in course of proof-reading; and I am afraid the work abounds in many a crude and vague expression and endless inaccuracies, which could have been avoided with a little more care.

GANGAṆATHA JHA,

MUIR COLLEGE, ALLAHABAD :
December 24th, 1915.

त्वांशे भूतपूर्वगतिस्वीकारेऽपि उपधात्वांशेऽपि भूतपूर्वगतिस्वीकारे मानाभावाच्च न दोषः । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः ॥

नाभ्यस्तस्याचि पिति सार्वधातुके । ७ । ३ । ८७ ॥

लघूपधगुणो न स्यात् । नेनिजानि । अनेनिजम् । वेविजानि । अवेविजम् । वेविषाणि । अवेविषम् । वर्वृतीति । अभ्यस्तस्य किम् । वेदानि । अचि किम् । नेनेक्ति । पितीत्युत्तरार्थम् । सार्वधातुके किम् । निनेज । जुहवानि । अजुहवम् । योयवीति रोरवीत्यादाविगन्तस्य तु भवत्येव गुणः ॥ बहुलं छन्दसीति वक्तव्यम् ॥*॥ यस्त आतिथ्यमानुषक् जुजोषत् । जुषी प्रीतिसेवनयोः । लेट् व्यत्ययेन परस्मैपदम् । तिप् इतश्च लोपः परस्मैपदेष्वितीकारलोपः । लेटो डाटावित्यट् । व्यत्ययेन शपः श्लुर्द्विर्वचनं गुणः ॥

भूसुवोस्तिङि । ७ । ३ । ८८ ॥

भू सु एतयोः सार्वधातुके तिङि गुणो न स्यात् । अभूत् । अभूः । सुवै । सुवावहै । तिङि किम् । भवनि । सार्वधातुके किम् । व्यतिभविषीष्ट । सविषीष्ट । सोषीष्ट । भूसुवोरिति गुणनिषेधो बोभवीति बोभोति सोषवीति सोषोतीत्यादौ यङ्लुकि भाषायां न । बोभूतु तेतिक्ते इति छन्दसि निपातनात् । अत एव यङ्लुग्भाषायामपि सिद्धः । न च यङ्लुकि अप्राप्त एव गुणाभावो निपात्यतामिति वाच्यम् । प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात् । द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तात् ॥

उतो वृद्धिर्लुकि हलि । ७ । ३ । ८९ ॥

लुग्विषये उकारस्य वृद्धिः स्यात् पिति हलादौ सार्वधातुके नत्वभ्यस्तस्य । यौति । यौषि । यौमि । नौति । स्तौति । द्यौति । स्नौति । उतः किम् । एति । लुकि किम् । सुनोति । हलि किम् । यवानि । पिति किम् । युतः । इह उतो वृद्धिर्न । युयात् । भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात् । विशेषविहितेन ङित्वेन पित्वस्य बाधात् । नाभ्यस्तस्येत्यनुवृत्तेर्नेह । योयोति । योयवीति ॥

ऊर्णोतेर्विभाषा । ७ । ३ । ९० ॥

वृद्धिर्वा स्याद्धलादौ पिति सार्वधातुके ॥ ऊर्णौति । ऊर्णोति । नेह । ऊर्णवानि । ऊर्णुतः । ऊर्णुयात् । ऊर्णूयात् ॥

गुणोऽपृक्ते । ७ । ३ । ९१ ॥

ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः । और्णोत् । और्णोः । हलीति वर्तमानेपि यदपृक्तग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा यस्मिन्विधिस्तदावल्ग्रहणे इतीति वृत्तिः ॥

तृणह इम् । ७ । ३ । ९२ ॥

तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति ॥ तृणेढि । तृणेक्षि । तृणेह्मि । अतृणेट् । नेह तृणहानि । तृण्ढः । येन नाप्राप्तिन्यायेनेम् श्नमो बाधको मा भूदिति सश्नम्को निर्देशः ॥

ब्रुव ईट् । ७ । ३ । ९३ ॥

ब्रुवः परस्य हलादेः पित ईट् स्यात् ॥ ब्रवीति । ब्रवीषि । ब्रवीमि । नेह ब्रवाणि । ब्रूतः । ब्रूतात् । सार्वधातुकस्येत्येव । उच्यात् । आत्थेत्यत्र स्थानिवद्भावात्प्राप्तोऽयं झलीति यत्वविधानान्न भवति ॥

यङो वा । ७ । ३ । ९४ ॥

यङन्तात्परस्य हलादेः पितः सार्वधातुकस्य ईड् वा स्यात् ॥ बोभवीति । बोभोति । नेह । बोभवानि । बोभूतः । बोभूयात् ॥

तुरुस्तुशम्यमः सार्वधातुके । ७ । ३ । ९५ ॥

एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईट् वा स्यात् ॥ नाभ्यस्तस्येत्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम् । तु इति सौत्रो धातुः गतिवृद्धिहिंसासु । अयं च लुग्विकरण इति स्मरन्ति । तवीति । तौति । तुवीतः । तुतः । रवीति । रौति । रुवीतः । रुतः । स्तवीति । स्तौति । स्तुवीते । स्तुते । अधिगे, शमीध्वम् । अभ्यमीति । अभ्यन्ति । शम्यमोर्बहुलं छन्दसीति विकरणस्य लुक् । शमेरन्तर्भावितण्यर्थात्प्रैषे लोट् । व्यत्ययेनात्मनेपदम् । आपिशलास्तु तुरुस्तुशम्यमः सार्वधातुके छन्दसीति पठन्ति ॥ हलादेः किम् । रुवन्ति । तिङः किम् । शाम्यति । सार्वधातुके किम् । आशिषि स्तूयात् । विध्यादौ तु रुयात् । रुवीयात् ॥

अस्तिसिचोऽपृक्ते । ७ । ३ । ९६ ॥

सिच्च अस् चेति समाहारद्वन्द्वः ॥ सिच्छब्दस्य सौत्रं भत्वम् ।

अस्तीत्यव्ययेन कर्मधारयः । ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात् ॥ अकार्षीत् । अकार्षीः । अलावीत् । अलावीः । आसीत् । आसीः । इह त्वीरान । अभूत् । सिचो लुप्तत्वात् । अस्तेश्च भूभावेनापहारात् । तयोश्च विद्यमानत्वेन विशेषणात् । हलः किम् । एधिषि । अपृक्ते किम् । एधिष्ट ॥

बहुलं छन्दसि । ७ । ३ । ९७ ॥

सर्वमा इदम् ॥

रुदश्च पञ्चभ्यः । ७ । ३ । ९८ ॥

हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात् ॥

अड् गार्ग्यगालवयोः । ७ । ३ । ९९ ॥

अरोदीत् । अरोदत् । अस्वपीत् ॥ अस्वपत् । अस्वपीः । अस्वपः । अश्वसीत् । अश्वसः । प्राणीत् । प्राणः । अजक्षीत् । अजक्षत् । अजक्षीः । अजक्षः । अयमन्तस्थादिरित्युज्ज्वलदत्तो बभ्राम । प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वादिह यासुट् । रुद्यात् । पञ्चभ्यः किम् । अजागर्भवान् । गणनिर्दिष्टत्वान्नेह । असास्वप् । यङ्लुकीतीटि तु असास्वपीदिति भवति ॥

अदः सर्वेषाम् । ७ । ३ । १०० ॥

अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात्सर्वेषां मतेन ॥ आदत् । आदः । अपृक्तस्य किम् । अत्ति ।

अतो दीर्घो यञि । ७ । ३ । १०१ ॥

अतोऽङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे । भवामि । भवावः । भवामः । भविष्यामि । भविष्यावः । भविष्यामः । अतः किम् । चिनुवः । चिनुमः । यञि किम् । पचतः । सार्वधातुके किम् । अङ्गना । केशवः । अत आदिति वक्तव्ये दीर्घग्रहणं दीर्घ एव यथा स्यात् । अनन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतो मा भूत् । अपाक्षीरोदनं देवदत्त ननु पचामि भोः । केचिदत्र तिङीत्यनुवर्तयन्ति ॥

सुपि च । ७ । ३ । १०२ ॥

यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात् । रामाभ्याम् । अतः किम् । अग्निभ्याम् । यञि किम् । वृक्षस्य ।

बहुवचने झल्येत् । ७ । ३ । १०३ ॥

झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात् । रामेषु । रामेभ्यः । बहुवचने किम् । रामाभ्याम् । रामः । रामस्य । झलि किम् । रामाणाम् । सुपि किम् । पचध्वम् ।

ओसि च । ७ । ३ । १०४ ॥

ओसि च परेऽतोऽङ्गस्यैकारः स्यात् । रामयोः ॥ २ ॥

आङि चापः । ७ । ३ । १०५ ॥

आङिति टा संज्ञा प्राचाम् । आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात् ॥ रमया । बहुराजया । कारीषगन्ध्यया । रमयोः । बहुराजयोः । कारीषगन्ध्ययोः ।

संबुद्धौ च । ७ ३ । १०६ ।

आप एकारः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति संबुद्धिलोपः हे रमे । हे बहुराजे । हे कारीषगन्ध्ये ।

अम्बार्थनद्योर्ह्रस्वः । ७ । ३ । १०७ ।

अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ । हे अम्ब हे अक्क । हे अल्ल । हे कुमारि । हे गौरि । हे शार्ङ्गरवि । हे बहुश्रेयसि । हे ब्रह्मबन्धु । हे अतिचमु । असंयुक्ता ये डलकास्तद्वतां न ह्रस्वः । हे अम्बाडे । हे अम्बाले । हे अम्बिके ॥ मातुर्मातच् पुत्रार्थमर्हते ॥ * ॥ मातृशब्दस्य मातजादेशो वक्तव्यः । ये मातृशब्दः पुत्रार्थे पुत्रमभिधातुमुपादीयते । बहुव्रीहौ च वर्तिपदैरन्यपदार्थोऽभिधीयते इति तत्रैवायं संबुद्धौ मातजादेशः । गार्गी माता यस्येति गार्गीमातृकः । तस्य संबोधनं हे गार्गीमात नद्यृतश्चेति कप् येन नाप्राप्त इति न्यायेन मातजा बाध्यते । चित्करणमन्तोदात्तार्थम् । यः पुत्रः श्लाघ्यगुणत्वात्कुलसंभूतया मात्रा व्यपदेशमर्हति तत्र मात्तजादेशो नान्यत्र हे गार्गीमातृक । अत्र स्वरूपकथनमात्रे तात्पर्यम् । पुत्रार्थमर्हते इत्यत्र सापेक्षत्वेप्यत एव निपातनात्समासः ।

ह्रस्वस्य गुणः । ७ । ३ । १०८ ।

ह्रस्वस्य गुणः स्यात्सम्बुद्धौ । हे अग्ने । हे वायो । हे कुमारि । हे ब्रह्मबन्धु इत्येवमादीनां ह्रस्वविधानसामर्थ्यान्न गुणः । अन्यथाम्बार्थानां ह्रस्वः नदीह्रस्वयोर्गुण इत्येव सिद्धेः ।

जसि च । ७ । ३ । १०९ ।

ह्रस्वस्य गुणः स्याज्जसि परे । अग्नयः । वायवः ॥ जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः ॥ * ॥ अधा शतक्रत्वो यूयम् । शतक्रतवः । पश्वे नृभ्यो यथा गवे । पशवे ।

ऋतो ङिसर्वनामस्थानयोः । ७ । ३ । ११० ।

ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । मातरि । भ्रातरि । कर्तरि । नरि । गमलि । शकलि । मातरौ । पितरौ भ्रातरौ । कर्त्तारौ । नरौ । गमलौ । शकलौ ॥

घेर्ङिति । ७ । ३ । १११ ।

घिसंज्ञकस्य ङिति सुपि गुणः स्यात् । अग्नये । वायवे । अग्नेः । वायोः । घेः किम् । सख्ये । ङिति किम् । हरिभ्याम् । सुपि किम् । पट्वी । कुरुतः ।

आण्नद्याः । ७ । ३ । ११२ ।

नद्यन्तात्परेषां ङितामाडागमः स्यात् । कुमार्यै । ब्रह्मबन्ध्वै । कुमार्याः । ब्रह्मबन्ध्वाः । इह परत्वादाटा नुट् बाध्यते । कुमार्याम् । ब्रह्मबन्ध्वाम् ।

याडापः । ७ । ३ । ११३ ।

आपः परस्य ङिद्वचनस्य याडागमः स्यात् ! रमायै बहुराजायै । कारीषगन्ध्यायै । रमायाः । बहुराजायाः । कारीषगन्ध्यायाः। रमायाम् । बहुराजायाम् । कारीषगन्ध्यायाम् । अतिखट्वायेत्यत्र यथा न याट् भवति तथा जराया इति सूत्रेऽवोचाम ।

सर्वनाम्नः स्याट् ह्रस्वश्च । ७ । ३ । ११४ ।

आबन्तात्सर्वनाम्नः परस्य ङितः स्याडागमः स्यादापश्च ह्रस्वः । याटोऽपवादः सर्वस्यै । यस्यै । कस्यै । सर्वस्याः । यस्याः । कस्याः । सर्वस्याम् । यस्याम् । कस्याम् । आपः किम् । भवत्यै ।

विभाषा द्वितीयातृतीयाभ्याम् । ७ । ३ । ११५ ।

आभ्यां परस्य ङितः स्याड् वापश्च ह्रस्वः । इदं सूत्रं त्यक्तुं शक्यम् । तीयस्य ङित्सूपसंख्यानात् । द्वितीयस्यै । द्वितीयायै । द्वितीयस्याः । द्वितीयायाः । द्वितीयस्याम् । द्वितीयायाम् । एवं तृतीयस्यै तृतीयायै ।

ङेराम्नद्याम्नीभ्यः । ७ ३ । ११६ ।

नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात् । बहुश्रेयस्याम् । वध्वाम् । खट्वायाम् । नियाम् । उन्याम् । ग्रामण्याम् ।

इदुद्भ्याम् । ७ । ३ । ११७ ।

नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् । मत्याम् । धेन्वाम् ।

औत् । ७ । ३ । ११८ ।

इदुद्भ्यामुत्तरस्य ङेरौत्स्यात् । उकारानुवृत्तिरुत्तरार्था । सख्यौ । पत्यौ ।

अच्च घेः । ७ । ३ । ११९ ।

इदुद्भ्यामुत्तरस्य ङेरौत्स्यात् घेरन्तादेशश्चाकारः । अग्नौ । वायौ । मतौ । धेनौ ।

आङो नाऽस्त्रियाम् । ७ । ३ । १२० ।

घेः परस्याङो ना स्यादस्त्रियाम् । अग्निना । वायुना । अस्त्रियां किम् । मत्या । पुंसीति तु नोक्तम् । अमुना कुलेनेत्यपि द्व्यापत्तेरिति दिक् ।

इत्योरम्भट्टेन श्रीधोंडभट्टविश्वरूपात्मजेन वैजनाथभट्टविश्वरूपापरनामधेयेन विरचितायां व्याकरणदीपिकासमाख्यायां पाणिनिसूत्रवृत्तौ सप्तमाध्यायस्य तृतीयः पादः समाप्तः ।

सप्तमाऽध्यायस्य चतुर्थः पादः ।

णौ चङ्युपधाया ह्रस्वः । ७ । ४ । १ ।

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् । अचीकरत् । अजीहरत् । अलीलवत् । बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात्प्रागेव । ओणेर्ऋदित्करणाल्लिङ्गात् । मा भवानिदिधत् मा भवानटिटत् । णौ किम् । अलीलवदित्यत्र वचनसामर्थ्यादन्तरङ्गावपि वृद्ध्यावौ बाधित्वा ह्रस्वः स्यात् । अदीदपदित्यत्र ह्रस्वेन पुको बाध एव स्यात् । अपीपचदित्यादौ तु नैव ह्रस्वः स्यात् । चङि किम् । कारयति । उपधायाः किम् । अचकाङ्क्षत् । इह तु वादितवन्तं प्रयोजितवानवीवदद्वीणां परिवादकेनेति णयन्ताण्णिचि पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णौ णिलोपे तस्य स्थानिवत्वादग्लोपित्वाद्वा ह्रस्वो न प्राप्नोति । एयाकृतिनिर्देशाद्भवति ।

नाग्लोपिशास्वृदिताम् । ७ । ४ । २ ॥

णावग्लोपिनः शास्तेर्ऋदिताञ्चोपधाया ह्रस्वो न स्याच्चङ् परे णौ ॥ मालामाख्यदममालत् । राजानमतिक्रान्तवानत्यरराजत् । लोमान्यनुमृष्टवानन्वलुलोमत् । स्वामिनमाख्यदसस्वामत् । गोमिनमाख्यदजुगोमत् । अशशासत् । बाधृ अबबाधत् । टुयाचृ अययाचत् । ढौकृ अडुढौकत् । लोकृ अलुलोकत् । ओणृ मा भवानोणिणत् । णेरग्लोपेऽपि सम्बन्धस्त्वगितामपि सिद्धये । अचीकमत् ॥

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् । ७ । ४ । ३ ॥

एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ । अबिभ्रजत् । अबभ्राजत् । अबीभसत् । अबभासत् । अबीभषत् । अबभाषत् । अदीदिपत् । अदिदीपत् । अजीजिवत् । अजिजीवत् । अमीमिलत् । अमिमीलत् । अपीपिडत् । अपिपीडत् । भ्राजभासो ऋदित्करणमपाणिनीयमिति वृत्तिः ॥ काण्यादीनां वेति वक्तव्यम् ॥ ० ॥ णयन्ताः कणरणभणश्रणलुपहेठाः काण्यादयः षड् भाष्ये उक्ताः । ह्वायिवाणिलोठिलोचयश्चत्वारोऽधिकान्यासे । वाणिलोठी अप्यन्यत्र । इत्थं द्वादश । अचीकणत् । अचकाणत् ॥

लोपः पिबतेरीच्चाभ्यासस्य । ७ । ४ । ४ ॥

पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च चङ्परे णौ ॥ अपीप्यत् ॥

तिष्ठतेरित् । ७ । ४ । ५ ॥

उपधाया इदादेशः स्यात् चङ्परे णौ ॥ अतिष्ठिपत् ॥

जिघ्रतेर्वा । ७ । ४ । ६ ॥

उपधाया इत्वं वा स्याच्चङ्परे णौ ॥ अजिघ्रिपत् । अजिघ्रपत् ॥

उर्ऋत् । ७ । ४ । ७ ॥

उपधाया ऋवर्णस्य स्थाने ऋद्वा स्याच्चङ्परे णौ ॥ इररारामपवादः । अचीकृतत् । अचिकीर्तत् । अवीवृतत् । अववर्तत् । अमीमृजत् । अममार्जत् । तपरत्वं दीर्घेऽपि स्थानिनि ह्रस्व एव

यथा स्यात् । अचीकृतदिति । न चायं भाव्यमानः तपरत्वाभावे स्वादेशान्तरनिवृत्यर्थं स्वरूपमेवैतदभ्यनुज्ञायते कृते तु तपरत्वे भाव्यमानत्तापीत्यन्यत् ॥

नित्यं छन्दसि । ७ । ४ । ८ ॥

छन्दसि विषये णौ चङ्युपधाया ऋवर्णस्य ऋन्नित्यम् । अवीवृधत् ॥

दयतेर्दिगि लिटि । ७ । ४ । ९ ॥

दिग्यादेशेन द्वित्वबाधनमिष्यते इति वृत्तिः । दिग्ये । दिग्याते । दिग्यिरे । दयतेरिति देङ् रक्षणे इत्यस्य ग्रहणं न तु दय दानगतिरक्षणहिंसादानेष्वित्यस्य । तस्य हि लिट्याम् विहितः ।

ऋतश्च संयोगादेर्गुणः । ७ । ४ । १० ॥

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि । किदर्थमपीदं परत्वाण्णल्यपि भवति । रपरत्वम् । उपधावृद्धिः । जह्वार । जह्वरतुः । जह्वरुः । ऋतः किम् । चिक्षियतुः । संयोगादेः किम् । चक्रतुः । लिटि किम् । स्मृतः । स्मृतवान् । सञ्चस्करतुरित्यत्रापि यथा गुणस्तथा सुट्कात्पूर्वः अडभ्यासव्यवायेपीत्यत्रावोचाम ॥

ऋच्छत्यृताम् । ७ । ४ । ११ ॥

तौदादिकऋच्छेर्ऋधातोर्ॠताञ्च गुणः स्याल्लिटि ॥ आनर्च्छतुः । णलि प्राग्वदुपधाया वृद्धिः । आर । आरतुः । आरुः । चकार । चकरतुः । जगार । जगरतुः ।

शृदृप्रां ह्रस्वो वा । ७ । ४ । १२ ॥

एषां ह्रस्वो वा स्याल्लिटि । क्ित्येवैतस्य फलम् । शश्रतुः । शशरतुः । दद्रतुः । ददरतुः । पप्रतुः । पपरतुः । ह्रस्ववचनमित्वनिवृत्यर्थम् । शशृवान् । ददृवान् । पपृवान् इति क्वसौ श्रवणार्थं च । गुणे एव विकल्पिते तु क्वसोः कित्वस्य प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधार्थत्वस्योक्तत्वेन गुणे निषिद्धेऽपि दीर्घस्यैव श्रवणं प्रसज्येतेति दिक् ॥

केऽणः । ७ । ४ । १३ ॥

के परेऽणो ह्रस्वः स्यात् । ज्ञका । कुमारिका । किशोरिका । अणः किम् । गोका । नौका ।

न कपि । ७ । ४ । १४ ॥

कपि परे ह्रस्वो न स्यात् ॥ बहुकुमारीकः । बहुवधूकः । बहुलक्ष्मीकः । गोस्त्रियोरित्यपि ह्रस्वः कपि न भवति । अकृते एव समासे समासार्थलौकिकप्रक्रियावाक्ये एव कपः प्रवृत्या समासान्ता इति शास्त्रबलात् कबन्तस्यैव च समासत्वेन कपः प्राग्वर्तिभागस्योपसर्जनस्त्रीप्रत्ययांतसमासरूपप्रातिपदिकत्वाभावात् । अनेनैव तु न तस्यापि निषेधोऽनन्तरत्वात् । अन्यथा प्रियं ग्रामणि कुलमस्य प्रियग्रामणिक इत्यत्र ह्रस्वो नपुंसके इत्यस्यापि निषेधापत्तेः ॥

आपोऽन्यतरस्याम् । ७ । ४ । १५ ॥

कपि आबन्तस्य ह्रस्वो वा स्यात् । बहुमालकः । बहुमालाकः ॥

ऋदृशोऽङि गुणः । ७ । ३ । १६ ॥

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि । असरत् । अजरत् । जृष् । जरा । अदर्शत् ॥

अस्यतेस्थुक् । ७ । ३ । १७ ॥

अङि परे । आस्थत् ।

श्वयतेरः । ७ । ३ । १८ ॥

श्वयतेरिकारस्याकारः स्यादङि । पररूपम् । अश्वत् ॥

पतः पुम् । ७ । ३ । १९ ॥

अङि परे । अपप्तत् ॥

वच उम् । ७ । ३ । २० ॥

अङि परे । अवोचत् । अवोचत ॥

शीङः सार्वधातुके गुणः । ७ । ३ । २१ ॥

क्ङिति चेत्यस्यापवादः । शेते । शयाते । शेरते । सार्वधातुके किम् । शिश्ये ॥

अयङ् यि क्ङिति । ७ । ३ । २२ ॥

शीङोऽयङादेशः स्याद्यादौ क्ङिति परे । शय्यते । शाशय्यते । प्रशय्य गतः । यीति किम् । शिश्ये । क्ङिति किम् । शेयम् ।

उपसर्गाद्ध्रस्व ऊहतेः । ७ । ४ । २३ ॥

यादौ क्ङिति । समुह्यते । अभ्युह्यते । ब्रह्म समुह्यात् । अग्निं समुह्य । इह त्वेकादेशे कृते व्यपवर्गाभावान्न भवति । प्रोह्यते । उपोह्यते । इहाप्यण इत्यनुवृत्तेर्न भवति । आ ऊह्यते ।

ओह्यते। समोह्यते। उपसर्गात्किम्। ऊह्यते। ऊहतेः किम्। समीह्यते। यीति किम्। समूहितम्। क्ङिति किम्। अभ्यूह्यो- ऽयमर्थः॥

एतेर्लिङि। ७। ४। २४।

उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यात् यादौ क्ङिति लिङि। निरियात्। आशीर्लिङि अकृत्सार्वेतिदीर्घे कृतेऽनेन ह्रस्वः। उभयत आश्रयणे नान्तादिवत्। अभीयात्। अणः किम्। समेयात्। समीयादिति प्रयोगस्तु भौवादिकस्य इट किट कटीत्यत्र प्रश्लिष्टस्य।

अकृत्सार्वधातुकयोर्दीर्घः। ७। ४। २५।

अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्व- धातुकयोः। भृशायते॥ सुखायते। दुःखायते। कवीयति। चीयते। चेचीयते। स्तूयते। तोष्टूयते। चीयात्। चीयात्। स्तूयात्। अकृदिति किम्। चिनुयात्। क्ङितित्येत्र उरुया धृष्णुयेति वृत्तिः।

च्वौ च। ७। ४। २६।

च्वौ च परे दीर्घः स्यात्। शुचीभवति। पटूस्यात्। अव्य- यस्य दीर्घत्वं नेति केचित्तन्निर्मूलम्। स्वस्ति स्यादिति तु महावि- भाषया च्वेरभावे सिद्धम्। स्वस्तीस्यादित्यपि पक्षे स्यादिति चेत्। अस्तु यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यते इत्यस्तु।

रीङ् ऋतः। ७। ३। २७।

अकृद्यकारेऽसार्वधातुकयकारे च्वौ च परे ऋदन्तस्य रीङादेशः स्यात्। यस्येति च। पित्र्यम्। कर्त्रीयति। मात्रीयते। रेक्रीयते। संचे-

क्रीयते । मात्रीकरोति । ऋत इति तपरः किम् । चेकीर्यते निजेगिल्यते ।

रिङ् शयग्लिङ्क्षु । ७ । ४ । २८ ॥

शे यकि यादावसार्वधातुके लिङि च ऋतः रिङादेशः स्यात् ॥ आद्रियते । आध्रियते । क्रियते । ह्रियते । क्रियात् । ह्रियात् । भ्रियात् । रीङि प्रकृते रिङ्विधिसामर्थ्याद्दीर्घो न । यादौ किम् । भृषीष्ट । असार्वधातुके किम् । बिभृयात् । जागृयात् ॥

गुणोऽर्तिसंयोगाद्योः । ७ । ४ । २९ ॥

शे इति नानुवर्ततेऽसम्भवात् । अर्तेः संयोगादेरृदन्तस्य च गुणः स्यात् यकि यादावसार्वधातुके लिङि च ॥ अर्यते । अर्यात् । स्मर्यते । स्मर्यात् । ह्वर्यते ह्वर्यात् । यादौ किम् । स्मृषीष्ट । असार्वधातुके किम् । इयृयात् । संस्क्रियते । संस्क्रियादित्यत्र तु यथा न गुणस्तथावोचाम ॥

यङि च । ७ । ४ । ३० ॥

अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि । अरार्यते । सास्मर्यते । हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः ॥ * ॥ जेघ्नीयते । हिंसायां किम् । जङ्घन्यते ॥

ई घ्राध्मोः । ७ । ४ । ३१ ॥

यङीत्येव । जेघ्रीयते । देध्मीयते ॥

अस्य च्वौ । ७ । ४ । ३२ ॥

अवर्णस्य ईत्स्यात् च्वौ । कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ॥ अव्ययस्य च्वावीत्वं नेति वाच्यम् ॥ * ॥ दोषाभूतमहः ।

चन्द्रयोः कथं सिद्धयेदिति । स्वाभीष्टसैकनिरेकतिथ्यन्तीयसाधनार्थमेकचान्द्रदिनरूपतिथेर्यदधिशेषं यच्चावमशेषं तेनाहर्गणानयनसिद्धं तत् क्रमेण यथायोग्यं हीनं युतं च कार्यम् । तत्र कल्पचान्द्रैः कल्पाधिमासास्तदैकचान्द्रदिनेन के इत्यनुपातेनैकतिथेरधिशेषं सौरं चान्द्रात् साधनात् । एतदहर्गणानयनसिद्धाधिशेषस्य चान्द्रस्य भिन्नजातित्वेन योजनवियोजनकरणाशक्यात्वात् सजातीयम् । कल्पसौरदिनैः कल्पचान्द्रास्तदैकतितिसिद्धसौराधिशेषेण के इत्युनुपातेन कल्पचान्द्रस्य गुणहरत्वात् तुल्यत्वेन नाशादेकतिथेश्चान्द्रमधिशेषं कल्पसौरदिनभक्तकल्पाधिमासरूपं हीनं युतं च कार्यमतोऽहर्गणानयनसिद्धाधिशेषस्य मासात्मकस्य कल्पसौरदिनहरत्वाच्चाधिमासाः कल्पोक्ता एव युतहीनाः कृता इति सिद्धम् । एवं कल्पचान्द्रदिनैः कल्पावमानि तदैकतिथिरूपचान्द्रदिनेन किमित्यनुपातेन सावनमवमशेषं कल्पचान्द्रदिनभक्तकल्पावमरूपमहर्गणानयनसिद्धावमशेषस्य सावनस्य कल्पचान्द्रहरस्य हीनं युतं कार्यमिति कल्पावमैर्युतं हीनं वाऽवमशेषं कार्यमिति सिद्धम् । अतः सुष्ठूक्तं तदेत्याद्युत्तरार्धम् । के चित् तु यतः सृष्ट्यादौ पूर्णेऽहर्गणे रविवारस्ततो रूपेऽहर्गणे चान्द्रवारः । एवमनुदिनमेकैको वारो वर्धते । एवमत्र वाराः सावनास्तिथयः पुनश्चान्द्रास्तदन्तरमवमानि । अत्र स्पष्टेऽवमे पतिते मध्यमकर्मण्यगृहीते सैकता घटते । अपतिते गृहीते निरेकतेति युक्तियुक्तमेव सैकत्वं निरेकत्वं च । तदुपलब्धिरभीष्टवारेण भवति । अहर्गणस्य सावनत्वेन वारनियामकत्वादित्याहुः ॥ १ ॥

इदानीं लघुदिनौघविषयमाह ।

अथैवमेवाल्पदिवागणेऽपि
सैकं निरेकं च तदाऽवमाग्रम् ।
तथाऽधिमासस्य तिथीर्गृहीत्वा
लघुर्दिनौघः सुधिया प्रसाध्यः ॥ २ ॥

वा. भा.—लघ्वहर्गणे सैके निरेके तिथयोऽपि सैका निरेकाः । तत्राव मशेषमपि सैकं निरेकं कार्यम् । यतस्तत्रावमानयने रूपगुणा एव तिथय श्चतुःषष्ट्या हृताः । अथ लघ्वहर्गणे साध्यमानेऽभीष्टाहचैत्राद्यन्तरे यद्य- धिमासोऽस्ति तदा तस्यापि तिथीर्गृहीत्वा लघुर्दिनौघः साध्यः । अत्र लघुरिति विशेषणाद्बृहदहर्गणो न ग्राह्यः । यतस्तत्राधिमासानयने लब्धाधिमासास्ता युक्ता भविष्यन्ति । लघ्वहर्गणानयने त्वब्दान्तादूर्ध्वम- धिमासानयनस्याभावात् तत्रावश्यं योज्याः ॥ २ ॥

मरीचिः—अथोक्तरीत्या लघ्वहर्गणे विशेषमुपजातिकयाऽऽह अथेति । लघ्वहर्गणे सौरवर्षान्तःपात्यहर्गणे अपिशब्दात् करणात् साधिताहर्गण इत्यर्थः । एवमभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तदा 'रविगुणैस्ति- थिभि'-रित्यादिना चन्द्रसाधने याः शुक्लादिगततिथयस्ताः सैका निरेकाः कार्या इत्यर्थः । एतादृशाश्चन्द्रसाधने तिथय उपयुक्ताः । बृहदहर्गणे एका न्तरं तदा लघ्वहर्गणे किमित्यनुपातेन बृहदहर्गणभक्तलघ्वहर्गणफलमेव वारसंवादार्थम् । लघ्वहर्गणे हीनं युतं कार्यमिति निरासायैवकारः । अह- र्गणस्यैकान्तरस्यात्रापि सिद्धत्वादिति ध्येयम् । न तु लघ्वहर्गणानयनज्ञा- तमवमशेषं स्वेष्टदिनकरणार्थं कल्पावमयुतहीनं कार्यम् । तत्र तस्या- वश्यं चतुःषष्ट्यल्पत्वात् कल्पावमहीनमवमशेषं कथं स्यादत आह सैक- मित्यादि । तदा यदा चन्द्रसाधनार्थं तिथयः सैका निरेकास्तदेत्यर्थः । अवमाद्यम् । लघ्वहर्गणानयने चतुःषष्टिभक्तं यद्दिनाद्यवमशेषं क्रमेण सैकं निरेकं कार्यम् । चः समुच्चये । तेन लघ्वहर्गणस्तिथयोऽवमशेषं त्रितयमपि सैकं निरेकं कार्यम् । न त्ववमशेषं बृहदहर्गणोक्तविशेषेण कल्पावमयुत- हीनं कार्यं विशेषस्य बलवत्त्वात् । अत्र यदि त्ववमशेषं सैकं चतुःष- ष्टेरन्यून तदा चतुःषष्टितष्टं कार्यम् । गतावमफलमेकयुतं वास्तवगताव- मज्ञानार्थं न त्वहर्गणसाधनार्थम् । एवमवमशेषमेकेन हीनं न तदाऽवमशेषे चतुःषष्टिर्योज्या ततो निरेकम् । गतावमफलं च तद्वास्त-

वज्ञानार्थमेकहीनं न त्वहर्गणसिद्ध्यर्थमित्यप्युक्तप्रायं ध्येयम् । एतादृ-शावमशेषेण "स्वनगभागयुतेन" इत्याद्युक्तं चन्द्रफलमानेयम् । ननु यदाऽधिमासश्चैत्रादीष्टकालमध्ये स्यात् तदा यदाद्योऽधिमासस्तन्मा-सस्य षष्टिदिनात्मकत्वेनैकमासत्वादिष्टकाले पूर्वरीत्याऽहर्गणसाधितग्र-हास्तत्काले बृहदहर्गणसाधितग्रहैर्न तुल्या भवन्ति । बृहदहर्गणेऽधि-मासगणनाभावेन षष्टिदिनात्मकैकमासस्याङ्गीकारादेकत्र निर्णीतः शास्त्र-र्थोऽपरत्र भवतीति न्यायान्मासद्वयग्रहाच्च । किञ्च षष्टिदिनात्मकमास-काले उत्तरार्धपूर्वागताहर्गणानामेव सिद्धिरित्युत्तरोत्तरमहर्गणव्याघातोऽत आह तथेति । यथा लघ्वहर्गणे बृहदहर्गणोक्तकल्पावमयुतहीनावमशेष-रूपविशेषं विहाय सैकं निरेकमवमशेषमिति विशेषोऽङ्गीकृतस्तथेत्यर्थः । चैत्रादीष्टकालयोर्मध्ये वक्ष्यमाणलक्षणाक्रान्ताधिमासपातश्चेत् तदा तस्य तिथीस्त्रिंशदनधिका अधिका गृहीत्वोक्तप्रकारेण लघुः सौरवर्षकावधि-रहर्गणः सुधिया गणकेन कार्यः । एवं च नोक्तदोष इति भावः । अत्र सुधियेति हेतुगर्भः । यत उक्तन्यायेनापि बृहदहर्गणानयनेऽधिमासो गतमासयोजनेन ग्राह्यः । लघुरिति पदोपादानादिति स्पष्टमुक्तमिति ध्येयम् ।

अत्रोपपत्तिः । सैकनिरेकत्वरूपविशेषस्याहर्गणसामान्येन सिद्ध-त्वात् लघ्वहर्गणेऽपि सैकत्वं निरेकत्वं तद्वशाच्चन्द्रसाधने तिथिष्वपीति युक्तम् । अथ तद्द्वितीयावमशेषं चतुःषष्टिचान्द्रैरेकोऽवमस्तदैकचान्द्रेण किमित्यनुपातेन समच्छेदत्वाच्चैकयुतमेकहीनं कार्यमिति सिद्धम् । अत्र यद्यप्यवमानयनानुरोधात् स्वीयकराभ्रतुरङ्गलवयुतैको युतो हीनश्च कार्यः । चतुःषष्टिचान्द्रैः संपूर्णावमपातात् तथाऽऽद्याचार्यैरेकस्य चान्द्र-दिनस्य कराभ्रसप्तांशः स्वल्पान्तरेणोपेक्षित इति मन्तव्यम् । लघ्वहर्ग-णस्य सौरैकवर्षान्तःपातित्वात् तदानयने सौरवर्षादेरूर्ध्वमधिमासा-नयनाभावेन मध्येऽधिकमासपातेऽपि तद्ग्रहणेऽहर्गणस्य त्रिंशद्दिना-

न्तरत्वं स्यादतो लघ्वहर्गणानयने चैत्रादिगततिथिगणे पतिताधिमासतिथयोऽपि ग्राह्याः । किञ्च अधिमासस्य चान्द्रत्वेनान्तःस्थत्वादिष्टकाले चैत्रादितः संपूर्णाश्चान्द्रदिवसा ग्राह्या इति तं विना तज्ज्ञानाभावात् तिथयो ग्राह्या एवेति बालैरपि बुध्यत इति किं चित्रमत एव बृहदहर्गणे तदानयनेन तत्काले एकाधिकाधिकमासरूपलब्धेः सिद्धत्वाच्च गतमासयोजनेन तद्योजनम् । अधिमासयोजनेन तद्योजनस्य सिद्धत्वाच्चिरवद्यम् ॥ २॥

इदानीमन्यदाह ।

स्पष्टोऽधिमासः पतितोऽप्यलब्धो
यदा यदा वाऽपतितोऽपि लब्धः ।
सैकैर्निरेकैः क्रमशोऽधिमासै-
स्तदा दिनौघः सुधिया प्रसाध्यः ॥ ३ ॥

कृत्वा युतोनं क्रमशोऽधिशेषं
दिनीकृतैः कल्पभवाधिमासैः ।
सैकान्निरेकान्मधुयातमासाँ-
स्ततः प्रसाध्यौ खलु पुष्पवन्तौ ॥ ४ ॥

वा. भा.—अथाहर्गणानयने योऽधिमास आगच्छति स मध्यममानेन यदा स्पष्टोऽधिमासः पतितः । अथ चाहर्गणानयने न लब्धस्तदा लब्धाधिमासान् सैकान् कृत्वाऽहर्गणः साध्यः । तदा यदधिमासशेषमागतं तच्च युतं कार्यम् । कैः । दिनीकृतैः कल्पभवाधिमासैः । तथा चैत्रादिमासान् सैकान् कृत्वा चन्द्रार्कौ साध्यौ । यदा वाऽपतितोऽपि लब्धस्तदाऽस्माद्विपरीतम् । एतदुक्तं भवति यदा स्पष्टोऽधिमासः पतितस्तदाऽलब्धोऽपि ग्राह्यः । यदा न पतितस्तदा लब्धोऽपि न ग्राह्यः । तदाऽधिमासशेषं कल्पाधिमासैर्दिनीकृतैर्यथाक्रमं युतोनं कार्यम् । यतस्त्रिंशता दिनैर्दिनगणोऽन्तरितः । तस्मादधिमासशेषाच्चन्द्रार्कौ साध्यौ । तदा चैत्रादयो मासाः सैका निरेकाश्च ग्राह्याश्चन्द्रार्कसाधने ॥ ३–४ ॥

मरीचिः—ननु यदाधिमासपातकालानन्तरकाले निकट एवाहर्गणानयने रविदिनैर्भागैः पतिताधिमासो लब्ध एकाधिकत्वेन लभ्यते यदा च पतिताधिमासकालात् पूर्वनिकटकालेऽहर्गणानयने कल्परविदिनभागेनैकाधिका लब्धिर्लभ्यते तदोक्तप्रकारेण साधितावहर्गणौ क्रमेण त्रिंशदूनत्रिंशद्दिनाधिकौ भवतः। तत्र क्रमेणाधिमासतदभावयोर्वस्तुतः सत्त्वादित्यत उपजातिकया तत्र विशेषमाह स्पष्ट इति। तिथ्यादिपत्रस्य स्पष्टत्वेन सत्त्वात् तत्राधिमासः स्पष्टमानेन भवति । तथा च यदाऽधिमासः स्पष्ट उक्तलक्षणः पतितः। यत्कालेऽहर्गणः साध्यते तत्पूर्वनिकटे भवति तदाऽहर्गणसाधनेऽलब्धः । यथाऽधिमासपातकालात् पूर्वं फलं तदेवाधिमासपातकालानन्तरं फलं न त्वेकाधिकमिति कदाचित् । यदा वाऽधिमासपातकालात् पूर्वं निकटकालेऽहर्गणसाधनेऽपतितः स्पष्टमानेनोक्तलक्षणः पूर्वं न जातोऽपि लब्धोऽधिमासानयने पूर्वागताधिमासफलमेकाधिकं कदाचित् तदा तत्र क्रमशोऽधिमासानयनेऽप्राप्तःप्राप्तैकाधिमासक्रमेणेत्यर्थः । सैकैरेकहीनैरधिमासैः कल्पसौरदिनभक्ताप्तगताधिमासैर्दिनौघो बृहदहर्गण उक्तरीत्या सुधिया गणकेन प्रसाध्यः। न तु मया गताधिमासैः। सुधियेति हेतुगर्भः। यतस्तत्रैकमासान्तरस्य प्रत्यक्षसिद्धत्वेन यथागताधिमासैरहर्गणानयनद्वारा ग्रहस्तिथ्यादिपत्रं च कथं संचरेत् । एकमासान्तरेणेष्टकालात् पूर्वापरकाले च संवदेदित्यवश्यमयं विशेषः कार्यः । अन्यथाऽभीप्सितकाले ग्रहादिसिद्धिर्न स्यादिति ध्येयम् ।

अत्रोपपत्तिः । ग्रहाः खलु स्पष्टगत्या भ्रमन्ति । न वस्तुतो मध्यममानमस्ति । यन्मध्यममानं तद्गणनाव्यवहारोपयिकतया गोणं कल्पितम् । स्पष्टमानस्यैकरूपत्वाभावेन तदनुरोधाद्ग्रहसाधनस्य नियतमानं विनाऽसाध्यत्वात् । तथा च कल्पितमध्यममानेन प्रत्यक्षसंवादाभावेन पर्यवसानत्वाभावादनियतस्पष्टमाने प्रत्यक्षसंवादेन पर्यवसानं

युक्तम् । अन्यथा संहिताजातकादौ सूर्यबुधशुक्राणां भिन्नराशिस्थोक्ते-रप्रसिद्धेः ।

"दृष्टे चन्द्रे सिनीवाली नष्टे चन्द्रे कुहूः स्मृता" ।

इति वचनस्य मध्यमामावास्याकाले दर्शनादर्शनयोरसत्त्वादप्रामाण्यापत्तेश्च । एवं सत्यभीष्टकाले पूर्वस्पष्टमानेनाधिमासपातेऽप्यहर्गणानयनेऽनुपातेन मध्यममानाभिप्रायेणाधिमासपाताभावान्मध्यममानेनोक्तरीत्या सिद्धोऽप्यहर्गणोऽभीष्टकालमधिकृत्य साधितोऽपि पूर्वमासो जातः । स्पष्टमानेनैकमासस्याधिकत्वदर्शनादतोऽभीष्टकाले मध्यममानेनाहर्गणसिद्ध्यर्थमनुपातसिद्धगताधिमासा एकयुता: कार्याः । एकाधिकमासग्रहणेनाभीष्टदैर्घ्यसकाहर्गणसिद्धेः स्वतः सिद्धत्वात् । न चैवं बृहदहर्गणसाधनेऽप्यधिकमासयोजनस्य युक्तिसिद्धत्वेन लघुर्दिनौघ इत्यनेन पूर्वमत्र निषेधः कथं कृत इति वाच्यम् । निषेधस्यैतत्स्थलभिन्ने सावकाशत्वात् । अत एव सुधियेति पूर्वमुक्तम् । निषेधस्य गतमासयोजनत्वे नोक्तत्वाच्च चतिः । एवमभीष्टकालादग्रे स्पष्टमानेनाधिमासपातात् पूर्वमधिमासपाताभावेऽप्यनुपातसिद्धगताधिमासा एकहीनाः कार्याः । एतेन मध्यममानमदूरं विप्रकर्षेण स्पष्टकालमनुमापयति । न तु तत्त्वतः कार्यकर्मामित्यपि सूचितमत उपपन्नं स्पष्ट इत्यादि ॥ ३ ॥

मरीचिः—ननु यदाऽधिमासस्यैकान्तरं तदाऽधिशेषस्य त्वागताधिमासशेषत्वात् स्पष्टाधिमासवशादधिशेषाभावाच्च 'कोट्याहतैर्यद्रवभे'-रित्यादिश्लोकद्वयेनार्कचन्द्रौ कथं साध्यावित्यतस्तद्विशेषं तत्साधने चैत्रादिगतमासग्रहणविशेषं चोपजातिकयाऽऽह कृत्वा इति । ततो हेतोः । यत आगताधिमासाः सैका निरेका अत इत्यर्थः । अधिमासानयने यज्ज्ञातमधिशेषं तत् तु कल्पोक्ताधिमासैः "लब्धाहता देवनवेषुचन्द्राः"-इत्युक्तैर्दिनौघैस्त्रिंशद्गुणैः क्रमशः सैकनिरेकलब्धाधिमासक्रमेणेत्यर्थः । युतोनं कृत्वा । सिद्धमधिशेषं ग्राह्यम् । अत्र योजनेनाधिशेषं

कल्पसौरदिनाधिकं चेत् तत् नष्टम् । अधिशेषं तदूनं तु भवति चेत् सौरा दिवसाः कल्पोक्ता योज्यास्ततो दिनीकृत्याधिमासा हीना इति स्वत उक्तरीत्या ध्येयम् । ननु तथाऽपि 'कोट्याहतैर्यद्गवभै'-रित्यादिना सूर्यचन्द्रसाधनं तत्र व्यभिचरति । तथा हि षट्त्रिंशदधिकपञ्चदशशतमितशालिवाहनशके १५३६ शुक्लादिमासगणनया वैशाखकृष्णषष्ठ्यां भौमे सूर्यचन्द्रज्ञानार्थं प्रथमं कल्यहर्गणः साध्यते । कलिवर्षाणि ४७१५ लब्धाधिमासाः १७३९ शेषम् ५४२८५०००००० । अत्र पूर्वमधिमासपाताभावादहर्गणार्थमुक्तरीत्या गताधिमासा निरेकाः १७३८ । अन्यथा तदग्राधिकज्येष्ठकृष्णषष्ठ्यां गुरावहर्गणः स्यात् । चन्द्राहर्गणः १७४९५९० । गतावमानि २७३७६ । शेषम् ४७८०३०५००००० । कल्यहर्गण इन्द्राकृतियमात्यष्टिमितः १७२२२१४ । अस्मादनुपातेन भगणाद्यौ सूर्यचन्द्रौ । सूर्यः ४७१५ । ২० । १० । २१ । चन्द्रः ६३०३४ । ८ । २३ । ४८ । २५ । अथ प्रकारान्तरेणानयोः साधनार्थमधिशेषं प्रयुतघ्नशरगजयमवेदेषुमितम् ५४२८५०००००० । अधिदिनै—४७१९९०००००० रूनं जातं प्रयुतघ्नषड्गजवेदाङ्कमितम् ६४८६०००००००० अधिशेषं तदुपयुक्तम् । अथ चैत्रादियातास्तिथयः पञ्चाशत् ५० । एतदंशाः सूर्यस्य विश्वगुणाश्चन्द्रस्यांशाः ६५० । एतावधिशेषाच्छशिमासभक्ते फलेनांशादिना ७ । २७ हीनौ । सू ४९ । ५२ । ४३ चं ६४९ । ५२ । ४३ । अवमशेषात् सूर्यस्य धनफलं कलाद्यम् । १७ । ३८ चन्द्रस्य २३५ । ४७ । स्वफलयुतौ सूर्यचन्द्रौ राश्याद्यौ सू १ । २० । १० । २१ । चं ९ । २३ । ४८ । ३० । अनयोरहर्गणसाधितयोरेकराश्यन्तरमिति स्पष्टो व्यभिचारः । एवमधिमासपातोत्तरकाले यदा गणितेनैकाधिकमासो न लभ्यते तत्रापि व्यभिचारो बोध्यः । तत् स्थलं त्वेकोनपञ्चाशद्युतपञ्चदशशतशके १५४९ श्रावणशुक्लाष्टम्यां गुरौ प्रसिद्धम् । अहर्गणानीतसूर्यस्य ४ । १० । १२ । २० । तत्प्रकारेणानीतस्य चन्द्रस्य च ३ । १० । १२ । २० । विसंवादादत

आह सैकाधिरेकानित्यादि । अहर्गणार्थं चैत्रादिगतमासा ये गृहीतास्तानधिमासवत् सैकान् निरेकान् कृत्वा चैत्रादियातास्तिथयो ग्राह्या न त्वहर्गणवद्यथागताः । आभ्यां पुष्पवन्तौ ।

"एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" ।

इत्यभिधानात् सूर्यचन्द्रौ खल्वसंशयं कोट्याहतैरित्यादिश्लोकद्वयोक्तप्रकारेण प्रसाध्यौ । पूर्वाहर्गणसाधिताभ्यां संवादेन व्यभिचाराभावादिति भावः । यथोक्तस्थले चैत्रादियातास्तिथयो विंशतिमिताः २० । त्रयोदशगुणाः । पृथक् २६० । अधिशेषफलेन ७ । १७ हीनौ । सू १९ । ५२ । ४३ । चं २५९ । ५२ । ४३ स्वफलेन धनेन सू १७ । ३८ । चं २३५ । ४७ । युतौ राश्यादिकौ सूर्य—० । २० । १० । २१ चन्द्रौ ८ । २३ । ४८ । ३० । अहर्गणानीताविव । एवं द्वितीयस्थलेऽपि चैत्रादिगततिथयः सप्तपञ्चाशदधिकशतमिताः २५७ । आभ्यः सूर्योऽहर्गणानीत एव धूलीकर्मणा साधितः ४ । १० । १२ । १० ।

अत्रोपपत्तिः । अधिमासस्य यदैकमासान्तरं तदा सिद्धाधिशेषं स्वाभीष्टकालमधिकृत्य साधितमपि स्वाभीष्टकालात् तदनुरोधेनैकचन्द्रमासान्तरेण पूर्वमासेऽपरमासे वा सिद्धमतः स्वेष्टकालीनकरणार्थमधिशेषं कल्पचान्द्रदिनैः कल्पाधिमासास्तदा त्रिंशच्चान्द्रदिनैः किमित्यनुपातेनानीतैकचान्द्रमासाधिशेषं सौरम् । कल्पसौरदिनैः कल्पचन्द्रास्तदाऽनेन सौरेण किमित्यनुपातेन चान्द्रं कृत्वा क्रमेणाधिशेषे युतोनं कार्यम् । तत्र गुणहरयोः कल्पचान्द्रदिनयोर्नाशे त्रिंशगुणस्य दिनत्वपर्यवसानात् समच्छेदत्वाच्च कृत्वेत्याद्युपपन्नम् । अथात्र सूर्यचन्द्रसाधनार्थं चैत्रादितिथयोऽहर्गणानयनोपयुक्ता गृह्यन्ते तदा यथा सैकनिरेकागताधिमासग्रहणं विनाऽहर्गणस्त्रिंशद्दिनान्तरितः स्वाभीष्टकालात् तथा सूर्यचन्द्रावपि तद्दिने भवतो न स्वेष्टकालकरणार्थम् । चैत्रादितिथयोऽहर्गणानयनाङ्गीकृता एव त्रिंशद्दिनैर्युतोनाः सन्तः क्रमेण

पादीनां धातूनां यथासंख्यं शिप्रत्यये पिबादय आदेशा भवन्ति । पः पिबः—पिबति । पिबतः पिबन्ति । पिबन् । उत्पिबः । निपिबः । घ्रो जिघ्रः । जिघ्रति । जिघ्रतः । जिघ्रन्ति । जिघ्रन् । उज्जिघ्रः । निजिघ्रः । ध्मो धमः—धमति । धमतः । धमन्ति । धमन् । उद्धमः । निधमः । स्थस्तिष्ठः । तिष्ठति । तिष्ठतः । तिष्ठन्ति । तिष्ठन् । म्नो मनः—आमनति । आमनतः । आमनन्ति । आमनन् । दाणो यच्छः—यच्छति । यच्छतः यच्छन्ति । दृशेः पश्यः—पश्यति । पश्यतः । पश्यन्ति । पश्यन् । उत्पश्यः । निपश्यः । अर्त्तेः ऋच्छः—ऋच्छति । ऋच्छतः ऋच्छन्ति । श्रौतेः शृ—शृणोति । शृणुतः । शृण्वन्ति । दिन्वोः दिः—दिनोति दिनुतः । दिन्वन्ति । कृण्वोः कृ—कृणोति । कृणुतः । कृण्वन्ति । शदेः शीयः । शीयते । शीयेते । शीयन्ते । सदः सीदः—सीदति । सीदतः । सीदन्ति । पा इत्येधादेर्ग्रहणमदादेः—पाति । पान् । दाणिति णकारः यङ्लुग्धात्वन्तरनिवृत्त्यर्थः दादत् । दान् । दृष्ट्यर्तिश्रौतीति दृशः ऋ इत्येतस्य श्रु इत्यस्य च तिपा निर्देशः, दिन्वु कृण्वु इति अनुबन्धनिर्देशश्च यङ्लुग्निवृत्त्यर्थः तेन, दद्दृशत् । आरत् । शोश्रुवत् । देदिन्वत् । चरीकृण्वत् । पादिसाहचर्यादर्त्तेरनेधादेर्न भवति इयत । शवत एव निर्देशान्न भवति ॥

सर्त्तेर्धौ वेगे ॥ ४ । २ । ५८ ॥

सर्त्तेर्धातोः शिप्रत्यये धावादेशो भवति वेगे गम्यमाने धावति । धावतः । धावन्ति । अन्यत्र सरति ॥

ज्ञाजनो जाः ॥ ४ । २ । ६० ॥

ज्ञाजनोर्धात्वोः शिप्रत्यये जादेशो भवति । जानाति । जायते ॥

एद्भिदोऽकः ॥ ४ । २ । ६१ ॥

भिदृ इत्येतस्य धातोरकश्शि प्रत्यये एकारो भवति । भेद्यति । भेद्यतः । भेद्यन्ति । अक इति किम्? हलो मा भूत् । शिति किम्? भिद्यते । भेभिद्यते । अभेद्यत । इत्यदो विप्रकर्षान्न भवति । एवमुत्तरत्रापि ॥

प्वां ह्रस्वः ॥ ४ । २ । ६२ ॥

पू इत्येवमादीनां धातूनामकः शिप्रत्यये ह्रस्वो भवति । पूञ्–पुनाति । लुञ्–लुनाति । धूञ्–धुनाति । स्तॄञ्–स्तृणाति । ज्या–जिनाति । री–रिणाति । ली–लिनाति ॥

शमां दीर्घोऽष्टानाम् ॥ ४ । २ । ६३ ॥

शमादीनां यः शादिप्रत्ययस्तस्मिन् शमादीनामेवाष्टानामको दीर्घो भवति । शाम्यति । धाम्यति । ताम्यति । श्राम्यति । भ्राम्यति । क्षाम्यति । क्लाम्यति । माद्यति । शमादिभिः शिविशेषणाच्छपि न भवति भ्रमति ।

ष्ठिवूक्लम्वाचमः ॥ ४ । २ । ६४ ॥

ष्ठिवूक्लमू आचामामकश्शिप्रत्यये दीर्घो भवति । ष्ठीवति । क्लामति । आचामति । आङ्ग्रहणादिह न भवति । चमति । विचमति ॥

क्रमोऽतङाने ॥ ४ । २ । ६५ ॥

क्रमोऽकोऽतङाने शिप्रत्यये दीर्घो भवति । क्राम्यति । क्रामतु । क्रामेत् । अक्रामत । अतङान इति किम्? आक्रमते चन्द्रमाः । आक्रममाणः ॥

सावारैचः ॥ ४ । २ । ६६ ॥

धातोरकः अतङाने परे सौ परत आआरैचो भवंति । अकार्षीत् । अहार्षीत् । अचैषीत् । अनैषीत् । अलावीत् । साविति

किम् ? एति ये नानाप्राप्तिन्यायेन एङरोऽयं बाधकः । उवादेशो नान्तरङ्गत्वाद्बाध्यते न्यनुवीत् न्यदुवीत् । अतङान इति किम् ? अच्योष्ट । अप्लोष्ट । अक इति किम् ? गौरिवाचारीत् अगवीत् । अचिकीर्षीद् इत्यत इति परत्वादस्य लुक् ॥

हलाम् ॥ ४ । २ । ६७ ॥

हलन्तस्य धातोर्योऽक् तस्यातङाने परे सौ आरैचो भवन्ति । अपाक्षीत् । अधाक्षीत् । अताप्सीत् । अद्राप्सीत् । अभैत्सीत् । अकात्सीत् । अरौत्सीत् । बहुवचनं जात्यर्थं तेनानेकहल्व्यवधानेऽपि भवति—असांक्षीत् । अरांक्षीत् । अताक्षीत् । अत्वाक्षीत् । अत इति किम् ? उदवोढाम् । उदवोढ ।

वद्व्रज्लॄोऽतः ॥ ४ । २ । ६८ ॥

वद्व्रजोर्लकारान्तस्य लघोरकारस्य इडादावतङाने परे सौ अकारो भवति । अवादीत् । अव्राजीत् । अज्वालीत् । अह्वालीत् । अचारीत् । अक्षारीत् । वद्व्रजल् इति किम् ? मा निरवीत् मा निरटीत् । अत इति किम् ? न्यमीलीत् । न्यखोरीत् । अश्वल्लीत् । अवश्चीत् । इत्यत्रातः सेध्वानेकवर्णव्यवधानमिति न भवति ॥

वोर्णुञ्हलादेर्लघोरिटि ॥ ४ । २ । ६९ ॥

ऊर्णुञः हलादेश्च धातोर्हलन्तस्य लघोरकारस्य इडादावताङाने परे सौ परत आरैचो वा भवन्ति । ऊर्णोञ् प्रौर्णावीत् । प्रौर्णवीत् । प्रौर्णुवीत । हलादेः-अकणीत् । अकाणीत । अरणीत् । अराणीत् । गौरिवाचारीत् । अगवीत् । अगावीत् । ऊर्णुञ्हलादेरिति किम् ? मा भवानशीत् । सानुबन्धोपादानात् प्रौर्णोनुवीत् । प्रौर्णोनवीत् । लघोरिति किम् ? अतक्षीत्-अरक्षीत् । इटीति किम् ? अपाक्षीत् अधाक्षीत् । हलामिति

जात्युपादानमिति लघुग्रहणम् । अन्यथानेकवर्णव्यवधानादेवात्र न भवति । अचकासीत् इत्यत्र अज्झलसमुदायेनव्यवधानमिति न भवति ।

न क्षण्श्वसिश्विजागृएदिन्सह्यश्च ॥ ४ । २ । ७० ॥

क्षणादीनामेदितो मह्यान्तस्य हलन्तस्य च धातोरिडादावतङाने परे सौ परतः आरैचो न भवन्ति । क्षण्—अक्षणीत् । श्वस्—व्यश्वसीत् । श्वि—अश्वयीत् । जागृ—अजागरीत् । एदित्—करवै अकरवीत् । रगे अरगीत् । कगे अकगीत् । म—अस्यमीत्—अक्रमीत् । ह्य—अचहीत् । अग्रहीत् । य—अहयीत अव्ययीत् । हलाम्—व्यकर्तीत् । अदेवीत् । असेवीत् । अकोयीत् । अमोषीत् । क्षणादीनां यङ्श्लुगन्तानामपि प्रतिषेधः । अचक्षणीत अशाशसीत् । एदितां तु यङ्श्लुच्ययं प्रतिषेधः—अजाहसीत अजाहासीत् । इटीति किम्? अपाक्षीत् । अधाक्षीत् ॥

धूञ्सुस्तुभ्य इट् ॥ ४ । २ । ७१ ॥

धूञ् सुस्तुभ्यः परस्य सेरतङाने परे इडागमो भवति । अधावीत् । अधाविष्टाम् । अधाविषुः । असावीत् । असाविष्टाम् । असाविषुः । अस्तावीत् । अस्ताविष्टाम् । अस्ताविषुः । बहुवचनं सुमात्रार्थम् । अतङान इति किम्? अधोष्ट । असोष्ट अस्तोष्ट ॥

यंरंनमातां सक्च ॥ ४ । २ । ७२ ॥

यम् रम् नमभ्यः आकारान्तेभ्यश्च धातुभ्यः परस्य सेरतङाने परे इडागमो भवति । सगागमश्चैतेषाम् । अयंसीत् अयंसिष्टाम् । अयंसिषुः । अरंसीत् । अरंसिष्टाम् । अरंसिषुः । अनंसीत् । अनंसिष्टाम् । अनंसिषुः । तिप्सिपोश्चेत्याकारो न भवतीति विशेषः । आतः अयासीत् । अयासिष्टाम् । अयासिषुः । अवासीत् । अवासिष्टाम् । अवासिषुः । अदरिद्रासीत् । अदरिद्रासिष्टाम् ।

अदरिद्रासिषुः । अदरिद्रीत् । अदरिद्रिष्टाम् । अदरिद्रिषुः । इति लुक्पक्षे । अतङान इति किम्? आयंस्त । आरंस्त । आनंस्त दण्डः स्वयमेव । अमास्त धान्यम् । बहुवचनं लाक्षणिकार्थम् । अग्लासिष्टाम् । अग्लासिषुः ॥

घुपाभूस्थैतेश्श्लुक् ॥ ४ । १ । ७३ ॥

घुभ्यः पाभूस्थाभ्यः एतिभ्यां च परस्य सेरतङाने परे श्लुग् भवति । अदात् । अपात् । अभूत् । अस्थात् । अगात् । अध्यगात् । एभ्य इति किम्? अदासीत् केदारम् । अदासीत् भूमिम् । पा इति पा पाने इत्यस्य न पा रक्षणे । पै ओवै शोषणे इत्येतयोरदादित्वाल्लाक्षणिकत्वाच्च अपासीत् धाम । अपासीत् वस्त्रम् । भू इति भवत्यस्त्यादेशयोर्द्वयोर्ग्रहणम् । एतीति तिन्निर्देश इणिगर्थः । अतङान इति किम्? व्यभविष्ट उपास्थिषत ॥

घ्राधेट्शाच्छासो वा ॥ ४ । २ । ७४ ॥

घ्राधेट्शाच्छासाभ्यः परस्य सेरतङाने परे श्लुग्वा भवति । अघ्रात् । अघ्रासीत् । अधात् । अधासीत् । अशात् । अशासीत् । अच्छात् । अच्छासीत् । असात् । असासीत् । अतङान इति किम्? अघ्रासाताम् । अधिषाताम् स्तनौ देवदत्तेन ॥

तन्भ्यस्थास्ते ॥ ४ । २ । ७५ ॥

इहातङान इति निवृत्तम् । तनादिभ्यः परस्य सेः थासि ते च प्रत्यये परे श्लुग्वा भवति । अतत अतथाः । अतनिष्ट अतनिष्ठाः । असात । असाथाः । असनिष्ट । असनिष्ठाः । अक्षथाः । अक्षणिष्ट । अक्षणिष्ठाः । थाससाहचर्यात्तोऽपि । तङेवेत्यत्र न भवति—अतनिष्ट यूयम् ॥

जल्हस्वाल्लुक्सस्तौ ॥ ४ । २ । ७६ ॥

जलन्ताद्ध्रस्वान्ताश्च धातोः परस्य सेस्सकारस्य तवर्गादौ प्रत्यये लुग्भवति । जलः—अभैत्ताम् । अभैत्त। अभित, अभित्थाः। अच्छैत्ताम्। अच्छैत्त। अच्छित्त। अच्छित्थाः। ह्रस्वात्—अकृत। अकृथाः। अहृत। अहृथाः॥ जल्हस्वादिति किम्? अमंस्त। अमास्त। अरंस्त। अच्योष्ट। अप्लोष्ट। स इति किम्? अवादिष्टाम्। अवादिष्ट। ताविति किम्? अभैत्स अभैत्स्न। अभित्साताम्। अभित्सत। अकृषताम्। अकृषत। धातोरिति किम्? अलाविष्टाम्। अपाविष्टाम् ॥

इटीटः ४ । २ । ७७ ॥

इटः उत्तरस्य सेस्सकारस्य इडादौ प्रत्यये लुग्भवति ॥ अलावीत्। अपावीत्। सेर्लुचः स्थानिवद्भावात् ऐच् ॥ इटीति किम्? अलाविष्टाम्। अलाविषुः॥ इट इति किम्? अकार्षीत् अहार्षीत् ॥

धि वा ४ । २ । ७८ ॥

धातोर्धकारादौ प्रत्यये परे सकारस्य लुग्वा भवति ॥ अलविढ्वम्। अलविध्वम्। चकाधि। चकाद्धि। वाग्रहणात् हन्मन्यमिति लोपविषयेऽपि न भवति—अरन्ध्वम्। अमन्ध्वम् ॥

तासस्त्योस्रि ४ । २ । ७९ ॥

तासित्येतस्य अस्तेश्च धातोस्सकारस्य सकारादौ रेफादौ च प्रत्यये लुग्भवति ॥ कर्तासि। कर्तासे। कर्तारौ। कर्तारः। अस्तेः—असि। व्यतिसे। अकारसकारयोर्लोपे 'से' इति प्रत्ययमात्रं पदम् ॥

एति हः ॥ ४ । २ । ८० ॥

तासस्त्योस्सकारस्य एकारादौ प्रत्यये हकारादेशो भवति ॥ कर्ताहे व्यतिहे । इल्—भावयामहे कारयामहे ॥

तस्सि त्यशिल ४ । २ । ८१ ॥

धातोर्ल्यादेशे शिद्वर्जिते लादेशवर्जिते च(१) सकारादौ प्रत्यये सकारस्य तकारादेशो भवति । व्यतिवत्सीष्ट । वत्सीष्ट देवदत्तेन । वत्स्यति । अवत्स्यत् । पिवत्स्यति(२) । जिघत्सति । अवात्सीत् । अवात्ताम् । अवात्तम् । अवात्त(३) । अत्र सि त्यशीति विषयसप्तमी तेन नित्यात् जल्हस्वात् लुकुसस्ताविति लोपादपि(४) सौ तकारो भवति ॥ सीति किम् ? वसिसीष्ट वसिष्यते । त्यशलीति किम् ? आस्से । वस्से । लेर्लत्वेन प्रतिषेधे प्राप्ते ग्रहणम् । शित्प्रतिषेध उत्तरार्थः न हि (५)शित्सकारादिरस्ति ॥ स इति किं ? पत्तीष्ट पक्ष्यति ॥

थ्याहः ॥ ४ । २ । ८२ ॥

आहः ब्रुञादेशस्य थादौ प्रत्यये तकारो भवति । आत्थ । थीति किम् ? आह । आहतुः । आहुः ॥

दीङो यिक्ङित्यचि ॥ ४ । २ । ८३ ॥

दीङो धातोरजादौ क्ङिति प्रत्यये इगागमो भवति । उपदिदीये । उपदिदीयाते । उपदिदीयिरे । उपदिदीयिषे । उपदिदीयाथे । उपदिदीयिध्वे, उपदिदीयिढ्वे । दीङ इति किम् ? उड्डिल्ये । ङकारः किम् ? उपदुद्यितः । अचीति किम् ? उपदेदीयते ।

इटि चातो लुक् ॥ ४ । २ । ८४ ॥

* १ नास्ति । २ खपुस्तके नास्त्ययं पाठः । ३ कपुस्तके नास्ति । ४ खपुस्तके "लोपाविति" इति पाठः ५ खपुस्तके शिखात्सकारादिरिति पाठः ।

आकारान्तस्य धातोरिडादावजादौ च क्ङिति ल्यश्रि प्रत्यये लुग् भवति । इटि—पपिथ । तस्थिथ । क्ङित्यचि—पपतुः । पपुः । तस्थतुः । तस्थुः । अदद्त । आह्वत् । इटि चेति किम् ? ग्लाता । क्ङितीति किम् ? ग्लानम् । अचीति किम् ? ग्लायते । ल्यश्लीति किम् ? यान्ति वान्ति व्यत्यये व्यत्यले ॥

हल्भ्यां लिङ्येद्वा ॥ ४ । २ । ८५ ॥

धातोर्द्वाभ्यां हल्भ्यां परस्याकारस्य क्ङिति प्रत्यये एकारो वा भवति ॥ ग्लेयात्, ग्लायात् । म्लेयात, म्लायात् । स्नेयात्, स्नायात् ॥ हल्भ्यामिति किम् ? यायत् । पायात् । क्ङितीति किम् ? ग्लासीष्ट ॥

घुमास्थागापाहाक्सः ॥ ४ । २ । ८६ ॥

घु मा स्था गा पा हाक् सानां क्ङिति लिङि प्रत्यये नित्यमेकारो भवति । देयात् । धेयात् । मेयात् । स्थेयात् । गेयात् । पेयात् । अवस्येयात् । एतेषामिति किम्? दायात् केदारम् । अवदायाद्भूमिम् । पा इत्यैधादिकस्य ग्रहणं न पा रक्षणे इत्यदादेः—पायात् । क्ङितीति किम् ? दासीष्ट ॥

ई हल्यप्ये ॥ ४ । २ । ८७ ॥

घ्वादीनां धातूनां प्यवर्जिते हलादौ क्ङिति ल्यश्रि प्रत्यये ईकारो भवति । घु—दीयते । देदीयते । दीतः । दीतवान् । दीत्वा स्तनम् । मा—मीयते । स्था—स्थीयते । तेष्ठीयते । गा—गीयते । जेगीयते । गीतः गीतवान् गीत्वा । अध्यगीष्ट । पा—पीयते। पेपीयते । पीतः पीतवान् । पीत्वा । हाक्—हीयते । जेहीयते । हीनः । हीनवान् । हाङः—हायते । जाहायते । सा—सीयते । सेषीयते । हलीति किम् ? तस्थतुः । तस्थुः । अप्य इति किम् ? प्रदाय । प्रधाय । प्रमाय । प्रस्थाय ।

प्रगाय । प्रपाय । अवहाय । अवसाय । ल्यश्लीति किम् ? अदाताम् । अधाताम् । अस्थाताम् । ङ्कितीति किम् ? दाता । धाता ॥

ये ॥ ४ । २ । ८८ ॥

आकारान्तस्य धातोर्यप्रत्यये ईकारो भवति । देयम् । धेयम् । पेयम्, सेयम्, आधेयम् ॥

घ्राध्मोर्यङि ॥ ४ । २ । ८८ ॥

घ्राध्मा इत्येतयोर्धात्वोः यादौ प्रत्यये ईकारो भवति । जेघ्रीयते । देध्मीयते । यङीति किम् ? घ्रायते । ध्मायते । जाघ्राति । दाध्माति इति यङोऽभावान्न भवति ॥

हनो घ्नी हिंसायाम् ॥ ४ । २ । ९० ॥

हनो धातोर्हिंसायां वर्तमानस्य यङि 'घ्नी' इति ईक् अलुक्च निपात्यते । जेघ्नीयते द्विषः । जेघ्नीयिषीष्ट वः । अन्यत्र गतौ—जंघन्यते । केचिदिमं विकल्पेनाहुः—घटकमपि न जंघन्यसि त्वं तु राजन् ॥

अस्तिब्रुवोर्भूवचौ ॥ ४ । २ । ९१ ॥

ल्यश्लीति वर्तते । अस्तेर्ब्रुञश्च ल्यश्लि प्रत्यये विषये यथासंख्यं 'भूवच्' इत्यादेशौ भवतः । बभूव । भूयात् । भविता । अभूत् । भविष्यति । अभविष्यत् । भव्यम् । भविता । भवितव्यम् । उवाच । ऊचे । उच्यात् । वक्षीष्ट । वक्ता । अवोचत् । वक्ष्यति । वक्ष्यते । वक्ष्यत् । अवक्ष्यत । वाच्यम् । वक्ता । वक्तुम् । वक्तव्यम् । ल्यश्लीति किम् ? अस्ति । स्तः । ब्रवीति । आसीत् । अब्रवीत् । अस्तु । ब्रवीतु । स्यात् । ब्रूयात् ॥

चक्षः ख्शाञ् वाचि ॥ ४ । २ । ९२ ॥

चक्षेर्धातोर्वाचि वर्तमानस्य ल्यश्लि प्रत्यये विषये ख्शाञ्

इत्यादेशो भवति । चत्वे आक्शायात् । आक्शेयात् । आक्शाता । आक्शातुम् । आक्शातव्यम् । खयत्वे । आख्शायात् । आख्शेयात् । आख्शात् । आख्शातुम् । आख्शातव्यम् । वाचीति किम् ? चक्षुः विचक्षणः । अत्र बोधे । अवसंचक्ष्याः । परिसंचक्ष्याः । अत्र वर्जने । नृचक्षः राक्षसः । अत्र हिंसायाम् । ल्यश्लीति किम् ? आचष्टे । आचष्ट । आचष्टाम् । आचक्षीत । ख्शाञिति । ञकारो । नित्यात्मनेपदनिवृत्त्यर्थः ॥

लिटि वा ॥ ४ । २ । ८३ ॥

चक्षः लिटि ख्शाञ्वा भवति । आचख्यौ आचख्यतुः आचख्युः । आचचक्षते । आचचक्षिरे ॥

शो यः ॥ ४ । २ । ८४ ॥

ख्शाञादेशस्य यश्शकारस्तस्य यकारादेशो वा भवति । आख्याता । आख्यातम् । आख्यातुम् । आख्यातव्यम् । उपाख्यानम्, । आक्शाता । आक्शातुम् । आक्शातव्यम् । आक्शानम् । शो यत्वविधानं "श्योऽलुचि ॥ १ । २ । ४९ ॥ इत्येवमर्थम् ॥

भ्रस्जस्रोऽर् ॥ ४ । २ । ८५ ॥

भ्रस्ज इत्येतस्य यो रसितिभागस्तस्य ल्यश्लि प्रत्यये विषये अर् इत्यादेशो वा भवति । बभर्ज, बभर्जतुः । बभर्जुः, बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जुः । भर्क्षीष्ट, भ्रक्षीष्ट । अभार्क्षीत्, अभ्राक्षीत् । भर्ष्टा, भर्ष्टुम् । भर्ष्टव्यम्, भ्रष्टा, भ्रष्टुम्, भ्रष्टव्यम् । विभर्क्षति । विभ्रक्षति । बिभर्जिषति, बिभ्रज्जिषति । भर्ग्यम् । भ्रग्यम् । भर्गः भ्रग्गः । भर्जनम्, भ्रज्जनम् । ल्यश्लीति किम् ? भृज्जति । भृज्जते । रसोर्वचने कथं ? भृष्टः । भृष्टवान् ।

भृज्यते । भृज्यात् । बरीभृज्यते । बरीभृज्जितः । इत्यरादेशे कृतेऽपि पूर्वेणाचा सहितस्य यञ इग्भवति ॥

लुङि लुग्दरिद्रः ॥ ४ । २ । ८६ ॥

दरिद्रो लुङि लुग्वा भवति । अदरिद्रीत् । अदरिद्रात् । अदरिद्रि । अदरिद्रायि ॥

अस्सन्वुणवने ॥ ४ । २ । ८७ ॥

दरिद्रातेर्ल्यशिल प्रत्यये विषयभूते नित्यं लुग्भवति । सकारादिसन् वुण्णवु अनट् इत्येतान्वर्जयित्वा । दरिद्र्यात् । दरिद्र्यते । दरिद्रयति । अदरिद्रत् । दरिद्रिता । दरिद्रितुम् । दरिद्रणीयम् । साधु दरिद्री ॥ अस्सन्वुणवन इति किम्? दिदरिद्रासति । दरिद्रायको व्रजति । दरिद्रायकः । दरिद्रायिका । दरिद्राणम् । सनस्सादिविशेषणं किम्? दिदरिद्रिषति । इदमेव ज्ञापकं दरिद्रः सनो विकल्पेनेडिति । वुणवुग्रहणात् वुणि—दरिद्रकः । विषयविज्ञानात्—दुर्दरिद्रम् । आतो न इति अनो न भवति । पुनर्दुरवीषत इलि खः ॥

हलो यः ॥ ४ । २ । ८८ ॥

हलन्ताद्धातोः परस्य यकारस्य ल्यशिल प्रत्यये विषये नित्यं लुग्भवति । बेभिदिषीष्ट । बेभिदिता । मरीमृजषीष्ट । मरीमृजकः । लोटिता । लोटकः । हल इति किम्? पुत्रिय । लोलूयिता । कण्डूयिता । सोसूचिता । सोसूत्रिता । शाशयिता । मोमूडकः । कुषभिता । मगधकः । एयल्लुक्ययनादेशे च हलन्तता । धातोरिति किम्? ईक्षिता । ईर्ष्यिता । मव्यिता । पुत्रकाम्यिता । ल्यशलीति किम्? बेभिद्यते । मगध्यते ॥

क्यो वा ॥ ४ । २ । ८९ ॥

धातोर्हल उत्तरस्य क्यः—क्यच्क्यङोर्यकारस्य ल्यशिल

प्रत्यये परे लुग्वा भवति । समिधिषीष्ट, समिध्यिषीष्ट । समिधिता, समिध्यिता । दृषदिषीष्ट, दृषद्यिषीष्ट । दृषदिता दृषद्यिता । क्यच्क्यङोर्वायम् । हल इति किम्? पुत्रीयिता । काकायिता । ककारः किम्? ईर्ष्यिता । बेभिदिता । आद्युच्चारणं किम्? यक्रि—कुषुभिता । मगधकः । केचित् 'यक्', इत्यत्रापि विकल्पमाहुः । लयश्लीति किम्? समिध्यति । दृषद्यते ॥

अतः ॥ ४ । २ । १०० ॥

अकारान्ताद्धातोर्विहिते लयश्लि प्रत्यये पूर्वस्याकारस्य लुग्भवति । कथयति । कुषुभ्यति । गर्दभ्—गर्दभ इवाचरति क्विपि अलोपः । चिकीर्ष्यात् । चिकीर्षिता । चिकीर्ष्यते । प्रचिकीर्ष्य । समिध्यिता । दृषद्यिता ॥

णेरिक्तानिष्ठामाल्वन्तेत्न्वाय्ये ॥ ४ । २ । १०१ ॥

धातोरवयवस्य णेरिष्टाद्योः क्तयोः इडागमाल्वन्तेत्न्वाय्यवर्जिते च लयश्लि प्रत्यये लुग्भवति । गणितः । गणितवान् । कारितः । कारितवान् । कार्यात् । हार्यात् । अततक्षत् । आटिटत् । कारणा । कारकः । कार्यते । प्रकार्य । ज्ञीप्सति । अनिष्टामाल्वन्तेत्न्वाय्य इति किम्? इट्—कारयिषीष्ट । कारयिता । हारयिता । आम्—कारयाञ्चकार । आलुः—स्पृहयालुः । गृहयालुः । अन्तः—गदयन्तः । इत्नु—स्तनयित्नुः । आय्य—स्पृहयाय्यः । महयाय्य । इक्तग्रहणमिडर्थम् । इकारादिटि कृते लोपः न प्राक्—शाकितः । शाकितवान् । अन्यथा इहेड न स्यात् ॥

दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ता वा ॥ ४ । २ । १०२ ॥

दान्तादयश्शब्दाः क्ते कृतणिलुगादयो वा निपात्यन्ते ।

दान्तः, दमितः । शान्तः, शमितः । पूर्णः, पूरितः । अत्र णिलुग्निपात्यते । दस्तः, दासितः । स्पष्टः, स्पाशितः । छन्नः, छादितः । अत्र ह्रस्वश्च । ज्ञप्तः, ज्ञपितः, ज्ञापितः । अत्र क्वचिद्ध्रस्वश्चेडभावः । सर्वत्र वृत्तो गुणो देवदत्तेनेत्यत्र प्रकृ- 'तेरेव ण्यर्थः वृत्ते क्तः यथा "तेन निवृत्तम्" इति ण्यन्तात् क्ते वर्तितः' इतीष्यते ॥

लघोर्हलः ण्येऽय् ॥ ४ । २ । १०३ ॥

धातोर्यो लघुस्ततः परो यो हल् तस्मात् परस्य णेः ण्ये नत्यमयादेशो भवति । प्रशमय्य । प्रतमय्य । प्रबेभिदय्य । प्रचेच्छिदय्य । प्रकथय्य । प्रगणय्य गतः । लघोरिति किम्? प्रतिपाद्य गतः ॥

वाप्नोः ॥ ४ । २ । १०४ ॥

आप्नु व्याप्तावित्येतस्माद्धातोः परस्य णेः ण्ये परतः अयादेशो वा भवति । प्रापय्य, प्राप्य गतः । विकरणनिर्देशः किम्? अध्याप्य गतः ॥

इ मेङः ॥ ४ । २ । १०५ ॥

मेङः ण्ये परे इकारादेशो वा भवति । अपमित्य, अपमाय ॥

क्षेरीः ॥ ४ । २ । १०६ ॥

'क्षि' इत्येतस्य धातोः ण्ये परतः ईकारो नित्यं भवति । प्रक्षीय, उपक्षीय ॥

क्षय्यजय्यौ शक्तौ ॥ ४ । २ । १०७ ।

'क्षय्यजय्य' इति शक्तौ गम्यमानायां यप्रत्यये अयादेशो निपात्यते । क्षिजिघोर्यः । क्षय्यं देवदत्तेन, क्षय्यो देवदत्तः । जय्य देवदत्तेन, जय्यो देवदत्तः । अन्यत्रार्थे—क्षेयम् । जेयम् ॥

क्रय्यः क्रय्यार्थे ॥ ४ । २ । १०८ ॥

'क्रय्य' इति क्रीणातेर्यप्रत्यये अयादेशो निपात्यते । क्रय्यार्थे—क्रयया चेत्प्रसारितोऽभिधेयो भवति । क्रय्यः कम्बलः । क्रय्या गौः । क्रय्यार्थे इति किम्? क्रेयं नो धान्यं न तु क्रयाय प्रसारितम् ॥

दोसोमास्थां क्ति ॥ ४ । २ । १०९ ॥

द्यति स्यति मा स्था इत्येतेषां क्ति—किति तकारादौ प्रत्यये परे इकारो भवति । दो—निर्दितः । निर्दितवान् । दित्वा । दितिः । सो—अवसितः । अवसितवान् । अवसित्वा । अवसितिः । मा—मितः । मितवान् । मित्वा । मितिः । स्था—स्थितः । स्थितवान् । स्थित्वा । स्थितिः । मा इति मामेङ्माङां सामान्यग्रहणम् । 'दो' इति दो अवखण्डने । 'षो' इति षोऽन्तकर्मणि । क्तीति किम्? अवदाय । अवसाय । ककारः किम्? अवदाता । अवसाता ॥

शो व्रते ॥ ४ । २ । ११० ॥

श्यतेर्व्रतविषये तकारादौ किति प्रत्यये इकारो भवति । संशितं व्रतम् । संशितो व्रती । संशितः व्रतः । संशितशब्दोऽन्यत्राप्यस्तीति व्रतविशेषणं न दुष्यति । अन्यत्र—निशातः । उत्तरेण विकल्पे प्राप्ते नित्यार्थं वचनम् ॥

छश्च वा ॥ ४ । २ । १११ ॥

'शाच्छा' इत्येतयोर्धात्वोस्तकारादौ किति प्रत्यये इकारादेशो वा भवति । निशितः । निशितवान्, निशातः । निशातवान् । अवच्छितः । अवच्छितवान्, अवच्छातः । अवच्छातवान् ।

दद्घोर्दः ॥ ४ । २ । ११२ ॥

'दा' इत्येतस्य धातोर्घुसंज्ञकस्य तकारादौ किति प्रत्यये दत् इत्ययं तकारान्त आदेशो भवति । दत्तः । दत्तवान् । दत्त्वा । दत्तिः । घेरिति किम्? दातं बर्हिः । अवदातं मुखम् । द इति किम्? दीतः स्तनः ।

इतोऽच उपसर्गात् ॥ ४ । २ । ११३ ॥

अजन्तादुपसर्गादुत्तरस्य 'दा' इत्यस्य धातोर्घुसंज्ञकस्य तकारादौ किति प्रत्यये श्तादेशो भवति । शकारः सर्वादेशार्थः । प्रत्तः । प्रत्तवान् । परीत्तः । परीत्तवान् । अच इति किम्? निर्दत्तम् । दुर्दत्तम् । उपसर्गादिति किम्? अधिदत्तम् ।

प्राद्दाञस्ते वारम्भे ॥ ४ । २ । ११४ ॥

'दाञ्' इत्येतस्य आरम्भे—आदिकर्मणि वर्तमानस्य अजन्तादुपसर्गात्प्रादुत्तरस्य तकारादौ किति प्रत्ययेतेक्ते परे श्तादेशो वा भवति । प्रत्तम्, प्रदत्तम् । प्रादिति किम्? परीत्तम् । दाञ इति किम्? दो-प्रत्तम् । त इति किम्? प्रत्तवान् । आरम्भ इति किम्? प्रत्तम् ।

निविस्वन्ववात् ॥ ४ । २ । ११५ ॥

न्यादिभ्यः परस्य दाञः क्तप्रत्यये श्तादेशो वा भवति । नीत्तम्, निदत्तम् । वीत्तम्, विदत्तम् । सूत्तम्, सुदत्तम् । अनूत्तम् । अवात्तम् । अवदत्तम् । व्यवस्थितविभाषाविज्ञानात्—सुदत्तमित्येत्वैके ।

धाञो हिः ॥ ४ । २ ११६ ॥

धाञस्तकारादौ किति प्रत्यये परे हिरादेशो भवति । हितः । हितवान् । हित्वा । हितिः । ञकारः धेट्यङ्श्लुग्निवृत्त्यर्थः । दीतः । दीतवान् । दीत्वा । दीतिः । दादीतः । दादीतवान् ॥

हाक्स्त्वि ॥ ४ । २ । ११७ ॥

'ओहाक् त्यागे' इत्येतस्य तकारादौ क्विति क्त्वाप्रत्यये परे हीत्ययमादेशो भवति । हित्वा राज्यं वनं गतः । ककारः हाङ्निवृत्त्यर्थः । हात्वा भुङ्क्ते । त्वीति किम्? हीनः । तीति किम्? विहाय गतः ॥

जग्धदः प्ये च ॥ ४ । २ । ११८ ॥

'अद्' इत्येतस्य धातोस्तकारादौ क्विति प्ये च प्रत्यये 'जग्ध' इत्ययमादेशो भवति । जग्धः । जग्धवान् । जग्धिः । जग्धा । प्रजग्ध्य । प्ये चेति किम्? अदनम् । तीति किम्? अद्यात् । क्वितीति किम्? अत्तुम् । क्तीत्येव सिद्धे प्यग्रहण-मन्तरङ्गेभ्यो ऽपि प्यो भवतीति ज्ञापनार्थम् । तेन प्रशम्य । प्रपृच्छ्य । प्रदीव्य । प्रखन्य । प्रस्थाय । प्रदाय । प्रदायेत्यादौ "प्ये दीर्घात् ।" इति न भवति । अन्नमिति "णो न्नादित् ।" इति निपातनात् सिद्धं भवति । अन प्राणन इत्यस्य वा औणादिको नः ॥

घस्लज्घञ्लुङ्सनि ॥ ४ । २ । ११९ ॥

अदेर्धातोः अज् घञ् लुङ् सन् इत्येतेषु 'घस्ल्' इत्ययमादेशो भवति । अच्-प्रात्तीति अदनमिति वा प्रघसः । घञ्-घासः । लुङ्-अघसत् । सन्-जिघत्सति । लदिदङर्थः ॥ ।

लिटि वा ॥ ४ । २ । १२० ॥

अदेर्लिटि घस्लादेशो वा भवति । जघास । जक्षतुः । जक्षुः । आद । आदतुः । आदुः ।

वेर्वय् ॥ ४ । २ । १२१ ॥

वेः—वेञः लिटि 'वय' इत्यादेशो वा भवति । उवाय । ऊयतुः । ऊयुः, ववौ । ववतुः । ववुः ॥

हनो वधस्तङि लुङि ॥ ४ । २ । १२२ ॥

हनः—हन् धातोस्तङि लुङि 'वध' इत्ययमादेशो भवति । नित्यापवादः । आवधिष्ट । आवधिषाताम् । आवधिषत । अवधि । आहत । आहसाताम् । आहसत । अघानि । तङीति किम् ? अवधीत् । लुङीति किम् ? आजघ्ने । 'वधकः' इति वधिः प्रकृत्यन्तरम् ॥

लिङि च ॥ ४ । २ । १२३ ॥

हन्तेर्लुङि लिङि च विषये वधादेशो नित्यं भवति । अवधीत् । अवधिष्टाम् । अवधिषुः । वध्यात् । वध्यास्ताम् । वध्यासुः । आवधिषीष्ट । आवधिषीयास्ताम् । आवधिषीरन् । 'वध' इत्यदन्तोऽयम् । अतः "वोर्णुञ्हलादेः" । इत्याकारो न भवति ॥

गैत्योः ॥ ४ । २ । १२४ ॥

एत्योः—इण इकश्च लुङि 'गा' इत्ययमादेशो भवति । अगात् । अगाताम् । अगुः । अगायि भवता । अध्यगात् । अध्यगाताम् । अध्यगुः । अध्यगायि भवता । "ण्येतेरिट्" इतीत्वशासनाल्लिङीति नानुवर्तते ॥

णौ गमज्ञाने ॥ ४ । २ । १२५ ॥

एत्योर्णौ प्रत्ययेऽज्ञानेऽर्थे गम्भवति । इदमर्थविशेषणभिणोनेकोऽसम्भवात्—गमयति । अधिगमयति । अन्यत्र—अर्थान्संप्रत्याययति ॥

सनीङश्च ॥ ४ । २ । १६२ ॥

सनि इङश्च एत्योश्च गम्भवति अज्ञाने । अधिजिगांसते । जिगमिषति । अधिजिगमिषति । अन्यत्र—अर्थान्प्रतीषिषति ॥

गाङ् लिटि ॥ ४ । २ । १२७ ॥

इङः लिटि गाङ् भवति । अधिजगे । अधिजगाते । अधिजगिरे । अधिजगिषे । ङकारः "गाङ्कुटां"० इति विशेषणार्थः ॥

लुङ्लङ्णौ सन्ङे वा ॥ ४ । २ । १२८ ॥

इङः लुङि लृङिः सन्परे ङपरे च णौ गाङ् वा भवति । लुङि—अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत, अध्यैषाताम् । अध्यैषत । लृङि—अध्यगीष्यत । अध्यगीष्येताम् । अध्यगीष्यन्त, अध्यैष्यत । अध्यैष्येताम् । अध्यैष्यन्त । णौ सनि—अधिजिगापयिषति, अध्यापिपयिषति । अध्यजिगपत, अध्यापिपत् । णिग्रहणं किम्? अधिजिगांसते ॥

वलनेऽचो वि ॥ ४ । २ । १२९ ॥

'अच्' इत्येतस्य धातोर्वलादौ 'अनः' इत्येतस्मिंश्च ल्यप्शिल प्रत्यये विषयभूते वीत्ययमादेशो भवति वा । नित्यापवादः । प्रवेता । प्रवेतुम् । प्रवेतव्यम्, प्राजिता । प्राजितुम् । प्राजितव्यम् । प्रवयणो दण्डः, प्राजनो दण्डः ।

अक्यब्घञचि ॥ ४ । २ । १३० ॥

अजेर्धातोः क्यप् घञ् अच् वर्जिते ल्यप्शि प्रत्यये वी नित्यं भवति । वीयात् । वीयास्ताम् । वीयासुः । विवाय । विव्यतुः । विव्युः । वीयते । प्रवेयम् । प्रवयणीयम् । प्रवायकः । प्रवीय । अक्यब्घञचीति किम्? समज्या । समाजः । उदजः । समजः । पशूनां यजतीत्यजः अजा ॥

लङ् लुङ् लृङ्यमाङाट् ॥ ४ । २ । १३१ ॥

धातोर्लङ् लुङ् लृङ् विषये अडागमो भवति अमाङा—न चेन्माङास्य योगो भवति । अकरोत् । अहरत् । अकार्षीत् ।

अहार्षीत् । अकरिष्यत् । अहरिष्यत् । विषयविज्ञानाद्धिकरण-व्यवधानेऽपि भवति । अमाङेति किम्? मा स्म भवान् करोत् । मा भवान् कार्षीत् । मा दोषवन्ति वचनानि समानि भूवन् ॥

आरैजाद्यचः ॥ ४ । २ । १३२ ॥

लङ्लुङ्लृङ्विषये धातोरादेरचः आरैचो भवन्ति अमाङा योगे । आ—आटत् । अश्नात् । आटीत् । आशीत् । आटिष्यत् । आशिष्यत् । आर्च्छ—आर्च्छत् । ऋणातेः—आर्णात् । आर्च्छीत् । आर्च्छिष्यत् । ऐच्—ऐहतः । ऐलयत । ऐजयत । ऐहिष्ट । ऐलिलत् । ऐहिष्यत । ऐलिष्यत् । औ-'औजत् । औम्भत् । औष्यत् । औब्जीत् । औम्भीत् । औब्जिष्यत् । औम्भिष्यत्' । औच्छत् । औभत् औम्भत् । औच्छीत् । औम्भीत् । औच्छिष्यत् । (औम्भीत् कुत्रचिदयं पाठः) ॥ उस्नम्—ऐच्छत् । औस्त्रीयत् । औंकारीयत् । आ—ऊढा ओढा, तामैच्छत् औढीयत् । अमाङेति किम्? मा स्म भवानटत् । मा भवानटीत् । मा स्म भवानृच्छत् । मा भवानृच्छीत् ॥

यसः ॥ ४ । २ । १३३ ॥

इणः इकस्य अस भुवीत्यस्य च धातोराद्यचः लङ्लुङ्लृङ्-विषये आरेजासन्न ऐकार आकारश्चादेशो भवति अमाङ्योगे । यङ्लुगपवादः । आयन् । अध्यायन् । आस्ताम् आसन् । अमाङेति किम्? मा स्म भवन्तो यन् । मा स्म भवन्तस्सन् । अगात् । अभूत् इति नेमाङादेशस्य, कस्य तर्हि? धातोरिति न बाध्येते । इदमेव ज्ञापकं लङ्लुङ्लृङिति विषय-विज्ञानेऽपि निष्पन्नेऽन्यस्मिन् धातुप्रत्यये कार्ये पश्चात् आरैच् भवंतीति । तेन—अचीकरत् । अजीहरत । अध्यैयन् । अध्यैयन् । ऐयरुरित्यादि सिद्धम् ॥

वलादेरिडत्रवषुणादेः ॥ ४ । २ । १३४ ॥

धातोर्वलादेर्ल्यशलः प्रत्ययस्येडागमो भवति अत्रवषुणादेः—न चेदसौ त्रः वषादिरुणादिर्वा भवति । लुलविथ । लुलुविषे । लुलुविढ्वे । लविषीष्ट । पविषीष्ट । लविता । पविता । वलादेरिति किम् ? लव्यम् । लवनीयम् । आदिग्रहणं किम् ? लावकः । पावकः । अत्रवषुणादेरिति किम् ? त्र—हलस्य पोत्रम् । सूकरस्य पोत्रम् । पत्रम् । वष्—ईश्वरः । नश्वरः । दीप्रम् भस्म । यत्नः । उणादि तु—तन्तुः । जन्तुः । थ—कोष्ठम् । कुष्ठम् । तृ—शस्ता, शंस्ता । स्नक्—कृत्स्नम्, तीक्ष्णम् । रुरुदिव रुरुदिम इति स्वादिनियमादिट् । ल्यशलीति किम् ? आस्ते । शास्ते ॥

तेर्ग्रहादिभ्यः ॥ ४ । २ । १३५ ॥

ग्रहादिभ्यः परस्य वलादेर्ल्यशलः प्रत्ययस्य तेरिडागमो भवति । गृहीतिः । उपस्निहितिः । निकुचितिः । निपठितिः । उदितिः । तेर्ग्रहणादेरेवेति नियमात्—वान्तिः । दीप्तिः । पाक्तिः । याष्टिः । प्रच्छप्तिः । इत्यादौ न भवति ॥

ग्रह एकाचोऽलिटीटः ॥ ४ । २ । १३६ ॥

एकाचो ग्रहेर्धातोरिट इडागमो भवति ,अलिटि—न चेत्स इट् लिटि भवति । गृहीता । ग्रहीतुम् । ग्रहीतव्यम् । अग्रहीत् । अग्रहीध्वम् । ग्रह इति किम् ? भविता । एकाच इति किम् ? जरीगृहीता । जरीगृहीतुम् । जरीगृहीतव्यम् । अलिटीति किम् ? जगृहिव । जगृहिम । इट इति किम् ? ग्रहणम् । आग्रहीषाताम् इति जिटि नेट् ॥

ऋद्वूर्वालतङ्सेः ॥ ४ । २ । १३७ ॥

ऋकारान्तात् 'वृ' इति वृञ्वृङ्भ्यां च इट इड् भवति वा अलतङ्सेः—न चेत्स लिङ्लिटोरतङ्परस्य च सेर्भवति ।

तरिता, तरीता। तितरिषति, तितरीषति। जरिता, जरीता। जरित्वा, जरीत्वा। जिजरिषति, जिजरीषति। वृ-वरिता, वरीता। विवरिषते, विवरीषते। प्रावरिता, प्रावरीता। प्राविवरिषति, प्राविवरीषति। ऋद्वुरिति किम्? करिष्यति। हरिष्यति। अलङ्सेरिति किम्? तेरिथ। ववरिथ। तेरिव तेरिम। विशरिषीष्ट। आस्तरिषीष्ट। वरिषीष्ट। प्रावरीषीष्ट। अतारिष्टाम् अतारिषुः। आस्तारिष्टाम् आस्तारिषुः। प्रावारिष्टाम् प्रावारिषुः। अलङिति विशेषणादिहेड् भवत्येव—आस्तरिष्ट, आस्तरीष्ट। आवरिष्ट, आवरीष्ट। प्रातरिष्ट, प्रातरीष्ट॥

हल्यां चोऽसट् तङ्सेः॥ ४। २। १३८॥

धातोर्हल्भ्यां—हल्द्वयात्परो य ऋकारस्तदन्तात् ऋद्वुश्च धातोः परस्य सटः तङ्परस्य च सेरिडागमो वा भवति। द्वृषीष्ट, द्वरिषीष्ट, स्मृषीष्ट, स्मरिषीष्ट। तर्षीष्ट। तरिषीष्ट, आस्तीर्षीष्ट, आस्तरिषीष्ट। वृषीष्ट, वरिषीष्ट। प्रावृषीष्ट, प्रावरिषीष्ट। तङ्सेः—अध्वृषाताम्, अध्वरिषाताम्। अस्मृषाताम्, अस्मरिषाताम्। आस्तीर्ष्ट, आस्तरिष्ट। अवृत, अवृषीष्ट। प्रावृत, प्रावरिषीष्ट। हल्भ्यामिति किम्? कृषीष्ट। अकृत। धातोरिति विशेषणादिह न भवति—निष्कृषीष्ट। मा निष्कृत। "स्कृच्छृत" इति स्कृग्रहणात्सट् हल्भ्यामिति न निर्दिश्यते। तेनेह न भवति संस्कृषीष्ट। समस्कृत। तङ्ग्रहणं किम्? अध्वार्षीत। अस्मार्षीत्। अतारीत्। अस्तारीत्। प्रावारीत्। प्रावारिष्टाम्। प्रावारिषुः॥

रधाद्यौदिद्धूञः॥ ४। २। १३९॥

रधादेरौदितः धूञश्च धातोः परस्य वलादेर्ल्यस्तः प्रत्य-

यस्य इडागमो वा भवति । रध–रद्धा । रधिता । नश–नष्टा, नशिता । तृप्–तप्ता । तर्पिता । दृप्–दप्ता । दर्पिता । द्रुह्–द्रोग्धा । द्रोढा । द्रोहिता । मुह– मोग्धा, मोढा, मोहिता । ष्णुह–स्नोग्धा, स्नोहिता । स्नोढा । स्नेह–स्नेग्धा । स्नेढा स्नेहिता । औदितः–गुपौ–गोप्ता, गोपिता । गुहौ निगोढा, निगूहिता । गाहौ—निगाढा, विगाहिता । औस्ट—सर्ता, सरिता । षूङौ–सोता, सविता । धूञ्–धोता, धविता ॥

अन्जोऽसेः ॥ ४ । २ । १४० ॥

अन्जो धातोः परस्य सिवर्जितस्य वलादेर्ल्यस्न: प्रत्ययस्य इडागमो भवति वा । अंक्ता । अंजिता । असेरिति किम् ? आंजीत । आंजिष्टां । आंजिषुः ।

निष्कुषः ॥ ४ । २ । १४१ ॥

निस् पूर्वात्कुषो धातोः परस्य वलादेः प्रत्ययस्य इडागमो वा भवति । निष्क्रोष्टा । निष्कोषितुं । निष्क्रोष्टव्यं । निष्कोषिता । निसोऽन्यत्र नित्य एव कोषिता । प्रकोषिता ।

क्तयोः ॥ । ४ । २ । १४२ ॥

निष्कुषः क्तयोरिड्नित्यं भवति । निष्कुषितः । निष्कुषितवान् ।

न डीयश्व्यैदिद्वेटोऽपतः॥ ४ । २ । १४३ ॥

डीयश्वि इत्येताभ्यां ऐकारानुबंधात् वेटः यत्र कुत्रचिद् विकल्पते टश्च धातोः क्तयोरिड्न भवति अपतः पतिवर्जितात् । डीयः डीनः । डीनवान् । उड्डीनः । उड्डीनवान् । डीय इति श्यनिर्देशादेधादेरिड्भवत्येव-डयितः । डयितवान् ॥ श्वि–शूनः । शूनवान् । ऐदितः ओलजैः लग्नः । लग्नवान् । ओविचैङ्–उद्विग्नः । उद्विग्नवान् । वेट्–अपरद्धः । अपरद्धवान् ।

अक्तः । अक्तवान् । शांतः । शांतवान् । सोढा । सोढवान् । भृष्टः । भृष्टवान् । विन्नः विन्नवान् । तृणाः । तृणवान् । अतप इति किम् ? परितः । परितवान् । एकाच इत्येव दरिद्रितः । दरिद्रितवान् । कृत्तत्यादेः—कृतृन्नृच्छृदः स्यसौ इति विकल्पेनेट्त्वेपि एदित्वं यङ्श्लुगर्थं चरीकृतवान् इति ।

अर्दस्सन्निवेः ॥ ४ । २ । १४४ ॥

सन्निविभ्यः परादर्देः क्तयोरविदूरेप्रकृष्टे चार्थे इड्न भवति । समर्णः । व्यर्णः । न्यर्णः । सन्निवेरिति किम् ? अर्दितः । दुरर्दितः ।

अविदूरेऽभेः ॥ ४ । २ । १४५ ॥

अभेरुत्तरादर्देः क्तयोरविदूरे अविप्रकृष्टेऽर्थे इड्न भवति । अभ्यर्णमविदूरमित्यर्थः । अभ्यर्णा शरत् अभ्यर्णे सेने । अन्यत्र अभ्यर्दितः, शीतेन बाधित इत्यर्थः ।

शसिधृषः प्रागल्भे ॥ ४ । २ । १४६ ॥

शसिधृषिभ्यां क्तयोः प्रागल्भेऽर्थे इड्न भवति । शस्तः । विशस्तः । धृष्टः प्रगल्भ इत्यर्थः । अन्यत्र—विशसितः । धर्षितः ।

कषः कृच्छ्रगहने ॥ ४ । २ । १४७ ॥

कृच्छ्रं दुःखं दुःखकारणं च तस्मिन् गहने चार्थे कषेर्धातोः क्तयोरिड्न भवति । कष्टं वर्तते । कष्टं गणितं । कष्टं वनं । अन्यत्र—कषितं ।

घुषोऽविशब्दे ॥ ४ । २ । १४८ ॥

नाना शब्दनं विशब्दः । प्रतिज्ञानं वा ततोऽन्यत्राविशब्देऽर्थे वर्तमानाद्घुषेर्धातोः क्तयोरिड्न भवति । घुष्टा रज्जुः । घुष्टौ पादौ । घुष्टाः संबद्धावयवा इत्यर्थः । अन्यत्र—अवघुषितं वाक्यमाह । अयमेव विशब्दने प्रतिषेधो ज्ञापकः अनित्य-

प्रचुरादि णिजिति, तेनेदमप्यनुपपन्नं । जुघुषुः । घुष्यमाणाः वा

दृढः स्थूलबलिनोः ॥ ४ । २ । १४९ ॥

दृढ इति दृहेर्दृन्हेर्वा धातोः क्तप्रत्यये स्थूले बलवति चार्थे इडभावादि निपात्यते । दृढः स्थूलः बलीयान् वा । परिदृढस्य गतः । पारिदृढा कन्या । अन्यत्र–दृहितं दृंहितं ॥

क्षुब्धस्वान्तध्वान्तपरिवृढलग्नम्लिष्टविरिब्धफांटबाढं मंथमनस्तमःप्रभुसक्तास्पष्टस्वरानायासभृशे ॥ ४ । २ । १५० ॥

क्षुब्धादि यथासंख्यं मन्थादिष्वर्थेषु निपात्यन्ते । क्षुभेः क्ते मन्थे इडभावे निपात्यते । मन्थनं, मथ्यते वा यः सः मन्थः, तदभिधाने क्षुब्धं देवदत्तेन मलितमित्यर्थः । क्षुब्धः समुद्रः, मथितः मथ्यमानो वा । संक्षोभं गत इत्यर्थः । सक्तुसंपृष्टं वा । द्रवद्रव्यं मन्थः । तद्द्रव्याभिधाने क्षुब्धः मन्थः इत्यर्थः । संवलितो मन्थ इत्यन्ये । अन्यत्र क्षुभितं समुद्रेण । क्षुभितं मन्थनेन । क्षुभितः समुद्रः । स्वनेः–स्वान्तं मनः विषयेष्वविक्षिप्तमनाकुलमित्यर्थः । तन्नामधेयं वा । अन्यत्र–स्वनितो मृदङ्गः । स्वनितं मनसा । घटितं स्पृष्टमित्यर्थः । ध्वन्-ध्वान्तं तमः । अनालोकं गम्भीरमित्यर्थः । तन्नामधेयं वा । अन्यत्र–ध्वनितो मृदङ्गः । ध्वनितं तमसा । परिपूर्वस्य वृहेर्वृंहेर्वा क्ते इडभावादि परिवृढः कुटुम्बी, प्रभुरित्यर्थः । परिवृढस्य गतः । पारिवृढी कन्या । अन्यत्र–परिवृंहितं । लगतेर्लग्नः सक्त इत्यर्थः । लगितमन्यत् । म्लेच्छतेः–इडभावः इत्वं च म्लिष्टः अविस्पष्ट म्लेच्छितमन्यत् । रेभे रेभृच् शब्दे इत्यस्य वा । विपूर्वस्य इत्वं च विरिब्धः स्वरो ध्वनिरित्यर्थः । विरिभितमन्यत् । विरेभितं चान्यत् । विभिः सौत्रो धातुः । फलेः फांटमनायासं

यदश्रपितमपीष्टमुदकसंपर्कमात्रात् विभक्तरसं कषायं तदुच्यते । अग्निना तप्तं यत् किञ्चिदुष्णं तत् फांटमित्यन्ये । फाणितमन्यत् । वाहेः-बाढं भृशमित्यर्थः । वाहितमन्यत् ।

आदितः ॥ ४ । २ । १५१ ॥

आदितो धातोः क्तयोरिड्न भवति । ञिमिदा-विन्नः, विन्नवान् । ञिक्ष्विदा-क्ष्विण्णः । क्ष्विण्णवान् ॥

भावारम्भे वा ॥ ४ । २ । १५२ ॥

आदितो धातोः भावे आरम्भे अधिकर्मणि चार्थे क्तयोरिड् वा भवति । मिन्नमनेन । मिदितमनेन । प्रमिन्नः । प्रमेदितः । प्रमिन्नवान् । प्रमेदितवान् । क्ष्विण्णमनेन । क्ष्वेदितमनेन । प्रक्ष्विण्णः । प्रक्ष्विण्णवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । आदित इति किम्? विदितमनेन । प्रविदितः । अन्यत्र-विन्नः । विन्नवान् ॥

शकेः कर्मणि ॥ ४ । २ । १५३ ॥

शकेः कर्मणि क्तयोरिड्वा भवति । शक्तो घटः कर्तुं शकितो घटः कर्तुम् । अन्यत्र-शक्तो देवदत्तः ॥

हृषेर्लोमविस्मयप्रतिघाते ॥ ४ । २ । १५४ ॥

हृषेर्धातोः लोमविस्मयप्रतिघातेषु वर्तमानात् क्तयोरिड्वा भवति । लोमविषया लोमस्थक्रिया लोमेत्युच्यते । लोमशाङ्कजम्, मूर्द्धजं च गृह्यते । हृषितं हृष्टानि लोमानि । हृषितानि हृष्टं । हृषितं लोमभिः । एवं हृष्टाः केशाः । हृषिताः केशाः । हृष्टं हृषितं केशैः । विस्मये-हृष्टः । हृषितः देवदत्तः । विस्मित इत्यर्थः । प्रतिघाते-हृष्टाः । हृषिताः दंताः । प्रतिघाता इत्यर्थः । अन्यत्र-हृष्टोऽलीकं । हृषितः तुष्टो ॥

जप्तश्वस्तापचितम् ॥ ४ । २ । १५५ ॥

जप्तादयः क्ते वा निपात्यते । जप्तः । जपितः । श्वस्तः । श्वसितः । अपचितः आश्वस्तः । आश्वसितः । अपचितः । अपचायितः ।

वमरुष्यमत्वरसंघुषास्वनः ॥ ४ । २ । १५६ ॥

वमादिभ्यः क्तयोरिड्वा न भवति । व—वान्तः । वान्तवान् । वमितः । वमितवान् । रुषी-रुष्टः । रुष्टवान् । रुषितः । रुषितवान् । अस्य वेटिति नित्ये प्रतिषेधे ग्रहणम् । अम-अभ्यान्तः । अभ्यान्तवान् । अभ्यमितः । अभ्यमितवान् । त्वर्—तूर्णः । तूर्णवान् । त्वरितः । त्वरितवान् । संघुष्—संघुष्टं संघुषितं वाक्यम् । संघुष्टौ, संघुषितौ दन्यौ । अविशब्दनेऽपि परत्वादयमेव विकल्पः । आस्वन्—आस्वान्तः । आस्वनितो देवदत्तः । आस्वान्तः । आस्वनितं मनः मनस्यप्ययमेव विकल्पः ।

जृव्रश्चास्त्वि ॥ ४ । २ । १५७ ॥

जृव्रश्चिभ्यां क्त्वाप्रत्यये परे तस्येड् नित्यं भवति । जरित्वा । जरीत्वा । व्रश्चित्वा । जृषिति दैवादिकस्य धानुबन्धस्य जीर्त्वा ।

क्तक्त्वा क्षुधवसः ॥ ४ । २ । १५८ ॥

क्षुधवसाभ्यां परयोः क्त्वायाश्च वलादेरिड् भवति । क्षुधितः । क्षुधितवान् । क्षुधित्वा । क्षोधित्वा । उषितः । उषितवान् । उषित्वा । वस्तेरनिषेधादिडस्त्येव ।

लुभ्यंचेर्विमोहार्चे ॥ ४ । २ । १५९ ॥

लुभि अंचिभ्यां यथासंख्यं विमोहे अर्चायां चार्थे क्तयोः क्त्वायाश्च वलादेरिड् भवति । विलुभितः सीमन्तः । विलु-

भिताः केशाः । विलुभितानि पदानि । विलुभितमन्यः । लुभित्वा लोभित्वा केशान् गतः । अंचि—अंचिताः गुरवः । गुरूनञ्चितवन्तः । अञ्चित्वा गुरून् स्वर्गमाप्नोति । अन्यत्र—लुब्धो जाल्मः । लुब्ध्वा । लुभित्वा । लोभित्वा । उदक्तमुदकं कूपात् । अक्त्वा—अञ्चित्वा । विमोहनमाकुलीकरणम् । अर्चा पूजा ।

पूङ्क्लिशो वा ॥ ४ । २ । १६० ॥

पूङ्क्लिशिभ्यां परयोः क्तयोः क्त्वायाश्च वलादेरिड्वा भवति । पूतः । पूतवान् । पूत्वा । पवितः । पवितवान् । पवित्वा । क्लिष्टः । क्लिष्टवान् । क्लिष्ट्वा । क्लिशितः । क्लिशितवान् । क्लिशित्वा । ङकारः पूञ् निवृत्त्यर्थः । तस्य शिङ् दिङ् पुङित्यनिषेधात् पवित इत्यनिष्टं स्यात्तत्र च ङकारोच्चारणं, पोपवितः । पोपवितवान् । इति यङ्लुचि निषेधनिवृत्यर्थः ।

त्व्यूदितः ॥ ४ । २ । १६१ ॥

उदितो धातोः क्त्वाप्रत्यये वलादेरिड्वा भवति । शमू—शान्त्वा । दमू—दान्त्वा । शमित्वा । दमित्वा ॥

सहलुभेच्छरुषरिषस्ति ॥ ४ । २ । १६२ ॥

सहादिभ्यस्तकारे परे वलादेर्ल्यंशलः प्रत्ययस्य इड्वा भवति । सह—सोढा । सोढुम् । सोढव्यम् । सहिता ॥ सहितुं । सहितव्यम् । लुभ—लोब्धा । लोब्धुं । लोब्धव्यं । लोभिता । लोभितुम् । लोभितव्यम् । इच्छ—एष्टा । एष्टुम् । एष्टव्यं । एषिता । एषितुं एषितव्यम् । इच्छेति इषेः शविकरणस्योपादानादिष गतौ इष आभीक्ष्ण्ये इत्येताभ्यां नित्यमेवेट् । प्रेषिता । प्रेषितुं । केचिदिष्णातेरपि विकल्पमाहुः । रुष—रोष्टा । रोषिता । रिष्टः रेषिता । तीति किम्? सहिष्यते ॥

अस्ज्रृधदम्भतन्सन्पति ज्ञपि श्रियूर्णुभरस्वृश्रि-
वृतस्सनि ॥ ४ । २ । १६३ ॥

अस्यादिभ्य इव इत्येवमन्तेभ्यः ऋकारान्तेभ्यश्च धातुभ्यः परस्य वलादेर्यशलः प्रत्ययस्य इड्वा भवति । सनि—भ्रस्ज-विभ्रक्षति । विभर्क्षति । बिभ्रज्जिषति । बिभर्जिषति । ऋध्—ईर्त्संति । अर्दिधिषति । दंभ—धिप्सति । दिदम्भिषति । तन्—तितन्सति तितान्सति । तितनिषति । सन्—सिषासति । सिषनिषति । सनतेः सनोतेश्च ग्रहणम् । पति—पित्सति । पिपतिषति । ज्ञपि—जिज्ञपयिषति । ज्ञपीति कृतह्रस्वस्योपादानात् ज्ञापेः—जिज्ञापयिषतीत्येव भवति । श्रि—शिश्रीषति । शिश्रयिषति । यु युयूषति । यियविषति । ऊर्णु—प्रोर्णुनूषति । प्रोर्णुनुविषति । प्रोर्णुनविषति । भर—बुभूर्षति । बिभरिषति । भर इतिशब्निर्देशः । टुडुभृञ् निवृत्त्यर्थः । अन्ये—तयोनार्थ भेदः । भर इत्यरादेशनिपातनमेतत् । बिभर्षत्यर्थमित्याहुः । स्वृ—सुस्वूर्षति । सिस्वरिषति । वृ—वुवूर्षति । विवरिषते । विवरीषते । प्रावुवूर्षति । प्राविवरिषति । प्राविवरीषति । वृ इति वृङवृञो-र्ग्रहणम् । दिव्—दिद्यूषति । दिदेविषति । सुस्यूषति । सिसेविषति । ॠत्—तितीर्षति । तितरिषति । तितरीषति । आतिस्तीर्षति । आतिस्तरिषति । आतिस्तरीषति । चिकीर्षति । जिहीर्षति । ति दीर्घे कृते ॠकारो लाक्षणिक इति न भवति ॥

क्राद्युपूङ्स्म्यञ्जुशः ॥ ४ । २ । १६४ ॥

कॄ विक्षेपण इत्यादिभ्यः पंचभ्यः ऋपूङ्स्मिङ् अञ्जू अशिभ्यश्च सन इड्नित्यं भवति । क्रादि—चिकरिषति । जिगरिषति । दिदरिषते । दिधरिषते । पिपृच्छिषति । प्रच्छेः परतो वृत्करणात्तुदादिप्रतिपत्तेः । कृणातेः चिकीर्षति । गृणातेः

जिगीर्षति । दरतेः दिद्रीर्षते । इतीड् भवति । ऋ—अरीरिषति । पूङ् पीपविषते । पूञः पुपूषति । स्मिङ्—सिस्मयिषति । अञ्जि अंजिजिषति । अश् अशिशिषते ॥

न किदाद्युग्ग्रहगुहः ॥ ४ । २ । १६५ ॥

किदादिभ्यः उगंताद्ग्रहगुहाभ्यां च सनि इड्न भवति । चिकीर्त्सति । चिकित्सति । तितिक्षते । शिशांसते । दिदांसते । गुरूषते । लुलूषति । जिघृक्षति । जुघुक्षति । कित् तिज् गुप् । शान् । दान् । मान् । ओदाः । किदादयः॥

ऋद्धनस्स्ये ॥ ४ । २ । १६६ ॥

ऋकारांतात् हन्तेश्च परस्य स्यवलः प्रत्ययस्य इड् भवति स्ये । करिष्यति । अकरिष्यत । हरिष्यति । अहरिष्यत। स्वरिष्यति । अस्वरिष्यत । हनिष्यति । अहनिष्यत् ॥

क्वस्यैकाज्घसः ॥ ४ । २ । १६७ ॥

आकारांतादेकाचः घसश्च धातोः परस्य स्यवलः प्रत्ययस्य इड् भवति । क्वसौ आतः । पपिवान् । तस्थिवान् । एकाचः—आधिवान् । अनूधिवान् । पेचिवान् । उपसेदिवान् । घसः--जक्षिवान् । एकाज्घस इति किम् ? बिभिद्वान् । बभूवान् । नित्यत्वाद्द्विर्वचने कृते अनेकाज्त्वम् । इण्—ईयिवान् । समीयिवान् । अत्र द्विर्वचने दीर्घे सत्येकाजेवायं भवतीति इटः प्रासिद्धाभावादिड्नित्य इति पूर्वमेव भवति । अघस्ग्रहणमनेकाजर्थम् । स्नादिनियमादिटि प्राप्ते नियमार्थं वचनम् ।

गम्हन्विद्दृशविशो वा ॥ ४ । २ । १६८ ॥

गम् हन् विद् दृश् विश् इत्येतेभ्यः क्वसः इड्वा भवति । जगन्वान् । जग्मिवान् । जघन्वान् । जघ्निवान्। विविद्वान्। विविदिवान् ददृश्वान् । ददृशिवान् । विविश्वान् । विविशि-

वान् । अदाद्यनदाद्योरनदादेरेव ग्रहणमिति लाभार्थस्य विदेर्ग्रहणं । ज्ञानार्थस्य विविद्वानित्येव भवति । सत्ताविचारणार्थयोः क्सुरेव नास्ति ॥

कृत्तृन्नृच्चृच्छृदस्यसौ ॥ ४ । २ । १६९ ॥

कृतै च्छेदने कृतै संवेष्टने इति द्वयोरपि ग्रहणं तृदृञ् हिंसानादरयोः नृतै गात्रविक्षेपणे । चृतै हिंसाग्रंथनयोः । च्छृदसं दीपने । एभ्यो धातुभ्यः परस्य स्यश्लः प्रत्ययस्य इड्वा भवति । सकारादौ संवर्जते । कृत्–कर्त्स्यंति । अकर्त्स्यत् । चिकर्त्सति । कर्तिष्यति । अकर्तिष्यत् । चिकर्तिष्यति । तृद्–तर्त्स्यति । अतर्त्स्यत् । तितृत्सति । तर्दिष्यति । अतर्दिष्यत् । तितर्दिषति । नृत्–नर्त्स्यति । अनर्त्स्यत् । निनृत्सति । नर्तिष्यति । अनर्तिष्यत् । निनर्तिष्यति । चृत्–चर्त्स्यत् । अचर्त्स्यत् । चिचृत्सति । चर्तिष्यति । अचर्तिष्यत् । चिचर्तिषति । च्छृद्–च्छर्त्स्यति । अच्छर्त्स्यत् । चिच्छृत्सति । छर्दिष्यति । अच्छर्दिष्यत् । चिच्छर्दिषति । सीति किम् ? कर्तिता । तर्दिता नर्तिता । चर्तिता । छर्दिता । असाविति किम् ? अकर्तीत् । अतर्दीत् । अनर्तीत् । अचर्तीत् । अच्छर्दीत् ।

गमः ॥ ४ । २ । १७० ॥

गमेर्धातोः परस्य सकारादेर्ल्यश्लः प्रत्ययस्य इड्वा भवति । संजिगंसिता । संजिगमिषिता । अधिजिगांसिता । अधिजिगमिषिता । सीति किम् ? गन्ता ॥

अतङः ॥ ४ । २ । १७१ ॥

अतङ्निमित्ताद्गमेः परस्य सकारादेर्ल्यश्लः परस्य इड्नित्यं भवति । गमिष्यति । अगमिष्यत् । जिगमिष्यति । अजिग-

मिष्यत् । जिगमिषितुम् । अधिजिगमिषिता । अधिजिगमिषितुम् । अधिजिगमिषितव्यम् ।

न वृद्भ्यः ॥ ४ । २ । १७२ ॥

अतङः इति वर्तते । न सीति । वृतादिभ्यः अतङ्निमित्तेभ्यः परस्य प्रत्ययस्य वट् न भवति । अतङ्निमितम् च वृतादयः स्यसनोस्तासि च क्रपिः । वृतूङ्—वर्त्स्यति । अवर्त्स्यत् । विवृत्सयति । विवृत्सितुम् । वृधूङ् । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । विवृत्सितुम् । शृदूङ्—शर्त्स्यति । अशर्त्स्यत् । शिशृत्स्यति । शिशृत्सितुम् । स्यन्दौङ्-स्यंत्स्यति । अस्यंत्स्यत् । सिस्यंत्स्यत् । अस्यंत्स्यत् । सिस्यंत्सति । सिस्यंत्सितुम् । क्रपौङ्—कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सितम् । चिक्लृप्सितव्यं । कल्प्तारौ । कल्प्तारः । कल्प्तासि । कल्प्तास्थः । कल्प्तास्थ । अतङ इति किम् ? वर्तिता । कल्पितव्यम् । स्यादावपि पाक्षिकमेषामतङ्निमित्तत्वम् । यत्रातङ्निमित्तता नास्ति तत्रेड् भवति । वर्तिष्यते । अवर्तिष्यत । विवर्तिषते । विवर्तिषिता । विवर्तिषितुम् । व्यवर्तिषितव्यं । वर्द्धिष्यते । अवर्द्धिष्यत । विवर्द्धिषते । विवर्द्धिषितुम् । शर्दिष्यते । अशर्दिष्यत । शिशर्दिषते । शिशर्दिषितुम् । स्यंदिक्रपोरौदित्वाद्विकल्पः । स्यंत्स्यते । स्यंदिष्यते । अस्यंत्स्यत । अस्यंदिष्यत । सिस्यंत्सते । सिस्यंदिषते । सिस्यंत्सितुम् । सिस्यंदिषितुम् । कल्प्स्यते । अकल्प्स्यत । कल्पिष्यते । अकल्पिष्यत । कल्पिष्यति । अकल्पिष्यत चिक्लृप्सते । चिकल्पिषते । चिक्लृप्सितुम् । चिकल्पिषितुम् । कल्प्ता । कल्पिता । कल्प्तासे । कल्पितासे । विवृत्सतीत्यत्र एकयङ्तिङ्निमित्तं वृत्तिरतङ् एव ॥

गमूस्नोरसुप्तज्ञाने ॥ ४ । २ । १७३ ॥

गमू स्नुभ्यां परस्य वलादेर्ल्यंग्रलः प्रत्ययस्य इड् भवति । असुप्तज्ञाने असुव्धातोः सम्बंधिनि तज्ञाने । गंस्यते ग्रामः संगंस्यते वत्सो मात्रा गंस्यमानः । संगंस्यमानः । अगंस्यतः समगंस्यत । गंसीष्ट । संगंसीष्ट । संजिगंसते । संजिगंसमानः संजिगंसिष्यते । संजिगंसिष्यमानः । अधिजिगांसते । अधिजिगांस्यमानः । गम इति प्राप्तिः । स्नुः—प्रस्नोता । प्रस्नोतासे । प्रस्नोष्यते । प्रस्नोष्यमाणः । प्रास्नोस्यत । प्रस्नोषीष्ट । प्रास्नोष्ट । इषट्कत्वात्प्राप्तिः । असुप्तज्ञान इति किम् ? संजिगमिषिता । अधिजिगमिषिता । प्रघ्नवितुम् । प्रस्नवितव्यम् । असुङ्ग्रहणं किम् ? जिगमिषीत्रीयते । प्रस्नवित्रीयते ।

क्रमः ॥ ४ । २ । १७४ ॥

क्रमः परस्य वलादेर्ल्यंग्रलः प्रत्ययस्यासुप्तज्ञाने सति इड् न भवति । प्रक्रंसीष्ट । उपक्रंसीष्ट प्रक्रांतासे । प्रक्रंस्यमानः । उपक्रंस्यमानः । प्राक्रंस्यत । उपाक्रंस्यत । प्राक्रंस्यतः । उपाक्रंस्यतः । प्रचिक्रंसते । प्रचिक्रंसिष्यते । असुप्तज्ञान इति किम् ? क्रमिता । निरक्रमीत् नृपतिः । असुङ् ग्रहणं किम् ? क्रमित्रीयते ॥

तुः ॥ ४ । २ । १७५ ॥

असुप्तज्ञाने यः क्रमिः असुप्तज्ञानविषयस्तस्मात्परस्य तुः—तृप्रत्ययस्य इड् भवति । प्रक्रंता । उपक्रंता । असुप्तज्ञान इति किम् ? क्रमिता । निष्क्रमिता ॥

श्रकप्रच्छिविन्दुद्यहन्वसिघस्यचोऽश्विग्रिश्रीङ्डीङ्रुषट्कोद्वृदतः ॥ ४ । २ । १७६ ॥

एकाच इति वर्तते । शकादिभ्योऽजन्तेभ्यश्च एकाज्भ्यो धातुभ्यो विहितस्य प्रत्ययस्य इडन भवति । श्रिञ् श्रि शीङ् दीङित्येतान् रुषट्कं ऊकारान्तं वृङ् वृञो ॠकारांतमकारांतं च वर्जयित्वा । शक—शक्ता । शक्तुम् । प्रच्छ—प्रष्टा । प्रष्टुम् । विंद्—वेत्ता । वेत्तुम् । विकरणोपादानं ज्ञानार्थव्युदासार्थम् । वेदिता शास्त्रस्य । विंदतेरपि । व्युदासं केचिदाहुः । वेदिता स्वरणस्य । हन्—हंता । हंतु । वसि—वस्ता । वस्तुम् । वसीति वसतेर्ग्रहणं न वस्तेरदादित्वात् । वसिता वस्त्राणां । घसि—घस्ता । घस्तुम् । घस्तव्यम् । अजन्तेभ्यः—पाता । चेता । नेता । स्तोता । कर्ता । हर्ता । अश्वीत्यादीति किम् ? श्वयिता । श्रयिता । शयिता । डयिता । रुषट्क—रविता । लविता । क्षणविता । प्रस्नविता । नविता । यविता । ऊत्—लू लविता । पू—पविता । भू—भविता । वृङ्—वरीता । वरिता । वृङ्—प्रावरिता । प्रावरीता । वृ इति वृङ्वृञोः सामान्यग्रहणं ॠत्—तृ—तरिता तरीता । तरितुम् । तरीतुम् । स्तृ—आस्तरिता । आस्तरीतुम् । अत्—अवधीत् । अवधिष्ट । शकादिसाहचर्याद्धातुपाठे अजंतस्य प्रतिषेध इति इह न भवति । विरिवा वारीत् । अवायीत् । अगमीत् । अगामीत्वा । एकाच इति किम् ? प्रोर्णविता । प्रोर्णुविता । शाशविता । परिपृच्छता । एकाचो विहितस्य इति विहितविशेषणम् । विवत्सति । विधत्सति । पश्चादनेकाच्त्वेति प्रतिषेधो भवत्येव ॥

सुरिसिविपवाच्च ॥ ४ । २ । १७७ ॥

सु—रि—सि—वि—प—व इत्येतेभ्यः परो यश्चकारास्तदंतादेकाचो धातोर्विहितस्य इडन भवति । मुच्—मोक्ता । मोक्तुम् ।

रिच्—रेक्ता । रेक्तुम् । सिच्—सेक्ता । सेक्तुम् । विच्—वेक्ता । वेक्तुम् । पच्—पक्ता । पक्तुम् । वच्—वक्ता । वक्तुम् ।

भ्रस्जसृयुयविनित्यभुरुभाञ्जः ॥ ४ । २ । १७८ ॥

भ्रसादिभ्यः परो यो जकारस्तदंतादेकाचो धातोर्विहितस्य इड्न भवति । भ्रस्ज—भ्रष्टा । भ्रष्टुम् । भर्ष्टा । भर्ष्टुम् । मस्ज—मंक्ता । मंक्तुम् । सृज्—स्रष्टा । स्रष्टुम् । युज्—योक्ता । योक्तुम् । यज्—यष्टा । यष्टुम् । विजृज्—पृथग्भावे । इति धातुरस्ति तस्मादयं प्रतिषेधः । ओविजैङ् भयचलनयोरित्येतस्मात्तु ऐदित्वान्न भवति तद्धि क्तयोः प्रतिषेधार्थम् । यद्यनेनैव प्रतिषेधः स्यात् तदनर्थकमापद्यते । विवेक्ता । विवेक्तुम् । निज्—नेक्ता । नेक्तुम् । त्यज्—त्यक्ता । त्युक्तुम् । भुज्—भोक्ता । भोक्तुम् । रुच्—रोक्ता । रोक्तुम् । भज्—भक्ता । भक्तुम् ॥

रभसस्वान्ञ्जः ॥ ४ । २ । १७९ ॥

रादिभ्यः परो यः ञ्ज इति तदंतादेकाचो विहितस्य इड्न भवति । रंज—रंक्ता । रंक्तुम् । भञ्ज—भंक्ता । भंक्तुम् । संज—संक्ता । संक्तुम् । स्वंज—स्वंक्ता । स्वंक्तुम् ॥

अक्षुनुतुस्कन्भिच्छिखिशपहाद्भः ॥ ४ । २ । १८० ॥

अ इत्यादिभ्यः परो यो दकारस्तदंतादेकाच—इड्न भवति । अद्—अत्ता । अत्तुम् । क्षुद्—क्षोत्ता । क्षोत्तुम् । नुद्—नोत्ता । नोत्तुम् । तुद्—तोत्ता । तोत्तुम् । स्कन्द—स्कंत्ता । स्कंत्तुम् । भिद्—भेत्ता । भेत्तुम् । छिद्—छेत्ता । छेत्तुम् । भिद्—भेत्ता । भेत्तुम् । शद्—शत्ता । शत्तुम् । पद्—पत्ता । पत्तुम् । सद्—सत्ता । सत्तुम् । हद्—हत्ता ।

हन्तुम् । केषांचित् । क्ष्वेत्ता । क्ष्वेत्स्यति । अपरेषां—क्ष्वेदिता । क्ष्वेदिष्यति ।

बन्धराधसाधयुधबुधक्रुधशुधरुधक्षुधव्याधः ॥ ४ । २ । १८१ ॥

बन्धादिभ्यः परो यो दकारस्तदन्तादेकाचो विहितस्य इड्न भवति । बन्ध—बंधा । राध्—राद्धा । साद्—साद्धा । युध्—योद्धा । बुध्—बोद्धा । क्रुध्—क्रोद्धा । शुध्—शोद्धा । रुध्—रोद्धा । क्षुध्—क्षोद्धा । व्याध्—व्यद्धा ।

आपवलिलुक्षिलुसृस्वतिशतात्परः ॥ २ । ४ । १८२ ॥

आप इत्यादिभ्यः परो यः पकारस्तदंतादेकाचो विहितस्य प्रत्ययस्येड्न भवति । आप्—आप्ता । आप्तुम् । वप्-वप्ता । वप्तुम् । लिप्-लेप्ता लेप्तुम् । लुप्—च्छोप्ता । च्छोप्तव्यम् । च्छोप्तुम् । सृप्—स्रप्ता । स्रप्तुम् । स्वप्—स्वप्ता । स्वप्तुम् । तिप्—तेप्ता । तेप्तुम् । शप्—शप्ता । शप्तुम् । तप्—तप्ता तप्तुम् ।

यरलाद्धः ॥ ४ । २ । १८३ ॥

यादिभ्यः परो यो भकारस्तदन्तादेकाचो विहितस्य प्रत्ययस्य इड्न भवति । यभ्—यब्धा । यब्धुम् । रभ्—रब्धा । रब्धुम् । आरब्धा । आरब्धम् । आरब्धुम् । लभ्—लब्धा । लब्धम् । लब्धुम् । लब्धव्यम् ।

रयनगान्मः ॥ ४ । २ । १८४ ॥

रादिभ्यः परो यो मकारस्तदन्तादेकाचो विहितस्य प्रत्ययस्य इड्न भवति । रम्—रन्ता । रंतुम् । यम्—यंता । यंतुम् । नम्—नंता । नंतुम् । गम्—गंता । गन्तुम् ।

दन्दृलिविस्पृमृदिरुक्रुरेशः ॥ ४ । २ । १८५ ॥

दनादिभ्यः परो यः शकारस्तदंतादेकाचो विहितस्य इड्न भवति । दंश—दंष्टा । दंष्टुम् । दृश्—द्रष्टा । द्रष्टुम् ।

लिश्—लेष्टा। लेष्टुम् । विश्–प्रवेष्टा । प्रवेष्टुम् । स्पृश्-स्प्रष्टा । स्प्रष्टुम् । मृश्—म्रष्टा । आम्रष्टा । आम्रष्टुम् । दिश्—देष्टा । देष्टुम् । रुश्-रोष्टा । रोष्टुम् । क्रुश्—क्रोष्टा । क्रोष्टुम् । रिश्—रेष्टा । रिष्टम् । रेष्टुम् ।

शिशुद्विट्त्विकृपिचितुदोष्षः ॥ ४ । २ । १८६ ॥

श्यादिभ्यः परो यो षकारस्तदन्तादेकाचो विहितस्य प्रत्ययस्य इड्न भवति । शिष्—शेष्टा । शेष्टुम् । शुष्—शोष्टा । शोष्टुम् । द्विष्–द्वेष्टा । द्वेष्टुम् । त्विष्—त्वेष्टा । त्वेष्टुम् । कृश्—कर्ष्टा । कर्ष्टुम् । पिष्–पेष्टा—पेष्टुम् । विष्—वेष्टा । वेष्टुम् । तुष्—तोष्टा । तोष्टुम् । दुष्—दोष्टा । दोष्टुम् ।

वनमिदुरुदिलिदाद्धहः ॥ ४ । २ । १८७ ॥

व इत्यादिभ्यः परो यो हकारस्तदन्तादेकाचो विहितस्य प्रत्ययस्य इड्न भवति—वह—वोढा । वोढुम् । नह—नद्धा । नद्धुम् । मिह्—मेढा । मेढुम् । दुह्—दोग्धा । दोग्धुम् । रुह्—आरोढा । आरोढुम् । रिह्—रेग्धा । रेग्धुम् । लिह् लेढा । लेढुम् । दह्—दग्धः । दग्धुम् ॥

स्विद्मन् सिधिश्लिषिपुषश्श्यात् ॥ ४ । २ । १८८ ॥

स्वदादिभ्यः श्यविकरणेभ्यो विहितस्य प्रत्ययस्य इड्न भवति । स्वेत्ता । मन्ता । सेद्धा । आश्लिष्टा । पोष्टा । श्यादिति किम् ? स्वेदिता । मनिता । सेधिता । श्लेषिता । पोषिता ।

क्रित्युकृश्यूर्णुञः ॥ ४ । २ । १८९ ॥

उगंतात् श्रि इत्येतस्माच्चैकाचः ऊर्णुञश्च किति प्रत्यये विहिते इड्न भवति । कृतम् । लूनम्। युत्वा । श्रित्वा । ऊर्णु-

त्वा । एकाच इति किम् ? जागरितः । जागरितवान् । जागरित्वा । सानुबन्धाद्यङ्श्लुचि—जर्णौनवित्वा ।

नित्यानिट्तासोऽत्वदृच्सृज्दृशस्थेवावृव्यात्तेः ॥ २।४।१८० ॥

नित्यानिट्तास् तस्मादकारवतः अनन्तात् सृजृशिभ्यां च धातुभ्यां विहिते थ प्रत्यये इट् वा भवति । वृ—ऋ—व्य—ऋतीन् वर्जयित्वा एभ्यो भवत्येव । अत्वत्—पपक्थ । पेचिथ । शशक्थ । शेकिथ । जगन्थ । जगमिथ । इयष्ट । इयजिथ । अचः—ययाथ । ययिथ । ववाथ । वविथ । चिचेथ । चिचयिथ । निनेथ । निनयिथ । जुहोथ । जुहोविथ । सृज—सस्रष्ठ । ससर्जिथ । दृश्—दद्रष्ट । ददर्शिथ । नित्यादतास इति किम् ? जघसिथ । ववयिथ । नास्य तासस्ति लिटयादेशात । नित्यानिट् ग्रहणं किम् ? आनन्दिथ । अत्वदच् सृजृश इति किम् ? विभेदिथ । तकारः किम् ? आरराद्दिथ । आवृव्यात्तेरिति किम् ? ववरिथ । आरिथ । संविव्ययिथ । आदिथ । विहितविशेषणं किम् ? चकर्षिथ ॥

ऋतः ॥ २ । ४ । १८१ ॥

ऋकारांतादेकाचो विहितस्य इट् न भवति । सस्मर्थः । विजहर्तः । ऋ इति किम् ? निनयिथ । एकाच इति किम् ? जजागरिथ ।

कृञोऽसः ॥ २ । ४ १८२ ॥

कृञः असकाराद्विहितस्य थस्य इट् न भवति । चकर्थः । अस इति किम् ? संचस्करिथ ।

सृभृवृस्तुद्रुश्रुस्रोश्च लिटि ॥ २ । ४ १८३ ॥

स्रादिभ्यः कृञश्चासकाराद्विहितस्य लिटः इट् न भवति । सृ—सस्रव । सस्रम—भृ—बभृव । बभृम । वृङ्—ववृवहे । ववृमहे । वृ—व

वृव । ववृम । स्तु-तुष्टोव । तुष्टोम । द्रु-दुद्रोथ । दुद्रुव । दुद्रुम । स्रु—सुस्रोथ । सुस्रुव । सुस्रुम । श्रु-शुश्रुथ । शुश्रुव । शुश्रुम । कृ-चकृव । चकृम । असु इति किम् ? सञ्चस्करिव । संचस्करिम । सिद्धे सूत्यारम्भो नियमार्थः । तेन लिटि स्वादिभ्योऽन्ये सेट् एव । सस्वरिव । सस्वरिम । भि-बिभेदिथ । बिभेदिव । बिभेदिम ॥

सृजृदृशोऽम् जल्यकि ॥ २ । ४ । १८४ ॥

ल्यस्मीति निवृत्तम् । सृजृदृशोर्धात्वोः जलादौ प्रत्यये अमागमो भवति । अकि—अकिति । स्रष्टा । स्रक्ष्यति । अस्राक्षीत् । अस्राष्ट । द्रष्टा । द्रक्ष्यति । अद्राक्षीत् । अद्राष्टां । अकीति किम् ? सृष्टः । दृष्टः । सिसृक्षति । दिदृक्षते । प्रसज्यप्रतिषेधोऽयं । प्रतिषेधेनाश्रियत इति सिलुचस्यानीवद्भावादिहापि प्रतिषेधः । असृष्ट । असृष्टाः । समदृष्ट । समदृष्टाः । धातुप्रत्यये कार्यविज्ञानाच्चेह न भवति । रज्जुसृड्भ्यायाम् । देवदृग्भ्यायाम् ।

दृपतृपसृपकृषिस्पृशमृशो वा ॥ २ । ४ । १८५ ॥

दृपादीनामकिति जलि प्रत्यये अमादेशो वा भवति । द्रप्ता । दर्प्ता । त्रप्ता । तर्प्ता । स्रप्ता । सर्प्ता । क्रष्टा । कर्ष्टा । स्प्रष्टा । स्पर्ष्टा । म्रष्टा । मर्ष्टा । अम्राष्टा । अमार्ष्टा ।

नशमस्जसोर्नम् ॥ २ । ४ । १८६ ॥

नश् इत्येतस्य धातोः मस्जश्च सकारस्य स्थाने जलि प्रत्यये नमागमो भवति । नंष्टा । नंष्टम् । नंष्टव्यम् । नंष्टास् । नंक्ष्यति । निनंक्षति । मंक्ता । मंक्तुम् । मंक्तव्यम् । मंक्ता । मंक्ष्यति । मिमंक्षति । मस्जेः सकारस्य स्थाने भवन्नयमागमो आदेशश्चादेशकरणम् । मग्नः । मग्नवान् । मङ्क्ता । मामक्त इति नलोपार्थम् । अन्यथाऽनुपान्त्यत्वान्न स्यात् ।

उदितः ॥ २ । ४ । १८७ ॥

उदितो धातोर्नम् भवति प्रत्यये विषयभूते । तेन नमि सति यथासंख्यं प्रत्ययः उदित्वं च । हलो नोनचाँच्युदितोरिति विशेषणार्थं । बिँदति । नंदितः । कुंडिता । हुंडिता ।

लिपादितृफदृफगुफोभशुभश्शे ॥ २ । ४ । १८८ ॥

लिपादीनां तृपेत्येवमादीनां च धातूनां शे प्रत्यये नमागमो भवति । लिपादि—लिंपति । लिंपते । सिंचति । सिंचते । मुंचति । मुंचते । लुंपति । लुंपते । विंदति । विंदते । कृनत्ति । भिनत्ति । पिंशति वृत् । तृफ—तृंफति । दृफ्—दृंफति । गुफ—गुंफति । उभउंभति । शुभ—शुंभति ॥

जभोऽचि ॥ २ । ४ । १८९ ॥

जभेर्धातोरजादौ प्रत्यये नं भवति । जंभयति । जंभकः । साधुः । जंभंजम्भम् । जंभो वर्तते ॥

रधः ॥ २ । ४ । २०० ॥

रधेर्धातोरचि प्रत्यये नम् भवति । रन्धयति रन्धकः । साधु रन्धी । रन्धंरन्धम् । रन्धो वर्तते ।

नेट्यलिटि ॥ ४ । २ । २०१ ॥

रधः इडादावलिटि न नम् भवति । रधिता । रधिष्यति । इटीति किम् ? रंधयति । अलिटीति किम् ? ररंधिम । रेधिवानित्यत्र नमः लुक् ॥

रभः ॥ ४ । २ । २०२ ॥

रभो लिड्वर्जिताजादौ प्रत्यये नम् भवति । आरंभयति । आरंभकः । साध्वारंभी । आरंभमारम्भम् । आरंभो वर्तते । अलिटीति किम् ? आरभे । आरभेत । इति तुदादित्वात् शे न लुक् ॥

लभः ॥ ४ । २ । २०३ ॥

लभेर्लिवर्जित अजादौ प्रत्यये नम् भवति । लंभयति । लंभकः । साधु लंभी । अलिटीति किम् ? लेभे । लभेत । इति तुदादित्वात् शे न लुक् ॥

य्याङः ॥ ४ । २ । २०४ ॥

आङः परस्य लभेः यि—यकारादौ प्रत्यये नं भवति आलंभ्या गौः । आङ इति किम् ? लभ्यम् ॥

स्तुतावुपात् ॥ ४ । २ । २०५ ॥

उपात्परस्य लभेः यि प्रत्यये स्तुतौ प्रशंसायां नं भवति । उपलंभ्यं धनम् । अन्यत्र—उपलभ्यमस्मात् वृषलोत्किंचित् ॥

ञ्यमि वा ॥ ४ । २ । २०६ ॥

लभेः ञौ अमि च प्रत्यये नम् वा भवति । अलंभि । अलाभि । लंभं लम्भम् । लाभंलाभम् ॥

घञवे चोपसर्गात् ॥ ४ । २ । २०७ ॥

घञ् खे ञ्यमि च प्रत्यये उपसर्गात्परस्य लभे नम् भवति । प्रलम्भः । उपलम्भः । ईषत्प्रलम्भः । ईषदुपलम्भः । प्रालम्भि । प्रालम्भः । प्रालम्भम् । उपसर्गादिति किम् ? लाभः । ईषल्लाभः ॥

सुदुर्भ्यः ॥ ४ । २ । २०८ ॥

सुदुर्भ्यामुपसर्गाभ्यां व्यस्ताभ्यां समस्ताभ्यां चोपसर्गादेव पराभ्यां परस्य लभेः घञ् खे नं भवति । अतिसुलम्भः । अतिदुर्लम्भः । अतिसुलम्भं । अतिदुर्लम्भम् । उपसर्गादिति किम् ? सुलाभः । दुर्लाभः । सुलभम् । दुर्लभम् । सुदुर्लभम् । अतिदुर्लभम् । अतिसुलभम् । अत्रार्चायामतिक्रमे वा अतिः ॥

क्रीङ्तन्यवस्यादेर्लुग्बहुलं ॥ ४ । २ । २०९ ॥

अव इत्युपसर्गस्य क्रीञ्तन्योर्धात्वोः परयोरादेर्बहुलम् लुग् भवति । वक्रयः । अवक्रयः । तनुषु वक्रयगेहवद्स्पृहाः । वतन्सः । अवतन्सः । वतन्सयन्ति सहकारमञ्जरीम् । बहुलग्रहणं प्रयोगानुसरणार्थम् ॥

धाञ्नह्यपेः ॥ ४ । २ । २१० ॥

अपीत्येतस्योपसर्गस्य धाञ्नह्योर्धात्वोः परतः आदेर्बहुलं लुग् भवति । पिहितमपिहितं । क संदस्याम् । पिहितं स्तनाभ्याम् । पिनद्धं । अपिनद्धं पिनद्धरत्नाङ्गदकोटिदीपः ॥

संपर्युपात्कृञस्सड्भूषसमवाये ॥ ४ । २ । २११ ॥

सं परि उपेभ्यः परस्य कृञ भूषे अलंकारे समवाये समुदाये चार्थे सडागमो भवति । संस्करोति । उपस्करोति परिष्करोति । कन्यां भूषयतीत्यर्थः । तत्र न संस्कृतम् । परिस्कृत मुपस्कृतम् । समुदितमित्यर्थः । संपर्युपादिति किम्? सुकृता कन्या । अन्यत्र संस्कारः परिकृतः । उपकरोति । संस्कृतं वचनमिति भाक्तो निर्देशः । संचस्कार । संचस्कुरतुः । संचिस्कुरुः । संचिष्किषति । संचिचेष्क्रियते । समस्करोत । समकार्षीत । समचिस्करत् । इत्यत्र परत्वादन्तरङ्गत्वाच्च अटि कृते पदैर्भावादागमो प्रत्यय इति निवृत्तः । सडिति सकारको निर्देशस्तेन स एव सड् भवतीति समचिस्करदित्यादौ षिर्न भवति सस्थानिकत्वात् । परिष्करोतीत्यादौ सट्स्तु स्वंजामिति वचनाद्भवति ॥

उपाद्विकारप्रतियत्नवाक्याध्याहारे ॥ ४ । २ । २१२ ॥

विकारादिष्वर्थेषु वर्तमानस्योपात्परस्य कृञस्सड् भवति । विकारे–उपस्कृतं भुंक्ते । उपस्कृतं गच्छति विकृतमित्यर्थः । प्रतियत्ने–एधोदकस्योपस्कुरुते । तत्र प्रतियतन

इत्यर्थः । वाक्याध्याहारे—उपस्कृतं जल्पति । सोपस्काराणि सूत्राणि सवाक्याध्याहाराणीत्यर्थः । गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः ॥

किरतेर्लवने ॥ ४ । २ । २१३ ॥

उपात्परस्य कॄ विक्षेपण इत्यस्य धातोस्सड् भवति । लवने—लवनविषयश्चेत्तदर्थो भवति । उपस्कारं मद्रका लुनन्ति उपस्कीर्य मद्रका लुनन्ति विक्षिप्य लुनन्तीत्यर्थः । अन्यत्र—उपकिरति धान्यम् ॥

प्रतेश्च वधे ॥ ४ । २ । २१४ ॥

प्रतेरुपाच्चोपसर्गात्परस्य किरतेर्धातोर्वन्धे हिंसायां विषये सडागमो भवति । प्रतिस्कीर्णन्ते भूयात् । उपस्कीर्णम् ते भूयात् । तथा ते विक्षेपणम् भूयात् । यथा हिंसनमवध्नाति इत्यर्थः ॥

चतुष्पद्यपाद्धर्षात् ॥ ४ । २ । २१५ ॥

अपात् किरतेस्सट् भवति । हर्षाच्चतुष्पदि विषये चेत्तदर्थो भवति । अपस्कीरते वृषभः । हर्षाद्विलिख्य क्षिपतीत्यर्थः । अन्यत्र—अपकिरति वा वृषलो हृष्टः ॥

विशुनि भक्षाश्रयाय ॥ ४ । २ । २१६ ॥

अपात्किरतेः सड् भवति वौ पक्षिणि भक्षाय शुनि आश्रयाय चेत्तदर्थो भवति । अपस्किरते कुक्कुटो भक्षाय । अपस्किरते श्वा आश्रयाय । विलिख्य विक्षेपयतीत्यर्थः । भक्षाश्रयायेति किम् ? अपकिरति श्वा ओदनपिण्डमाशितः ॥

वौ विष्किरो वा ॥ ४ । २ । २१७ ॥

विष्कर इति वौ पक्षिण्यभिधेये विपूर्वस्य किरतेः क्प्रत्यये पक्षे सड्निपात्यते । विष्किरः शकुनिः विकिरो वा ॥

प्रात्तुंपतेर्गवि ॥ ४ । २ । २१८ ॥

प्रात्परस्य तुम्फतेः धातोः गवि कर्तरि सड् भवति । प्रस्तुम्पति गौः । प्रस्तुंपति वत्सो मातरं । प्रस्तुम्पको वत्सः । गवीति किम् ? प्रतुम्पति वनपतिः ॥

प्रादुसश्चाच्यस्तेष्षिः ॥ ४ । २ । २१९ ॥

उपसर्गादिति वर्तते । उपसर्गात्प्रादुसश्च परस्याऽस्तेरचि यकारे च परे षिरादेशो भवति । क्विजः सः षिः । शर्नम इति चेहोपतिष्ठते । अभिषन्ति । व्यतिषन्ति । व्यतिषते कृत्यानि । निष्यात् । प्रादुष्षन्ति । प्रादुष्ष्यात् । अच्यीति किम् ? निस्तः । प्रादुस्तः ॥

सुञ्सूसोस्तुस्तुभोऽत्यप्यद्वेः ॥ ४ । २ । २२० ॥

सुञादीनामद्विरूपाणां सकारस्योपसर्गात्परस्य षिर्भवति । अस्यागमेऽन्तरे सत्यसत्यपि । षुञ्—अभिषुणोति । परिषुणोति । अभिषावयति । परिषावयति । अभ्यषुणोत् । पर्यषुणोत् । सू—अभिषुवति । परिषुवति । अभ्यषुवत् । षि—अभिष्यति । परिष्यति । अभ्यष्यत् । पर्यष्यत् । स्तु—अभिष्टोति । परिष्टोति । सुदुष्टवं व्याकरणम् । स्तवीमि । अभ्यष्टौत् । प्रत्यष्टौत् । स्तुभ्—अभिष्टोभते । परिष्टोभते । अभ्यष्टोभत । पर्यष्टोभत । अद्वेरिति किम् ? अभिसुसूषति । अभ्यसुसूषत् । पर्यसुसूषत् । अभिसिषासति । अभ्यसिषासत् ॥

स्थासेनिसेधसिचसंजां द्वयटि ॥ ४ । २ । २२१ ॥

स्थादीनामुपसर्गात्परेषां सकारस्य षिर्भवति । द्व्योस्सतोर्द्विर्भावेऽटि च सत्यसत्यपि । स्था—अधिष्ठास्यति । अधितष्ठौ । अध्यष्ठात् । अध्यष्ठास्यत् । अनुष्ठास्यति । अनुतष्ठौ । अन्वष्ठात् । अन्वष्ठास्यत् । सेनि—सेनया अभियाति अभि-

अभिषेणयति । अभिषिषेणयिषति । अभ्यषेणयत । अभ्यषीषेणयिषत् । सेध—प्रतिषेधति । प्रतिषिषेधिषति । प्रत्यषेधत् । प्रत्यषिषेधिषत् । सिच्—अभिषिञ्चति । सुषिक्तं नाम किं तवात्र । अभिषिषिक्षति अभ्यषिञ्चत् । अभ्यषिषीक्षत् । संज्—अभिषज्जति । अभिषसंज । अभिषिषंक्षति । अभ्यषजत । अभ्यषिषंक्षत् । सेधेति एधादिपरिग्रहस्सिध्यतिनिवृत्यर्थः । यङ्लुचस्तु ग्रहणमिष्यत एव प्रतिषेधीति ॥

स्तम्भोऽङ्प्रतिस्तब्धनिस्तब्धे ॥ ४ । २ । २२२ ॥

उपसर्गात्स्तम्भेस्सकारस्य ड्व्योरटि च सत्यसत्यपि षिर्भवति । न चेदसौ स्तम्भः ङे प्रतिस्तब्धे निस्तब्धे च भवति । विष्टभ्नाति । प्रतिष्टभ्नाति । वितष्टम्भ । प्रतितष्टम्भ । व्यष्टभ्नात् । अङेत्यादीति किम्? न्यतस्तम्भत् । प्रत्यतस्तम्भत् । प्रतिस्तब्धः । निस्तब्धः ॥

अवाच्चालम्बनाविदूर्यार्क्षे ॥ ४ । २ । २२३ ॥

आलम्बनमाश्रयणम् । अविदूरस्य भावः आविदूर्यम् । और्जित्यमूर्ज्यम् । एतेष्वर्थेषु वर्तमानस्य स्तम्भेरवात्परस्य सकारस्य ड्व्यस्यपि षिर्भवति । अङे अवलम्बने । दुर्गावष्टम्भः । दुर्गमवष्टभ्नाति । अवतष्टम्भ । अवाष्टभ्नात् । आविदूर्ये—अवष्टब्धा शरत् । अवष्टब्धे-सेने । ऊर्जे अहो वृषलस्यावष्टम्भः । अवष्टब्धो रिपुः शूरेण । चेन अङेत्यनुकृष्यते । अवातस्तम्भत् । अन्यत्र—अवस्तब्धो वृषलः शीतेन ॥

वेश्च स्वनोऽशने ॥ ४ । २ । २२४ ॥

वेरवाच्च परस्य स्वनो धातोरशनेऽर्थे वर्तमानस्य सकारस्य ड्व्यस्यपि षिर्भवति । विष्वणति । विषष्वाण । विषष्वणयते । व्यष्वणत् । अवष्वणति । अवषष्वाण । अवषष्वणयते

अवाष्वणत् । भोजनमत्र स्वनेरर्थः । विष्वणति । अवष्वणति । भुङ्क्त इत्यर्थः । अन्यत्र—विस्वनति । अवस्वनति मृदङ्गः ॥

सदोऽप्रतेर्लौ त्वादेः ॥ ४ । २ । २२५ ॥

प्रतिवर्जितादुपसर्गात्परस्य सदेर्धातोर्द्व्यन्तस्यपि षिर्भवति । लौ-लिटि तु द्वयोस्सतोरादेर्भवति । निषीदति । विषीदति । निषीषद्यते । निषाषद्यते । विषाषद्यते । न्यषीदत् । अप्रतेरितिकिम् ? प्रतिसीदति । लौ त्वादेः—निषसाद । तुर्विशेषणार्थः ॥

स्वञ्जेश्च ॥ ४ । २ । २२६ ॥

उपसर्गात्स्वञ्जेः सकारस्य द्व्यन्तस्यपि षिर्भवति । लौत्वादेरेव । अभिष्वजते । परिष्वजते । प्रतिष्वजते । अभिषिष्वंजते । अभ्यष्वजत । पर्यष्वजत । प्रत्यष्वजत । अभिषस्वजे परिषस्वजे । प्रतिषस्वजे । अभिषस्वञ्जे । परिषस्वञ्जे । प्रतिषस्वञ्जे । चेन लौत्वादेरित्यनुकृष्यते ॥

परिनिवेस्सेवः ॥ ४ । २ । २२७ ॥

परिनिविभ्यः परस्य सेवतेस्सकारस्य द्व्यन्तस्यपि षिर्भवति । परिषेवते । पर्यषेवत् । परिषिषेविषते । निषेवते । निषिषेविषते । न्यषेवत । विषेवते । विषिषेविषते । व्यषेवत ॥

सयसिते ॥ ४ । २ । २२८ ॥

परिनिविभ्यः परयोः सयसितयोस्सकारस्य षिर्भवति । परिषयः । निषयः । विषयः । परिषितः । निषितः । विषितः । सय इति सिनोतेरच्प्रत्ययान्तः । सित इति क्तान्तः । द्व्यन्तस्यपीति निवृत्तमिह न भवति । मा विषसयत् । व्यसयीयत् । पर्यसितायत ॥

सट्स्तुस्वञ्जां वा त्वटि ॥ ४ । २ । २२९ ॥

परिनिविभ्यः परस्य सटः स्तुस्वञ्जोश्च धात्वोः षिर्भव-

ति । वचनभेदाद्यथासंख्याभावः । अटि तु सति वा भवति । परिष्करोति विष्करः शकुनिः । परिष्टौति । निष्टौति । परिष्वजते । निष्वजते । विष्वजते । वा त्वटि-पर्यस्करोत् । पर्यष्करोत् । पर्यस्तौत् । पर्यष्टौत् । न्यस्तौत् । न्यष्टौत् । व्यस्तौत् । व्यष्टौत् । पर्यस्वजत । पर्यष्वजत । निस्वजत । निष्वजत । व्यस्वजत । व्यष्वजत ॥

सीवूसहेोऽङेऽस्तोः ॥ ४ । २ । २३० ॥

परिनिविभ्यः परस्य सीव्यतेः असोभूतस्य च सह अङे षिर्भवति वात्वटि । परिषीव्यति । निषीव्यति । विषीव्यति । परिषहते । निषहते । विषहते । अटि–पर्यषीव्यत् । न्यषीव्यत् । व्यषीव्यत् । पर्यसहत । पर्यषहत । न्यसहत । न्यषहत । व्यसहत । व्यषहत । अनुबन्धः किम्? परिसेषिवीति । अङ इति किम्? मा परिसिषिवत् । पर्यसीवत् । पर्यसीषहत् । पर्यषीषहत् । असोरिति किम्? परिसोढः । परिसोढव्यः । न्यसोढः । न्यसोढव्यः । विसोढः । विसोढव्यः ॥

स्यन्दतेर्वाभ्यनोश्चाप्राणिनि ॥ ४ । २ । २३१ ॥

अभ्यनुभ्यां परिनिविभ्यश्च परस्य स्यन्दतेः षिर्वा भवति । अप्राणिनि । अप्राणिकर्तृकश्चेद् तदर्थो भवति । अभिष्यन्दते । अनुष्यन्दते । परिष्यन्दते । निष्यन्दते । विष्यन्दते । अभिस्यन्दते तैलं । अनुस्यन्दते । परिस्यन्दते । निस्यन्दते । विस्यन्दते । तिप् निर्देशादिह न भवति—अभिसास्यन्दीति तैलम् । अप्राणिनीति किम्? परिस्यन्दते मत्स्यः उदके । पर्युदासोऽयम् । न तु प्राणिनि प्रतिषेधः । तेनेहापि भवति – अनुष्यन्दते । अनुस्यन्दते मत्स्य उदके ॥

वेस्स्कन्दोऽक्तयोः ॥ ४ । २ । २३२ ॥

वेः परस्य स्कन्देर्धातोः षिर्वा भवति । अक्तयोः—न चेत् क्तक्तवतू परतो भवतः । विष्कन्ता । विस्कन्ता अक्तयोरिति किम्? विस्कन्नः । विस्कन्नवान् ।

परेः ॥ ४ । २ । २३३ ॥

परेः परस्य स्कन्देः षिर्वा भवति । परिष्कन्ता । परिस्कन्ता । परिष्कन्नः । परिस्कन्नः । परिष्कन्नवान् । परिस्कन्नवान् ॥

स्फुरस्फुलोर्निर्नेः ॥ ४ । २ । २३४ ॥

निस्निभ्यां परयोः स्फुरत्स्फुलोः षिर्वा भवति । निःष्फुरति । निःस्फुरति । निष्फुरति । निष्फुरति । निःष्फुलति । निःस्फुलति । निष्फुलति । निस्फुलति ॥

वेः ॥ ४ । २ । २३५ ॥

वेः परयोः स्फुरस्फुलयोः षिर्वा भवति । विस्फुरति । विष्फुरति । विस्फुलति । विष्फुरति ॥

स्कभ्नः ॥ ४ । २ । २३६ ॥

वेः परस्यः स्कभ्नातेर्नित्यं षिर्भवति । विष्कभ्नाति । विष्कम्भिता विष्कम्भिताम् । विष्कम्भः । श्नानिर्देश-स्कम्भतेः निवृत्यर्थः ॥

निर्दुस्सुवेस्समसूतिस्वपेोऽवः ॥ ४ । २ । २३७ ॥

निस् दुस् सु विभ्यः परयोः समसूतिशब्दयोः स्वपेश्च। वकारस्य धातोः षिर्भवति । निःषमः । दुष्षमः । सुषमः विषमः । निष्षूतिः । दुष्षूतिः । सुषूतिः । विषूतिः । निष्षूतिः । निष्षुप्तः । दुष्षुप्तः । सुषुप्तः । विषुप्तः । अव इति किम् ? दुः स्वप्नः । सुस्वप्नः । विसुष्वाप । समसूतीति प्रातिपदिकग्रहणम् । तेनेह न भवति—दुःसमति । निःसमति । निःसूतम् । अन्ये

धातुग्रहणमेवाहुः । तेषां–निःषसति । दुःषसति । सुषमति । निषूतम् । दुःषूतम् ॥

हिनुमीनानिणोऽदुरोऽन्तरश्च णः ॥ ४ । २ । २३८ ॥

दुर्वर्जितादुपसर्गादन्तःशब्दाच्च परस्य धातोः हिनुमीना-नीत्येतेषां णकारस्य च नकारस्य णकारो भवति । णोनोण इति परिभाषया व्यवस्था । प्रहिणोति । प्रमीणाति । प्रयाणि । प्रवपाणि । प्रापयाणि । प्रणमति । प्रणायति । परिणयति । प्रणामकः । परिणामकः । अन्तर्णयति । अन्तर्णायकः । हिन्वा-दीति किम् ? प्रनृत्यति । प्रनन्दति । अदुरिति किम् ? दुर्नयः-दुर्नीतः । प्रगतो नायकोऽस्मात् प्रनायको देशः । प्रादेरत्र प्रत्य-यार्थेन योगो न धातुनेति अनुपसर्गत्वम् ॥

शः ॥ ४ । २ । २३९ ॥

अदुरुपसर्गादन्तरश्च परस्य शकारान्तस्य धातोः णो भव-ति । प्रणश्यति । परिणश्यति । अन्तर्णश्यति । प्रणाशः । प्रणा-शकः । अशान्तत्वादिह न भवति—प्रनष्टः । परिनंक्ष्यति ॥

नेर्घुमानदृत्पतपदिस्यतियातिवातिद्रातिप्साति-हंतिवपिवहिशमूचिञ्देग्धौ ॥ ४ । २ । २४० ॥

अदुरुपसर्गादन्तरश्च परस्य नेः घुसंज्ञमादिषु च परतो णो भवति । प्रणियच्छति । परिणियच्छति । प्रणिदयते । परि-णिदयते । प्रणिदधाति । परिणिदधाति । प्रणिद्यति । परि-णिद्यति । प्रणिदयति । परिणिदयति । प्रणिदधाति । परिणि-दधाति । प्रणिमयते । परिणिमयते प्रणिमिमीते । परिणिमिमते प्रणिमाता । प्राणिनदति । परिणिनदति । प्रणिगदति । परिणिगदति । प्रणिपतति । परिणिपतति । प्रणिपद्यते । प-रिणिपद्यते । प्रणीष्यति । परिणीष्यति । प्रणियाति । परिणि-

याति । प्रणियाति । परिणिवाति प्रणिद्राति । परिणिद्राति । प्रणिप्साति । परिणिप्साति । प्रणिहन्ति । परिणिहन्ति । प्रणिवपति । परिणिवपति । प्रणिवहति । परिणिवहति । प्रणिशास्यति । परिणिशास्यति । प्रणिचिनोति । परिणिचिनोति । प्रणिदेग्धि । परिणिदेग्धि । अन्तर्णिदेग्धि । तिप्निर्देशो यङ्लुचि निवृत्यर्थः । तेन प्रनिसासाति । परिनिसासातीति आदौ न भवति । अन्यत्र भवति–प्रणिदाधाति । प्रणिनानाति । प्रणिजागर्दिति । उपसर्गोदिति किम् ? वारि निदधाति ॥

शेषेऽषांतकखपाठे वा ॥ ४ । २ । २४१ ॥

शेषे घ्वादिभ्योऽन्यस्मिन् धातुपाठे धातूद्देशे अषान्ते कखादौ परे अदुरुपसर्गादन्तरश्च परस्य नेर्णो भवति वा । प्रणिपचति । परिणिपचति । प्रनिपचति । परिनिपचति । प्रणिभिनत्ति । परिणिभिनत्ति । प्रनिभिनत्ति । परिनिभिनत्ति । अंतर्णिभनत्ति । शेष इति किम् ? प्रणिदयति । प्रणिदयते । घ्वादिग्रहणं किम् ? यङ्लुचि सावकाशस्यात् । अषांतकखेति किम्? प्रनिपिनष्टि । प्रनिकरोति । प्रनिखनति । पाठः इति किम् ? प्रनिसासाति । प्रनिपापचीति । प्रनिचकार । प्रनिचखाद । प्रनिपेक्ष्यति । अत्रायं विधिर्न भवति । प्रणिवेष्टा । प्रनिवेष्टा । प्रणिदेष्टा प्रनिदेष्टा । अत्र भवति पाठे अषांतत्वात् ॥

परेरनितेः ॥ ४ । २ । २४२ ॥

परेः परस्यानेर्धातोर्णो भवति वा । पर्यणिति । पर्यनिति । परेरिति किम् ? प्राणिति ।

अंते च ॥ ४ । २ । २४३ ॥

उपसर्गादंतरश्च परस्यानितेर्नकारस्य पदस्यांतेऽनन्ते च

वर्तमानस्य णो भवति । प्राणिति । पराणिति । हे प्राण् । हे पराण् । हे पर्याण् ।

द्वयोः ॥ ४ । २ । २४४ ॥

अदुर उपसर्गादन्तरश्च परस्यानितेर्द्वयोर्नकारयोर्णो भवति । प्रत्येकम् प्राणिणिषति । पर्यणिणिषति । प्राणिणत् । प्राणिणिणिषत् । पर्याणिणिणिषत् ।

घ्नः ॥ ४ । २ । २४५ ॥

अदुर उपसर्गादन्तरश्च परस्य हंतेर्नकारस्य णो भवति । प्रहण्यते । प्रहणनम् । पराहणनम् । निर्हणनम् । परिहणनम् । अंतर्हणनम् । प्रघ्नन्ति । प्राघानीत्यत्र घि घ्न इति न भवति ।

म्वि वा ॥ ४ । २ । २४६ ॥

अदुर उपसर्गादन्तरश्च परस्य हंतेर्नकारस्य मकारवकारयोः परतः णो भवति वा । प्रहण्वः । प्रहन्वः । प्रहण्मः । प्रहन्मः । प्राहण्वहे । प्राहन्वहे । प्राहण्महे । प्राहन्महे । अन्तर्हण्वः । अन्तर्हन्वः । अन्तर्हण्मः । अतर्हन्मः ॥

न देशेऽन्तरोऽयनघ्नः ॥ ४ । २ । २४७ ॥

अन्तरा परस्यायनशब्दनस्य हंतेश्च नकारस्य णो न भवति । देशाभिधाने । अंतरयनो देशः । अतर्हननो देशः । अन्यत्र-अरयणम् । अन्तयरणम् । अन्तर्हणनम् वर्तते ।

निंसनिक्षनिन्दः कृति वा ॥ ४ । २ । २४८ ॥

अदुर उपसर्गादन्तरश्च परेषां निंसनिक्षनिन्दाधातूनां कृति परे णो भवति वा । प्रणिंसनम् । प्रनिंसनं । प्रणिक्षणम् । प्रनिक्षणम् । प्रणिंदनम् । प्रनिन्दनम् । कृतीति किम् ? प्रणिंस्ते । परिणिंस्ते । प्रणिक्षति । परिणिक्षति । प्रणिन्दति । परिणिन्दति । हिन्विति नित्यमेव भवति ।

अषोऽचोऽभाभूपूञ्क्र्गंप्यायिवेपः ॥ ४ । २ । २४९ ॥

कृतीति वर्तते। तन्नकारस्य विशेषणम् । अषकारांतादद्रुर उपसर्गादन्तरश्च परात् भाभ्वादिवर्जितस्य धातोः परस्य कृतप्रत्ययस्थस्य नकारस्याचः परस्य णो भवति । प्रयाणम् । परियाणम् । निर्याणम् । प्रयायमाणं । प्रयाणीयं । परियाणीयं । अप्रयाणिः । अपरियाणिः । प्रयायिणौ । परियायिणौ । प्रहीणः । परिहीणः । अष इति किम् ? प्रभग्नः । अभादिति किम् ? प्रभानम् । प्रभवनम् । प्रपवनम् । प्रक्रमनम् । प्रगमनम् । प्राप्यायनम् । प्रवेपनम् । अकारानुबन्धात् ङकारानुबन्धस्य भवति । प्रपवमाणं । प्रयवणं । कृतीति किम् ? प्रवापेन ।

नमीजादेरेव ॥ ४ । २ । २५० ॥

अषांतादद्रुर उपसर्गादन्तरश्च परस्य धातोर्नमि सति इजादेरेव भादिवर्जितात् कृत्स्थस्य नकारस्याचः परस्य णो भवति । प्रेङ्खणम् । परेङ्खणम् । प्रेङ्गणम् । परेङ्गणम् । नमीति किम् ? नम्यवति । नियमो नास्ति, प्रपवणं । इजादेरिति किम् ? प्रमंकनम् । प्रमंगनम् ।

णिहलिजुपांत्याद्वा ॥ ४ । २ । २५१ ॥

णयंतात् हलः परो य इच् तदुपांत्याच्च धातोः भादिवर्जितात्कृत्स्थस्याचः परस्य नकारस्याषकारांतोपसर्गस्थान्निमित्तात्परस्य णो वा भवति । प्रयापणं । प्रयापनं । प्रयाप्यमाणं । प्रयाप्यमानं । प्रयापणीयं । प्रयापनीयं । अप्रयापणिः । अप्रयापनिः । प्रयापिणौ । प्रयापिनौ । हलिजुपांत्यात्-प्रकोपणं । प्रकोपनं । प्रगोप्यमाणं प्रगोप्यमानं । हल्ग्रहणं किम् ? प्राहणं । पराहणं । इजोपांत्यादिति किम् ? परिवहणं । अष इति किम् ? निष्पायनं । दुष्पायनं । अभा-

देरिति किम् ? प्रभापना । प्रभावना । प्रपातना । प्रकामना । प्रगामना । प्राप्यायना । प्रदेवना ।

निर्विण्णः ॥ ४ । २ । २५२ ॥

निर्विण्ण इति निस्पूर्वाद्विदेस्सत्तालाभविचारार्थात्परस्य क्तनकारस्य णो निपात्यते । निर्विण्णः प्राव्रजत् पिता ।

रोलोऽयौ ॥ ४ । २ । २५३ ॥

उपसर्गादिति वर्तते । उपसर्गादयतौ धातौ परे उपसर्गस्थस्य रेफस्य लकारादेशो भवति । प्लायते । पलायते । पल्ययते । अयाविति किम् ? प्रायः । परायः । इणोऽच् ।

निप्रतेर्वा ॥ ४ । २ । २५४ ॥

निस्प्रत्यो रेफस्याऽयतौ परे लो वा भवति । निलयनं । निलयते । निरयणं । निरयते । प्रत्ययते । दुलयनं । दुलयते । दुरयणं । दुरयते । इति दुसः दुष्टत्वं । दुस्थितमित्येवमर्थं ह्यीमौ द्वावप्युपगम्येते ।

परेर्घाङ्कयोगे ॥ ४ । २ । २५५ ॥

परेः रेफस्य घांकयोगेषु परतः लो वा भवति । पलिघः । पल्यंकः । पलियोगः । परिघः । पर्यङ्कः । परियोगः ।

डश्चर्फिडादीनां ॥ ४ । २ । २५६ ॥

ऋफिडादीनां रेफस्य डकारस्य च लो वा भवति । लृफिडः । ऋफिडः । लृतकः । ऋतकः । कपिलकः । कपिरकः । तिलिपरिकं । तिर्पिरिकं । लोमानि । रोमानि । पांसुलः । पांसुरः । कल्म । कर्म । इस्य-ऋफिलः । ऋफिडः । चूला । चूडा । वलिशं । वडिशं । पुलिनं । पुडिनं । ऋफिडादयश्शिष्टप्रयोगानुसर्त्तव्याः ।

ग्रोऽचि ॥ ४ । २ । २५७ ॥

गृ इत्येतस्य धातोः विहितेरचि अजादौ प्रत्यये परे रेफस्य लो वा भवति । निगिलति । निगिरति । निगलनम् । निगरणम् । निगालको निगारकः । अचीति किम् ? निगीर्णम् । निगीर्यते । निगाल्यते । इत्यत्रांतरंगत्वात् लत्वे कृतेणि लुक् । गिरौ । गिरः । इत्यत्र न धातोः प्रत्यय इति न भवति ।

यङि ॥ ४ । २ । २५८ ॥

वेति निवृत्तं । ग्रो यङि रेफस्य लो नित्यं भवति । निजेगिल्यते । निजेगिल्येते । निजेगिल्यन्ते ।

गरगलं विषप्राण्यंगे ॥ ४ । २ । २५९ ॥

गरगल इति विषे प्राण्यंगे च यथासंख्यं लत्वाभावोलत्वं च निपात्येते । गरो विषम् । गलः प्राण्यगम् ।

कृपोऽकृपीटादिषु ॥ ४ । २ । २६० ॥

कृपेर्धातोरेकस्य कृपिडादिवर्जितेषु लो भवति । क्लृप्तः । क्लृप्तवान् । चिक्लृप्सति । अचिक्लृपत् । कल्पते । कल्पिता । कल्पकः । अकृपिडादिष्विति किम् ? कृपीटः । कृपणः । कर्पूरः ।

आदेष्णोऽष्वक्कष्ट्याष्ठीवस्स्नस् ॥ ४ । २ । २६१ ॥

पाठ इति वर्तते । ष्वक्कष्ट्याष्ठीवूवर्जितस्य धातोः सकारस्य णकारस्य च धातुपाठे आदिभूतस्य यथासंख्यं सकारो नकारश्च आदेशौ भवतः । षहि—सहते । षिचि—सिंचते । णिञ् नयति । णम् नमति । आदेरिति किम् ? प्रनिलषति । प्रनिसेक्ष्यते । प्रनिपिनष्टि । वणति । भणति । अष्टक्कष्ट्याष्ठीव इति किम् ? ष्वक्कते । ष्ट्यायते । निष्ठीवति । पाठ इति किम् ? षकारीयति । णकारीयति ॥

इति शब्दानुशासने चिंतमणौ वृत्तौ चतुर्थस्याध्यायस्य द्वितीय पादः ।

अथ चतुर्थस्याध्यायस्य तृतीयः पादः ।

तास्यौ लुलॄोः ॥ ४ । ३ । १ ॥

धातोरिति वर्तते । तदितः प्रभृति पंचम्यंतं वेदितव्यम् । धातोः लुलृ इत्येतयोः परतः यथासंख्यं मध्ये ताम् स्य इत्येतौ प्रत्ययौ भवतः । लु इति लुटो ग्रहणम् । लुङि स्यादिरपवादः । लृ इति सामान्येन लृङ्लृटोश्च । कर्ता । कर्तारौ । कर्तारः । कर्तासि कर्तास्थः । कर्तास्थ । करिष्यति । करिष्यतः । करिष्यंति । अकरिष्यत् ।

सिर्लुङि ॥ ४ । ३ । २ ॥

धातोर्लुङि परे मध्ये सिप्रत्ययो भवति । अकार्षीत् । अहार्षीत् ।

दृपादेर्वासृपः ॥ ४ । ३ । ३ ॥

दृपादिभ्यः सृप् वर्जितेभ्यो लुङि परे मध्ये सिर्वा भवति । क्साङोरपवादः, दृप्, तृप्, सृप्, कृप्, स्पृश् मृशे वेति सूत्रोपात्ता दृपादयः । अदृपत् । अद्राप्सीत् । अदार्प्सीत् । अतृपत् । अत्राप्सीत् । अतार्प्सीत् । अकृक्षत् अक्राक्षीत् । अकार्क्षीत् । अस्पृक्षत् । अस्प्राक्षीत् । अस्पार्क्षीत् । अमृक्षत् । अम्राक्षीत् । अमार्क्षीत् । असृप इति किम् ? असृपत् ।

इकश्शलोऽदृशः क्सो नेट् चेत् ॥ ४ । ३ । ४ ॥

इकः परो यः शल् तदन्ताद्धातोः दृशिवर्जिताल्लुङि परे मध्ये क्सप्रत्ययो भवति न चेत्तस्य क्सस्येड्भवति । लिह्—अलिक्षत् । अलिक्षाताम् । अलिक्षन् । द्विष्—अद्विक्षत् । अद्विक्षताम् । अद्विक्षन् । दुह्—अधुक्षत् । अधुक्षताम् । अधुक्षन् । इक इति किम् ? अदाक्षीत् । अताक्षीत् । शल इति किम् ? अभै-

त्सीत् । अदृश इति किम् ? अद्राक्षीत् । नेट्चेति किम् ? अमोषीत् । विकल्पितेट: । यदेड् भवति तदा न भवति—न्यगूहीत् । यदा न भवति तदा भवत्येव अघोक्षत् ।

श्लिषः ॥ ४ । ३ । ५ ॥

श्लिषेर्धातोर्लुङि क्सो भवति न चेत्तस्य क्सस्येड् भवति । आश्लिक्षत् कन्यां देवदत्तः । नेट्चेदिति किम् ? उषूश्रिषूश्लिषूप्रषूप्लुषू दाहे । आश्लेषीत् । पुष्यादित्वात्तस्यात्ङ्यङ् स्यादिति वचनं । आश्लिषि कन्या देवदत्तेनेत्यत्र तूत्तरो ञिर्भवति एव ॥

नानालिंगने ॥ ४ । ३ । ६ ॥

आलिंगनं परिष्वञ्जनम् । अनालिङ्गनेऽर्थे वर्तमानात् श्लिषेर्धातोः क्सो न भवति । आश्लिषत् जतु च काष्ठं च । समाश्लिषत् गुरुकुलम् । समाश्लिष्ट प्लक्षोऽन्यग्रोधेन । अन्यत्र आश्लिक्षत् कन्यां देवदत्तः । आश्लिक्षन्त कन्याः देवदत्तेन ।

कंश्रिद्रुस्रुणेर्ङः कर्तरि ॥ ४ । ३ । ७ ॥

कम् श्रि द्रु स्रुभ्यो ण्यन्तेभ्यश्च कर्तरि लुचि परे मध्येङो भवति । अचकमत । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । णेः—अचीकरत् । अजीहरत् । अजीहरत् । अचीकमत् । अचीकरत कटः स्वयमेव । कर्तरीति किम् ? अकमिषातां । अकारयिषाताम् कटौ ॥

धेट्श्वेर्वा ॥ ४ । ३ । ८ ॥

धेटःश्वयतेश्च कर्तरि लुचि मध्येङो वा भवति । अदधत् अदासीत् अशिश्वियत् । अश्वत् । अश्वयीत् । कर्तरीति किम् ? आदिषातां स्तुतौ देवदत्तेन ।

स्तम्भूम्रूचूम्लुचूग्रुचूग्लुचूश्विञ्ज्रोऽङ् ॥ ४।३।९ ॥

स्तम्भ्वादिभ्यः कर्तरि लुङि मध्ये अङ् भवति वा । अस्तभवत् । अस्तम्भीत् । अम्रुचत् । अम्रोचीत् । अम्लुचत् । अम्लोचीत् । अग्रुचत् अग्रोचीत् । अग्लुचत् । अग्लोचीत् । अग्लुचीत् । अश्वत् । अशिश्वियत् । अश्वयीत् । अजरत् । अजारीत् ॥

ऋदितोऽतङि ॥ ४ । ३ । १० ॥

ऋदितो धातोः कर्तर्यतङि लुङि मध्ये अङ् भवति । अरुधत् । अरौत्सीत् । अभिदत् । अभैत्सीत् । अच्छिदत् । अच्छैत्सीत् । पर्यविषत् । पर्यविषत् । पर्यवीक्षत् । अतङीति किम्? अरुद्ध । अभित्त । अच्छित्त ।

सर्तिशास्तिलिद्द्युत्पुष्यादेः ॥ ४ । ३ । ११ ॥

सर्तिशास्तिभ्याम्लृदितः द्युतादिभ्यः पुष्यादिभ्यश्च कर्तर्यतङि लुङि मध्ये अङ् नित्यं भवति । असिरत् । अशिषत् । लृदितः—अगमत् । असृपत् । अशकत् । आपत् । द्युतादिभ्यः—अद्युतत् । द्युतादयो द्युद्भ्यो लुङि इत्यत्रोदाहृताः । पुष्यादिभ्यः—अपुषत् ॥ अशुषत् । अतुषत् । अपाश्लिषत् जतु च काष्ठं च । अशकत् इति नेयम् । श्यनिर्देशः किम्? अपोषीत् । अकुक्षत् । अक्षोदीत् । पोषति । पुष्णात्यादिभ्यो न भवति । अतङीति किम्? व्यद्योतिष्ट । व्यत्यशुक्षत् ।

वक्त्यसूख्यातेः ॥ ४ । ३ । १२ ॥

वक्तीति वच भाषणे ब्रूञादेशश्च असू क्षेपणे ख्यातीति ख्याप्रकथने चक्षादेशश्च एभ्यो धातुभ्यः कर्तरि लुङि अङ् भवति । अवोचत् । पर्यास्थत पर्यास्थेतां घटो स्वयमेव । आख्यत् । आख्यतु । असूग्रहणम् तङर्थं । अतङि पुष्यादित्वात् सिद्धं तिब् निर्देशो यङ् लुग्निवृत्त्यर्थः । अचाख्यासीत् ।

लिप्सिजह्वाऽर्तेः ॥ ४ । ३ । १३ ॥

लिप् सिच् ह्वा ऋतिभ्यः कर्तरि लुङि अङ् भवति । अलिपत् । असिचत् । आह्वत् । आरत् ।

तङि वा ॥ ४ । ३ । १४ ॥

लिपादिभ्यः कर्तरि लुङि तङि अङ्वा भवति । अलिपत । अलिप्त । असिचत । असिक्त । आह्वत । आह्वास्त । समारत । समार्ष ।

दीप्पूर्जन्बुधताय् प्यायस्ते ञिः ॥ ४ । ३ । १५ ॥

दीपादिभ्यः कर्तरि लुङि तङि ते परे ञिर्वा भवति । अदीपि । अदीपिष्ट । अपूरि । अपूरिष्ट । अजनि । अजनिष्ट । अबोधि । अबुद्ध । अतायि । अतायिष्ट । अप्यायि । अप्यायिष्ट । त इति किम्? अदीपिषाताम् । अदीपिषत । कर्तरीति किम्? अदीपि भवता । ततीति किम्? बुधि—बोधने । अबोधिष्ट यूयम् ।

पदः ॥ ४ । ३ । १६ ॥

पदेर्धातोस्तङि नित्यं ञिर् भवति कर्तरि लुङि । उदपादि फलम् । समपादि सस्यम् । ते इति किम् । उदपत्साताम् । उदपत्सत ।

कर्मभावे ॥ ४ । ३ । १७ ॥

धातोः कर्मणि भावे च लुङि ते परे मध्ये ञिर्भवति । अकारि कटो देवदत्तेन । अहारि भारो देवदत्तेन । आसि भवता । अशायि भवता ।

हन्दृशिग्रहज्भ्यस्सितास्स्यसटां ञिङ्वा ॥ ४ । ३ । १८ ॥

हनादिभ्योऽजन्तेभ्यश्च विहितानां कर्मभावविषयाणां सितासिस्यसटां ञिङागमो वा भवति । हनः सेः । अघानिषाताम् ।

अवधिषाताम् । अहसाताम् । दृशः—अदर्शिषाताम् । अदृक्षाताम् । ग्रह—अग्राहिषाताम् । अग्रहीषाताम् अचः—अचायिषाताम् । अचेषाताम् । अदायिषाताम् । अदिषाताम् । अशामिषाताम् । अशमिषाताम् । अशमयिषाताम् । तासः—घानिता । दर्शिता । द्रष्टा । ग्राहिता । चायिता । चेता । दायिता । दाता । शामिता । शमिता । शमयिता । स्य—घानिष्यते । हनिष्यते । अघानिष्यत । अहनिष्यत । दर्शिष्यते । द्रक्ष्यते । अदर्शिष्यत । अद्रक्ष्यत । ग्रहीष्यते । ग्राहिष्यते । अग्राहिष्यत । अग्रहीष्यत । चायिष्यते । चेष्यते । अचायिष्यत । अचेष्यत । दायिष्यते । दास्यते । अदायिष्यत । अदास्यत । शमिष्यते । शामिष्यते । अचायिष्यत । अशामिष्यत । अशमयिष्यत । सटः—घानिषीष्ट । वधिषीष्ट । दर्शिषीष्ट । दृक्षीष्ट । ग्राहिषीष्ट । ग्रहीषीष्ट । चायिषीष्ट । चेषीष्ट । दायिषीष्ट दासीष्ट । शामिषीष्ट । शमिषीष्ट । शमयिषीष्ट । कारिता । कारिष्यते । अकारिष्यत । इत्यत्र नित्यत्वात् अङादेशे कृते पि तास्स्यावयवयेव विहिताविति ञिड् भवति ॥ अन्यत्र—आहृत । आचेष्ट ।

श्लेले यक् ॥ ४ । ३ । १९ ॥

धातोः कर्मणि भावे च वर्तमाने शि शिदादौ ले ल लेटि लेङि लटि लङि च प्रत्यये परे मध्ये यक् भवति । क्रियतां कटः । क्रियते कटः । क्रियेत कटः । अक्रियत कटः । अक्रियेतां कटौ । अक्रियन्त कटाः । आस्यताम् । आस्येत । आस्यते । आस्यते भवता । शिद्ग्रहणमुत्तरार्थम् । श्लेले इति किम् ? चक्रे । कृषीष्ट । शिश्ये । शयिषीष्ट ।

कर्तरि शप् ॥ ४ । ३ । २० ॥

धातोः कर्तरि वर्तमाने श्लेले परतः मध्ये शप् प्रत्ययो भ-

वति धारयः । पारयः । अङ्गमेजयः । जनमेजयः । ग्लायतु । ग्लायेत् । ग्लायति । अग्लायत् । जयतु । जयेत् । जयति । अजयत् । कर्तरीति किम् ? पच्यते । श्लेल इति किम् ? पपाच । पच्यात् । पक्ता । सि-पक्ष्यति । अपक्ष्यत् । अपाक्षीत् ॥

ह्वादादेश्श्लुब्लुक् ॥ ४ । ३ । २१ ॥

ह्वादिभ्योऽदादिभ्यश्च कर्तरि श्लेले विकरणस्य शपोऽन्यस्य वा यथासंख्यं श्लुप् श्लुक् च शिल्लोपो वाचकभिन्नो भवति । जुह्वानः । जुहोतु । जुहुयात् । जुहोति अजुहोत् । इत्यादि । अत्ति । हन्ति । यायष्टि । तात्वष्टि । कति हन्ति । घनानाः । इत्यादि ॥

दिवादेश्श्यः ॥ ४ । ३ । २२ ॥

दिवादिभ्यः कर्तरि श्लेले परे मध्ये श्यः प्रत्ययो भवति । दीव्यमानः । दीव्यतु । दीव्येत् । दीव्यति । अदीव्यत् । इत्यादि ॥

भ्राशभ्लाशभ्रमिक्रमिक्लमित्रसित्रुटिलषो वा ॥ ४ । ३ । २३ ।

भ्राशादिभ्यः कर्तरि श्लेले मध्ये श्यो वा भवति । भ्राशमानः । भ्राश्यमानः । भ्राशताम् । भ्राश्यताम् । भ्लाशताम् । भ्लाश्यताम् । भ्रमतु । भ्राम्यतु । क्रमतु । क्राम्यतु । त्रसतु । त्रस्यतु । त्रुटतु । त्रुट्यतु । लषतु । लष्यतु । भ्रमेर्दैवादिकस्य श्ये शमां दीर्घोऽष्टानामिति दीर्घः नैधादिकस्य ॥

यसोऽनुपसर्गात् ॥ ४ । ३ । २४ ॥

अनुपसर्गाद्यसेः धातोः कर्तरि श्लेले श्यो वा भवति । यसमानः । यस्यमानः । यसतु । यस्यतु । अनुपसर्गादिति किम् ? आयस्यति । प्रयस्यति ।

ग्रसः ॥ ४ । ३ । २५ ॥

ग्रस् इत्युपसर्गात्पराद्ग्रसेः कर्तरि श्लेले श्यो वा भवति। संयसमानः । संयस्यमानः । संयसतु । संयस्यतु ।

अक्षश्श्नुः ॥ ४ । ३ । २६ ॥

अक्षेर्धातोः कर्तरि श्लेले श्नुर्वा भवति । अक्षमाणः । अक्षुवानः । अक्षतु । अक्ष्णोतु ।

तक्षस्तनूकृतौ ॥ ४ । ३ । २७ ॥

तनूकरणे वर्तमानात्तक्षेः कर्तरि श्लेले श्नुर्वा भवति । तक्षमाणः तक्ष्णुवानः । तक्षतु । तक्ष्णोतु काष्ठम् । अन्यत्र—संतक्षति वाग्भिः । अनिर्भर्त्सयतीत्यर्थः ।

स्वादेः ॥ ४ । ३ । २८ ॥

वेति निवृत्तं । स्वादिभ्यो धातुभ्यः कर्तरि श्लेले श्नुर्भवति । सुन्वानः । सुनोतु । सुनुयात् । सुनोति । असुनोत् ।

स्तन्भूस्तुन्भूस्कन्भूस्कुन्भूस्कोश्श्ना च ॥ ४ । ३ । २९ ॥

स्तन्भ्वादेः कर्तरि श्लेले मध्ये श्ना भवति श्नुश्च। स्तभ्नानः । स्तभ्नुवानः । स्तभ्नातु । स्तभ्नोतु । स्तुभ्नोतु । स्कभ्नातु । स्कभ्नोतु । स्कुभ्नोतु । स्कुभ्नातु स्कुभ्नोतु स्कुनातु । स्कुनोतु । सौत्रा एते धातवः स्कुञस्तु स्कुनाति । स्कुनीतः । इत्येव भवति । उकार इत् । स्तब्ध्वा । स्तंभीत्वा इति विकल्पार्थः ॥

क्र्यादेः ॥ ४ । ३ । ३० ॥

डुक्रीञित्यादिभ्यः कर्तरि श्लेले श्ना भवति । क्रीणानः । क्रीणातु । क्रीणीयात् । क्रीणाति । अक्रीणात् ।

हलश्श्न हावानः ॥ ४ । ३१ ॥

हलंताद्धातोः परस्य श्नाप्रत्ययस्य हौ परे आनादेशो

भवति। स्तभानः। स्तुभानः कुषाण। मुषाण। हल इति किम्? क्रीणीहि। श्ना इति किम्? स्तभ्नुहि। स्तुभ्नुहि।

तुदाभ्यश्शः ॥ ४। ३। ३२ ॥

तुदादिभ्यः कर्तरि श्लेले मध्ये शो भवति। तुदमानः। तुदतु। तुदेत् तुदति। अतुदत्।

कृञ्तनादेरुः ॥ ४। ३३ ॥

कृञस्तनादिभ्यश्च कर्तरि श्लेले मध्ये उप्रत्ययो भवति। कुर्वाणः। करोतु। कुर्यात्। करोति। अकरोत्। तन्वानः। तनोतु। तनुयात्। तनोति। अतनोत्।

रुधां नं नूलुक् च ॥ ४। ३। ३४ ॥

रुधादीनां धातूनां कर्तरि श्लेले मध्ये नम् भवति। नकारस्य च लुक्। अन्वाचीयते। मित्वादन्त्यमन्वाद्चः परो वेदितव्यः। शपोपवादः। रुन्धानः। रुणद्धु। रुन्ध्यात्। रुणद्धि। अरुणत्। भंजो–भनक्तु। हिंसु–हिनस्तु। उन्दै उनत्तु। उन्धः। व्यनक्तु। तञ्चू–आतनक्तु।

कर्मण्यस्त्रुवादीनां कर्मवल्लि ॥ ४। ३५ ॥

धातोः कस्यचित् कश्चिदर्थभागः कर्मस्थः प्रधानं फलरूपो विक्लेदादिः कर्तृस्थो गुणो भवनारूपोऽधिश्रयणादिस्तत्र यथा कर्मस्थे स्वस्यार्थभागे सुकरत्वेन वा कर्मण्यध्यारोपितायां भावनायां धातुर्वर्तते तदा तत्कर्म कर्ता भवति। तस्मिन् स्रुवत्यादिवर्जितस्य धातोः कर्तरि लकारे सति तदंतस्य कर्मवत्कार्यं भवति। कर्मणि लकारे सति यथा ञि ञिट् यक् तङ् आना भवंति तथा अत्रापि ते भवंतीत्यर्थः। पचत्योदनं देवदत्तः। विक्लेदयतीत्यर्थः। पच्यते ओदनः स्वयमेव। विक्लिद्यतीत्यर्थः। भिनत्ति कुसूलं देवदत्तः। द्विधा भावयतीत्यर्थः। भिद्यते कुः

सूलः स्वयमेव, तद्द्विधा भवतीत्यर्थः । एवं—लूयते । लूयमानः केदारः स्वयमेव । क्रियते क्रियमाणः कटः स्वयमेव । अपाच्योदनः । अभेदि कुसूलः । कृषीष्ट कारिषीष्ट कटः स्वयमेव । लुलुवे केदारः । बिभिदे कुसूलः स्वयमेव । कर्मणीति किम् ? ग्रामं गच्छति देवदत्तः । साध्वसिश्छिनत्ति । साधु स्थाली पचति, अस्नुवादीनामिति किम् ? स्रवत्युदकं कुम्भः । स्रवत्युदकं स्वयमेव । गलत्युदकं कुम्भः । गलत्युदकं स्वयमेव । ञीति किम् ? भिन्दानः कुसूलः स्वयमेव । पृथक्प्रत्ययो मा भूत् ।

तपस्तपसि ॥ ४ । ३ । ३६ ॥

कर्मणीत्येतदिह तप्रत्यये तस्य विशेषणम् । तपेर्धातोस्तपसि कर्मणि सति यः कर्ता तस्मिन् लकारे तदन्तस्य कर्मवत्कार्यं भवति । तप्यते तपांसि धीरः । तपिरत्र करोत्यर्थः । तप इति किम् ? कुरुते तपांसि धीरः । तपसीति किम्? उत्तपति स्वर्णं स्वर्णकारः । कर्मणीति किम् । तपांसि साधुं तपन्ति । दुःखयन्तीत्यर्थः ।

सृजश्श्राद्धे ॥ ४ । ३ । ३७ ॥

सृजेर्धातोः श्राद्धे श्रद्धावति कर्तरि लकारे सति तदन्तस्य कर्मवत्कार्यं भवति । सृज्यते । असर्जि मालां धार्मिकः । अन्यत्र—सृजति । अस्राक्षीत् मालां मालिकः ।

करणे क्वचित् ॥ ४ । ३ । ३८ ॥

धातोः करणे कर्तरि लकारे सति क्वचित्कर्मवत्कार्यं भवति । परिवारयन्ति कंटकैः पुरुषा वृक्षं परिवारयन्ते कंटकाः स्वयमेव । क्वचिदिति किम् ? साध्वसि छिनत्ति ॥

कुषिरजश्श्यान्न वा ॥ ४ । ३ । ३९ ॥

कुषिरजाभ्यां श्यात्परस्य कर्मणि कर्तरि लकारस्य कर्म-

वत्कार्यं तङानं वा न भवति। कुष्णाति पादं देवदत्तः कुष्यति, कुष्यते वा पादः स्वयमेव। कुष्यन्। कुष्यमाणः रजति वस्त्रं रजकः। रज्यति, रज्यते वा वस्त्रं स्वयमेव। श्यादिति किम्? चुकुषे। कोषिषीष्ट ररंजे। रंक्षीष्ट। अकोषि। अरञ्जि स्वयमेव। अत एव श्यो विज्ञायते। यकोऽपवादः। तेन—कुष्यन्ति। रंज्यन्तीति नित्यं नम। नेति कर्मवद्विधिनिवृत्यर्थः॥

ञ्यजदुहः॥ ४। ३। ४०॥

अजंताद्दुहेश्च धातोः कर्मणि कर्तरि ञिप्रत्ययो वा न भवति। अकृत। अकारि कटः स्वयमेव। अलविष्ट। अलावि केदारः स्वयमेव। अदुग्ध। अदोही गौः स्वयमेव। कर्तरीति किम्? अकारि कटः देवदत्तेन। अदोहि गोपालकेन॥

रुधः॥ ४। ३। ४१॥

रुधेर्धातोः कर्तरि ञिर्न्नित्यं न भवति। अरुद्ध गौः स्वयमेव। कर्तरीति किम्? अरोधि गौः गोपालकेन॥

तपोऽनुतापे च॥ ४। ३। ४२॥

तपेर्धातोः कर्तर्यनुतापे च विषये ञिर्न भवति। अतप्त तपांसि धीरः अन्वतप्त पापेन कर्मणा। अनुतापे चेति किम्? अतापि पृथ्वी राजा॥

णिश्रिस्नुतङकर्मणः॥ ४। ३। ४३॥

णयन्तानां श्रिस्नु इत्येतयोः तङि विधातव्ये येऽकर्मकाः येभ्यः कर्मण्यसति तङ् विधीयते तेषां च धातूनां कर्तरि ञिर्न भवति। णि—स्वयं पच्यमान ओदनः। पाकं प्रायुंक्त। अपीपचतौदनः स्वयमेव। अथवा पचत्योदनं गुरुदत्तः तेन अपीपचतौदनं देवदत्तः तस्य पुनः कर्तृत्वे—अपीपचतौदनः स्वयमेव। स्वयमेवपाचि इत्यर्थः। उदपुपुच्छत स्वयमेव गौः पुच्छं

वा । श्रि—उदशिश्रियत् दण्डः देवदत्तः । उदशिश्रियत दंडः स्वयमेव । स्नु—प्रास्नावी गां देवदत्तः । प्रास्नो गौः स्वयमेव । तङ्कर्मणः व्यकृत सैन्धवः । व्यकृत कटः । आहत गौः । व्यतप्त पृथ्वी । उदतप्त सुवर्णं स्वयमेव । ञिटि—पाचिता । पाचिषीष्ट ओदनः स्वयमेव । उच्छ्रायिता । उच्छ्रायिषीष्ट दंडः स्वयमेव । प्रास्नाविष्ट । प्रास्नाविषीष्ट गौः स्वयमेव । अपूनिष्ट । अवधिषीष्ट गौः स्वयमेव ॥

भूषार्थसन्दुहादीनां च ञियक् ॥ ४ । ३ । ४४ ॥

भूषार्थानाम् सन्नन्तानाम् दुहादीनाम् णिश्रिस्नूनाम् तङ्व्यकर्मणां च धातूनां कर्तरि ञि ञिट् यक् च प्रत्यया न भवन्ति । अबूभुषत् कन्यां देवदत्तः । अबूभुषत कन्या स्वयमेव । भूषयिष्यति कन्यां देवदत्तः । भूषयिष्यते मंडयिष्यते कन्या स्वयमेव । भूषयति कन्यां देवदत्तः । भूषयते कन्या स्वयमेव । सन् अचिकीर्षीत् कटं देवदत्तः । उत्पादयतुमैषीदित्यर्थः अचिकीर्षिष्ट कटः स्वयमेव । उत्पत्तुमैषीदित्यर्थः । एवमविभित्सिष्ट कुसूलः स्वयमेव । अचिच्छित्सिष्ट रज्जुः स्वयमेव । चिकीर्षते कटः । विभित्सते कुसूलः स्वयमेव । दुहो—दिदुग्धे गौः स्वयमेव । दुहेः ञिविकल्प उक्तः । अननृसीत् दंडं देवदत्तः । अनंस्त दंडः स्वयमेव । नयते दंडः स्वयमेव । अश्रन्थीत ग्रथं देवदत्तः । अश्रन्थिष्ट ग्रंथः स्वयमेव । अग्रंथिष्ट मेखला स्वयमेव । श्रन्थते ग्रंथः स्वयमेव । ग्रंथते मेखला स्वयमेव । श्रथ्नीते मेखला स्वयमेव । श्रंथि, ग्रन्थि क्र्यादौ युजादौ च । अवोचत् कथां देवदत्तः । अवोचत् कथा स्वयमेव । ब्रूते कथा स्वयमेव । अकीर्ष्ट । अकीर्षिष्ट । किरते । अगीर्ष्ट । गीर्षिष्ट । गिरते स्वयमेव । णिश्रिस्नुतङ्कर्मणां ञिरुदाहृतः । युक्—पच्यते

ओदनः । उत्पुच्छयते गौः । पुच्छं वा लक्षयते गौः उच्छूयते दंडः । प्रस्नुते गौः । विकुर्वते सैन्धवाः । आहते गौः स्वयमेव । कर्तरीति किं ? अभूषि भूषिष्यते । भूष्यते कन्यया । अत्र जिडपि प्रतिषिध्यते ।

कृल्लोऽतुन्त्वां ॥ ४ । ३ । ४५ ॥

तुं त्वा अमित्येतद्वर्जिताः कृतो लकारश्च प्रत्ययाः कर्तरि भवन्ति । कर्त्रैषां वाच्यत्वेन विधीयते कर्ता । कारकः । पचति । आस्ते । अग्रहणं भावकर्मभ्यामबाधार्थम् । अतुंत्वामिति किम् ? कर्तुं व्रजति । कृत्वा व्रजति । कारं कारं व्रजति । भोजं भोजमाक्रोशति अतिथि । देवं भोजयति देवदत्तः । अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भावे एवेत्यर्थः ॥

घुरकेलिमकृष्टपच्यङ्कर्मणि ॥ ४ । ३ । ४६ ॥

घुरकेलिम इत्येतौ प्रत्ययौ कृष्टपच्यश्च कर्मणि कर्तरि भवन्ति । घुरो वक्ष्यते । केलिमः कृष्टपच्यश्चातएव भंगुरम् । भिदुरम् काष्ठम् । छिदुरा रज्जुः । पचेलिमा माषाः । भिदेलिमानि काष्ठानि । कृष्टे पच्यन्त इति कृष्टपच्याः शालयः । भास्मिद्धिधां कर्तर्येव घुरः कर्मकर्तुरसम्भवात् ।

सङ्गतेऽजर्यं ॥ ४ । ३ । ४७ ॥

सङ्गमनं सङ्गतं तस्मिन् कर्तरि नञ् पूर्वात् जीर्यतेर्यं निपात्यते अजर्यं सङ्गतम् । अजर्यं तेस्तु सङ्गतम् । अन्यत्र—अजरः कटः । अजरिता कम्बलः । कर्तरीति किम् ? अजर्यं सङ्गतेन ।

रुच्याव्यथ्यौ ॥ ४ । ३ । ४८ ॥

रुच्य अव्यथ्येति रोचतेर्नञ्पूर्वाच्च व्यथतेः क्यप् निपात्यते । रोचत इति रुच्यो मोदकः देवदत्ताय । न व्यथत इत्यव्यथ्यो देवदत्तः ॥

भूगेयौ वा ॥ ४ । ३ । ४९ ॥

भूगाभ्यां यप्रत्ययः कर्तरि वा भवति । भव्यो देवदत्तः । भव्यं देवदत्तेन । गेयो माणवकः गाथानाम् । गेया माणवकेन गाथा ॥

प्रब्रूपस्थोऽनीयः ॥ ४ । ३ । ५० ॥

प्रब्रूपस्थाभ्यामनीयप्रत्ययः कर्तरि वा भवति । प्रवचनीयो गुरुः शासनस्य । प्रवचनीयं गुरुणा शासनम् । उपस्थानीयः शिष्यो गुरोः । उपस्थानीयः शिष्येण गुरुः ।

जनाप्लवापतो घ्यण् ॥ ४ । ३ । ५१ ॥

जन आप्लु आपत् इत्येतेभ्यो घ्यण् कर्तरि वा भवति । जन्योऽयं जन्यमनेन । आप्लाव्योऽयम् । आप्लव्यमनेन । आपात्योऽयम् । आपात्यमनेन । घ्यणीति किम्? आप्लव्यं देवदत्तेन ॥

श्लिषशीङ्स्थाजॄषास्वसजनुहा-
रम्भात् क्तः ॥ ४ । ३ । ५२ ॥

श्लिषादिभ्यः आरम्भादिकर्मत्वेभ्यश्च धातुभ्यो यः क्तः स कर्तरि वा भवति । श्लिष्टः । आश्लिष्टः कन्यां देवदत्तः । आश्लिष्टा कन्या देवदत्तेन । आश्लिष्टं देवदत्तेन । शीङ्-अतिशयितो गुरुं देवदत्तः । अतिशयितो गुरुर्देवदत्तेन । अतिशयितं देवदत्तेन । स्था—उपस्थितो गुरुर्देवदत्तः । उपस्थितो गुरुर्देवदत्तेन । उपस्थितं देवदत्तेन । जॄष्—अनुजीर्णो वृषलीं देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । अनुजीर्णं देवदत्तेन आस्—उपासितो गुरुं देवदत्तः । उपासितो गुरुर्देवदत्तेन । उपासितं देवदत्तेन । वस्—अनूषितो गुरुं देवदत्तः । अनूषितो गुरुर्देवदत्तेन । अनूषितं देवदत्तेन । जनू—अनुजातो माणविकां माणवकः । अनुजाता माणविका माणविकेन ।

अनुजातं माणविकेन । विजाता वत्सं गौः । विजातो वत्सो गवा । विजातं गवा । आरूढो वृक्षं देवदत्तः । आरूढो वृक्षो देवदत्तेन । आरूढं देवत्तेन । आरम्भः प्रकृतः कटं देवदत्तः । प्रकृतः कटो देवदत्तेन । प्रकृतं देवदत्तेन । प्रभुक्तः ओदनं देवदत्तः । प्रभुक्त ओदनो देवदत्तेन । प्रभुक्तं देवदत्तेन अकर्मकापि हि धातवः सोपसर्गाः सकर्मकाः भवन्ति । इति श्लिष्टो धिग्रहणम् ॥

गत्यकर्मण्याधारे च ॥ ४ । ३ । ५३ ॥

गतौ अकर्मके चार्थे वर्तमानाद्धातोः क्तः आधारे चकारात्कर्तरि च वा भवति । इदमहेः सृप्तम् । इदं यातं गतं देवदत्तस्य । गतो देवदत्तो ग्रामं । गतो देवदत्तेन ग्रामः । गतं देवदत्तेन । इदमेषामासितम् । शयितम् । आश्रितः । शयितो देवदत्तः । आसितं शयितं देवदत्तेन । अकर्मणीति—यस्य कालादि कर्म नास्ति तन्निर्देशः । तेन—कृतो देवदत्तः इत्यविवक्षितकर्मकात्कर्त्तरि न भवति । भुक्ताः ब्राह्मणाः पिताः गावः इति मत्वर्थीयोऽकारः ।

आदौ ॥ ४ । ३ । ५४ ॥

अद्यर्थाद्भ्यवहारत्यर्थाद्धातोः क्तप्रत्यय आधारे वा भवति इदमेषां अद्यं भुक्तम् । पीतं । भुक्त ओदनः । पीतमुदकं देवदत्तेन । योगविभागात्कर्तरीति नास्ति ॥

साप्यानाप्याल्लक्तघ्यप्खार्था कर्मभावे ॥ ४ । ३ । ५५ ॥

वेति निवृत्तम् । कृञ इति लग्रहणात् सकर्मकादकर्मकाच्च धातोर्लक्तघ्यप्खार्थाः प्रत्यया यथासंख्यं कर्मणि भावे च भवन्ति ।एवं लकाराणां त्रयोऽर्थाः वाच्यत्वेन विहिता भवन्ति । शेषाणां द्वौ, पच्यते पेचे ओदनो देवदत्तेन । शय्यते, शिश्ये

देवदत्तेन । कृतः कटो देवदत्तेन । शयितं देवदत्तेन । कार्यः कर्तव्यः कटो देवदत्तेन । शयितव्यं देवदत्तेन । सुकरः कटो देवदत्तेन । सुशयं देवदत्तेन । सुकरंकराणि वीरणानि ईषदाढ्यंभवं देवदत्तेन । सुस्नानं त्वयं देवदत्तेन । सुग्लानं देवदत्तेन । साप्यानाप्यादिति किम् ? सकर्मकाद्भावे मा भूत् । कटं क्रियते देवदत्तेनेति अविवक्षिते तु कर्मकार्ये वेति भवति । भुज्यते देवदत्तेन ॥

भीमादयोऽपादाने ॥ ४ । ३ । ५६ ॥

अपादीयतेऽस्मादित्यपादानमपाये अवधिरुच्यते । तत्र भीमादयश्च शब्दा भवन्ति । बिभेत्यस्मादिति भीम: भीष्मः । भयानकः । खलतिरित्यादि ॥

संप्रदानाच्चान्यत्रोणादयः ॥ ४ । ३ । ५७ ॥

संप्रदीयतेऽस्मै इति संप्रदानं तस्माच्चकारादपादानाच्चा-न्यत्रोणादयः प्रत्यया भवन्ति । करोतीति कारुः । कंपितोऽसा-विति कपिः । ऋचन्ति तयेति ऋक् । वृत्तं तत्रेति वर्त्म । भस्म ॥

कृद्बहुलम् ॥ ४ । ३ । ५८ ॥

कृत्प्रत्ययो निर्दिष्टादर्थादन्यत्राप्यर्थे बहुलं भवति । पा-दाभ्यां ह्रीयत इति पादहारकः । गले चोप्यत इति गलेचोप्यकः दास्यते तस्मादिति दासः । गां हन्ति तस्मै गोघ्नो ब्राह्मणः । स्नात्यनेनेति स्नानीयं चूर्णम् । दीयते तस्मै इति दानीयोऽतिथिः । समावर्तते अस्मादिति समावर्तनीयो गुरुः । उद्वेजनीयो राजा । मोहयत्यात्मानं मु-ह्यतेऽनेनात्मेति वा मोहनीयं कर्म । निरदन्ति तदिति निरदनम् । अपसेचनम् । अपस्रावणं राजभोजनाः शालयः । राजाच्छादनानि वासांसि । संप्रदीयते ऽस्मादिति संप्रदानं ।

अपादीयते ऽस्मादिति अपादानं, प्रस्कंदनम् । प्रपतनं । निर्दिष्टे कृते नियोगतो भवन्ति । अन्यत्र तु यथादर्शनमल्पशः । बहुवचनाच्चरेष्टः । मनसि हृञः संज्ञायामित्येके, मनोहारी । अधिकारश्चायं तेन वक्ष्यमाणाः प्रत्ययाः बाहुल्केन भवन्त्यभिधानानुसारेण ॥

प्राक्स्त्री प्राप्तोऽसमः ॥ ४ । ३ । ५९ ॥

इत ऊर्ध्वं स्त्रियां क्ति नित्यर्थः प्राक् यो विषयस्तस्मिन् प्राप्तश्चासमञ्जौत्सर्गिकश्चासरूपः प्रत्ययो भवति । अपवादेन बाधितस्योत्सर्गस्यापवादविषयेऽनेन समावेशः क्रियते । अवश्यलाव्यम् । अवश्यलवितव्यं । अवश्यलवनीयं । जेयम् जेतव्यम् । जयनीयम् । ज्ञः—ज्ञाता । ज्ञायकः विक्षिप्तः । विक्षेपः । विक्षेप्ता । विक्षेपकः । प्राक्स्त्रीति किम्? कृतिः । चितिः । रक्षितम् । रक्षणम् । घञादिर्न भवति । चिकीर्षा । जिहीर्षा । क्तिन्न भवति । ईषत्पानः । सुपानः । खो न भवति । प्राप्त इति किम्? सुभगंकरणम् । घ्यणादेः खनादिविषये न भवति । असम इति किम्? उत्पिबः । निपिबः को न भवति । सानुबन्धकृतमसाध्यम् । तथापि मानसमः क्वचित् ॥

घ्यण् ॥ ४ । ३ । ६० ॥

धातोः घ्यण्प्रत्ययो भवति । कार्यम् । पाच्यम् । पाठ्यम् ।

पाणिसमवात् सृजः ॥ ४ । ३ । ६१ ॥

पाणिसमवाभ्यां परात्सृजेर्घ्यण् भवति । क्यपापवादः । पाणिसर्गा रज्जुः । समवसर्गः । अन्यस्मात् संसृज्यः ॥

ओरावश्यके ॥ ४ । ३ । ६२ ॥

उवर्णान्ताद्धातोरवश्यम्भावे द्योत्ये घ्यण् भवति । लाव्यमवश्यम् । अवश्यलाव्यम् । पाव्यमवश्यम् । अवश्यपाव्यम् ।

मयूरव्यंसकादित्वात्समासः । अन्यत्र—ऊढ्यम् । पव्यम् ।

वाधारेऽमावस्या ॥ ४ । ३ । ६३ ॥

अमापूर्वाद्वसतेराधारे धातोः घ्यण् पक्षे ह्रस्वश्च निपात्यते । अमावसतोऽस्यां तिथौ सूर्याचन्द्रमसाविति अमावस्या, अमावास्या वा । रूढिशब्दाविमौ । तिथिविशेषवचनौ ॥

कुण्डपाय्यसञ्चाय्यराजसूयाः क्रतौ ॥ ४ । ३ । ६४ ॥

कुण्डपाय्यादयः शब्दाः क्रतावभिधेये घ्यणन्ता निपात्यन्ते । कुण्डैः पीयतेऽस्मिन् सोम इति कुण्डपाय्यः क्रतुः । कुण्डपानोऽन्यः । सञ्चीयत इति सञ्चाय्यः क्रतुः । सञ्चेयोऽन्यः । राज्ञा सोतव्यो राजा वा सूयतेऽस्मिन्निति राजसूयः क्रतुः ॥

पाय्यधाय्यासान्नाय्यनिकाय्यप्रणाय्यानाय्यं मानर्त्विर्निवासासंमत्यनित्ये ॥ ४ । ३ । ६५ ॥

पाय्यादयः शब्दाः मानादिष्वर्थेषु यथासङ्ख्यं घ्यणन्ता निपात्यन्ते । मीयते येन तन्मानं तत्र पाय्येति माङो घ्यणादि पत्वं च निपात्यते । पाय्यं मानम् । मेयमन्यत् । दाञः दाय्याः ऋचः । समेधणीञः । सान्नाय्यं हविः । नेः चीञः निकाय्यो निवासः । सम्मतिरिच्छा साऽस्मिन्नास्तीति असम्मतिः । असम्मतेः निष्प्रतिभ उच्यते तत्र प्रणाय्यश्चोरः । प्रणाय्योऽन्तेवासी । अनित्ये माङो णिञः आनाय्यः दक्षिणाग्निः । आनाय्ये गुदुग् इत्येके । तेषामनित्यपर्ययः ॥

अग्नौ परिचाय्योपचाय्यसमूह्यचित्याः ॥ ४ । ३ । ६६ ॥

परिचाय्यादयः अग्नौ निपात्यन्ते । परिचाय्योऽग्निः । परिचेयोऽन्यः । उपचाय्योऽग्निः । उपचेयोऽन्यः । समूह्योऽग्निः । समापितव्योऽन्यः । चित्योऽग्निः । चेयोऽन्यः ।

तव्यानीयौ ॥ ४ । ३ । ६७ ॥

धातोस्तव्यः अनीयः प्रत्ययौ भवतः । कर्तव्यम् । करणीयम् । हर्तव्यम् । हरणीयम् । वस्तव्यम् । वसनीयम् । देवदत्तेन वास्तव्य इति तद्धितः । वास्तुनि भव इति ।

पवन्तक्तिशक्शसियत् सहियजोऽय्वासुवपरपलपापत्र पडिपदभचमुर्यः ॥ ४ । ३ । ६८ ॥

पवर्गान्तादजन्ताच्च तादिभ्यश्च धातुभ्यः यप्रत्ययो भवति । य्वादीन् ऋवर्णान्तानांश्च वर्जयित्वा । घ्यणापवादः । पु—शप्यम् । लभ्यम् । गव्यम् । रम्यम् । अच्—देयम् । धेयम् । लव्यम् । पठ्यञ्च । तादि इत्यं तक्यम् । शक्यम् । शस्यम् यत्यम् । सह्यम् । यज्यम् । त्यजज इति वचनात् घ्यणपि । याज्यम् । य्वादिप्रतिषेधः किम् ? याव्यम् । आसाव्यम् । वाप्यम् । राप्यम् । लाप्यम् । अपत्राप्यम् । देप्यम् । दाभ्यम् । आचाम्यम् । कार्यम् । तार्यम् ॥

गदमदयमोऽनुपसर्गात् ॥ ४ । ३ । ६९ ॥

गद् मद् यम्भ्योऽनुपसर्गेभ्यः यो भवति । गद्यम् । मद्यम् । यम्यम् । अनुपसर्गादिति किम् ? निगाद्यम् । प्रमाद्यम् । आयाम्यम् ।

चरः ॥ ४ । ३ । ७० ॥

चरेर्धातोरनुपसर्गात् यो भवति । चर्यः ।

आङो ऽगुरौ ॥ ४ । ३ । ७१ ॥

आङः परात् चरेर्यो भवति अगुरौ । आचर्यो देशः । गुरौ आचार्यः शाकटायनः ॥

पणोपसृब्रवदाद्विक्रेयर्तुमत्युपेयागर्ह्ये ॥ ४ । ३ । ७२ ॥

पणादिभ्योऽनुपसर्गेभ्यो यो भवति । यथासङ्ख्यं विक्रेयादिष्वर्थेषु । पण्यः कम्बलः । पण्या गौः । विक्रेय इत्यर्थः ।

उपसर्या गौः । उपसर्या बडवा । ऋतुमती काल्या, प्रजनिरित्यर्थः । शतेन वर्या स्त्री । सहस्रेण वर्या। उपेया संभक्तव्या इत्यर्थः । अवद्यं पापम् । अवद्या हिंसा । गर्ह्येत्यर्थः । अन्यत्र-पाण्यः साधुः । उपसार्या शरदि मधुरा । वृत्या गौः । अनुद्या जनबाधा । अवाद्या इति निरूपसर्गात् घ्यण् पश्चान्नञ्समासे भवति । उपेयेति । स्त्रीलिङ्गनिर्देशादिह न भवति—आर्याः ऋत्विजः । वृङ एष घ्यण् वृत्येति वृजः क्यप् ॥

स्वामिवैश्येऽर्तेः ॥ ४ । ३ । ७३ ॥

स्वामिनि वैश्ये चाभिधेये ऋ गतावित्येतस्मादनुपसर्गाद्यो भवति । अर्यः स्वामी । अर्यः वैश्यः । अन्यत्र– आर्यो देवदत्तः ॥

वदः सुपः क्यप् च ॥ ४ । ३ । ७४ ॥

अनुपसर्गात्सुपः पराद्वदतेर्धातोः क्यप् भवति चकाराद्यश्च । ब्रह्मोद्यम् । ब्रह्मवद्यम् । सत्योद्यम् । सत्यवद्यम् । सुप इति किम्? पाद्यम् । उपसर्गात्प्रवाद्यम् ॥

हत्याभूयं भावे ॥ ४ । ३ । ७५ ॥

अनुपसर्गात्सुबन्तात्परं हत्या भूय इति क्यपन्तं निपात्यते । हन्तेः स्त्रीः भावे । ब्रह्महत्या । अश्वहत्या । भवतेर्नपुंसके भावे—ब्रह्मभूयं गतः । देवभूयं गतः ब्रह्मत्वमित्यर्थः । भाव इति किम्? श्वघात्या वृषली । सुप इति किम्? हतिर्वर्तते । अनुपसर्गादिति किम्? उपहतिर्वर्तते ॥

अग्निचित्या ॥ ४ । ३ । ७६ ॥

अग्नेः पराच्चिञः स्त्रीभावे क्यप् निपात्यते । अग्नेश्चयनं अग्निचित्या ॥

खेयमृषोद्यम् ॥ ४ । ३ । ७७ ॥

खेयमृषोद्यमिति क्यबन्तं निपात्यते। खनेः—खेयम्। उत्खेयम्। निखेयम्। मृषापूर्वाद्वदतेः मृषोद्यम्। न भाव इति योगविभागः।

कुप्याज्यभिद्योद्ध्यसिध्ययुग्यं नाम्नि ॥ ४ । ३ । ७८ ॥

कुप्यादयः क्यबन्ता नाम्नि निपात्यन्ते। गोपाय्यत इति कुप्यन्धनम्। आज्यत इति आज्यं घृतम्। भिनत्ति कूलमिति भिद्यो नाम नदः। उद्धत्युदकमिति उद्ध्यो नाम नदः। सिध्यन्तेऽस्मिन्नर्था इति सिध्यो नाम नक्षत्रम्। युज्यते गमने इति युग्यम् यानम्। अन्यत्र—गोप्यम्। आग्यम्। भेद्यम्। उज्यम्। सेधनम्। योग्यम्। पुष्यसूर्यौ पुष्यार्थात्पुनर्वसुज्योतिषे। सूर्यागस्ययोरिति निपातनात्सिद्धौ॥

शास्वृञ्दृजुषस्त्वेत्यृदुपान्त्यादनृच्क्लृप्चृतः ॥ ४।३।७९ ॥

शासादिभ्यः ऋचिक्लृपिवर्जितेभ्यः ऋकारोपान्त्येभ्यः क्यप् भवति। एतीति इणिकोर्ग्रहणं नेङः। शिष्यः। प्रावृत्यम्। आदृत्यम्। जुष्यम्। स्तुत्यम्। इत्यम्। आदित्यम्। वृत्यम् गृध्यम्। अकार किम्? वार्याः ऋत्विजः। अनृच्क्लृप्चृत इति किम्? अर्च्यम्। कल्प्यम्। चर्त्यम्। उपेयमिति इङः॥

जीविपून्यो हलिमुञ्जकल्के ॥ ४ । ३ । ८० ॥

जी इत्येतस्मात् विपूर्वाभ्यां च धातुभ्यां यथासंख्यं हलि मुञ्ज कल्केषु कर्मसु प्राच्येषु क्यप् भवति। महद्धलं हलिः। मुञ्जं तृणविशेषः कल्कस्त्रिफलादीनां जित्यो-हलिः। विपूयो मुञ्जः। विनीयः कल्कः। अन्यत्र—जेयम्। विपव्यम्। विनेयम्॥

ग्रहः पदास्वैरिबाह्यापक्ष्ये ॥ ४ । ३ । ८१ ॥

सुबन्तं पदं स्वयमीर्ते इति स्वैरिन् स्वैरी अस्वैरी पर-

तंत्रः बाह्या बहिर्भवा । पक्षे भवः पक्ष्यो वर्गः । एतेष्वर्थेषु ग्रहेः क्यप् भवति । घ्यणोऽपवादः । पदे—प्रगृह्यम् । अवगृह्यम् पदम् । अस्वैरिणि-गृह्यका इमे । गृहीतकाः, परवशाः इत्यर्थः । वाह्यायां गृह्या स्त्री । नगरगृह्या सेना । वहिर्भूतेत्यर्थः । बाह्येति स्त्रीलिङ्गनिर्देशाल्लिङ्गान्तरे न भवति । पक्षे त्वद्गृह्याः । मद्गृह्याः गुणगृह्याः वचने विपश्चिताः । तत्पक्षाश्रिता इत्यर्थः । अन्यत्र ग्राह्यम् ॥

भृञोऽनाम्नि ॥ ४ । ३ । ८२ ॥

भृञो धातोरनाम्नि क्यप् भवति । भृत्यः कर्मकरः । भर्तव्याः, पोष्या इत्यर्थः । अनाम्नीति किम्? भार्या नाम क्षत्रियाः । भार्या देवदत्तस्य ॥

समो वा ॥ ४ । ३ । ८३ ॥

सम् पूर्वात् भृञः क्यप् भवति वा । संभृत्याः संभार्याः ॥

कृमृज्वृषशंसगुहदुहजपः ॥ ४ । ३ । ८४ ॥

कादिभ्यः क्यप् वा भवति । कृत्यं । कार्यं । मृज्यं रमार्ग्यं वृष्यं वर्ष्यं । शस्यं । शंस्यं गुह्यं । गोह्यं । जप्यं । जाप्यं क्यपामुक्ते घ्यण् । ये विकल्पाभावात् ॥

णवुतृच् लिहादिभ्यश्च ॥ ४ । ३ । ८५ ॥

धातोर्लिहादिभ्यश्च णवु तृ अच् इत्येते प्रत्यया भवन्ति । कारकः । कर्ता । करः । हारकः । हर्ता । हरः । पाचकः । पक्ता । पचः । वाचकः । वक्ता । वचः । वापकः । वप्ता । वपः । वादकः । वदिता । वदः । लोलुवः । पोपुवः । एवं त्रय उत्सर्गाः । लिहादिभ्यः लेहः । श्लेषः । म्लेषः । सेचः । कोपः । मेदः । नर्तः । दर्शः । दर्भः । सर्पः । जारभरः । श्वपचः । अज-

गरः । बाधकबाधनार्थम् । लिहादिग्रहणमाकृतिगणश्चायम् । नदी भदी चरी देवी इत्यादयो गौरादिषु द्रष्टव्याः ।

नान्द्यादिभ्योऽनः ॥ ४ । ३ : ८६ ॥

नन्द्यादिभ्योऽनप्रत्ययो भवति । नन्द्यादयः नन्दनः रमणः इत्यादि प्रातिपदिकपाठादपोद्धृत्य प्रकृतयो निर्दिश्यन्ते स च स प्रत्ययपाठो (?) विशिष्टविषयार्थः । रूपनिग्रहणार्थश्च । नन्दनः । वासनः । मदनः । दूषणः । नादनः । वर्द्धनः । शोभनः । रोचनः अत्र एयन्तेभ्यः । सहनः । तपनः । दमनः । सर्वे एते संज्ञायाम् । जनार्दनः । मधुसूदनः । कुलनाशनः । अत्रापयेष्यति ।

ग्रहादिभ्यो णिन् ॥ ४ । ३ । ८७ ॥

ग्रहादिभ्यः णिन् प्रत्ययो भवति । ग्रहादयश्च प्रातिपदिकपाठादेवापोद्धृताः । ग्राही । उत्साही । उद्दाही । उद्भासी । स्थायी । मंत्री । संमर्दी । ग्रहादिराकृतिगणः । तेन विसारीत्यादि ॥

नेर्वपश्रुशाविशरक्षः ॥ ४ । ३ । ८८ ॥

निपूर्वेभ्यः वपादिभ्यः णिन् भवति । निवापी । निश्रावी । निशायी । निवेशी । निरक्षी ।

नञो याचृव्याहृव्रजवदवसः ॥ ४ । ३ । ८९ ॥

नञः परेभ्यो याच् आदिभ्यो णिन् भवति । अयाची । अव्याहारी । असंव्याहारी । अव्राजी । अवादी । अवासी ।

अचोऽचित्ते ॥ ४ । ३ । ९० ॥

नञः परादजन्ताद्धातोरचित्ते कर्तरि णिन् भवति । अकारी परशुः । अहारी गंधः । अचित्त इति किम् ? अकर्ता । अहर्ता देवदत्तः । नञ इति किम् ? कर्ता । हर्ता । केषांचित् नञ् इति नास्ति । कारी । हारी ।

रुधराधोऽपात् ॥ ४ । ३ । ८१ ॥

रुधराधाभ्यामपपूर्वाभ्यां णिन् भवति । अपरोधी । अपराधी ।

इन्च परिभ्वः ॥ ४ । ३ । ८२ ॥

परि भू इत्येतस्मादिन् भवति । चकारात् णिन् च । परिभवी । परिभावी ॥

वेः शीङषिञो देशे ॥ ४ । ३ । ८३ ॥

विपूर्वात् शिङः षिञश्च इन् भवति देशाभिधाने । विषयी विशयी देशः । अत एव षिञः षत्वम् ।

ज्ञाकॄगॄप्रीगुपान्त्यात्कः ॥ ४ । ३ । ८४ ॥

ज्ञादिभ्य इगुपान्त्येभ्यश्च धातुभ्यः कप्रत्ययो भवति । ज्ञः । किरः । उत्किरः । विकिरः । गिलः । निगिलः । प्रियः । संप्रियः । विलिखः । बुधः । युधः । विकृषः । काष्ठभेदे परत्वादण् ॥

उपसर्गादातोऽनिङ् ॥ ४ । ३ । ८५ ॥

उपसर्गात्परादाकारांताद्धातोः कप्रत्ययो भवति । अनिक् इगत्र न भवति । प्रस्थः । सुग्लः । सुम्लः । सुत्रः सुरः । व्यालः । अनिगिति किम् ? आह्वः । प्रह्वः । प्रज्यः । अन्यथा ह्वीग्यजः स्यात् । यथा जुहुवतुः । जुहुवुः । पूर्वेऽपवादा अंतरान् विधीन् बाधन्ते नोत्तरानिति पूर्वापवादेनानेन णो बाध्यते नाण् । गोसंदायः ।

पाघ्राध्माधेट्दृशश्शः ॥ ४ । ३ । ८६ ॥

उपसर्गात्पादिभ्यः शो भवति कापवादः । पा इति पिबतेर्ग्रहणं न पातेः । उत्पिबः । निपिबः । उज्जिघ्रः । उद्धमः । विधमः । उद्धयः । विधयः उत्पश्यः । निपश्यः केचिदुपसर्गादिति नानुवर्त्यं । पश्य इति दृश्यते इत्याहुः ॥

धारिपारिवेद्युदेजिचेतिसातिसाहिलिम्प-
विन्दोऽनुपसर्गात् ॥ ४ । ३ । ८७ ॥

धार्यादिभ्यो ण्यन्तेभ्यो लिम्पतेर्विन्दतेश्चानुपसर्गेभ्यः शो भवति । धारयः । पारयः । वेदयः । उद्वेजयः । चेतयः । सातयः । साहयः । लिम्पः । विन्दः । अनुपसर्गादिति । किम् ? सन्धारयता । प्रलिपः । छत्रधारः । कुड्यलेप इति मध्येऽपवादः पूर्वान्विधीन् बाध्यते नोत्तरानित्यण् भवति । निलिम्पाः नाम देवाः गोविन्दः । अरविन्दः । कुरुविन्दः । इति संज्ञा एताः अत्र हिलिविदिभ्यां केवलाभ्यां प्रत्ययः पश्चात् भ्यादिना गतादिषु प्रादय इत्यादिना समासः । लिम्पविन्द इति सनं निर्देशः । नमुपदेशावस्थायामेवेति विज्ञापनार्थः । तेन—कुण्डाहुण्डेति सिद्धम् । ददः । दधः । इति दधि । दध्योरच् । दायः धाय इति दाञ्धाञोर्णः । तेनानयोर्विभाषा नारभ्यते ॥

दुन्योर्णः ॥ ४ । ३ । ८८ ॥

दुनीभ्यामनुपसर्गाभ्यां णो भवति । दावः । नायः । अनुपसर्गादिति किम् ? प्रदयः । प्रणयः ॥

सहादिग्रहाद्वा ॥ ४ । ३ । ८९ ॥

सहादिभ्यो ग्रहेश्च धातोरनुपसर्गाण्णो भवति । सहः । साहः । रमः । रामः । बुधः । बोधः । ज्वलः । ज्वालः । बलः । बालः । ग्रहः । ग्राहः । अनुपसर्गादिति किम् ? उज्ज्वलः । प्रज्वलः । बहुलाधिकाराद्विषयनियमादिविज्ञायते । ज्योतिषि ग्रहः । जलचरे ग्राह इति । ग्रहम् । ग्रहा इति गृहयतेरच् ॥

श्यात्तन्व्यधास्रुसंस्रवसावहतीश्वसः ॥ ४ । ३ । १०० ॥

श्यादिभ्यो णो भवति अनुपसर्गाद्वेति चेह निवृतम् । श्या—अवश्यायः । प्रतिश्यायः । श्याग्रहणं सोपसर्गार्थम् । आत्-

धायः । ग्लायः । स्नायः । तनू—तानः । अवतानः । व्यधः व्याधः । आस्रावः । संस्रावः । अवसायः । अवहारः । अत्यायः । श्वासः । आश्वासः ।

नृत् खन्रञ्जो वुट् शिल्पिनि ॥ ४ । ३ । १०१ ॥

नृत् खनू रञ्ज्भ्यः शिल्पिनि कर्तरि वुट्प्रत्ययो भवति । शिल्पं क्रियाजं कौशलं तद्वान् शिल्पी नर्तकः । नर्तकी । खनकः । खनकी । रजकः रजकी । अत एव निर्देशात् रञ्जेर्नलोपः । अन्यत्र—नर्तिका । टो ङ्यर्थः ॥

पाणिघट्ताडघट् ॥ ४ । ३ । १०२ ॥

पाणिताड पूर्वस्य हन्तेः शिल्पिनि कर्तरि अट्प्रत्ययादेशश्च निपात्यते । टो ङ्यार्थः । पाणिं हन्तीति पाणिना हन्तीति वा पाणिघः । पाणिघी । तालं हन्तीति तालघः । तालघी । अन्यत्र—पाणिघातः । तालघातः ॥

गस्थकः ॥ ४ । ३ । १०३ ॥

गायतेः शिल्पिनि कर्तरि थको भवति । गाथकः ॥

टनण् ॥ ४ । ३ । १०४ ॥

गायने शिल्पिनि टनण् भवति । गायनः । गायनी । टो ङ्यर्थः णो यार्थः । योगविभाग उत्तरार्थः ॥

हो व्रीहि काले ॥ ४ । ३ । १०५ ॥

हा इत्येतस्माद्धातोः टनण् भवति व्रीहि काले कर्तरि ।

प्रुसृल्वः साधौ वुच् ॥ ४ । ३ । १०६ ॥

प्रुसृलुभ्यः साधुत्वविशिष्टेऽर्थे वुच् भवति । साधु प्रवत इति प्रवकः । एवं सरकः । लवकः । अन्यत्र—प्रावकः । सारकः । लावकः ॥

आशिषि वुन् ॥ ४ । ३ । १०७ ॥

अभीष्टस्य प्रार्थनाशीः । तस्यां गम्यमानायां धातोः वुन् भवति । जीवतादित्याशास्यमानः जीवकः । एवं नन्दकः । भवकः । नकारः स्त्रियां पुंसो नित्याद्यसुप इति पर्युदासार्थः । जीवका । नंदका । भवका ॥

नाम्नि क्तिः ॥ ४ । ३ । १०८ ॥

आशिषि धातोः क्तिप्रत्ययो भवति नाम्नि-समुदाय-श्चेन्नाम भवति । तनुतात् । तन्तिः । रंतिः । सातिः । शांति । भूतिः ॥

कर्मणोऽण् ॥ ४ । ३ । १०९ ॥

कर्मणः पराद्धातोः अण् प्रत्ययो भवति । अआद्यकारापवादः । कुम्भं करोतीति कुंभकारः । नगरकारः । काण्डलावकः । शरलावः । वेदाध्यायः । चर्चापाठः । छत्रधारः । द्वारपालः । उष्ट्रप्रणायः । भारवाहः । ग्रामं गच्छति इति प्राप्यात्कर्मणः । महांतं कुंभं करोतीति च बहुलाधिकारान्न भवति ॥

शीलिकामिभक्ष्याचारीक्षिक्षमो णः ॥ ४ । ३ । ११० ॥

शील्यादिभ्यः कर्मणः परेभ्यः णो भवति । धर्मं शीलयतीति धर्मशीलः । धर्मशीला । धर्मकामः । धर्मकामाः । धर्मकामौ । वायुभक्षः । वायुभक्षा । कल्याणाचारः । सुखप्रतीक्षः । क्लेशक्षमः । कर्मणि शीलादौ बहुव्रीहिणाप्येते सिद्धा भवन्ति । अणुबाधनार्थं तु वचनम् । अणि ङ्ग्रि स्यात् । पयस्कामीत्यण्यंते ।

गो ऽनुपसर्गाट्टक् ॥ ४ । ३ । १११ ॥

कर्मणः परादनुपसर्गाद्गायतेष्टक् अणोपवादः । वक्त्रगः । वक्त्रगी । अनुपसर्गादिति किम् ? वक्त्रसंगायन । सामसंगायनः ॥

सुरासीधोः पिबात् ॥ ४ । ३ । ११२ ॥

सुरासीधुभ्यां कर्मभ्यां परात् पिबतेरनुपसर्गाट्टग् भवति सुरापी । सीधुपी । अन्यस्मात्—क्षीरपा । अंबुपा । पिबादिति किम् ? सुरां पातीति सुरापा ॥

आतोऽह्वावामोऽड् ॥ ४ । ३ । ११३ ॥

कर्मणः परात् ह्वावामा वर्जितादाकारांतादनुपसर्गाद्धातोरड् डिदकारः प्रत्ययो भवति अणोऽपवादः । धनदः । तनुत्रम् । अह्वावामा इति किम् ? जिनह्वायः । तंतुवायः । दास्समायः ॥

दाज्ञः प्रे ॥ ४ । ३ । ११४ ॥

कर्मणः प्रपराभ्यां दाज्ञाभ्यां अड् भवति । सर्वप्रदः । सुखप्रदः । प्रवचनप्रज्ञः । परिप्रज्ञः ॥

संख्यः ॥ ४ । ३ । ११५ ॥

कर्मणः परादनुपसर्गात् ख्या इत्येतस्मात्समुपसर्गादड् भवति अणोऽपवादः । गां संचष्टे गोसंख्यः । अश्वसंख्यः ॥

आशिषि हनः ॥ ४ । ३ । ११६ ॥

आशिषि गम्यमानायां कर्मणः परात् हंतेरड् भवति । तिमिं वध्यादित्याशाभितः तिमिहः । शत्रुहः । पापहः ॥

क्लेशतमसोऽपे ॥ ४ । ३ । ११७ ॥

क्लेशतमाभ्यां परात् हंतेरपे उपसर्गे सत्यड् भवति । क्लेशापहः । तमोपहः । अनाशीरर्थः आरंभः ॥

शीर्षकुमाराणिन् ॥ ४ । ३ । ११८ ।

शीर्षकुमाराभ्यां पराद्धन्तेः णिन् भवति । शीर्षघाती । कुमारघाती । निपातनात् शिरसः शीर्षभावः शिरःपर्यायः । शीर्षशब्दोऽकारांतोऽस्ति । यथा—शीर्षोपहारादिभिरात्मदुःखैरित्येके ॥

अमनुष्ये टक् ॥ ४ । १ । ११९ ॥

मितिः तन्न। किं जीवे शक्तिग्रहनिमित्तप्रचुरप्रयोगाभावादात्मपदस्य न शक्तिः, किं वाऽऽत्मशब्दस्य सति योगे न रूढिः। योगश्च न परिच्छिन्ने जोव इति। अथवाऽऽत्मशब्दाज्जीवप्रत्ययस्य लक्षणयाप्युपपत्तौ न जीवे तच्छक्तिरिति। नाद्यः। श्रुतौ स्मृतौ लोके च जीवेऽप्यात्मशब्दस्य प्रचुरप्रयोगसत्त्वात्। नापि द्वितीयः। जीवस्याणुत्वनिरासेन स्वाभाविकमध्यमपरिमाणस्याप्ययोगाद्योगयुक्तत्वात्

साक्षाद्व्यवहारनिमित्तप्रकाशप्रश्नोत्तरमेवं सति भवतीत्याह-तथा चेति। यदुक्तमस्येति भेदनिर्देशाज्ज्योतिष्ट्वमात्मनोऽनुपपन्नमिति। तन्न। व्यवहर्तुरहमर्थस्यैवेदंशब्दार्थत्वात्तद्भिन्नाकरणात्मनो ज्योतिष्ट्वोपपत्तेरित्याह-आत्मैवेति। अत्रायं पुरुषः स्वयं ज्योतिरित्यस्याप्यस्येत्यनुषंगमन्तरेणैवार्थवत्त्वान्न तदनुषंगः कार्य इत्याह-अत एवेति। किं ज्योतिरेवायं पुरुष इति प्रश्नेऽयमिति पदस्य जीवपरत्वादत्रायं पुरुष इत्यत्रापि जीव एवायं पदार्थ इत्याह-अयमिति चेति। यच्चोक्तं द्युभ्वाद्यधिकरणन्यायेनात्मशब्देन परमात्मैव कथ्यत इति, तदनूद्य दूषयति यच्चेति। जीव एवात्मपदस्य शक्तिरितिवक्तुं तत्र शक्त्यभावे बीजं विकल्पयति-किं जीव इति। सति योग इति। अतति व्याप्नोतीत्यात्मेति योगे सति न रूढिः कल्प्या, क्लृप्तयोगस्य कल्प्यरूढिबाधकत्वादित्यर्थः। “यः प्राणेन प्राणिति, स आत्मा सर्वान्तरः। आ-

त्मानं रथिनं विद्धि, य आत्मनि तिष्ठन्नात्मानमन्तरोऽयमयमात्मा ब्रह्म"इत्यादिश्रुतौ,—

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
यावद्बुद्धीन्द्रियप्राणैरात्मनः सन्निकर्षणम् ॥
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति" ।

इत्यादि स्मृतौ, ममाऽऽत्मा सुखी, तवात्मा दुःखीत्यादिवृद्धप्रयोगे च जीव एवात्मशब्दप्रयोगान्न प्रथम इत्याह-नाद्य इति । यौगिकत्वपक्षेऽपि जीवो मुख्योऽर्थः। तत्रापि योगसंभवादित्याह-नापीति ।

तृतीये आत्मशब्दस्य भेदिमते जीवे शक्तिरीश्वरे तु लक्षणैवेति युक्तम् । जीवे प्रथमगृहीतशक्तिग्रहस्य बाधकाभावादित्यभिप्रेत्याह- नापि तृतीय इति ।

आत्मशब्दस्य जीवे एव शक्तिःपरमात्मप्रतीतिर्लक्षणयेति समर्थनम् । नापि तृतीयः । प्राथमिकवृद्धप्रयोगानुरोधेन जीव एव तच्छक्तिः । परमात्मनि त्वाकाशादिशब्दवल्लक्षणैवेति वैपरीत्यस्यैवोचितत्वात् ।

अथ मुख्यार्थसंबाधितया ज्ञायमाने लक्षणा । न च परमात्मा शब्दादृते ज्ञातुं शक्यते इति नियोग इव लिङादेरात्मादिपदस्य तत्रैव शक्तिर्न जीवे इति चेत् । किं मानान्तरेण वाच्यार्थसम्बन्धितया ज्ञायमाने लक्षणा, किं वा यद् वस्तुतो वाच्यार्थसम्बन्धि मानान्तरेण गृह्यते तत्र ? ।

नाद्यः । लौकिकानामात्मादिपदाज्जीवादिप्रतीत्यभावप्रसङ्गात् । तेषां त्वदभिमतेश्वराज्ञानात् । न च तेषां जीवे आत्मपदशक्तिभ्रमात्ततस्तदवगम इति वाच्यम् । प्रयोगप्राचुर्येण तदवगतशक्तिज्ञानस्य बाधकाभावात् ।

ननु जीववाचकत्वेऽनेकव्यक्तिवाचकत्वगौरवम्, ईश्वरवाचकत्वे तु लाघवमिति बाधोऽस्तीति चेत् तर्हि जीवत्वमेवार्थोऽस्तु । प्रथमावगतप्रयोगप्राचुर्यात् । ईश्वरे च सर्वज्ञादिशब्दोपस्थिते तत्सन्निधिपाठाल्लक्षणया तदवगमः । नियंतृत्वादिविषयाद्वाक्याज्जीवसंबन्धित्वेन परस्यावगतत्वात् । लिङादिशब्दस्य प्रथमावगतधात्वर्थव्युत्पत्तौ तु न किञ्चिद् बाधकम् । गौरवस्य तुल्यत्वादिति न तस्य तत्र शक्तिज्ञानम् । तदभावे च न लौकिकलिङादिश्रावित्वां ततः क्रियावगमः संभवति । लक्षणाप्रकारस्य तत्रासम्भवात् ॥

मुख्यार्थसंबन्धितया ज्ञायमानत्वस्य लक्षणाबीजस्य शास्त्रैकगम्ये परमात्मन्यभावान्न तत्र लक्षणा, किं तु शक्तिरेव, गुरुमतेऽपूर्वनियोगे लिङादिपदस्येवेति शङ्कते-अथेति । वाच्यार्थसंबन्धित्वस्य ज्ञानत्वमपि लक्षणाबीजमुत तत्संज्ञामात्रमिति विमृशति-कि मिति । आद्ये तव मते प्राकृतानामात्मलिङादिपदैर्जीवक्रियाकार्याद्यवगमो न स्यात् । वाच्येश्वरादिसंबन्धित्वेन

जीवादेरज्ञानादित्याह-नाद्य इति । ननु लौकिकानां न लक्षणया जीवावगमः, किं तु शक्तिभ्रमादित्याशङ्क्य शक्तिग्रहस्य बाधकाभावान्न भ्रमत्वमित्याह- न च तेषामिति । बाधकाभावोऽसिद्ध इति शङ्कते-नन्विति । जीवानामनेकत्वेऽपि तदनुगतात्मत्वस्यैव प्रथमावगतस्य वाच्यत्वसम्भवान्न गौरवमिति भेदवादिनं शिक्षयति तर्हीति । ईश्वरस्यापि पूर्वमनुपस्थितस्य कथं लक्षणयाऽवगम इत्यत आह- ईश्वरे चेति । वाच्यार्थसंबन्धित्वेनावगते एव लक्षणेत्यभिनिविशमानं प्रत्याह-नियन्तृत्वादीति । नियोगदृष्टान्तोऽप्यसम्प्रतिपन्न इत्याह-लिङादीति। बहूनां धात्वर्थलक्षणकार्याणां लिङादिपदवाच्यत्वे गौरवमित्याशङ्क्य नियोगस्यापि प्रतिविषयं भिन्नत्वात्तद्वाच्यत्वेऽपि गौरवं तुल्यमित्याह- गौरवस्येति । एवं तर्हि क्रियायामेव शक्तिरित्यत्र किं नियामकमित्यत्राह- तदभाव इति । लक्षणयैव ततः क्रियावगम इत्याशङ्क्याह-लक्षणेति । वाच्यार्थसंबन्धित्वेन मानान्तरेणाधिगतलक्ष्यालक्षणाहेत्वभावादित्यर्थः । न च शक्तिभ्रमादेव क्रियाकार्यावगम इति वाच्यम् । प्राथमिकशक्तिग्रहस्य बाधकाभावेन भ्रमत्वायोगादित्यादिकमत्रापि द्रष्टव्यमिति भावः ।

वस्तुतो वाच्यार्थसंबन्धे सति उपस्थिते लक्षणेति पक्षे ईश्वरे न लक्षणाविरोध इत्याह-नापि द्वितीय इति ।

आत्मशब्दस्योभयत्रापि जीवात्मनोर्मुख्यत्वम् । नापि द्वितीयः । ब्रह्मणि वस्तुतो जीवसंबन्धस्य वाक्यान्तरस्य च सत्त्वात् ।

सर्वज्ञादिरूपं ब्रह्मानवगच्छतामात्मादिपदैः परमात्मबुद्धयभावात् । नियोगे च तर्कोपस्थिते लिङ्गादिनाऽनवगात् तर्को न मानमितिचेन्न । यथार्थोपस्थितिमात्रस्यैव लक्षणायामपेक्षितत्वात् । तर्कस्यापि नियोगगोचरस्य यथार्थत्वात् । ततो भेदिनां मते आत्मत्वप्रवृत्तिनिमित्तकमात्मत्वनिष्ठं वाऽऽत्मपदमुभयत्रापि मुख्यम् । सिद्धान्ते त्वेकव्यक्तिजात्यभावाज्जीवेश्वरस्वरूपभूतमपरिमितत्वविशिष्टं चैतन्यमात्मपदार्थः । लोकेऽहमनुभवे प्रकाशमानचैतन्ये "एष ते आत्मा सर्वान्तरः। एष ते आत्माऽन्तर्याम्यमृतः। आत्मैवास्य ज्योतिः। अयमात्मा ब्रह्म सर्वानुभूतात्मन आकाश" इत्यादौ च सर्वान्तरचैतन्ये जगत्कारणे चात्मशब्दप्रयोगात् । अहमनुभवे प्रकाशमानचैतन्यस्याहङ्कारेन्द्रियशरीराद्यधिष्ठानतया सर्वान्तरत्वात्। ईश्वरस्यापि तदभेदेनैव सर्वान्तरत्वम्। अन्यथा जीवापेक्षया तस्य कथमप्यान्तरत्वानुनपत्तेः ॥

वाक्यान्तरस्येति । सर्वज्ञादिपदयुक्तवाक्यान्तरस्येत्यर्थः । नन्वेवं सति वाक्यान्तराश्रुतावात्मपदादीश्वरो न प्रतीयेतेत्याशङ्क्येष्टापत्तिरित्याह-सर्वज्ञादीति । नियोगे लिङ्गादिपदव्यतिरिक्ततदुपस्थापकाभावात्कथं लक्षणेत्याशङ्क्याह-नियोगे चेति । यदि क्रियाति-

रिक्तं कार्यं न स्यात्तर्हि स्वर्गकामिकृतिसाध्यं न स्यात् । काम्यमानसाधनस्यैव कामिकृतिसाध्यत्वादित्यादि विमर्शस्तर्कशब्दार्थः । मानेनैवोपस्थितिर्लक्षणाहेतुर्नोपस्थितिमात्रमिति शङ्कते-तर्क इति । विशेषणवैयर्थ्येन परिहरति-न यथार्थेति । एवमात्मपदस्य जीवलक्षकत्वेऽभिमते वैपरीत्यमापाद्य तन्मते वस्तुवृत्तमाह-तत इति । आत्मत्वनिष्ठमिति । जीवपदार्थवादेनोक्तमुभयत्रेति । जीवेश्वरयोरित्यर्थः । सिद्धान्ते तु योगवृत्त्यैव जीवेश्वरस्वरूपभूतचैतन्ये प्रवृत्तिः संभवति । योगे रूढेरकल्प्यत्वात् । योगश्चात्रापरिच्छिन्नत्वम् । तथा चोक्तम्—

"यच्चाप्नोति यदादत्ते यच्चात्तिविषयादिह ।

यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति ।

एतदभिप्रेत्याह-सिद्धान्ते त्विति । नन्वेवमाकाशादेरप्यपरिच्छिन्नस्यात्मपदात्प्रतीतिः स्यादित्याशङ्क्य पङ्कजपदेन तामरसवल्लौकिकवैदिकप्रयोगप्राचुर्यादुक्तचैतन्यस्यैव प्रतीतिरित्यभिप्रेत्यात्रैव लौकिकवैदिकप्रयोगप्राचुर्यं दर्शयति-लोके इति । अपरिच्छिन्नचैतन्यस्य कथं सर्वान्तरत्वमित्याशङ्क्य सर्पं प्रति रज्जोरिवेत्याह-अहमनुभवदिति । वियदाद्यधिष्ठानेश्वरस्य कथमहंकाराद्यपेक्षयाऽऽन्तरत्वमित्यत आह-ईश्वरस्येति । जीवेश्वराभेदे तदकार्यस्य तद्बाह्यतरत्वमित्याशङ्क्य त्वज्जीवेश्वरयोः परस्परापेक्षयान्तरत्वासंभवेनोभयोरपि सर्वान्तरत्वं न स्यादित्यभिप्रेत्याह-अन्यथेति ॥

फलितमाह-तथाचेति ।

(योगव्युत्पत्त्या आत्मनः सर्वव्यापकत्वम्) तथा चायमात्मशब्दो यौगिक एव क्लृप्तयोगे सति रूढेरकल्पनात् । योगश्च अतति व्याप्नोतीति व्यापकत्वम् । व्यापकत्वञ्च जीवेश्वरस्वरूपभूतं चैतन्यं, तदेव-रज्जुरिवसर्पं, सर्वं व्याप्नोतीति । यत्तु ब्रह्मलिङ्गमुदाहृतं, तदस्मन्मते न विरुद्ध्यते । जीवस्यैव स्वरूपत्वाद् ब्रह्मणः स्वेन भासा स्वेन ज्योतिषा प्रस्वपतीति प्रस्तुत्य "अत्रायं पुरुषः स्वयं ज्योतिः" इति वाक्ये स्वापो जीवलिङ्गं, तदनात्मनि ब्रह्मणि विरुध्यते । तस्य स्वापायोगात् । अनुमानमप्यहमिति व्यवहारः प्रकाशजन्यो व्यवहारत्वात्संमतवत् । आत्मव्यवहा- इति वा पक्षनिर्देशः व्यवहारस्यान्यविषयप्रकार शाजन्यत्वाद् व्यवहारजनकः प्रकाशसिध्यन् ला घावादात्मैवेति स्वप्रकाशत्वसिद्धिः । स्वविषय धर्मातिरिक्तप्रकाशजन्य इति वा साध्यम् । अनुभूतिः स्वप्रकाशा अनुभूतित्वात् व्यतिरेकेण-घटवदित्याचार्याः ।

आकाशादेः सापेक्षमेव व्यापकत्वं, सर्वव्यापकत्वं तु सर्वाधिष्ठानचैतन्यस्यैवेत्याह-व्यापकत्वं चेति । न चैवं द्युभ्वाद्यधिकरणविरोधः । तत्रेश्वरव्यावृत्तप्रातीतिककर्त्रादिरूपेण द्युभ्वाद्यधिकरणत्वं जीवस्य निरस्तं नत्वशनायाद्यतीतवास्तवरूपेण । नापीश्वर एवात्मशब्दस्य मुख्योऽर्थ इति व्युत्पादितः । तस्य स्वापाद्यसङ्ग-

तत्वात् । स्वशब्दादिति सिद्धवन्निर्देशाच्चेति द्रष्टव्यम् । जीववास्तवस्वरूपस्य ब्रह्माभिन्नत्वादसुप्तत्वादिलिङ्गं तत्रोपपद्यत इत्याह-यत्त्वित्यादिना । किं चात्र प्रत्यग्भिन्ने ब्रह्मणि परिगृहीते जीवलिङ्गं स्वापः श्रूयमाणोऽनुपपन्नः स्यादित्याह-स्वेनेति । वासनात्मान्तःकरणवृत्तिरूपदृश्यप्रकाशेन चित्प्रकाशेन चेत्यर्थः । आत्मस्वप्रकाशत्वेऽनुमानमपि प्रमाणमित्याह-अनुमानमिति । वेद्यविषयप्रकाशादेवात्मनः स्वव्यवहार इति वदन्तं प्राभाकरं प्रत्याह-व्यवहारस्येति । तर्ह्यविषयः प्रकाशो जन्योऽस्तु तत्राह-लाघवादिति । आत्मातिरिक्तप्रकाशस्य तदानन्त्यस्य च कल्पने गौरवाल्लाघवानुगृहीतमनुमानमात्मनः स्वव्यवहारहेतुप्रकाशात्मत्वलक्षणस्वप्रकाशत्वमेव साधयति, स्वविषयत्वस्य चासंभवेन दूषितत्वादिति भावः । सुखत एव जन्यज्ञानं व्यावर्तयन् साध्यान्तरमाह-स्वविषयेति । स्वस्यात्मव्यवहारस्य यो विषयस्तस्य धर्मो जन्यज्ञानादि तत्त्वानधिकरणप्रकाशजन्य इत्यर्थः । परमते जन्यज्ञानेनार्थान्तरत्वनिवृत्तये स्वविषयधर्मातिरिक्तेत्युक्तम् । स्वशब्दः समभिव्याहृतपरः । तथा च न घटादिव्यवहारे साध्यवैकल्यम् । न चेश्वरज्ञानजन्यतयाऽर्थान्तरता । तस्यापि जीवाभिन्नतया स्वविषयत्वात् । अथवाऽऽत्मव्यवहारस्यापि पक्षत्वान्नोक्तार्थान्तरता । यद्वा स्वविषयधर्मनिष्ठगुणत्वावान्तरजात्यनधिकरणप्रकाशजन्य इति साध्यं विवक्षितम् । न च गुणव्यवहारे व्यभिचारः । द्रव्यव्यवहारस्यैव हेतुत्वात् । न चाप्रयोजकम् । आत्मातिरिक्तप्रकाशजन्यत्वे गौरवाद्, आत्मनि तत्संबन्धादेर्दुर्निरूपत्वाच्चेति द्रष्टव्यम् ।

चित्सुखाचार्यानुमानमप्याह-अनुभूतिरिति ॥

साध्यादेर्दुर्निरूपत्वान्नेदमनुमानं साध्वित्यर्वाचीनः प्रलपतीत्याह-अत्रेति ॥

पूर्वोक्तानुमाने-नवीनाक्षेपः ।

अत्र नवीनः—किमिदं स्वप्रकाशत्वम् । न तावद्वृत्त्यव्याप्यत्वम् । आत्मनोऽपि वृत्तिव्याप्यत्वात् । अन्यथा श्रवणादिवैयर्थ्यप्रसङ्गात् । नापि फलाव्याप्यत्वम् । अतीतादौ नित्यातीन्द्रिये चातिव्याप्तेः । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वम् । सुषुप्तिप्रलयादावात्मव्यवहाराभावेनाव्याप्तेः । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वम् । मोक्षेऽव्याप्तेः । तदानीं योग्यतारूपधर्मस्याप्यभावात् । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्वम् । मोक्षदशायां तस्याप्यभावात् । न हि तदा ब्रह्मण्यत्यन्ताभावानधिकरणत्वाख्यः कश्चिद्धर्मोऽस्ति । ब्रह्मणस्तथाभूतयोग्यत्वात्यन्ताभावाधिकरणत्वाच्च । अन्यथा ब्रह्मगततद्योग्यताया मिथ्यात्वन्न स्यात् । स्वात्यन्ताभावसमानाधिकरणस्यैव मिथ्यात्वात् । न च व्यावहारिको योग्यताऽत्यन्ताभावो ब्रह्मणि नेति वाच्यम् । ब्रह्मातिरिक्तस्य तस्य व्यावहारिकत्वात् । नापि ब्रह्मणोऽवेद्यत्वम् । तस्य वृत्तिवेद्यत्वात् ॥

तस्य प्रलापमेवाह-किमिदमिति । किं वृत्त्यव्याप्यत्वं स्वप्रकाशत्वम्, उत फलाव्याप्यत्वम्, अथवा वेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वम्, तद्योग्यत्वं वा, तद्योग्यत्वात्यन्ताभावानधिकरणत्वं वेति किंशब्दार्थः । आद्यं दूषयति । न तावदिति । केवलात्मनो न वृत्तिव्याप्यत्वमपीति मतमाशङ्क्याह-अन्यथेति । केवलस्यैव वेदान्ततात्पर्यगोचरत्वात् तद्विषयवृत्त्यभावे तच्छ्रवणादिवैयर्थ्यापातादित्यर्थः । द्वितीयं दूषयति नापीति । अभिव्यक्तचैतन्यं फलं तस्य तादात्म्येनावच्छेदकत्वम् । घटादेस्तद्व्याप्यत्वं, तदभावत्वं न स्वप्रकाशत्वम् । अतीतादेर्नित्यातीन्द्रियस्य वाऽभिव्यक्तचैतन्यतादात्म्याभावेऽप्यस्वप्रकाशत्वादित्यर्थः । तृतीयं दूषयति नाप्यवेद्यत्व इति । व्यवहाराभावेन तद्विषयत्वस्याप्यभावादिति शेषः । चतुर्थपञ्चमावप्यव्याप्त्या दूषयति-नाप्यवेद्यत्वे सतीत्यादिना । व्यवहारदशायामपि योग्यत्वात्यन्ताभावस्य ब्रह्मणि सत्त्वादसम्भवश्चेत्याह-ब्रह्मण इति ।

ननु तदा ब्रह्मणि तद्योग्यत्वमेव, न तदत्यन्ताभावइत्याशङ्क्य तस्य मिथ्यात्वनिर्वाहार्थं तदभावोऽपि वक्तव्य इत्याह-अन्यथेति । ननु तद्योग्यताप्रतियोगिकव्यावहारिकात्यन्ताभावानधिकरणत्वमेव तल्लक्षणम् । ब्रह्मणि च न तद्व्यावहारिकात्यन्ताभावः प्रतियोगिसमानसत्ताकाभावस्य तत्सामानाधिकरण्यविरोधात् । किं तु पारमार्थिक एव तदत्यन्ताभावो ब्रह्मणि । तथा च नासम्भव इति चेन्न । ब्रह्मव्यतिरिक्तस्य पारमार्थिकत्वेऽद्वैतहानेः सोऽपि व्यावहारिको वाच्यः । ततश्च तत्समानसत्ताकयोरपि विरोधो ब्रह्मणोऽन्यत्रैव वाच्यः ।

तथा चासम्भव एवेत्यभिप्रेत्याह-न च व्यावहारिक इति । विशेष्यासम्भवमुक्त्वा विशेषणासम्भवमाह-नापीति । किमवेद्यत्वं वृत्त्यव्याप्यत्वं फलाव्याप्यत्वं वा? । नाद्य इत्याह-तस्येति ॥

न द्वितीय इत्याह-नापीति ॥

वृत्त्यव्याप्यत्वलक्षणं निरस्य फलाव्याप्यत्वं निरस्यति । नापि फलाव्याप्यत्वमवेद्यत्वम् । ब्रह्मणोऽपि चरमसाक्षात्कारवृत्तिप्रतिबिम्बितचैतन्यव्याप्यत्वात् । ननु वृत्तिबिम्बितचिदभिव्यक्तचैतन्याश्रयत्वं फलव्याप्यत्वं तच्च घटादावेव न ब्रह्मणीति चेन्न । घटादावपि वृत्तिविषयत्वव्यतिरेकेण तदभिव्यक्तचैतन्याश्रयत्वाभावात् । अपरोक्षव्यवहारश्च न तावदपरोक्षज्ञानजन्यो व्यवहारः । धर्मादावप्यलौकिकापरोक्षज्ञानजन्यव्यवहारस्य सत्त्वात् । अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यसाक्षात्कारविवक्षायां स्वरूपज्ञानस्य नित्यत्वादसम्भवः । नाप्यपरोक्षोऽयमित्याकारो व्यवहारः । वस्तुनः अपरोक्षत्वम्-अपरोक्षज्ञानविषयत्वं चेद् घटादिवदात्मनोऽपि वेद्यत्वापत्तिः । अपरोक्षव्यवहारविषयत्वं चेद् वस्तुव्यवहारापरोक्षत्वयोरन्योन्यसापेक्षत्वादन्योन्याश्रयः, अभावेऽतिव्याप्तिश्च । अस्ति हि गजाभावोऽपरोक्ष इति लोके व्यवहारः । अस्ति च फला-

व्याप्यत्वम् ॥

फलस्वरूपं वदन् ब्रह्मणस्तद्व्याप्यत्वमेव नेति श-ङ्कते-नन्विति । घटादावनित्यज्ञानविषयत्वव्यतिरेकेणा-नित्यज्ञानाश्रयत्वाभावात्तदेव फलं तद्विषयत्वं च ब्रह्मणो-ऽपि तुल्यमित्याह-न घटादाविति । किं च लक्षणवा-क्यगतापरोक्षव्यवहारपदेनापरोक्षज्ञानजन्यो व्यवहारो विवक्षितः, लौकिकापरोक्षज्ञानजन्यो वा, अपरोक्षोऽय-मित्याकारो वा ?। प्रथममतिव्याप्त्या दूषयति-अपरोक्षे-ति । द्वितीयमनूद्य दूषयति-अनागतेति । अनागतगो-चरो यः साक्षात्कारः तद्धेतुभूता या प्रत्यासत्तिः सा-मान्यलक्षणादिरूपा तदजन्यश्च यः साक्षात्कारः लौकिकप्रत्यक्षमिति यावत् । तज्जन्यव्यवहारविवक्षा-यामित्यर्थः । ईश्वरज्ञानजन्यधर्मादिव्यवहारव्यावृत्तये जन्यपदम् । स्वरूपज्ञानस्य नित्यत्वादिति । तथा च लौकिकसाक्षात्कारजन्यव्यवहारविषयताभावादसम्भव इत्यर्थः । तृतीयमपवदति-नापीति । 'अपरोक्षोऽयम्'-इति व्यवह्रियमाणं विषयापरोक्ष्यं किमपरोक्षज्ञानविष-यत्वमपरोक्षव्यवहारविषयत्वं वा ? । आद्यमनूद्य दूषयति-वस्तुन इति । द्वितीये वस्तुनोऽपरोक्षत्वे सिद्धे व्यवहारस्यापरोक्षत्वम् । व्यवहारापरोक्षत्वे च वस्त्वा-परोक्ष्यमिति परस्पराश्रय इत्याह-अपरोक्षेति । नन्वप-रोक्षोऽयमित्येवंरूपशब्दव्यवहारस्य स्वज्ञानजन्यस्य विष-यापरोक्ष्यज्ञानं विनैव श्रोत्रग्राह्यत्वान्नोक्तदोष इत्याशङ्क्य दूषणान्तरमाह-अभाव इति । अनुपलब्धिरूपपरोक्षमानग-म्यत्वान्न फलव्याप्यत्वमभावस्येत्याह- अस्ति चेति ।

विशेषणविशेष्ययोः परस्परव्याघातादप्यसम्भव इत्याह-यदि चेति ॥

परस्परव्याघातेनाऽसम्भवप्रतिपादनम् ।

यदि चाऽऽत्माऽवेद्यः न तर्ह्यपरोक्षव्यवहारविषयः स्यात् । फलव्याप्यस्यैवापरोक्षव्यवहारविषयत्वात् । यदि स्फुरणाविषयेऽपि स्फुरणे तद्विषयकापरोक्षवृत्तिस्तदविषयकस्फुरणमेव वा स्वभावविशेषाद्व्यवहारमुत्पादयेत्तर्ह्यवैरूप्याय घटादावपि तथैव स्यात् । अन्यथा प्रमेयत्वमपि स्ववृत्तिं विनैव स्वस्मिन्प्रमेयत्वव्यवहारं कुर्यादिति केवलान्वयि न स्यात् । किं च स्वप्रकाशत्वं न तावदात्मस्वरूपं साध्यम् । इष्टापत्तेः । न ह्यात्मनि कस्य चित्प्रद्वेषोऽस्ति । नापि तद्धर्मः । तस्यातात्त्विकत्वेनास्वयंप्रकाशतापत्त्या स्वप्रकाशत्वसाधकानुमानानां बाधितत्वात् । अप्रसिद्धविशेषणश्च पक्षः । न च वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि धर्मत्वात् शौक्ल्यवदिति सामान्यतस्तत्सिद्धिरिति वाच्यम् । वेद्यत्वाभावमात्रसिद्धावपि विशिष्टसाध्यस्याप्रसिद्धत्वात् । मम मते घटादेः फलाव्याप्यत्वे तत्र साध्यसत्त्वाच्च धर्मत्वं च केवलान्वयि धर्मे व्यभिचारि । किं चात्यन्ताभावप्रतियोगित्वं यदि कुतश्चिन्न व्यावर्तेत । तर्हि तत्रैव व्यभिचारः ।

व्यावर्त्तते चेत् । यतो व्यावर्तते तत्रैव व्यभिचारः । अनुभूतित्वं च न जातिः । जातेर्धर्मिसत्तासमानसत्ताकभेदवद्व्यक्तिसापेक्षत्वात् । नोपाधिः । तदनिरूपणात् ।

फलाव्याप्यत्वलक्षणावेद्यत्वेऽप्यपरोक्षवृत्तिमहिम्नैवापरोक्षव्यवहारोऽस्तु । यदि सुखदुःखादावपरोक्षवृत्तेर्व्यभिचारान्न तद्धेतुत्वं तर्हि स्वरूपस्फुरणं स्वाविषयमेव स्वव्यवहारहेतुरित्यभ्युपगमे घटादावपि तथात्वापातेनातिव्याप्तिः स्यादित्यभिप्रेत्याह-यदीति । स्फुरणस्य स्वव्यतिरिक्ते तद्विषयतयैव व्यवहारहेतुत्वम् । स्वस्मिंस्तु स्वरूपेणैवेत्यभ्युपगमेऽतिप्रसङ्गमाह-अन्यथेति । एवं साध्यनिरुक्तं दूषयित्वा तत्स्वरूपमपि किं पक्षीभूतात्ममात्रं तद्धर्मो वेति विकल्पमभ्युपेत्य प्रथमं दूषयति । किं चेति । न द्वितीय इत्याह-नापीति । स किं तात्त्विको धर्मः, उतातात्त्विकः ? । नाद्यः द्वैतापत्तेः । न द्वितीयः । अधिष्ठानस्यारोपितविपरीतरूपत्वनियमेनास्वप्रकाशत्वापातादित्याह-तस्येति । अवेद्यत्वस्याप्रसिद्धत्वेन तद्घटितसाध्यस्याप्यसिद्धत्वात् । संदेहायोगान्न पक्षताऽपीत्याह-अप्रसिद्धेति । सामान्यतो दृष्टानुमानेन पक्षतदतिरिक्तौदासीन्येनावेद्यत्वसिद्धौ पक्षे संदेहनिवृत्तये केवलव्यतिरेकिप्रवृत्तिरित्याशङ्क्य तथापि विशिष्टसाध्यमप्रसिद्धमेवेति दूषयति-न चेति । असाधारण्यमप्याह-प्रमेति । सामान्यानुमानं च व्यभिचारीत्याह-धर्मत्वं चेति । केवलान्वयि धर्मे विप्रतिपन्नं प्रत्याह-किं चेति । अत्यन्ताभावप्रतियोगित्वं यदि सर्वत्र वर्तते

तर्हि तदेव केवलान्वयीति तत्र व्यभिचारः । यदि न वर्तते तदेवात्यन्ताभावाप्रतियोगितया केवलान्वयीति तत्र व्यभिचार इत्यर्थः । हेतुकृतमनुभूतित्वमपि जातिरूपाधिर्वा ?, नोभयथाऽपीत्याह-अनुभूतित्वं चेत्यादिना । धर्मिसत्तेति सिद्धान्तेऽनुभूतौ तादृशभेदाभावादिति भावः ॥

किं च घटादौ यादृशवेद्यत्वं स्वप्रकाशत्वविरोधि तादृशवेद्यत्वस्याऽऽत्मनि सत्त्वेऽपि तदत्यन्ताभावघटितसाध्यस्याप्युपपत्तेरस्वप्रकाशत्वेनार्थान्तरतेत्याह-अपि चेति ।

स्वप्रकाशत्वविरुद्धवेद्यत्ववत्तयाऽर्थान्तरत्वम् ।

अपि च घटादाविव स्वप्रकाशत्वविरोधिनो व्यावहारिकवेद्यत्वस्य सत्त्वेऽपि तदत्यन्ताभावसंभवेनार्थान्तरमिति । अत्र ब्रूमः । संविदविषयत्वं स्वप्रकाशत्वम् । न चाव्याप्त्यतिव्याप्ती । चिद्रूपस्यात्मनः स्वाविषयत्वात्स्वातिरिक्तसंविदन्तराभावाच्च । संविद्रूपात्मातिरिक्तस्य सर्वस्य संविद्विषयत्वात् । अतीतादेरतीन्द्रियस्यापि वृत्तिगतसंविदवच्छेदकतया तद्विषयत्वात् । अन्यथा जडवृत्तिमात्रादनात्मव्यवहारायोगात् । न चैवमपि संविदगोचरस्तज्जडमेवास्तीति वाच्यम् । स्वतः परतो वाऽसिद्धस्य शङ्कितुमप्यशक्यत्वात् । संविच्च वृत्त्यतिरिक्ता निरूपितैवेति नासंभवोऽपि । अथवाऽवे-

द्यत्वे सत्यपरोक्षव्यवहारयोग्यताऽत्यन्ताभावानधिकरणत्वं स्वप्रकाशत्वमित्याचार्यीयमपि लक्षणमस्तु । तत्र च योग्यतान्तं लक्षणम् । अत्यन्ताभावानधिकरणत्वांशस्तु ब्रह्मणि लक्षणस्यासंभवं व्यावर्त्तयति ।

संविद्विषयत्वाभावः, संविद्विषयान्यत्वं वा संविदविषयत्वं स्वप्रकाशत्वं, तच्चाऽऽत्मस्वरूपमेवारोपिताभावस्याधिष्ठानमात्रत्वादित्यभिप्रेत्याह-अत्रेति अस्मिन् लक्षणे न पूर्वोक्तदोषावसर इत्याह-न चेति । आत्मधर्मज्ञानविषयत्वादव्याप्तिरित्यत आह संविदन्तरेति । अतिव्याप्त्यभावे हेतुमाह-संविद्रूपेति । अतीतादेः फलाव्याप्यत्वेऽपि संविद्विषयत्वान्न तत्रातिव्याप्तिरित्याह-अतीतादेरिति । अतीतादेर्वृत्तिविषयत्वमेव न चित्प्रकाशविषयत्वमित्यभ्युपगमे दोषमाह-अन्यथेति । हेतुगर्भविशेषणं दुःखादौ व्यभिचारादपि न वृत्तिमात्रस्य व्यवहारहेतुतेति द्रष्टव्यम् । जडस्यापि संविदविषयत्वसंभवात्तत्त्वेनार्थान्तरतेत्याशङ्क्याह-न चैवमिति । अयमभिसंधिः-संविदविषयत्वे सति प्रकाशमानत्वं स्वप्रकाशत्वम् । प्रकाशमानत्वं च स्वसत्तायां स्वसत्ताप्रकारकसंशयाद्यगोचरत्वम् तस्य घटादिवत्संविद्विषयत्वम् । प्रयुक्तत्वनिषेधे स्वरूपप्रयुक्तत्वमेवेति पर्यवस्यति । तथा च न जडत्वेनार्थान्तरतेति । ननु वृत्त्यतिरिक्ता संविदेव नास्ति वृत्तिविषयत्वञ्चात्मनोऽपीत्यसंभव इत्यत आह-संविच्चेति । चित्सुखाचार्यलक्षणमप्यनवद्यमित्याह-अथवेति । अत्रावेद्यत्वं फलाव्याप्यत्वम् । तच्च घटादावति-

स्याप्यावश्यकतया तदवच्छिन्नात्मनोऽप्येकशरीरे भेदप्रसङ्गात् । विशिष्टस्यात्मनः कर्तृत्वे भोक्तृत्वे वा मुक्तिदशायामप्यस्यावस्थानप्रसङ्गात् । बद्धस्यैव मुक्त्याश्रयत्वात् । तस्मान्मोक्ष्यमाणः केवलात्मैव कर्त्ता भोक्तेति न तस्य मृषाधर्मत्वम् ॥

"अन्नमयं हि सौम्यं मन"इति श्रुतेर्मनसो भौतिकत्वेन तन्मात्रधर्मत्वे सर्वपुरुषसाधारण्यं स्यादित्याह । दुःखादेरिति ॥ भौतिकधर्मत्वेऽपि द्वित्वादिवदसाधारण्यमित्याशङ्क्य दृष्टांतासंप्रतिपत्त्या दूषयति । न चेति । द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वाद्यावद्द्रव्यभावित्वेन साधारण्यमिति भावः । द्वित्वादेरपेक्षाबुद्धिजन्यत्वमतेऽपि नियतचेतनधर्मभूतज्ञानजन्यत्वमसाधारण्ये प्रयोजकम् । दुःखादौ च न तदस्ति । सांख्यमते चेतनस्य निर्द्धर्मकत्वादित्यभिप्रेत्याह । नियतेति । नन्वहमर्थे प्रत्यक्षशास्त्राभ्यां परिच्छेदापरिच्छेदयोर्विरुद्धधर्मयोरवगमाद्धर्मिभेद आवश्यक इति चोदयति । नन्वहमनुभवेति । परिच्छेदानुभवस्य देहविषयत्वेन तस्यात्मभेद इष्ट इत्यत आह । न च देह इति । अपरिच्छिन्नेऽप्यहमर्थे परिच्छेदानुभवस्य भ्रान्तिरूपस्य संभवान्न तद्वैरूप्यमित्याऽऽह पूर्ववादी । न देहपरिमाणस्येति । ननु परिच्छेदानुभवस्य प्रमात्वे संभवति भ्रांन्तित्वमयुक्तमित्याशङ्क्याऽऽह । आत्मेति । अंतःकरणतादात्म्यापन्न एवात्माऽहमर्थ इति पक्षे किमन्तःकरणमनंतपरिमाणमणुपरिमाणमनियतपरिमाणं वा ?। आद्ययोर्दोषमाह । अन्यथेति । तृतीये परिमाणभेदेनान्तःकरणभेदस्यावश्यकतया तदवच्छिन्ना-

द्यत्वे सत्यपरोक्षव्यवहारयोग्यताऽत्यन्ताभावान-धिकरणत्वं स्वप्रकाशत्वमित्याचार्यीयमपि लक्ष-णमस्तु । तत्र च योग्यतान्तं लक्षणम् । अत्य-न्ताभावानधिकरणत्वांशस्तु ब्रह्मणि लक्षणस्यासं-भवं व्यावर्त्तयति ।

संविद्विषयत्वाभावः, संविद्विषयान्यत्वं वा संविद-विषयत्वं स्वप्रकाशत्वं, तच्चाऽऽत्मस्वरूपमेवारोपिता-भावस्याधिष्ठानमात्रत्वादित्यभिप्रेत्याह-अत्रेति अस्मिन् लक्षणे न पूर्वोक्तदोषावसर इत्याह-न चेति । आत्मध-र्मज्ञानविषयत्वादव्याप्तिरित्यत आह संविदन्तरेति । अतिव्याप्त्यभावे हेतुमाह-संविद्रूपेति । अतीतादेः फलाव्याप्यत्वेऽपि संविद्विषयत्वान्न तत्रातिव्याप्तिरि-त्याह-अतीतादेरिति । अतीतादेर्वृत्तिविषयत्वमेव न चित्प्रकाशविषयत्वमित्यभ्युपगमे दोषमाह-अन्यथेति । हेतुगर्भविशेषणं दुःखादौ व्यभिचारादपि न वृत्तिमात्रस्य व्यवहारहेतुतेति द्रष्टव्यम् । जडस्यापि संविदविषयत्व-संभवात्तत्त्वेनार्थान्तरतेत्याशङ्क्याह-न चैवमिति । अय-मभिसंधिः-संविदविषयत्वे सति प्रकाशमानत्वं स्वप्रका-शत्वम् । प्रकाशमानत्वं च स्वसत्तायां स्वसत्ताप्रकारक-संशयाद्यगोचरत्वम् तस्य घटादिवत्संविद्विषयत्वम् । अयुक्तत्वनिषेधे स्वरूपमयुक्तत्वमेवेति पर्यवस्यति । तथा च न जडत्वेनार्थान्तरतेति । ननु वृत्त्यतिरिक्ता संविदेव नास्ति वृत्तिविषयत्वञ्चात्मनोऽपीत्यसंभव इत्यत आह-संविच्चेति । चित्सुखाचार्यलक्षणमप्यनवद्यमित्याह-अथ-वेति । अत्रावेद्यत्वं फलाव्याप्यत्वम् । तच्च घटादावति-

स्याप्यावश्यकतया तदवच्छिन्नात्मनोऽप्येकशरीरे भेदप्रसङ्गात् । विशिष्टस्यात्मनः कर्तृत्वे भोक्तृत्वे वा मुक्तिदशायामप्यस्यावस्थानप्रसङ्गात् । बद्धस्यैव मुक्त्याश्रयत्वात् । तस्मान्मोक्ष्यमाणः केवलात्मैव कर्त्ता भोक्तेति न तस्य मृषाधर्मत्वम् ॥

"अन्नमयं हि सौम्यं मन" इति श्रुतेर्मनसो भौतिकत्वेन तन्मात्रधर्मत्वे सर्वपुरुषसाधारण्यं स्यादित्याह । दुःखादेरिति ॥ भौतिकधर्मत्वेऽपि द्वित्वादिवदसाधारण्यमित्याशङ्क्य दृष्टांतासंप्रतिपत्त्या दूषयति । न चेति । द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वाद्यावद्द्रव्यभावित्वेन साधारण्यमिति भावः । द्वित्वादेरपेक्षाबुद्धिजन्यत्वमतेऽपि नियतचेतनधर्मभूतज्ञानजन्यत्वमसाधारण्ये प्रयोजकम् । दुःखादौ च न तदस्ति । सांख्यमते चेतनस्य निर्द्धर्मकत्वादित्यभिप्रेत्याह । नियतेति । नन्वहमर्थे प्रत्यक्षशास्त्राभ्यां परिच्छेदापरिच्छेदयोर्विरुद्धधर्मयोरवगमाद्धर्मिभेद आवश्यक इति चोदयति । नन्वहमनुभवेति । परिच्छेदानुभवस्य देहविषयत्वेन तस्यात्मभेद इष्ट इत्यत आह । न च देह इति । अपरिच्छिन्नेऽप्यहमर्थे परिच्छेदानुभवस्य भ्रान्तिरूपस्य संभवान्न तद्द्वैरूप्यमित्याऽऽह पूर्ववादी । न देहपरिमाणस्येति । ननु परिच्छेदानुभवस्य प्रमात्वे संभवति भ्रांन्तित्वमयुक्तमित्याशङ्क्याऽऽह । आत्मेति । अंतःकरणतादात्म्यापन्न एवात्माऽहमर्थ इति पक्षे किमन्तःकरणमनंतपरिमाणमणुपरिमाणमनियतपरिमाणं वा ?। आद्ययोर्दोषमाह । अन्ययेति । तृतीये परिमाणभेदेनान्तःकरणभेदस्यावश्यकतया तदवच्छिन्ना-

त्मनोऽपि भेदापातात् कृतहानादिप्रसङ्ग इत्याह । अनियतेति । कर्तृत्वादिबन्धस्य विशिष्टधर्मत्वे मुक्तिरपि तस्यैवेत्यद्वैतहानिरित्याह विशिष्टस्येति । केवलस्यात्मनो मुक्त्यन्वयित्वात् स एव कर्तृत्वादिबन्धाश्रयः। तथा च न बन्धस्य मिथ्यावस्तुधर्मत्वमित्युपसंहरति तस्मादिति ।

केवलस्यात्मन एव कर्तृत्वात् प्रमातृत्वमपि तस्यैवेत्याह । अत एवेति ।

केवलस्यात्मनः प्रमातृत्वनिरसनम् ।

अत एव श्रवणादिकर्तृत्वमपि तस्यैवेतिसंगच्छते इत्येवमेव पुस्तकान्तरे मुक्त्याश्रयत्वं सङ्गच्छते । मुक्त्याश्रय आत्मा कर्ताऽऽत्मत्वात् व्यतिरेकेण घटवत् । अत एव भोक्ता च । ज्योतिष्टोमादिश्रुतिश्चात्मनः कर्तृत्वे मानम् । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः । स तत्र पर्येति यक्षन् क्रीडन् रममाण इति स्वरूपाविर्भावलक्षणमुक्तावपि कर्तृत्वश्रवणात् तच्च परमार्थ एवेति। अत्रोच्यते—आत्मा तावत् ज्ञानरूपः । ज्ञानं च न स्वविषयमिति निरूपितम् । अहमनुभवश्च मामहं जानामीत्यहमर्थविषयोऽनुभूयते । अतो न केवलाऽऽत्मविषयः । न चेदं विषयत्वं तटस्थस्यैवान्तःकरणस्येति वाच्यम् । चैतन्यासंवलितस्याहमनुभवागोचरत्वात् । अहमनुभवगोचरधर्मस्य

सुखादेः कथमप्यनात्मधर्मत्वायोगाच्च । अत एव न देहादिगोचरत्वमपि तस्य ।

तर्कितेऽर्थे प्रमाणान्तरमप्याह । मुक्त्याश्रय इति । शबलात्मनि सिद्धसाधनतानिवृत्तये मुक्त्याश्रय इत्युक्तम् । अत एव—आत्मत्वादेवेत्यर्थः । ज्योतिष्टोमादिश्रुतिश्चेति । क्रियाफलस्य कर्त्रन्वयार्थे आत्मनेपदस्मरणादिति भावः । अविद्याऽभावदशायामपि कर्तृत्वश्रवणात्तदात्मनः पारमार्थिकमित्याह । परं ज्योतिरिति । ममाऽऽत्मा ममान्तःकरणमित्यनुभवद्वयस्यापि विनिगमकाभावेन यथार्थत्वादहमर्थे द्वैरूप्यमनुभवसिद्धं युक्तितोऽपि साधयितुमुपक्रमते । अत्रोच्यत इति । तत्र तावच्चैतन्यविषयत्वाविषयत्वलक्षणविरुद्धधर्माध्यासाद्भेदो वक्तव्य इत्यभिप्रेत्योक्तं स्मारयति । आत्मा तावदिति । तर्ह्यविषय एवात्माऽहमर्थ इत्यत आह । अहमनुभवश्चेति । अस्तु तर्हि जडान्तःकरणस्यात्मतादात्म्यरहितस्यैवाहमनुभवविषयत्वमिति वदन्तं साङ्ख्यं प्रत्याह । न चेदमिति । जडमात्रस्य घटादिवदहमनुभवविषयत्वायोगादिति । हेतुमाह । चैतन्येति । किं चान्तःकरणस्यैवाहमनुभवगोचरत्वे दुःखादेरध्यासेनाप्यात्मधर्मत्वं न स्यात् । न च तद्युज्यते । मुक्तान्वयिनि तस्मिन् बन्धक्ष्यावश्यकत्वादित्याह । अहमनुभवेति । कथमपीति । अध्यासेनाप्यात्मधर्मत्वाभावायोगादित्यर्थः । उक्तहेतोरेवाहमनुभवस्य देहादिमात्रगोचरत्वमप्ययुक्तमित्याह । अत एवेति ।

अहमनुभवगोचरस्य द्विरूपत्वेऽपि कथं मिथ्यात्वमित्याशङ्कयाह । न चेति ।

अनुभवविषयाऽऽत्मनो द्विरूपत्वे मिथ्यात्वशङ्कानिरासः ।

न च चिदचितोः संवलनं—तादात्म्यं वास्तवं संभवतीति मिथ्यात्मविषयोऽहमनुभवः । न चैवं केवलस्यात्मनोऽहमनुभवे प्रकाशाभावादनात्मत्वप्रसङ्गः । केवलचिदात्मन एवान्तःकरणाधिष्ठानस्य तादात्म्यतयाऽहमनुभवे स्फुरणात् । दुःखित्वपरमप्रेमास्पदत्वे अपि वस्तुतः परस्परासङ्कीर्णं स्वस्वाश्रयं व्यवस्थापयतः । सुखसमवायित्वेनात्मनः परमप्रेमास्पदत्वे दुःखसमवायित्वेन परमद्वेषगोचरत्वस्यापि प्रसङ्गात् । त्वदुक्तसामान्यविशेषन्यायस्य तत्रापि संभवात् । लाघवेन सुखत्वस्यैव परमप्रेमगोचरत्वप्रयोजकत्वात् । सुखित्वानुभवस्यान्यथासिद्धेर्वक्ष्यमाणत्वात् । अस्त्वानन्द एवात्मा दुःखधर्मीति चेन्न । आनन्दस्य दुःखविरोधात्त्वत्सुखमात्रस्यैव दुःखविरोधाच्च । अन्यथा कादाचित्काभावस्य प्रतियोगिविरोधित्वं दृष्टमित्यत्यन्ताभावस्य तदभावप्रसङ्गात् । न चैवमवच्छिन्नात्मनि दुःखादेश्च तादृग्रूपत्वात् ।

सम्वलनमित्यस्य व्याख्या तादात्म्यम् । यदुक्तमहमनुभवगोचरस्यैवात्मत्वात्केवलस्य तदगोचरत्वेऽनात्मत्वापातात् तद्दूषयति । न चैवमिति दुःखित्वादिविरुद्धधर्मभेदोऽपि धर्मिभेदक इत्याह । दुःखित्वेति । यदप्युक्तं दुःखिनोऽपि प्रेमगोचरत्वमविरुद्धं तत्प्रयोजकसत्त्वादिति

प्रसङ्गेन दूषयति । सुखसमवायित्वेनेति । ननु व्याप्त्य-भावेन नानयोरापाद्यापादकभाव इत्याशङ्क्य त्वदुक्त-न्यायस्य व्याप्येन सह व्याप्तत्वात्तेनैव तदापाद्यत इत्यभिप्रेत्याह त्वदुक्तेति । गौरवादपि त्वदुक्तविशेष-प्रयोजकमयुक्तमित्यभिप्रेत्याह । लाघवेनेति । यदुक्तं प्रामाणिकं गौरवमदोषायेति तत्राह । सुखित्वानुभव-स्येति । सुखरूपस्यापि आत्मनो दुःखित्वमपीत्युक्तमनू-द्यापादयति अस्त्वानन्द एवेत्यादिना । जन्ययोरेव सुखदुःखयोर्विरोध इत्युक्तं गौरवेण दूषयति । जन्ययो-रपीति । दुःखस्य यथा सुखविरोधित्वं दुःखत्वेनैव, एवं सुखस्यापि दुःखविरोधित्वं सुखत्वेनैवेत्याह । नित्येति । सुखत्वाविशेषेऽपि जन्याजन्यविशेषणविरोधाविरोधा भिधानेऽतिप्रसङ्गमाह । अन्यथेति । तर्हि शबलिते सुख-त्वानपायाद् दुःखंनस्यादित्युक्तं दूषयति । न चैवमिति । किं विरुद्धयोर्वास्तवः संसर्गोऽनुपपन्नः, किं वा कल्पितः? । आद्यमङ्गीकरोति-विरोधो हीति। द्वितीये नानुपपत्तिरि-त्याह । न त्विति। अनिर्वचनीयवादे प्रत्यक्षस्य शुक्तिरज-ततादात्म्यस्य विद्यमानताया वक्ष्यमाणत्वादिति भावः ।

सुखात्मनि दुःखं चेदारोपितं तर्हि केवलात्मनि तदारोपासंभवान्न दुःखादेः शबलात्मधर्मत्वमिति चोद-यति । नन्वेवमपीति ।

दुःखाधिष्ठानस्यान्तःकरणतादात्म्यकल्पनम् ।

नन्वेवमपि केवलात्मनि दुःख-मारोप्यतां किं तदधिष्ठानस्यान्तःकरणतादा-त्म्यकल्पनयेति चेन्न । आत्मन्यनिष्टदर्शनानन्तरं

हि दुःखमनुभूयत इति तत्र हेतुः । न चानिष्ट-दर्शनं ज्ञानरूप आत्मनि संभवति । न वा केवलजडे । ततान्तःकरणस्य चित्तादात्म्यात्पन्नस्य धर्माणां ज्ञानेच्छासुखदुःखादीनामेव कार्यकारणभावादवच्छिन्नात्मन्येव दुःखानुभवो न त्वंतःकरणंतादात्म्यरहिते । तथा चोपपत्तिसहितसमकालैकविषयदुःखिप्रेमास्पदत्वानुभवो दुःखाद्याश्रयाहमर्थस्योभयरूपत्वं व्यवस्थापयति । एवं दुःखाद्याश्रयस्य परिच्छेदानुभवोऽपि तस्योभयरूपत्वे प्रमाणम् । न च देहपरिमाणमेवात्मन्यारोप्यते । अत एव परिमाणे गृह्यमाण एव द्रव्यग्रहणमिति निरस्तम् । देहपरिमाणेन सहैवाऽऽत्मग्रहणात् । न च परिमाणे प्रतीयमान एव द्रव्यग्रहणमिति नियमः । अत्युन्नतगिरिशिखरवृक्षादिग्रहणे तदभावात् आरोपश्चान्यथाख्यातिरनिर्वचनीयख्यातिर्वैत्यन्यदेतदिति वाच्यम् । तद्गतपरिमाणग्राहकस्यद्रियस्यैव तद्द्रव्यग्राहकत्वात् । दूरस्थे वृक्षादावपि तद्गतपरिमाणमात्रस्य ग्रहणात् ।

आरोपितस्यापि दुःखस्य स्वसमानाधिकरणानिष्टदर्शनजन्यत्वात्तस्य च केवलात्मन्ययोगेन वृत्तिमदन्तःकरणतादात्म्यापन्नात्मधर्मत्वात्तत्समानाधिकरणदुःखादिकमपि तथेत्याह । न आत्मनीति । युक्तिमात्रस्याप्रमाणत्वात्कथं द्वैरूप्यसिद्धिरित्याशङ्क्य तदुपोद्बलितदुः-

खित्वाद्यनुभव एव तत्साधक इत्याह । तथाचेति । एवमपरिच्छिन्नेऽहमर्थे परिच्छेदानुभवोऽपि द्वैरूप्ये मानमित्याह । एवं दुःखेति । यदुक्तं स्फटिक इव लौहित्यस्यापरिच्छिन्नात्मन्येव परिच्छेदानुभव इति तन्निराकरोति । न चेति । अस्यान्यदेतदिति वाच्यमित्युत्तरेण सम्बन्धः । ननु द्रव्यप्रत्यक्षग्रहस्य परिमाणविषयकत्वनियमान्न विश्वात्मनोऽहमनुभवविषयत्वमित्याशङ्क्य किं द्रव्यग्रहस्य परिमाणग्रहणमात्रेणानियमः उत प्रमयाऽपि ?। आद्यस्तु प्रकृतेऽन्यायी संभवतीत्याह। अत एवेति। द्वितीयं व्यभिचारेण दूषयति । न चेति । ननु स्फटिके मयाऽनिर्वचनीयलौहित्योत्पत्त्यङ्गीकारादात्मन्यपि तन्मायेनानिर्वचनीयपरिमाणान्तरमेव स्यात् । तच्च तत्रानिष्टमित्यत आह । आरोपश्चेति । उभयथापि अहमर्थस्य द्विरूपत्वायोगादिति भावः । द्रव्यस्य स्वगतपरिमाणग्रहणयोग्येनैवेन्द्रियेण ग्रहणनियमादात्मपरिमाणस्य च मतद्वयेऽपीन्द्रियायोग्यत्वान्न केवलात्मनोऽहमनुभवगोचरता । कुतस्तत्र देहपरिमाणारोप इत्यभिप्रेत्याह । तद्वतेति । कथं तर्हि दूरस्थवृक्षगतपरिमाणाग्रहेऽपि तद्ग्रह इत्याशङ्क्येन्द्रिययोग्यं तत्परिमाणमेवान्यथा गृह्यत इत्याह । दूरस्थेति ।

विश्वात्मपरिमाणं तु केनाप्यग्रहादिन्द्रिययोग्यमेव नेत्याह दुःखादीति ।

विश्वात्मपरिमाणस्यातीन्द्रियत्वनिरूपणम् । दुःखाश्रयस्य परिच्छिन्नपरिमाणातिरिक्त परिमाणमात्रस्याप्यग्रहणात् । तस्य

च तव मते देहनिष्ठत्वात् लाघवेन द्रव्यग्राहकेन्द्रियस्यैव परिमाणग्राहकत्वनियमात्। तस्मात्केवलात्मनः प्रत्यक्षत्वायोगादन्तःकरणतादात्म्यविशिष्ट एव परिच्छिन्नोऽनुभूयते। किन्तु सुखादिसमवायितावच्छेदकरूपेण तस्याधिकपरिमाणे प्रमाणाभावान्नायमारोपितदेहपरिमाणगोचरोऽनुभवः। प्रत्यक्षस्य तावदहमिहैवास्मीति तत्परिच्छेदविषयत्वात्। न च सुखाद्याश्रयो विभुः सर्वदास्पर्शशून्यद्रव्यत्वात् नित्येन्द्रियग्राह्यगुणाश्रयत्वाद्वा गगनवदिति वाच्यम्। धर्मिग्राहकप्रत्यक्षविरोधेनानुमानस्याभासत्वात्। नचप्रत्यक्षं भ्रमः, सुखाद्याश्रयपरिच्छेदानुभवस्याबाधात्। न चैतदेवानुमानं बाधकमुपजीव्यविरोधेनास्यैवाप्रमाणत्वात्। अन्योन्याश्रयाच्च। अत एव चन्द्रैकत्वानुमाने तत्तद्भेदप्रत्यक्षबाधवदात्मविभुत्वानुमानेन तत्परिच्छेदविषयप्रत्यक्षस्यापि बाध इति प्रत्युक्तम्। तत्र भेदप्रत्ययं विनापि धर्मिणश्चन्द्रस्य प्रमितत्वात्। अनुमानस्य युक्त्युपोद्बलितत्वाच्च सुखाश्रयस्य विभुत्वे सर्वत्र सुखाद्युपलम्भप्रसङ्गाच्च नित्यदेशात्मधर्मत्वात्॥

ननु बहिरिन्द्रियग्राह्यस्यैव द्रव्यस्यायं नियम इत्याशङ्क्याह। लाघवेनेति। परिमाणपदेन तद्गतपरिमाणं विवक्षितम्। पराभिमतात्मन्यहमनुभवायोगात्

त्वमेति चेत् । न च सर्वदोपलब्धिः । तदुक्तम्—नित्यत्वव्यापित्वेऽपि शब्दस्याकाशस्येव प्रयत्नानन्तरमुपलब्धिरुपपद्यते । तथाहि—कूपादौ पूर्वमनुपलब्धस्य प्रयत्नादाकाशस्योपलब्धिर्दृष्टा । न च तस्यानित्यत्वम् । नापि व्यापित्वेऽपि सर्वत्रोपलम्भः । तथा शब्दं कुरु व्यपदेशा आकाशं कुर्विति व्यपदेशवन्नानित्यत्वं साधयन्ति । तथा स्तिमितवायुस्थगितस्य शब्दस्य कोष्ठस्थेन वायुना तदपसारणेन कात्स्न्र्येनोपलब्धिः स्वरूपमात्रस्यैवोपलब्धेः । नियतदेशा हि वायवीया ध्वनयः प्रतिपन्नभिन्नं यथा शब्दकर्तुस्तेन न सर्वत्र सर्वेषामुपलब्धिरिति । अत एव यस्यां दिशि न वायोर्गतिर्न तत्र शब्दः श्रूयते इति । तथैकस्यैव मुखस्य व्यञ्जकस्यादर्शखड्गादिभिर्भेदाद्यथा भेदास्तथा ध्वनिधर्मा अल्पमहत्त्वादयः सान्निध्याच्छब्दे उपलभ्यन्ते तेन न प्रत्ययभेदित्वादनित्यत्वमिति । यथा हि घटः स्वल्पेन महता वा शब्देन प्रतिपाद्यमानो न भिद्यते तथा शब्दोऽपि महता ध्वनिना अल्पेन वा व्यज्यमानोऽर्थप्रतिपादनलक्षणार्थक्रियाकारी न भिद्यते इति । अथ वायवीनां श्रोत्राग्राह्यत्वात् कथं तद्धर्माणामल्पमहत्त्वादीनां श्रोत्रेणोपलम्भ इति । न शब्दस्यैकत्वेनोपलब्धिर्न तद्धर्माः कल्प्यन्ते । तथाहि—स एव गकारो महानल्पो वा न तु सोऽयमन्य इति प्रतीतिः । तस्माद् ध्वनिधर्मैः सान्निध्यात्तथाभासत्वमिति । अथ भिन्नदेशस्थितैः पुरुषैः भेदेनोपलब्धेर्नैकः शब्दः इति । तदप्यादित्येनानैकान्तिकम् । तथाहि—विभिन्नदेशस्थिताः पुरुषा एकमप्यादित्यं केचित् पश्चिमायां दिशि उपलभन्ते, अपरे पूर्वस्यामिति । तदप्यसंगतमिति । तथाहि—व्यञ्जकेन किमावरणविनाशः क्रियते, अथ शब्दसंस्कारः, किं वा श्रोत्रसंस्कार उभयसंस्कारो वा ? । तत्रावरणं

यदि नित्यं न तस्य विनाशः । अथानित्यं तदा यदि नाशितं तदा मृतः पुनर्न जीवतीति सर्वदा शब्दउपलभ्येत । अथ क्षणिकसंतानेनोपपद्येत तदा सर्वदाशान्तरमुपलभ्येत प्रयत्नविरामेऽपि शद्वस्य मीमांसकैर्व्यापिनो निरवयस्योपगमवत्संस्कारे सर्वत्र सर्वैरुपलम्भः स्यात् । श्रोत्रं संस्कृतं सर्वान् शब्दानुपलभेत । न हि चक्षुरुन्मीलितं कंचिदेवोलभते योग्यदेशस्थ नान्यमिति दृष्टम् । अपि च तत्किमाकाशमथान्यदेव किंचित् ? आकाशस्यैकत्वात् सर्वेषां सर्वत्र सर्वोपलब्धिः स्यात् । अथास्माकं मीमांसकानां प्रतिपुरुषं भिन्नं श्रोत्रं तेन नायं प्रसङ्गः । न सर्वेषामात्मनां सर्वव्यापित्वादेकश्रोत्रसंस्कारे सर्वे आत्मन उपलभेरन्निति तत्प्राप्यकारित्वेऽपि । अथ संबन्धेऽपि यस्यैवादृष्टेनोपभोगाय संस्कृतं श्रोत्रं स एवोपलते नान्यस्तद्देशस्थोऽपि । यथा नगरस्थितोऽपि तदधिकाराद् भ्रंशितो न तद्भोगं लभते इति । नैतदस्ति । तददृष्टमपि सर्वसंबन्धि किं न भवति । सर्वैरकणादिति चेत् । सर्वे किं न कुर्वन्ति । मनोहि संचाराभावादिति चेत् । ननु सर्वव्यापित्वेऽविचलितरूपत्वेनैतद्युज्यते । एकस्य मनोभिसंबधो नान्यस्येति । तस्माद्यत्किञ्चिदेतदिति । एतेनोभयसंस्कारोऽपि निरस्त इति । नित्यपरमाणवारब्धस्य घटस्येव नित्यवर्णारब्धस्य क्रमस्यानित्यत्वे वर्णनित्यत्वं क्कोपयोगि । अथ वर्णानां वाचकत्वं न क्रमस्य । न हि घटक्रमो वाचको दृष्टः । नैतदस्ति । अन्वयव्यतिरेकाभ्यां हि क्रमस्यैव वाचकत्वं न वर्णानाम् । अन्यथा व्यस्तक्रमाणामपि तदर्थप्रतिपत्तिः स्यात् । क्रमविशिष्टानां वाचकत्वमिति चेत् । न, समर्थविशेषणात् तस्य चपौरुषेयत्वात् । यद्यक्रमस्य पट्टकुटीदृष्टान्तेन नित्यत्वं व्यावर्णितं तत्सदाजलसाङ्काङ्काङ्क्ष्य-

क्षुभितम् । तथाहि—तत्तु पट्टकुटीं नष्टां कुर्वंस्तामेव करोति न पुनरपूर्वामिति । तद्वद्वर्णक्रमोऽपि नापूर्वः क्रियते इति । यतो दृष्टान्तेऽपि न तस्याः नित्यत्वं तत्कथं दृष्टान्तात् क्रमस्य नित्यत्वम् । कल्पितं तु व्यवहारमात्रं न वस्तु साधयति । न च नित्यव्यापिनां वर्णानां क्रम उत्पद्यत इति । एतच्चाग्रेऽभिधास्यते । तस्मात्सङ्केतमात्रमेव न कश्चित्सम्बन्ध इति । किं च किमसौ एकार्थनियमतः सङ्केतेनाभिव्यज्यतेऽनेकार्थेनियतो वा? । यद्येकार्थनियतो सङ्केतवशादर्थान्तरे वेदस्य गतिः स्यात् । दृश्यते च व्याख्यातृविकल्पः। अथ मास्तु दृष्टविरोध इत्यनेकार्थेनियतोऽभिव्यज्यते तर्हि सकलार्थसाधारणस्य वेदस्य इष्टव्यक्तिमेव करोति व्याख्यातृरूपः समयकारः । कुत एतत् । तेनाग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुतौ खादेच्छ्वमांसमित्येष नार्थ इत्यत्र काप्रमा । तन्न स्वाभाविकः शब्दार्थयोः सम्बन्धः किन्तु सङ्केतमात्रमेव भवति । असौ नित्यो वा स्यादनित्यो वा? । अनित्यो पुरुषेच्छावृत्तिरवृत्तिर्वा पुरुषाधीनत्वेन पुरुषाणां यथाभिप्रायं देशादिपरावृत्त्या तेनार्थप्रतिपादनं स्यात् । न हि छामना वह्नः क्वचिन्नियुज्यते । पर्वतादिवत् । पुरुषे त्वप्रवृत्तित्वे कथमपौरुषेयत्वं स्यात् । नित्योऽपि शब्दार्थयोराश्रितः स्यादनाश्रितो वा? । अनाश्रितत्वे आकाशकल्पस्य कः संबन्ध्यर्थः । आश्रितत्वे वाऽऽश्रयाणामनित्यत्वादाश्रितेऽप्यनित्यता स्यात् । अथ सामान्यस्यैवाश्रयत्वभावात्तस्य च नित्यत्वात् कथमाश्रयनित्यत्वात्संबन्धस्यानित्यता । तदसत् । सामान्यस्य परपरिकल्पितस्याभावात् । तथा तद् व्यक्तिभ्यो भिन्नं स्यादभिन्नं, वा भिन्नाभिन्नं वा? । न तावद्भिन्नाभिन्नम् । विरोधात् । अथ केनाप्यंशेन भिन्नं केनाप्यभिन्नम् । ननु कथं निरंशस्य सामान्यस्यैतत् । किं च यमात्मानं पुरोधायेद

सामान्यमयं विशेष इति व्यवस्थाप्यते यदि तेनात्मना भेदस्त-
दा भेद एव अथाभेदस्तदाऽभेद एव । अथ तत्रापि भेदो तर्ह्य-
नवस्था । नचेदृशं वस्तुशतसारमप्यवमीक्षामहे । तन्न ताभ्यो
भिन्नाभिन्नम् । तासां नानात्वे तस्यापि नानात्वोपपत्तेः ।
तदेकत्वे तासामेकताप्रसङ्गादिति । नाभिन्नमपि भिन्नम् ।
असामान्यरूपतापत्तेः । दण्डादिवत् । अनेकसंबन्धात्सामान्य-
दिति चेत् । न, संख्याकार्यद्रव्यादेरपि सामान्यरूपताप्रसङ्गात् ।
अथानुस्यूताकारानुभूयमानं सामान्यं नेतरदिति चेत् । ननु
किमात्मरूपानुस्यूतं पररूपानुस्यूतं वा ? । न तावदात्म-
रूपानुस्यूतम् । आत्मन्यनुगमाभावात् । अथ पररूपानु-
स्यूतम् । पररूपानुस्यूतेन किं तादात्म्यं तत्समवायो वा ?
तद्यदि तादात्म्यं पूर्ववद्दोषप्रसङ्गः । अथ समवायः । तदयुक्तम् ।
तस्याभावात् । भवतु वा स सर्वथापि गोत्वं यथा गोपिण्डे-
ष्वसमर्थयति तथा कर्कादिपिण्डैरपि संबन्धयेत् । अवान्तरसंबन्ध-
कल्पनायां अनवस्था । किं च सामान्यं व्यक्तिषु वर्त्तमानमेक-
देशेन वा वर्त्तेतअनेकदेशेन वा ? । नैकदेशेन । निष्प्रदेशत्वात्सा-
मान्यस्य । नापि सामस्त्येन । एकस्यामेव व्यक्तौ परिसमाप्ति-
प्रसङ्गात् । किं च केयं वृत्तिराधेयता वा स्यात् व्यक्तिपूर्वा व
भवेत् । नाधेयता । निष्क्रियत्वात् । सामान्यस्य गुरुणो हि द्रव्यस्य
पततः स्थिरीकरणादाधारः स्यात् । न चैतत् स्थिते भिन्नाभि-
न्नकरणेन सामान्ये युज्यते । नापि व्यक्तिः । नित्यस्य व्यक्तेरपा-
यात् । तथाहि—व्यक्तिरावरणापगमे सति ज्ञानजनकत्वमुच्यते ,
न च नित्यस्य ज्ञानजनकत्वं विद्यते । यदेव हि ज्ञानजनकाव-
स्थायां सामान्यरूपं तदेव व्यक्तावस्थायामपीति प्रागेव जन-
येत् । यद्वा अव्यक्तावस्थायामप्येकरूपत्वाज् जनयेत् । अथ

कारकान्तरमपेक्ष्य जनयति । ननु कारकान्तरेण किं तस्य जनकत्वं क्रियते अथ ज्ञाप्यते ? तद्यदि क्रियते । सुस्थितं नित्यत्वम् । अथ ज्ञाप्यते सिद्धं तर्हि जनकत्वम् । कारकान्तराभावेऽपि भवतु को दोष इति चेत्कार्योत्पत्तिप्रसङ्गः । अथ कारकत्वेऽपि कार्यं जनयेत् । अहो राजाज्ञा गरीयसी देवानां प्रियस्य इतोऽपि न विद्यते सामान्यम् । तदुपलम्भकप्रमाणाभावात् । नन्वस्ति प्रमाणमनयोः सादृश्यम् । एषां सारूप्यं तेन सदृशोऽयमसौ वाऽनेन सदृश इत्यादिज्ञानमप्रतिपन्नसामान्यस्य नोपपद्यते । अस्तीदं विज्ञानं बाधकविकलजातिज्ञापकम् । तदेतद्युक्तम् ।यतः किं तेन निमित्तभूतेनैव विज्ञानमुत्पाद्यते कर्म्मतापन्नेन वा ? । तद्यदि निमित्तभूतेनोत्पाद्यते सदा ता एव व्यक्तयः समानाकारपरिणतास्तन्निमित्तं सन्तु अलं परपरिकल्पितेन सामान्येन । अथ कर्म्मतापन्नेनोत्पाद्यते तेनैवावभाति । न ह्यशेषव्यक्तिसाधारणं सामान्यरूपमध्यक्षमीक्षामहे । तत्र किं चित्सामान्यं यत्राश्रितः सबन्धः स्यात् । किं चाश्रयेण नित्यस्य सतः संबन्धस्य उपकारः क्रियते न वा ? । अकरणे साकल्येन सकलं जगदाश्रयेत् । करणे वा स तस्माद्भिन्नः स्यादभिन्नो वा ? । अभेदे नित्यताहानिप्रसङ्गात् । भेदे च न किंचित्संबन्धस्य कृतं स्यात् । तत्संबन्ध्युपकारकरणकल्पनायामनवस्था गगनतलावलम्बिनी धूमललितिके प्रसरती दुर्निवारा स्यात् । तन्न कश्चिन्नित्यः सम्बन्धः । न च क्रमयौगपद्याभ्यामर्थक्रियाविरोधेन सम्बन्धः सामान्यमन्यद्वा वस्तु नित्यं समस्तेऽपि जगत्यस्ति । किं चासौ सम्बन्धः प्रतीतो वार्थं प्रकाशयेदप्रतीतो वा ? । अप्रतीतस्य सन्निधिमात्रेणार्थप्रकाशने सर्वदा सर्वप्रतिपत्तॄणां प्रकाशयेत् । प्रतीतश्चेत् केन प्रतीतः । किं प्रत्यक्षेण, आहोस्विदनुमानेन ? । न

तावत् प्रत्यक्षेण । शब्दार्थव्यतिरेकेण तस्यानुपलब्धेः । नाप्यनुमानेन । लिङ्गस्य प्रत्यक्षेण सम्बन्धस्याग्रहणात् । अनुमानेन तेनैव सम्बन्धग्रहणे इतरेतराश्रयत्वम् । तथाहि—यावन्न सम्बन्धग्रहणं तावन्नानुमानं यावन्नानुमानं तावन्न सम्बन्धग्रह इति । अपरेणानुमानेन सम्बन्धग्रहणेऽनवस्था । तन्न प्रमाणप्रतीतसम्बन्धः । किञ्चासौ परिकल्प्यमानः तादात्म्यलक्षणः । तदुत्पत्तिलक्षणः संयोगलक्षणः, समवायलक्षणः, विषयविषयिलक्षणो वा स्यात् । ? तत्र न तावत्तादात्म्यलक्षणः सम्भवति । अप्रतीतेः । अन्यथा क्षुरोदकादिशब्दोच्चारणात् मुखपाटनपूरणादिरुपलभ्येत न चोपलभ्यते । तन्न प्रथमः । नापि द्वितीयः । यतः शब्देन वा अर्थो जन्येत अर्थेन वा शब्दः । प्रथमपक्षे न कश्चिदपरिपूर्णार्थः स्यात् । द्वितीयेऽपि अर्थेषु यथास्वं पुरुषबुद्धिनिरपेक्षाणां शब्दानां श्रवणं स्यात् । नचार्थेनात्रात् पुरुषबुद्धिनिरपेक्षाः शब्दा उत्पद्यन्ते । तथाहि—अर्थदर्शनं ततस्तत्प्रतिपादनाभिप्रायस्ततो विवक्षा ततः स्थानकरणाभिघातः, ततः शब्दनिष्पत्तिरिति नार्थजन्यता शब्दानाम् । न च नित्यत्वेनाभ्युपगतानामयं प्रकारः सम्भवति । तन्न तदुत्पत्तिलक्षणः । नापि संयोगलक्षणः । यतो मुखे शब्दस्योपलब्धिर्भूमावर्थस्य । नापि समवायलक्षणः । अयुतसिद्धानामाधार्याधारभूतानामेव हि वर्ण्यते । न च शब्दार्थयोरयुतसिद्धिराधाराधेयभावो घटते । तन्न समवायोऽपि । विषये विषयिभावोऽपि वाच्यवाचकभाव एव । स च सति सम्बन्धे नित्ये साङ्केतिके वा स्यात् न पुनरसति सम्बन्धे । अन्यथा सर्वार्थे वाच्यवाचकभावः स्यात् । तन्न कश्चिद्वास्तवः सम्बन्धो यस्यां पौरुषेयता परिकल्प्येत । नापि वर्णा अपौरुषेयाः । तेषां लोकवेदयोर्भेदानभ्युपगमात् । तदपौरुषेयत्वसाधनेन

किञ्चिन्नापौरुषेयं स्यात् । ततो मिथ्याशब्दानामप्यपौरुषेयत्वे निष्फलैवापौरुषेयता । भेदाभ्युपगमे वाभ्युपेतहानिः प्रत्यभिज्ञाया अप्रामाण्यं च स्यात् । तथाहि—वेदे गकारं श्रुत्वा पुंसः स एव गकारो यो मया लौकिकेषु वाक्येषूपलब्ध इति प्रत्यभिज्ञानोत्पत्तेस्तदप्रामाण्ये सर्वत्र प्रत्यभिज्ञायामनाश्वास इति न वर्णानामपौरुषेयता भवतां श्रेयस्करीति । नापि वाक्यम् । यतस्तद्वर्णेभ्यो भिन्नं वा अभिन्नं वा अभेदे वाच्यमेव स्यात् वर्णा एव वा स्युः ? । भेदेऽपि तददृश्यं स्यात् दृष्टं वा ? । अदृश्यत्वे न ततोऽर्थप्रतिपत्तिः स्यात् । न ह्यप्रतीताद्वाक्यादर्थप्रतीतिः साधीयसी । अप्रतीतादपि अर्थप्रतीतौ न प्रतीतेर्विरामः स्यात् । नापि दृश्यम् । अनुपलम्भात् । न हि देवदत्तादिवर्णव्यतिरिक्तं किञ्चिद्वाक्यमुपलभामहे । किञ्च वाक्यं वर्णद्वारेण वा प्रतीयेत स्वातन्त्र्येण वा ? । न तावत्स्वातन्त्र्येण । न ह्यवर्णश्राविणो वाक्यप्रतीतिरस्ति । वर्णैरपि प्रतीयमानं वाक्यं सावयवं स्यात्, अनवयवं वा ? तेऽप्यवयवाः प्रत्येकं सार्थकाः स्युर्निरर्थका वा ?। सार्थकत्वे एकावयवप्रतीतावपि सकलवाक्यार्थप्रतीतिः प्रसज्येत । निरर्थकत्वे सकलावयवप्रतीतावपि न वाक्यार्थप्रतीतिः प्रसज्येत । नापि निरवयवम् । तद्धि वर्णैः समस्तैर्वा प्रत्याय्यते व्यस्तैर्वा ?। न तावत्समस्तैः । अनिलावत् समस्तैरुच्चरितप्रध्वंसिनां वर्णानां सामस्त्यासंभवात् । नापि व्यस्तैः । प्रथमवर्णश्रवणकाले एव सकलस्य वाक्यस्य प्रतीतेः शेषवर्णोच्चारणस्य वैयर्थ्यप्रसङ्गात् । अथ समस्तवर्णसंस्कारवत्याऽन्त्यवर्णबुद्ध्या वाक्यावधारणमिष्यते । ननु किं तत्स्मरणमुताध्यक्षम् ? । न तावत्स्मरणम् । विद्यमानान्त्यवर्णग्राहकत्वात् । नापि प्रत्यक्षम् । अविद्यमानपूर्ववर्णविषयत्वात् । अथ पूर्ववर्णस्मरणान्त्यवर्णग्रहणाभ्यां एकं विकल्पज्ञानं जन्यते

तेन वाच्यावधारणम् । नन्वेवं कल्पनाज्ञानविषयत्वे काल्पनिकत्वं वाच्येऽभ्युपगतं स्यात् न वस्तुरूपता । अनेकवर्णानां च एकवाच्यप्रतिपादनेऽर्थे क एषां व्याघातो येनैकं वाच्यं वर्णव्यतिरिक्तमर्थप्रतिपादकं कल्पयेत । कल्प्यमानं वा तदनित्यं वानित्यम् ? । यद्यनित्यं करणव्यापारेणान्वयव्यतिरेकानुविधानात् पौरुषेयमेव स्यात् । तदुक्तम्—

अनित्यं यत्नसंभूतं पौरुषेयं कथं तु तत् ।

अथ नित्यं सामर्थ्यतिरस्कारायोगात् सर्वदाऽर्थप्रतीतिं जनयेत् । आवृतत्वान्नेति चेत् । न, नित्यस्यावरणायोगात् । किंचित्कुर्वाणं ह्यावारणं स्यात् । न च नित्यस्य किंचित्कर्तुं पार्यते करणे वा अनित्यताप्रसक्तिः । यदि च ताल्वादिव्यापारेऽपि कदाचिदनुपलब्धिर्वाच्यस्य स्यात् तदा व्याप्यधर्मानुविधानात्किंचिदावरणमपि कल्पयेत । व्यङ्ग्यस्य हि घटादेरेव धर्मो यदुक्तप्रदीपादौ व्यञ्जके सति न सर्वदोपलब्धिः । अन्यथा ताल्वादिव्यापारे नियमेनोपलभ्यमानस्य शब्दस्य व्यङ्ग्यत्वपरिकल्पने घटस्यापि कुलालादिव्यङ्ग्यताप्रसङ्गः स्तन्न किञ्चिद्वाच्यं वर्णानुपूर्वी बोध्यमिति चेत् । ननु सानुपूर्वी वर्णेभ्यो भिन्ना स्यादभिन्ना वा ? । न तावद्भिन्ना । भिन्नवाच्यदूषणेनैव तस्या निरस्तत्वात् । नाप्यभिन्ना वा । अनित्यत्वे तेषां पौरुषेयत्वमेव स्यात् तद्रूपायां वाऽनुपूर्व्यां अग्निरित्येव स्यात् न गगनमिति । किञ्च तेऽपि वर्णा नित्याः स्युरनित्या वा ? । अनित्यत्वे तेषां पौरुषेयत्वमेव स्यात् । नित्याः व्यापिनो वा स्युरव्यापिनो वा ? । अव्यापित्वे न सर्वत्रोपलम्भः स्यात् । तथाहि—कान्यकुब्जदेशव्यवस्थितस्य शब्दस्य न मान्यखेटदेशव्यवस्थैः पुंभिरुपलम्भः स्यात् । अप्राप्यकारित्वाच्छ्रो-

ईशावास्योपनिषद् ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ईशावास्यमिदꣳसर्वं यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥

TRANSLATION

Whatever moves in this universe is indwelt by the Lord (Brahma). Enjoy what He has given thee (Perform your natural duties). Do not covet anyone's riches. (1).

COMMENTARY.

तेन त्यक्तेम भुञ्जीथाः means, enjoy what naturally comes before you. The context indicates that भोग here is not restricted to what we generally mean by 'enjoyment'; it rather means all *pravṛttis* (out-going tendencies) in general; so कर्म (action) too comes under it. So, to resume, whatever duties a man has to perform on account of his social relations, he must perform. This sentence seems as an emphatic protest against the inaction of many people striving for salvation. There is no way of escaping from *karman* (work) unless there is total extinction (विदेहकैवल्यम्) C. F. Bhagavad-Gītā "प्रकृत्तेः क्रियमाणानि गुणैः कर्माणि सर्वशः" The karmayoga of the Gītā teaches nothing but this. We must perform our natural duties—we must do those works that God has placed before us. But we must not go beyond this. Because the command is "do your work", we must not on that account do any work and every work, involving ourselves in unnecessary actions and enjoyments (मा गृधः कस्यस्विद्धनम्). [Compare,

in this connexion, the sayings of Rāmakṛshṇa Paramahaṃsa] For by so doing we would be tied fast by the fetters of 'Karman,' while by performing our natural duties and remembering that सर्वं ब्रह्ममयं खल्विदं जगत् (All is Full of Jove), we wont be so bound (see next sloka). (1).

C. F. यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् । (1.)

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

TRANSLATION

Thus performing actions, one would fain live a hundred years. That will surely happen in your case too (if you thus perform your actions), as such actions never bind a man. (2).

COMMENTARY.

Attachment in the performance of actions is the cause of all our miseries: it begets a saṃskāra (repeating tendency) which again causes rebirth. To avoid this, many mistaken people wish to shun action which is at the root of all attachments, altogether. But that is an impossibility (प्रकृतेः क्रियमाणानि &c). Is there then no hope? 'Yes' emphatically declares the Seer and 'yes' asserts Lord Kṛshṇa. Giving up of action, they tell us, does not consist in not *doing* any work, but in not *beiny attached*. (कर्मण्येवाधिकारस्ते मा फलेषु कदाचन &c.) So, if we remember that all this is Brahma, we cannot get attached to anything and then life would cease to be a series of woes. The great *karmins* of the world have always illustrated this fact. (2).

असुर्या नाम ते लोका अन्धेन तमसावृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥

TRANSLATION.

And those that kill the Self (i. e. those that forget Its real nature) go after death to a region of utter darkness fit to be inhabited only by demons. (3).

COMMENTARY.

आत्महनः—'those that kill the Self'. What can be the meaning of killing the Soul which is admitted on all hands to be immortal? Surely, destroying the real nature of the Soul in our ideas—thinking the Soul to be something It is not—is meant. When I do not remember that I am the all-powerful Soul, when I allow myself to be mistaken into a belief that I am the body, my senses begin to affect me and saṃskāra ensues. As a result, I am born again after death and that not amidst environments that would help me in shaking off my delusion but amidst those that would take me more and more to darkness. (3).

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

TRANSLATION.

That Self is one, without fear, beyond the reach of the mind, knowing everything from before, whom (even) the shining ones (sāttvika beings) could not (cannot) attain. That is always stationery, but outgoing tendencies (passions) could never reach It. That is all-inclusive: air and water (and everything else) are contained therein. (4).

COMMENTARY.

It has been said just now that one who forgets the real nature of the Self goes down and down. But what

is that real nature? The following mantras answer this question.

अनेजद्—It has nothing to tremble for, because Matter is always subservient to Spirit. In spirit again, this Ātman is without a second. मनसो जवीयः means fleeter than the mind, i. e., something which the mind cannot reach (अवाङ्मनसगोचरम्). Compare Hastāmalakam "मनश्चक्षुरादेरगम्यस्वरूपः"। 'नैनद्देवा आप्नुवन्'। Here, as elsewhere, the devas typify the quality of *Sattva* whose essence is intelligence and knowledge. It we can never realise by intellectual means–it is only when we develop our superconscious faculty that we can realise the Self. (C. F. Rāmakṛshṇa Paramahaṃsa). Further, Brahma is attainable, when we "give up the dual throng–good, bad–love, hate"—knowledge, ignorance—and all the qualities, including even the very good quality of *Sattva*. 'तद्धावतोऽन्यानत्येति' Here, धावन्तः अन्ये are the outgoing tendencies (प्रवृत्तयः) Unless we contain within ourselves the mental tendencies (निरुद्ध चित्तवृत्तिकाः), these will distract us and we won't be able to feel the Self within ourselves. (4).

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

TRANSLATION.

That moves and That moves not; That is far off and is still very near; That is within all this and is also outside, (5).

COMMENTARY.

This Ātman (Brahma) is all-pervading and all-inclusive. There is nothing of which It cannot be predicated. It is in animal life as well as in material substance. It is far and is near. In one phase, It is the essence of things and can therefore be said to be living within

them; while, in another phase, It forms, as it were, a larger circle within which is contained the smaller one of this material world [C. F. Ṛg-Veda, "स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्"] "अणोरणीयान्महतो महीयान्"—in a word, It is Infinite.

NOTE:—For the meaning 'to move' of the root एज्, compare the Mahābhāratām where a like instance occurs. (5).

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

TRANSLATION.

He who looks upon all beings as contained in himself and himself as within every being, has on that account nothing to fear. (6)

COMMENTRAY.

As Brahma is of such a nature (i.e, All-inclusive), it logically follows that to attain that Brahma—to realise the Self—I must look upon all beings as nothing other than my own self: by unification alone can I reach that Unity. If I go on differentiating, I will move farther and farther off from that realisation. So I must expand my heart and include therein as forming an inseparable part of myself all beings, nay even inanimate objects and even all forces. This is practical Vedānta. It requires a man, first, to feel for his country, then for the world and then for the universe. This is the spirit that Buddha, Christ and Chaitanya tried to infuse into the hearts of their fellow beings and this is the teaching that all true relegions inculcate. The saying of the Swāmī Vivekānanda that "Expansion is life and contraction is death," forms the tersest commentary on this.

NOTE:—The Vedic rescension reads विचिकित्सति for विजुगुप्सते. With that reading न विचिकित्सति would mean

"feels no doubt—knows with absolute certainty the real nature of Brahma." This, however, comes to the same thing; for न विजुगुप्सते would imply, "has no fear or doubt but goes straight to Him." ततः means 'for that (reason)' and not 'from that (source).' (6).

यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

TRANSLATION.

The man endowed with right knowledge who finds himself identical with (who unites himself with) every being—what delusion, what sorrow can touch him, as he views all as One? (7)

COMMENTARY.

It has been already shown how the man who identifies himself with all beings possesses the right knowledge This right knowledge will take him to the right goal and no delusion (donbt, fear, differentiation &c.) will disturb him now. He will overcome all sorrow and will attain मोक्षः (salvation) which is आनन्दरूपः ("bliss absolute"), and is nothing but आत्यन्तिकी दुःखनिवृत्तिः (absolute sation of all sorrow). So long as differentiation remains, the duality of joy and sorrow must remain; when all is one, joy and sorrow too merge into one Bliss. (7).

स पर्यगाच्छुक्रमकायमव्रणम्
अस्नाविरꣳशुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभू-
र्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

TRANSLATION.

He attains that Being, bright, without material body, without fractions, not gross, (ever) pure, impregnable by sin, omniscient, omnipresent, provident and self-created,

ordaining things in their proper way through all the ages (i. e., whose law the universe follows). (*8*).

COMMENTARY.

Thus proceeding in his path of unification, the knowing man ultimately reaches that One, where "non-duality alone exists," when he is completely merged in Brahma and the limited *jiva* ceases to exist. Then all is Brahma, omniscient, omnipresent and omnipotent—without the limitation of a gross material body subjected to sin and grief. (8).

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाᳬरताः ॥ ९ ॥

TRANSLATION.

Those that worship (*God as*) *the principle of ignorance, go to utter darkness and those that take delight in* (*Him as only*) *the principle of knowledge go, as it were, to still greater darkness.* (*9*).

COMMENTARY.

This and the following five verses are characteristically Indian. The orthodox Hindu can never imagine of Dualism in Theology. According to him, God is at the root of both the principles—of knowledge and of ignorance—(of creation and of destruction). As God is all-powerful, good and bad are both under his control. He is not the sole Lord of only one of them; if one is under him, the other must be so. This is what logically follows. But not all men have been able to rise above Dualism in religion. The savage worships the Lord as the great Spirit who controls ignorance (and like principles) and who must be propitiated to dispel our ignorance and the consequent evils. In this, he is sadly mistaken. Not less, is the civilised dualist, who con-

ceives of God as the lord of only the knowing principle and as opposed by a mighty principle of ignorance. Both are guilty of one-sided view and they have to suffer for that.

NOTE :—' ततो भूय इव '—Perhaps this is not really meant, it being a sort of hyperbolical expression, meaning only 'not less.' That is what इव suggests. But if we are to take it literally, we can, none the less, explain it satisfactorily. See the commentary on the next mantra. (9).

अन्यदाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

TRANSLATION.

One thing (results) from (worshipping God as) the principle of ignorance and something else from (worshipping Him as) the principle of knowledge—this is what we hear from the sages who have explained that to us. (10).

COMMENTARY.

It has been said that both the mistakes produce bad results. But there is a difference in the nature of these last. The man who worships God as the Lord of *avidyā*, can never imagine of the presence of a great Store-house of knowledge, for if real knowledge is not in God, it is nowhere else. Consequenetly, he can never accumulate a force of knowledge which alone can take him higher up. One may pray to God for dispelling his ignorance; by that of course he may have a negative advantage; but something positive must be added, that he may make real progress. For the relation between विद्या and अविद्या is not exactly that between two contradictory terms; the relation is rather that of two contrary terms: when one is present

द्विवाभूता रात्रिः । अव्ययीभावस्य त्विष्यते । उपकुम्भीभूतम् । एतच्चाव्ययीभावश्चेति सूत्रे भाष्ये उक्तम् ॥

क्यचि च । ७ । ४ । ३३ ॥

अस्येत्स्यात् । पुत्रीयति । खट्वीयति ॥

अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु । ७ । ४ । ३४ ॥

क्यजन्ता निपात्यन्ते । अशनायति । उदन्यति । धनायति । बुभुक्षादौ किम् । अशनीयति । उदकीयति । धनीयति ॥

न च्छन्दस्यपुत्रस्य । ७ । ४ । ३५ ॥

पुत्रभिन्नस्यावर्णान्तस्य क्यचि ईत्वदीर्घौ न ॥ मित्रयुः संस्वेदयुः । देवान् जिगाति सुम्नयुः । क्याच्छन्दसीत्युः । अपुत्रस्य किम् । पुत्रीयन्तः सुदानवः ॥ अपुत्रादीनामिति वाच्यम् ॥ * ॥ जनीयन्तो न्वग्रवः । जनमिच्छन्त इत्यर्थः ॥

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति । ७ । ४ । ३६ ॥

एते क्यचि निपात्यन्ते । भाषायां तु प्रत्ययाभावाद् दुष्टीयति । द्रविणीयति । वृषीयति । रिषीयति ॥

अश्वाघस्यात् । ७ । ४ । ३७ ॥

अश्व अघ एतयोः क्यचि आत्स्याच्छन्दसि । अश्वायन्तो मघवन् ॥ मा त्वा वृका अघायवः । न च्छन्दसीति निषेधो न ईत्वमात्रस्य किन्तु दीर्घस्यापीत्यत्रेदमेव सूत्रं ज्ञापकम् ॥

देवसुम्नयोर्यजुषि काठके । ७ । ४ । ३८ ॥

अनयोः क्यचि आत्स्यात् यजुषि कठशाखायाम् । देवायन्तो यजमानाः । सुम्नायन्तो हवामहे । इह यजुःशब्दो न मन्त्रमात्र-

परः । किन्तु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदीयकठशाखास्थे भवति ॥ किन्तु ऋग्वेदेऽपि भवति । स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः । यजुषीति किम् । देवाञ्जिगान्ति सुम्नयुः । बह्वृचानामप्यस्ति कठशाखा । ततो भवतीदं प्रत्युदाहरणमिति हरदत्तः । काठके इति किम् । सुम्नयुरिदमासीत् ॥

कव्यध्वरपृतनस्यर्चि लोपः । ७ । ४ । ३९ ॥

सपूर्वयानि विदा कव्यतायोः । अध्वर्युं वा मधुपाणिम् । दमयन्तं पृतन्यून् ॥

द्यतिस्यतिमास्थामित्ति किति । ७ । ४ । ४० ॥

एषामिकारोऽन्तादेशः स्यात्तादौ किति । ईत्वदद्भावयोरपवादः । दितः । सितः । मा माङ् मेङ् मितः । स्थितः । तादौ किम् । अवदाय । किति किम् । अवदाता ॥

शाच्छोरन्यतरस्याम् । ७ । ४ । ४१ ॥

शितः । शातः । छितः । छातः । व्यवस्थितविभाषात्वाद्व्रते विषये श्यतेर्नित्यम् । संशितं व्रतम् । सम्यक् संपादितमित्यर्थः । संशितो ब्राह्मणः । व्रतविषयकयत्नवानित्यर्थः ॥

दधातेर्हिः । ७ । ४ । ४२ ॥

तादौ किति । अभिहितम् । निहितम् ॥

जहातेश्च क्त्वि । ७ । ४ । ४३ ॥

हित्वा । हाङस्तु हात्वा ।

विभाषा छन्दसि । ७ । ४ । ४४ ॥

हित्वा शरीरम् । हीत्वा वा । हात्वेति पाठे घुमास्थेतीत्वं छान्दसत्वान्न ।

सुधितवसुधितनेमधितधिष्वधिषीय च । ७ । ४ । ४५ ॥

सु वसु नेम एतत्पूर्वस्य दधातेः क्तप्रत्यये इत्वं निपात्यते । गर्भं माता सुधितम् । वसुधितमग्नौ । नेमधिता न पौंस्या ॥ क्तिन्यपि दृश्यते ॥ * ॥ उत श्वेतं वसुधितिं निरेके । धिष्व वज्रं दक्षिण इन्द्र हस्ते । धत्स्वेति प्राप्ते । सुरेता रेतो धिषीय । आशीर्लिङ् इट् इटोत् । धासीयेति प्राप्ते ॥

दो दद्घोः । ७ । ४ । ४६ ॥

घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति । चर्त्वम् । दत्तः । दत्तवान् । दत्तिः । दत्त्वा । दः किम् । धेट् धीतः । घोः किम् । दातं बर्हिः । अवदातं मुखम् । तान्तो वायमादेशः । न चैवं विदत्तमित्यादावुपसर्गस्य दस्तीति दीर्घापत्तिर्दे इति षष्ठ्याः सप्तम्यर्थत्वेन तान्तदाधातुघटितोत्तरपदे इति हि तस्यार्थ इति वाच्यम् । तकारादौ तद्विधानात् । दान्तो धान्तो वा । न च दान्तत्वे निष्ठानत्वम् । धान्तत्वे झषस्तथोरिति धत्वं शङ्क्यम् । सन्निपातपरिभाषाविरोधात् ॥

अच उपसर्गात्तः । ७ । ४ । ४७ ॥

अच इत्यावर्तते । अजन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति ॥ चर्त्वम् । प्रत्तः । अवत्तः । अचः किम् । निर्दत्तम् । उपसर्गात्किम् । दधि दत्तम् ।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

आदिकर्मणीत्येतत्प्रदत्तमित्यस्यैव सम्भवाद्विशेषणं च शब्दाद्यथा प्राप्तम् । सूत्तमिति तु न प्राप्नोति । गतिश्चेत्यत्र भाष्ये सोस्तत्त्वे उपसर्गत्वप्रतिषेधादित्याहुः । द्यतेरित्वादच इत्येतद्भवति विप्रतिषेधेन । अवत्तं प्रत्तं जुहोति ॥

अपो भि । ७ । ४ । ४८ ॥

अपस्तकारः स्याद्भादौ प्रत्यये परे ॥ अद्भिः । अद्भ्यः । भि किम् । अप्सु ॥ मासश्छन्दसीति वक्तव्यम् ॥ * ॥ माद्भिः । शरद्भिः ॥ स्ववस्स्वतवसोरुषसश्चेष्यते ॥ * ॥ स्ववद्भिः । अवतेरसुन् । शोभनमवो येषां ते स्ववसः तैः । तु इति सौत्रो धातुः । तस्मादसुन् । स्वं तवो येषान्तैः स्वतवद्भिः । समुषद्भि रजा यथाः मिथुनेभिः । वसेः किच्चेत्यसि प्रत्यय इति हरदत्तः । पञ्चपाद्यां तु उषः किदित्युक्तम् ॥

सः स्यार्धधातुके । ७ । ४ । ४९ ॥

सस्य तः स्यात्सादावार्धधातुके ॥ घत्स्यति । वत्स्यति । सः किम् । वक्ष्यति । सि किम् । वासः । आर्धधातुके किम् । वस्से ।

तासस्त्योर्लोपः । ७ । ४ । ५० ॥

तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये । परे । कर्तासि । कर्तासे । त्वमसि । व्यतिसे ॥

रि च । ७ । ४ । ५१ ॥

रादौ प्रत्यये प्राग्वत् । कर्तारौ । कर्तारः ॥

ह एति । ७ । ४ । ५२ ॥

तासस्त्योः सस्य हः स्यादेति परे । कर्ताहे । व्यतिहे । भावयामासे इत्यत्र तु तशब्दस्य एशि इट एत्वे च कृते ह एतीति हत्वं न । तासि साहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एव एति हत्वप्रवृत्तेरित्याहुः ॥

यीवर्णयोर्दीधीवेव्योः । ७ । ४ । ५३ ॥

यिश्च इवर्णश्चेति द्वन्द्वः । यीत्यत्रेकार उच्चारणार्थः । एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे । दीध्यते । वेव्यते । आदीध्य । आवेव्य । दीधिता । दीधिष्यते । वेविता । वेविष्यते । दीधीत । वेवीत । इह तु लोपं बाधित्वा नित्यत्वादेरेत्वम् । दीध्ये । वेव्ये । यीवर्णयोः किम् । दीधीते । दीध्याते । दीध्यते । वेवीते । वेव्याते । वेव्यते ॥

सनि मीमाघुरभलभशकपतपदामच इस् । ७ । ४ । ५४ ॥

सीति वर्तते । एषामच इस् स्यात्सादौ सनि । वक्ष्यमाणेनाभ्यासलोपः । डुमिञ् मीञ् आभ्यां सन् । कृतदीर्घस्य मिनोतेरपि मीरूपाविशेषात् इस् सः सीति तः । मित्सति । मित्सते । मा माने । मित्सति । माङ् मेङोः मित्सते । दोदाणोः दित्सति । देङ् दित्सते । दाञ् दित्सति । दित्सते । धेट् धित्सति । धाञ् । धित्सति । धित्सते । स्कोरिति सलोपः । रिप्सते । शक्लृ शिक्षति । शक मर्षणे दिवादिः । स्वरितेत् । शिक्षति । शिक्षते । पित्सति । प्रपित्सते । सनि किम् । दास्यति । सि किम् । पिपतिषति ॥

राधो हिंसायां सनीस् वाच्यः ॥ * ॥ रित्सति । हिंसायां किम् । आरिरात्सति ॥

आप्ज्ञप्यृधामीत् । ७ । ४ । ५५ ॥

एषामच ईत्स्यात्सादौ सनि । आप्तुमिच्छति ईप्सति । ज्ञपिः पुगन्तो मित्सञ्ज्ञः पकारान्तश्चौरादिकश्च । इडभावे इको झलिति कित्वान्न गुणः अज्झनेति दीर्घः परत्वाण्णिलोपेन बाध्यते । अनन्त्ये सावकाशमीत्वं तु पूर्वविप्रतिषेधात् । ज्ञीप्सति । अर्धितुमिच्छति । रपरत्वं चर्त्वम् । ईर्त्सति । सनि किम् । आप्स्यति । सि किम् । जिज्ञपयिषति । अर्दिधिषति ॥

दम्भ इच्च । ७ । ४ । ५६ ॥

दम्भेरच इत्स्यादीच्च सादौ सनि । हलन्ताच्चेत्यत्र हल्ग्रहणं जातिपरमित्युक्तम् । तेन सनः कित्वान्न लोपः । धिप्सति । धीप्सति । सि किम् । दिदम्भिषति ॥

मुचोऽकर्मकस्य गुणो वा । ७ । ४ । ५७ ॥

सादौ सनि । मोक्षते मुमुक्षते वा वत्सः स्वयमेव । अकर्मकस्य किम् । मुमुक्षति वत्सं कृष्णः ॥

अत्र लोपोऽभ्यासस्य । ७ । ४ । ५८ ॥

सनि मीमेत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात् । तथा चैवोदाहृतम् । अभ्यासस्येत्येतच्चाधिकृतं वेदितव्यम् । आ अध्यायपरिसमाप्तेः । सनिमीमेत्याद्यनुवृत्त्यैव सिद्धेऽत्र ग्रहणं विषयावधारणार्थम् । अत्रैवाभ्यासलोपो भवति सन्वद्भावात्प्राप्तो न भवति ।

अमीमपत् । अदीदपत् । अजिज्ञपत् । इत्वादयोऽपि सन्वद्भावेन तु न भवन्ति । मीमादीनां हि धातूनामच इत्वादयो विधीयन्ते । न च धातुकार्यं प्रति सन्वद्भावोऽस्ति । अभ्यासकार्यविषयत्वात्तस्य सर्वस्याभ्यासस्यायं लोप इष्यते । तदर्थमेव केचिदत्रग्रहणं वर्णयन्ति । अत्राभ्यासत्वेन यो निर्ज्ञातस्तस्य लोप इत्यर्थसङ्गतेरिति दिक् ॥

ह्रस्वः ७ । ४ । ५९ ॥

अभ्यासस्याचो ह्रस्वः स्यात् । चच्छतुः । डुढौके । तुत्रौके । ऊखतुः । ऊखुरित्यत्र तु सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्तो न तु भवति सकृत्प्रवृत्तत्वात् आङ्गत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः वार्णादाङ्गं बलीय इति न्यायात् परत्वाच्च ॥

हलादिः शेषः । ७ । ४ । ६० ॥

अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते । जग्लौ । मम्लौ । पपाच । पपाठ । अभ्यासस्येति जातिपरो निर्देशः तेन आट आटतुः आनच आनचतुरित्त्यादौ ठकारादिनिवृत्तिः सिध्यति क्वचिदभ्यासे आदेर्हलः सत्वमाश्रित्य सर्वत्रानादेर्लोपविधानात् ॥

शर्पूर्वाः खयः । ७ । ४ । ६१ ॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो लुप्यन्ते । हलादिः शेषस्यापवादः । चुश्च्योत । तस्थौ । पस्पर्द्धे । उचिच्छिषतीत्यत्र तु उछेस्तुक् श्चुत्वम् । पूर्वत्रासिद्धीयमद्विर्वचन इति चछाभ्यां सहितस्येटो द्वित्वम् । हलादिः शेषः । निमित्तापाये नैमित्तिकापाय

इति त्वनित्यम् । च्छ्वोरिति सतुक्कग्रहणाज्ज्ञापकात् प्रकृतिप्रत्ययापत्तिवचनाद्वा ॥

कुहोश्चुः । ७ । ४ । ६२ ॥

अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् । चकार । चखान । जगाम । जघास । चुकुवे । जहार । जहौ ॥

न कवतेर्यङि । ७ । ४ । ६३ ॥

कवतेरभ्यासस्य चुत्वं न स्याद्यङि । कोकूयते । कौतिकुवत्योस्तु चोकूयते । यङ्लुकि चोकवीति चोकोति । यङि किम् । चुकुवे ॥

कृषेश्छन्दसि । ७ । ४ । ६४ ॥

यङि अभ्यासस्य चुत्वं न । करीकृष्यते । छन्दसि किम् । चरीकृष्यते ॥

दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रदत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ।७।४।६५॥

एते ऽष्टादश निपात्यन्ते । तत्र दाधर्तीति धृङो धारयतेर्वा श्लौ धृङो यङ्लुकि वा परस्मैपदमभ्यासस्य दीर्घत्वं णिलुक् च यथायथमप्राप्तं निपात्यते । दर्धर्तीत्यत्र यङ्लुक्पक्षे दाधर्तीति निपातनप्राप्तदीर्घाभावः । श्लुपक्षे तु रुगपि । दर्धर्षीत्यत्र तु यङ्लुक्पक्षे न किंचिन्निपात्यं किंतु श्लावेव । भवतेर्यङ्लुगन्तस्य गुणाभावः तेन भाषायां गुणो लभ्यते । तिजेर्यङ्लुगन्तात्तङ् । इयर्तेर्लटि हलादिःशेषापवादो रेफस्य लत्वं इत्वाभावश्च निपात्यते । अलर्षि युध्मख-

जकृत्पुरन्दर। सिपा निर्देशो न तन्त्रम्। अलर्ति दक्ष उत। फणतेरा-ङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीगागमो निपात्यते। अन्वा-पनीफणत्। स्यन्देः संपूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक् धातुस-कारस्य षत्वम्। न चात्र संपूर्वता तन्त्रम् अन्यत्रापि हि दृश्यते आसनि-ष्यदितीति वृत्तिः। करोतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य चुत्वाभावः। क्रन्देर्लुङि द्विवचनं अभ्यासस्य चुत्वाभावो निगागमश्च। कनिक्रद-ज्जनुषम्। अक्रन्दीदित्यर्थः। बिभर्तेर्यङ्लुगन्तस्य शतरि अभ्यासस्य जश्त्वाभावः। बिभ्रदोषधीषु। ध्वरतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य विगागमः धातोर्ऋकारलोपश्च। जसन्तमेतत्। दविध्वतो रश्मयः सूर्यस्य। द्युतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य संप्रसारणा-भावोऽत्वं विगागमश्च। दविद्युतद्दीद्यच्छोशुचानः। तरतेः शतरि श्लौ अभ्यासस्य रिगागमः षष्ठ्येकवचनान्तमेतदिति वृत्तिः जसन्तमिति कश्चित्। सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमो अभ्यासस्य। वरीवृजदिति वृजेः शतरि श्लावभ्यासस्य रीक्। मर्मृज्य इति मृजेर्लिटि णलि अभ्यासस्य रुक् धातोश्च युक् ततो मृजेर्वृद्धिर्न भवत्यलघूपधत्वात्। लघूपधगुणे प्राप्ते वृद्धिरारभ्यते इति वृत्तिः। वृद्ध्यभावोपि छान्दसत्वादिति कश्चित्। गमेराङ्पूर्वस्य लटि श्लाव-भ्यासस्य चुत्वाभावो नीगागमश्च। वक्ष्यन्ती वेदागनीगन्ति कर्णम्। इतिशब्द एवंप्रकाराणामन्येषामपि संग्रहार्थः॥

उरत्। ७। ४। ६६॥

अभ्यास ऋवर्णस्यात्स्यात्प्रत्यये परे। उरत्वं हलादिः शेषः। चकार। ववृते। चच्छृदतुः। नर्नर्ति। प्रत्यये किम्। वव्रश्च॥

द्युतिस्वाप्योः संप्रसारणम् । ७ । ४ । ६७

अनयोरभ्यासस्य संप्रसारणं स्यात् । दिद्युते । दिद्युताते । दिद्योतिषते । दिद्युतिषते । व्यदिद्युतदित्यपि वत्तावुदाहृतम् । सुष्वापयिषति ॥

व्यथो लिटि ७ । ४ । ६८ ॥

व्यथोऽभ्यासस्य संप्रसारणं स्याल्लिटि । हलादिःशेषापवादः । यस्य हलादिः शेषेण निवृत्तिः । अत्र यद्वक्तव्यं तल्लिट्यभ्यासस्येत्यत्रोक्तम् । विव्यथे । लिटि किम् । वाव्यथ्यते ॥

दीर्घ इणः किति । ७ । ४ । ६९ ॥

इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि । ईयुः । किति किम् । इयाय । इययिथ । इयेथ ॥

अत आदेः । ४ । ७० ॥

अभ्यासस्यादेरतो दीर्घः स्यात् । एकादेशापवादः । आट । आटतुः । आनृधतुः । आदेः किम् । पपाच । लिटीत्येव । अरर्ति ॥

तस्मान्नुड् द्विहलः । ७ । ४ । ७१ ॥

द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात् ॥ आनर्द । आनर्च । नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते तेन द्विहल्त्वादिह नुट् । आनृजे । इह तु द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुट् । आनर्च्छ । आनर्च्छतुः । अत आदेरित्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थम् । तेन दीर्घाभावादिह न नुट् । आच्छि आयामे । आञ्छ । तपरकरणं मुखसुखार्थमिति मते तु नुट् । आनाञ्छ ॥

अश्नोतेश्च । ७ । ४ । ७२ ॥

दीर्घादभ्यासाद्वर्णात्परस्य नुट् स्यात् । आनशे । अश्नातेस्तु आश ॥

भवतेरः । ७ । ४ । ७३ ॥

भवतेरभ्यासोकारस्य अः स्याल्लिटि । बभूव । बभूवतुः । बभूवुः । बभूवे । अनुबभूवे । लिटि किम् । बुभूषति । बोभूयते ।

ससूवेति निगमे । ७ । ४ । ७४ ॥

सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते ॥ गृष्टिः ससूव स्थविरम् । सुषुवे इति भाषायाम् ॥

निजां त्रयाणां गुणः श्लौ । ७ । ४ । ७५ ॥

निज् विज् विष् एषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । वेवेक्ति । वेवेष्टि । श्लौ किम् । निनेज ॥

भृञामित् । ७ । ४ । ७६ ॥

भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ । बिभर्ति । मिमीते । जिहीते । त्रयाणां किम् । जहाति । श्लौ किम् । बभार ॥

अर्तिपिपर्त्योश्च । ७ । ४ । ७७ ॥

अभ्यासस्य इकारोन्तादेशः स्यात् श्लौ । बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्वविधानादयं धातुर्भाषायामपि । उरदत्वम् । हलादिः शेषः । इत्वम् । अभ्यासस्यासवर्णे इतीयङ् इयर्ति । पिपर्ति । पिपूर्तः । पिपूर्यात् । ह्रस्वान्तोऽयमिति केचित् ।

पिपृतः । पिपृयात् । पाणिनीयमते तु तं रोदसी पिपृतमित्यादौ छान्दसत्वं शरणम् । श्लौ किम् । आर । पपार ॥

बहुलं छन्दसि । ७ । ४ । ७८ ॥

अभ्यासस्य इकारः स्याच्छन्दसि श्लौ । पूर्णां विवष्टि वशेरेतद्रूपम् । सचेः गर्भे माता सिषक्ति । घृ जिघर्म्यग्निं हविषा घृतेन । हृ अयं स्रुवो अभिजिहर्ति होमान् । न च भवति ददातीत्येवं ब्रूयात् ॥

सन्यतः । ७ । ४ । ७९ ॥

अभ्यासस्यात इकारः स्यात्सनि । पिपक्षति । पिपासति । चिच्छादयिषति । अधीषिषति । प्रतीषिषति । सनि किम् । पपाच । अतः किम् । लुलूषति । तपरकरणं किम् । पापच्यतेः सन् । पापचिषते ॥

ओः पुयण्ज्यपरे । ७ । ४ । ८० ॥

सनि परे यदङ्गं तदवयवस्य अभ्यासोवर्णस्य इत्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः । पिपविषते । पिपावयिषति । बिभावयिषति । मिमावयिषति । यियविषति । यियावयिषति । रिरावयिषति । लिलावयिषति । जिजावयिषति । जु गतौ सौत्रो धातुः । जुचङ्क्रम्येत्यत्र निर्दिष्टः । अयमेव वर्गप्रत्याहारजकारग्रहो लिङ्गं णौ द्वित्वात्प्रागच आदेशो नेतीत्युक्तम् । ओः किम् । पापचिषते । पुयण्जीति किम् । नुनावयिषति । तुतावयिषति । चुचावयिषति । पुस्फारयिषति । ऊर्णुनावयिषति । अपरे किम् । बुभूषति ।

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा। ७। ४। ८१॥

एषामभ्यासोकारस्य इत्वं वा स्यादवर्णपरे धात्वक्षरे परे। सिस्रावयिषति। सुस्रावयिषति इत्यादि। अपरे इत्येव। सुस्रूषति। शुश्रूषते॥

गुणो यङ्लुकोः ७। ४। ८२॥

अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च। चेचीयते। लोलूयते। चोच्छूद्यते। जोहवीति। चोक्रुशीति। चेच्छिदीति॥

दीर्घोऽकितः। ७। ४। ८३॥

अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च। पापच्यते। पापचीति। यायज्यते। यायजीति। अकितः किम्। यंयम्यते। यंयमीति। बहुव्रीहिश्चायम्। न विद्यते किद्यस्मिन्नित्यर्थः। तेन हाकोपि हाङ्वत् जाहेतीति दीर्घः सिद्धः। अनन्तरस्येति न्यायेन प्रतिपदोक्तपरिभाषया चाभ्यासनिमित्तकित एव ग्रहणमिति चाच्छायत इत्यादौ न दोषः। नन्वजन्ताभ्यासस्य दीर्घ इत्यर्थे नुगागादौ कृतेऽजन्तत्वाभावान्नोक्ति विशेषाभावाद्रिक्रि रीगिविधानेनैव सिद्धेर्विधिसामर्थ्यादेव तदभावसिद्धेः किमकित इत्यनेनेति चेन्न। अभ्यासविकारविधौ वैयधिकरण्यान्वयज्ञापनार्थत्वात्। तेन ऋतेः सनि द्वित्वेऽन्तरङ्गत्वात्तुकि चिच्छासतीत्यादावभ्यासह्रस्वत्वसिद्धिः। न चैवमप्यपवादत्वान्नीगादिभिर्दीर्घबाधे व्यर्थमेव तदिति वाच्यम्। अभ्यासविकारे बाधका न बाधन्ते इत्यर्थस्यापि ज्ञापनात्। तेषां सति सम्भवे युगपदेव प्रवृत्तिः। यौगपद्यासम्भवे क्रमेणैव तत्रान्यत्र

बाधकप्रवृत्त्युत्तरं बाध्यप्रवृत्त्यभावः । प्रकृते तु तस्मिन्कृतेपि प्राप्तियोग्यं बाध्यं भवत्येव । यत्र तु बाधकप्रवृत्त्युत्तरं बाध्यस्य प्रवृत्त्ययोग्यता तत्र पूर्वं बाध्यस्य प्रवृत्तिरनन्तरं बाधकस्य प्रवृत्तिरिति । अत एव मीमांसतेऽचीकरदित्यादावित्वे कृते दीर्घ इति दिक् ॥

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । ७ । ४ । ८४ ॥

एषामभ्यासस्य नीगागमः स्याद्यङ्लुकोः । अकित इत्युक्तेर्न दीर्घः । वनीवच्यते । वनीवञ्चीति । सनीस्रस्यते सनीस्रंसीतीत्यादि ॥

नुगतोऽनुनासिकान्तस्य । ७ । ४ । ८५ ॥

अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात् यङ्लुकोः । नुगित्यनेनानुस्वारो लक्ष्यते स च पदान्तवद्वाच्यः । वा पदान्तस्येति यथा स्यात् । यय्यँम्यते । यंयम्यते । यय्यँमीति । यंयमीति । तन्तन्यते । तन्तनीति । जङ्गम्यते । जंगमीति । रंरम्यते । रंरमीति । अतः किम् । तेतिम्यते । तपरत्वसामर्थ्याद्भूतपूर्वदीर्घस्यापि न । भाम क्रोधे । बाभाम्यते । अनुनासिकान्तस्य किम् । पापच्यते इहान्तग्रहणं न कर्तव्यम् तदन्तविधिना सिद्धेः । तत्क्रियते अन्तस्यानुस्वारस्य यो धर्मः स यथा स्यादिति एवं चानुनासिकान्तस्येति पृथक्पदे अनुनासिकेति लुप्तषष्ठीकम् ॥ एवं च पदान्तवद्वाच्य इति सिद्धमिति पदमञ्जर्यां स्पष्टम् ॥

जपजभदहदशभञ्जपशां च । ७ । ४ । ८६ ॥

एषामभ्यासस्य नुक् स्याद्यङ्लुकोः । गर्हितं जपति जंजप्यते इत्यादि । दंशिरयं लुप्तनकारो निर्दिष्टः तेन यङ्लुक्यपि नकारलोपो

भवति । दंदश्यते दंदशीतीति वृत्तिः । पश गतौ सौत्रः दन्त्यान्तोऽयमिति स्पश बाधनस्पर्शनयोरिति धातौ माधवः ॥

चरफलोश्च । ७ । ४ । ८७ ॥

चरफलोरभ्यासस्यातो नुक् स्याद्यङ्लुकोः ॥

उत्परस्यातः । ७ । ४ । ८८ ॥

चरफलोरभ्यासात्परस्यात उत्स्यात् यङ्लुकोः । हलि चेति दीर्घः । चंचूर्यते । चञ्चूर्यते । चञ्चुरीति । पंफुल्यते । पम्फुल्यते पंम्फुलीति । परस्य किम् । अभ्यासस्य मा भूत् । अतः किम् । अलोन्त्यस्य मा भूत् । उदिति तपरत्वान्न गुणः हलि चेति दीर्घस्तु स्यादेव । तस्यासिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात् । चंचूर्ति ॥

ति च । ७ । ४ । ८९ ॥

चरफलोरत उत्स्यात्तादौ प्रत्यये । चूर्तिः । फुल्लः । फुल्लवान् प्रफुल्लः । प्रफुल्तिः ॥

रीगृदुपधस्य च । ७ । ४ । ९० ॥

ऋदुपधस्याङ्गस्याभ्यासस्य रीगागमः स्याद्यङ्लुकोः । वरीवृत्यते । वरीवृतीति । क्षुभ्नादित्वान्न णः । नरीनृत्यते । नरीनृतीति । गृहू ग्रहणे । जरीगृह्यते । जरीगृहीति । गृणहातेस्तु यङ्लुकि नैवं किन्तु जाग्रहीति जाग्राढि यद्यपि तसादौ ङिन्निमित्तं संप्रसारणं तथापि तस्य बहिरङ्गत्वेनासिद्धत्वान्न रीगादयः । जागृढः । जागृहति जरीगृधीति जरीगृध्यते । उभयत्र लत्वम् । चलीक्लृप्यते । चलीक्लृपीति । रीगृत्वत इति वक्तव्यम् ॥ * ॥

वरीवृश्च्यते । परीपृच्छ्यते । बरीभृज्यते । एतेषां यङ्लुकि वरीवृश्चीतीत्यादिरूपाणि न भवन्ति किंतु वाव्रश्चीति । वाव्रष्टि । पाप्रच्छीति । पाप्रष्टि । बाभ्रज्जीति । बाभ्रष्टि । तस्मादावपि ङिन्निमित्तं ग्रहिज्येति संप्रसारणं न भवति । श्तिपा निर्देशात् । तेन वाव्रष्टः पाप्रष्टः बाभ्रष्टः । वाव्रश्च्मः । च्छ्वोः शूडिति शः पाप्रश्मः बाभ्रज्ज्मः इत्यादीनि ऋत्वतो यङ्लुक्यपि । रीक् तु तृषमृषादीनामुदाहर्तव्यः । तरीतृष्यते । तरीतृषीति । मरीमृष्यते । मरीमृषीतीत्यादि ।

रुग्रिकौ च लुकि । ७ । ४ । ९१ ॥

ऋदुपधस्याङ्गस्याभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युर्यङ्लुकि ॥ वर्वृतीति । वरिवृतीति । वर्वर्ति । वरिवर्ति । वरीवर्ति । अवर्वृतीत्३ । अवर्वर्त्३ । सिपि दश्चेति रुत्वपक्षे अवर्वाः । गणनिर्दिष्टत्वादङ् न । अवर्वर्तीत्३ । जर्गृहीति३ । जर्गर्ढि३ । जर्गृढः३ । जर्गृहति३ । अजर्घट्३ । जर्गृधीति३ । जर्गर्द्धि३ । जर्गृद्धः । जर्घर्ति । जर्गृधीषि । जर्घर्त्सि । अजर्गृधीत्३ । ईडभावे हल्ङ्यादिलोपः । भष्भावः । जश्त्वचर्त्वे । अजर्घर्त् । अजर्गृद्धाम् । सिपि दश्चेति पक्षे रुत्वम् । अजर्घाः । अजर्गर्धीत्३ । अजर्गर्धिष्टाम् । मर्मृज्यत मर्मृज्यमानासः इत्युपसंख्यानम् ॥

ऋतश्च । ७ । ४ । ९२ ॥

ऋदन्तस्याङ्गस्याभ्यासस्यापि तथा । चर्करीति३ । चर्कर्ति३ । चर्कराञ्चकार । चर्करिता । अचर्करीत् । अचर्कः । आशिषि रिङ् । चर्क्रियात् । अचर्कारीत् । अत्रयङ्लुकि द्वित्वेऽभ्यासस्योरदत्वं रपरत्वम् । हलादिः शेषः । रुक् । रिग्रीकोस्तु । अभ्यास-

कर्मणः पराद्धन्तेरमनुष्ये कर्तरि टग्भवति । वातघ्नमाविकं क्षीरम् । पित्तघ्नं माहिषं पयः । श्लेष्मघ्नं कटुकं । शशघ्नो शकुनिः । जायाघ्नः तिलकालकः । पतिघ्नी पाणिरेखा । अमनुष्य इति किम् ? आखुघातः शूद्रः । पापघातः । ऋषिः । चोरघातो देवदत्तः । हन्तीति बाहुलकान्न भवति ।

जायापतेर्लक्षणे । ४ । ३ । १२० ॥

जायापतिभ्यां कर्मभ्यां परात् हन्तेर्लक्षणे-लक्षणवति कर्तरि टग्भवति । लक्षणं शुभाशुभसूचकम् । तिलकालकादि । जायाघ्नो ब्राह्मणः । पतिघ्नी कन्या मनुष्यार्थोरम्भः ॥

हस्तिकवाटाच्छक्तौ ॥ ४ । ३ । १२१ ॥

हस्तिकवाटाभ्यां पराद्धन्तेः शक्तौ गम्यमानायां टग् भवति । हस्तिनं हन्ति हस्तिघ्नः पुरुषः । हस्तिनं हन्तुं शक्त इत्यर्थः । एवं कवाटघ्नश्चोरः । अन्यस्माच्चोरघातो मनुष्यः । शक्ताविति किम् ? हस्तिनं हन्ति विशेषेण हस्तिघातो देवदत्तः ।

राजघः ॥ ४ । ३ । १२२ ॥

राज्ञः कर्मणः पराद्धन्तेष्टक् घश्च निपात्यते । राजानं हन्ति राजघः ।

अर्होऽः ॥ ४ । ३ । १२३ ॥

अर्हेर्धातोः कर्मणः परादप्रत्ययो भवति । अणोपवादः । पूजार्हा प्रतिमा । पूजार्हः शान्तिः ।

शक्तिलांगलांकुशयष्टितोमरधनुर्घटाद्ग्रहः ॥ ४ । ३ । १२४ ॥

शक्त्यादिभ्यः कर्मभ्यः परााद्ग्रहेर्धातोरप्रत्ययो भवति । अणोऽपवादः । शक्तिग्रहः । लांगलग्रहः । अंकुशग्रहः । यष्टिग्रहः । तोमरग्रहः । धनुर्ग्रहः । घटग्रहः । "प्रातिपदिकग्रहणे

लिंगविशिष्टस्यापि ग्रहणम्" घटीग्रहः । शक्त्यादेरिति किम् ? कमण्डलूग्राहः ॥

सूत्राद्धारणे ॥ ४ । ३ । १२५ ॥

सूत्रात्कर्मणः परात् ग्रहेर्द्धातोर्द्धारणार्थे अप्रत्ययो भवति । सूत्रग्रहः । अन्यत्र—यो सूत्रमुपाधत्ते स सूत्रग्राहः ।

हृञो वयोऽनुद्यमे ॥ ४ । ३ । १२६ ॥

कर्मणः परात् हृञो वयस्यनुद्यमे च गम्यमाने अप्रत्ययो भवत्यणोपवादः । उद्यममुत्क्षेपणमाकाशस्थस्य वा धारणम् । अस्थिहरः श्वा । कवचहरः क्षत्रियकुमारः । अंशहरः पुत्रः । विषहरो मणिः । अनुद्यम इति किम् ? भारहारः । वयसि क्रियमाणः संभाव्यमानो वा उद्यमोऽस्तीति वयोग्रहणम् ।

आङि शीले ॥ ४ । ३ । १२७ ॥

शीलयत इति शीलं स्वाभाविकम् । कर्मणः परात शीलेऽर्थे हृञः आङ्युपसर्गे सति अप्रत्ययो भवति । पुष्पाहरः । फलाहरः । सुखाहरः । आङीति किम् ? पुष्पाणि हर्ता । शील इति किम् ? पुष्पाहारः ॥

दृतिनाथात्पशाविः ॥ ४ । ३ । १२८ ॥

दृतिनाथाभ्यां कर्मभ्यां परात् हृञः पशौ कर्तरि इप्रत्ययो भवति । दृतिहरिः । नाथहरिः पशुः । पशाविति किम् ? दृतिहारः । नाथहारः ॥

फलेग्रह्यात्मंभरिकुक्षिंभरि ॥ ४ । ३ । १२९ ॥

फलेगृह्यादयः इप्रत्ययान्ता निपात्यन्ते । फलानि गृह्णातीति फलेगृही वृक्षः । आत्मानं बिभर्तीति आत्मंभरिः । कुक्षिंभरिः । भक्षिंभरिः ।

शकृत्स्तम्बाद्वत्सव्रीहौ कृञः ॥ ४ । ३ । १३० ॥

शकृत्स्तम्बाभ्यां परात् कृञः यथासंख्यं वत्से व्रीहौ च कर्तरि इप्रत्ययो भवति शकृत्करिः वत्सः । स्तम्बकरिः व्रीहिः । अन्यत्र--शकृत्कारः । स्तंबकारः ।

किंयत्तद्बहोरः ॥ ४ । ३ । १३१ ॥

किमादिभ्यः कर्मभ्यः परात् कृञः अप्रत्ययो भवत्यणोपवादः । किंकरः । किंकराः । यत्करः । यत्कराः । तत्करः । तत्कराः । बहुकरः । बहुकराः । बहुकरीति संख्यावचनात् परेण टः । किंकरीति हेत्वादौ टः ।

दिवाविभानिशाप्रभाभास्कराऽरुष्कर्त्रन्तानन्तादिनान्दीलिपिलिबिबलिचित्रक्षेत्रजंघाबाह्वहर्धनुर्भक्तसंख्याट्टः ॥ ४ । ३ । १३२ ॥

दिवादिभ्यस्संख्यायाश्च कर्मभ्यः परात् कृञः टप्रत्ययो भवत्यणोपवादः । संख्येत्यर्थग्रहणं तेनैकादि परिग्रहः दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः भास्करः । कारकरः । अरुष्करः । कर्तृकरः । अन्तकरः । अनन्तकरः । आदिकरः । नान्दीकरः । लिपिकरः । लिबिकरः । बलिकरः । चित्रकरः । क्षेत्रकरः । जंघाकरः । बाहुकरः । अहस्करः । धनुष्करः । भक्तकरः । संख्या–एककरः । द्विकरः । त्रिकरः । टकारो ङ्यर्थः । भक्तकरी ।

हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् ॥ ४ । ३ । १३३ ॥

हेतुः कारणं तच्छीलं तत्स्वभावः अनुकूलः । आराध्यचित्तानुवृत्तिः शब्दादिवर्जितात्कर्मणः परात्कृञः हेत्वादिषु कर्तृषु टो भवति । हेतौ–यशस्करी विद्या । शोककरी कन्या । कुलकरं धनम् । तच्छीले–पूजाकरः । श्राद्धकरः । अनुकूले–प्रेषणकरः । पचनकरः । अन्यत्र–कुंभकारः । नगरकारः । शब्दादि.

प्रतिषेधः किम्? शब्दकारः । श्लोककारः । कलहकारः । गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः । ताच्छीले—ताच्छीलिकः । तृप्रत्यय उदाहार्यः ॥

भृतौ कर्मणः ॥ ४ । ३ । १३४ ॥

कर्मन् शब्दात् कृञः भृतौ गम्यमानायां कर्तरि टो भवति । भृतिर्वेतनम् । कर्मकरो भृतकः । अन्यत्र—कर्मकारः ॥

क्षेमप्रियमद्रात्खाण् ॥ ४ । ३ । १३५ ॥

क्षेमादिभ्यः कर्मभ्यः परात्कृञः ख अणौ भवतः । क्षेमङ्करः । क्षेमकारः । प्रियङ्करः । प्रियकारः । मद्रङ्करः । मद्रकारः । हेत्वादिविवक्षायामपि परत्वादिमावेव । योगक्षेमकरी लोकस्येति तदन्तविज्ञानाभावाद्भवति । खकारो ममर्थः ।

मेघर्तेः खच् ॥ ४ । ३ । १३५ ॥

मेघ ऋतिभ्यां परात्कृञः खच् भवति । मेघङ्करः । ऋतिङ्करः । चकारः खचीति विशेषणार्थः ॥

भयात् ॥ ४ । ३ । १३७ ॥

इह कर्मणः इत्येतद्भयादित्यनेन विशेष्यते । तेन भयाद्भयान्ताच्च कर्मणः परात् कृञः खच् भवति । भयङ्करः । अभयङ्करः ॥

प्रियवशाद्वदः ॥ ४ । ३ । १३८ ॥

प्रियवशाभ्यां पराद्वदेः खच् भवति । प्रियम्वदः । वशम्वदः ॥

द्विषत्परात्तस्तापे ॥ ४ । ३ । १३९ ॥

पर इत्येतस्मात्तकारान्ताच्च द्विषच्छब्दात्कर्मणः परात्तपेर्ण्यन्तात् खच् भवति । द्विषन्तपः । परन्तपः । त इति द्विषद्विशे-

षणं किम् ? द्विषतीं तापयति द्विषतितापः । परतापः । द्विषत्तापः । इति तपतेरण्यन्तस्य रूपम् ॥

मितनखपरिमाणात्पचः ॥ ४ । ३ । १४० ॥

मितनखाभ्यां परिमाणशब्देभ्यश्च कर्मभ्यः परात्पचेः खज्भवति । परिमाणो प्रस्थादिः । मितंपचा ब्राह्मणीः । नखंपचा यवागूः । प्रस्थंपचं कुलं द्रोणपचा स्थाली । खारिंपचः कटाहः ।

करीषाभ्रकूलात्कषः ॥ ४ । ३ । १४१ ॥

करीषादिभ्यः कर्मभ्यः परात्कषेर्खच् भवति । करीषंकषा वात्या । अभ्रंकषाः कदलीध्वजाः । कूलंकषा नदी ।

सर्वात्सहश्च ॥ ४ । ३ । १४२ ॥

सर्वशब्दात्कर्मणः परात्सहेः कषेश्च खज्भवति । सर्वंसहः । सर्वंकषः ।

भृतॄवृधारिजिदमितपश्च नाम्नि ॥ ४ । ३ । १४३ ॥

कर्मणः परेभ्यः भ्रादिभ्यः सहेश्च नाम्नि खज्भवति । विश्वंभरा वसुन्धरा । रथंतरं साम । पतिंवरा कन्या । वसुंधरा भूः । शत्रुंजयः पर्वतः । अरिंदमः । शत्रुंतपः । शत्रुंसहः । एवं नामानो राजानः । नाम्नीति किम् ? कुटुम्बं बिभर्ति कुटुम्बभारः ॥

वाचंयमो व्रती ॥ ४ । ३ । १४४

वाचः कर्मणः पराद्यमेः खच् अमशब्दलुग्निपात्यते । व्रती—व्रती चेदुच्यते । व्रतं शास्त्रतो नियमः । वाचं यच्छति वाचंयमो व्रती । वाग्यामोऽन्यत्र ।

मन्याणिन् ॥ ४ । ३ । १४५ ॥

कर्मणः परात् मन्यतेर्णिन् भवति । पंडितं मन्यते पंडितमानी । दर्शनीयमानी ।

कर्तुश्खः ॥ ४ । ३ । १४६ ॥

कर्मण: परात् मन्यतेश्शखो भवति प्रत्ययार्थ: । कर्त्रैव-चेत्कर्म भवति । पंडितमात्मानं मन्यते पंडितंमन्य: । सर्वंज्ञंमन्य: । असाधुत्वाणिन्नपि भवत्येव पंडितमानी । दर्शनीयमानी । कर्तरीति किम् ? दर्शनीयमानो देवदत्तस्य । शकारो विकरणार्थ: ॥

एजे: ॥ ४ । ३ । १४७ ॥

कर्मण: परादेजयते: शखो भवति । अंगमेजय: । जनमेजय: ।

शुनीस्तनाद्धेट: ॥ ४ । १४८ ॥

शुनीस्तनाभ्यां पराद्धेट: शखो भवति । शुनिंधय: । स्तनंधय: धेट: पित्वात् ङी । स्तनंधयी सर्वजाति: ।

नाडीमुष्टिघटीखरीनासिकावाताद्ध्मश्च ॥४।३।१४९॥

नाड्यादिभ्य: कर्मभ्य: परात्ध्मो ध्येटश्च शखो भवति । नाडिंधम: । मुष्टिंधम: । नाडिंधय: । मुष्टिंधय: । घटिंधम: । घटिंधय: । खरिंधम: । खरिंधय: । नासिकंधम: । नासिकंधय: । वातंधय: । वातंधम: ॥

पाणे: ॥ ४ । ३ । १५० ॥

पाणे: कर्मण: परात् ध्माधातो: शखो भवति । पाणिंधमतीति पाणिंधम: । पाणिंधमा: । पंथान इति तद्योगाद्यथा वृक्षा हंतीति ॥

कूलादुदि रुज्वह: ॥ ४ । ३ । १५१ ॥

कूलात्कर्मण: पराभ्यां रुचिवहिभ्यां टत्पूर्वाभ्यां शखो भवति । कूलमुद्रुज: । कूलमुद्वह: ।

वहाभ्राल्लिह: ॥ ४ । ३ । १५२ ॥

वहअभ्राभ्यां कर्मभ्यां परालिहेः खो भवति । वहंलिहा गौः । अभ्रंलिहाः प्रासादाः ॥

विध्वरुस्तिलात्तुदः ॥ ४ । ३ । १५३ ॥

विध्वादिभ्यः कर्मभ्यः परात्तुदः खो भवति । विधुंतुदः । अरुंतुदः । तिलंतुदः ॥

शर्धललाटवाताद्धाक्तपाजः ॥ ४ । ३ । १५४ ॥

शर्धादिभ्यः कर्मभ्यः परेभ्यो यथासंख्यं हाक् तप अज इत्येतेभ्यो धातुभ्यश्खो भवति । शर्धंजहा मृगाः । ललाटंतपः सविता । वातमजा मृगाः ॥

पुरंदरभगंदरेरंमदोग्रंपश्यासूर्यंपश्याः ॥ ४ । ३ । १४५ ॥

पुरंदरादयः शब्दाः खच्खान्ता निपात्यन्ते । पुरं दारयतीति पुरंदरः शक्रः । पूशब्दादयं पुरपूर्वात्पुरदार इति । भगं दारयतीति भगंदरः व्याधिः । इरा सुरा तया माद्यति इति इरंमदः । उग्रं पश्यतीति उग्रंपश्यः उग्रकर्मणो दृशेश्खः । सूर्यं न पश्यतीति असूर्यंपश्या राजदाराः । गुप्तिपरमेतत् । अपरिहार्यदर्शनं सूर्यमपि न पश्यन्तीति ।

सुभगाढ्यस्थूलपलितनग्नान्धप्रियात्सुपोऽच्वेश्च्वौख्स्नुखकञ् भुवः ॥ ४ । ३ । १५६ ॥

सुभगादिभ्यो अच्व्यन्तेभ्यः च्व्यर्थे वर्तमानेभ्यः सुबन्तेभ्यः परात्भू इत्येतस्माद्धातोः खस्नुखुकञ् प्रत्ययौ भवतः । असुभगः सुभगो भवति सुभगंभविष्णुः । सुभगंभावुकः । एवमाढ्यंभविष्णुः । आढ्यंभावुकः । स्थूलंभविष्णु स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अंधंभविष्णुः । अंधंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । सुप्ग्रहणात्सुभगाद्यन्तादपि भवति । सुभगः असुभगो भवति असुभगंभविष्णुः ।

असुभगंभावुकः, इत्यादि । अच्वेरिति किम्? सुभगी भविता। च्वाविति किम्? सुभगो भविता।

क्रुञः करणे खनट् ॥ ४ । ३ । १५७ ॥

सुभगादिभ्योऽच्व्यन्तेभ्यः च्व्यर्थे वर्तमानेभ्यः सुबन्तेभ्यः परात्कृञः करणे खनट् भवति । करण इति कर्तरीत्यस्यापवादः । एवमन्यत्राप्यसुभगं सुभगं कुर्वन्त्यनेनेति सुभगङ्करणः मन्त्रः । सुभगङ्करणी विद्या । आढ्यङ्करणम् । स्थूलङ्करणम् । पलितङ्करणम् । नग्नङ्करणम् । अन्धङ्करणम् । प्रियङ्करणम् । सुभगाद्यन्तादपि भवति—सुभगमसुभगं कुर्वन्त्यनेनेति असुभगङ्करणो मन्त्रः एवमनाढ्यङ्करणमित्यादि । अन्यत्र—सुप् कर्म चोपात्तस्याविशेषणं विज्ञेयम् । अच्वेरिति किम्? सुभगी कुर्वन्त्यनेन खनटः। प्रतिषेधसामर्थ्यादनडपि न भवति । च्वाविति किम्? सुभग कुर्वन्ति तैलेन । अभ्यञ्जनमत्र कृञर्थः ॥

भावे चाश्रितंभवः ॥ ४ । ३ । १५८ ॥

आश्रितशब्दादश्नातिभवत्योः कर्तृवचनात्सुबंतात्पराद्भवतेर्खप्रत्ययो भावे करणे च निपात्यते। आश्रितस्य भवनमाश्रितंभवो वर्तते। अश्रितो भवत्यनेनेत्याश्रितंभवः ओदनः । अत एव निपातनादश्नातेः कर्तरि क्तः दीर्घश्च ॥

गमः खखड्डाः ॥ ४ । ३ । १४८ ॥

सुबंतात्पराद्गमः खखड्डाः प्रत्यया बहुलं भवन्ति । ख—तुरंगमः । सुतंगमः । जनंगमः । मितंगमा हस्तिनी । हृदयंगमाः वाचः । खड्—तुरंगः । भुजंगः । प्लवंगः । ड—तुरगः । भुजगः । प्लवगः । पतगः अन्तगः ।अत्यंतगः। अध्वगः । दूरगः । पारगः । सर्वगः। सर्वत्रगः । पन्नगः । ग्रामगः । स्वगारगः । गुरुतल्पगः । बहुलाधिकारात् यथाप्रयोगं व्यवस्था ॥

विहायसो विहश्च ॥ ४ । ३ । १६० ॥

विहायसः पराद्गमः खखड्डाः भवन्ति । विहायसश्च विहादेशः । विहायसा गच्छतीति विहंगमः । विहंगः । विहगः ॥

उरगः ॥ ४ । ३ । १६१ ॥

उरगः शब्दात्परात् गमः डः सश्च लुग् निपात्यते । उरसा गच्छतीत्युरगः ।

सुगदुर्गमाधारे ॥ ४ । ३ । १६२ ॥

सुगदुर्ग इत्याधारे डप्रत्ययांतौ निपात्येते । सुखेन गम्यते तस्मिन्निति सुगं । दुर्गः । सुगमनं । दुर्गमनम् । डत्यस्वरूपत्वादनडपि भवति । आधार इति किम् ? । सुखेन गच्छतीति सुगन्ता । दुर्गन्ता । सुगमः । दुर्गमः । इति कर्मणि ।

निर्गो देशे ॥ ४ । ३ । १६३ ॥

निर्ग इत्याधारे देशे निपात्यते । निर्गम्यते तस्मिन्देशे इति निर्गोदेशः अन्यत्र—निर्गमनः ।

नाम्न्यग्रशमः ॥ ४ । ३ । १६४ ॥

सुबन्तात्पराद्धातोर्नाम्नि आकारप्रत्ययो भवति । शङ्करः । शंभवः । शंवदः । हेत्वादावपि नाम्नि परत्वादयमेव टः शंकरानाम शकुनिका परिव्राजिका तच्छीला च । नाम्नीति किम् ? शंकरी विद्या ॥

पार्श्वादिभ्यश्शीङः ॥ ४ । ३ । १६५ ॥

पार्श्वादिभ्यः सुबन्तेभ्यः परात् शीङः अप्रत्ययो भवति । पार्श्वाभ्यां शेते पार्श्वशयः । उदरशयः । पृष्टशयः । दिग्धेन सह शेते दिग्धसहशयः । पार्श्वादयः प्रयोगगम्याः ॥

उत्तानादिभ्यः कर्तुः ॥ ४ । ३ । १६६ ॥

उत्तानादिभ्यः कर्तृवाचिभ्यः परात् शीङः अप्रत्यय

भवति । उत्तानः शेते उत्तानशयः । अवमूर्द्धशयः । उत्तानादयः प्रयोगगम्याः ॥

आधारात् ॥ ४ । ३ । १६७ ॥

आधारवाचिनः सुबन्तात्परात्शीङः अप्रत्ययो भवति श्वे शेते श्वशयः । बिलशयः । गुहाशयः । गिरिश इति लोमादित्वात् शः ॥

भिक्षासेनादायाञ्च चरष्टः ॥ ४ । १६८ ॥

भिक्षादिभ्यः आधारवाचिभ्यः सुबन्तेभ्यः परात् चरेष्टप्रत्ययो भवति । भिक्षां चरति भिक्षाचरः । भिक्षाचरी । सेनाचरः । सेनाचरी । आदायचरः । आदायचरी । आदायेति प्यान्तः । कुरुषु चरति कुरुचरः । मद्रचरः । एभ्य इति किम् ? कुरून् चरति ॥

पुरोऽग्रतोऽग्रेस्सर्तेः ॥ ४ । ३ । १६९ ॥

पुरसादिभ्यः सुबन्तेभ्यः परात्सर्त्तेर्द्धातोष्टो भवति एकान्तत्वं च निपात्यते । अग्रे इति पुरःसरतीति पुरःसरः । अग्रः सरतीति अग्रेण सरति, अग्रे सरतीति वाग्रेसरः ॥

पूर्वात्कर्तुः ॥ ४ । ३ । १७० ॥

पूर्वशब्दात्कर्तुः परात् सर्तेः टो भवति । पूर्वः सरति पूर्वसरः । कर्तुरिति किम् ? पूर्वं देशं सरति पूर्वसारः ॥

स्थः कः ॥ ४ । ३ । १७१ ॥

सुबन्तात्परात्तिष्ठतेः को भवति । समे तिष्ठति समस्थः । विषमस्थः ॥

दुहो घश्च ॥ ४ । ३ । १७२ ॥

सुबन्तात्परात्दुहेः को भवति । घश्चास्यादेशः । कामान् दुग्धे कामदुघा । पूर्वाय दुग्धे पूर्वदुघा, धेनुः ॥

शोकापनुदतुन्दपरिमृजस्तंबेरमकर्णेजपास्सुखाहरालस्यहस्तिसूचकाः ॥ ४ । ३ । १७२ ॥

शोकापनुदादयः कप्रत्ययान्ता निपात्यन्ते । यथासंख्यं सुखाहरादयश्चेत्कर्तारो वाच्या भवन्ति । शोकमपनुदतीति शोकापनुदः । सुखाहरः । सुखस्याहरः । सुखस्याहर्ता । शोकापनुदोऽन्यः । तुन्दपरिमृजोऽलसः । तुन्दपरिमार्जोऽन्या । स्तम्बेरमो हस्ती । स्तम्बेरन्ताऽन्यः । कर्णेजपः सूचकः । कर्णेजपिताऽन्यः ॥

मूलविभुजादयः ॥ ४ । ३ । १७४ ॥

मूलविभुजादयः नियतार्थधातूपपदाः कप्रत्ययान्ता यथाश्लिष्टप्रयोगा साधवो वेदितव्याः । मूलानि विभुजति मूलविभुजो रथः । नखान्मुञ्चति नखमुचानि धनूंषि । काकेभ्यो गूहितव्याः काकगुहास्तिलाः । कौ मोदते कुमुदम् । द्वाभ्यां पिबतीति द्विपः । अनेकपः । कच्छपः । पादपः । धर्माय प्रददातीति धर्मप्रदः । कामप्रदः । स्वर्गप्रदः । शास्त्रप्रदः । शास्त्रेण प्रजानातीति शास्त्रप्रज्ञः ॥

विण्भजः ॥ ४ । ३ । १७५ ॥

सुबन्ताद्भजेर्धातोर्विण् भवति । अर्धभाक् । प्रभाक् । णकारो विण्क्विपोः साम्यार्थः । तेनेह क्विप् न भवति ॥

स्पृशोऽनुदकात् क्विप् ॥ ४ । ३ । १७६ ॥

अनुदकात् सुबन्तात्परात् स्पृशेर्धातोः क्विप् भवति । घृतं स्पृशतीति घृतस्पृक् । मंत्रेण स्पृशतीति मंत्रस्पृक् । अनुदकादित्युदकस्पर्शः । अनुपसर्गः सुप्परिगृह्यते । तेनेह न भवति—उपस्पृशतीति । अनुदकादिति किम् ? उदकस्पर्शः । उदकेन स्पृष्टः ॥

अदोऽनंनात् ॥ ४ । ३ । १७७ ॥

अन्नवर्जितात्सुबन्तात्पराददेर्धातोः क्विप् भवति । आममत्ति आमाद् । सस्याद् । अनन्नादिति किम् ? अन्नादः ॥

क्रव्यात्क्रव्यादावामपक्वादौ ॥ ४ । ३ । १७८ ॥

क्रव्यात् क्रव्याद इत्येतौ क्रव्यकर्मपूर्वाददेः क्विबणंतौ साधू भवतः । यथासंख्यं यद्यामाद् पक्वाद्चाभिधेयौ भवतः । क्रव्यमत्ति क्रव्याद् । आममांसभक्षः । क्रव्यादः । पक्वमांसभक्षः ॥

मन्वन् क्वनिब्विच्च दृश्यते ॥ ४ । ३ । १७९ ॥

सुबन्तात्पराद्धातोः मन् वन् क्वनिप् विच् क्विप् च प्रत्ययो दृश्यते । मन्— सुशर्मा । सुवर्मा । शर्म । वर्म । वन्—विजावा । अग्रेगावा । क्वनिप्—प्रातरित्वा । कृत्वा । दिवाः । पिवा । विच्—वेट् । लेट् । जागः शुभंयाः । कीलालपाः । क्विप्—अन्तरीक्षसत् । उपसत् । प्रसत् । अण्डसूः । सतसूः । मित्रद्विट्-ष् । प्रद्विट्ष् । द्विट्ष् । मित्रध्रुक् । प्रध्रुक् । गोधुक् । कामधुक् । अश्वयुक् । प्रयुक् युङ् । युञ्जौ । युञ्जः । तत्वविट् (विड्) । प्रविद् । विद् । काष्ठभिद् (भित्) । प्रभिद् । भवच्छित् । प्रच्छिद् शत्रुजित् । प्रजित् । प्रसेनजित् । अग्रणीः । ग्रामणीः । मित्रभूः । प्रणीनीः । नियः । नियः । पक् । छिद् । भिद् विराट् । सम्राट् । प्रतिभूः । उखास्रत् । पर्णध्वत् । महाभ्राट् । प्राङ् दध्यङ् । ऋतु ऋतौ ऋतवे वा यजत इति ऋत्विक् । धृष्णोतीति दधृक् । अनड्युद्युदुष्णिगिति निपातनात् द्वित्वकुत्वे । सृज्यत इति स्रक् । तपः स्रग्मायेति निपातनादमागमाः । दिश्यत इति दिक् संपदादिति क्विप् । दृशिग्रहणं प्रयोगानुसरणार्थम् । तेन—सर्वस्मादेते प्रत्यया भवन्ति । साधु धर्मशीलेषु अपि क्वचित्क्विप् भवति । विभ्राडित्यादि ॥

त्यदाद्यन्यसमानाद्गौणाद्दृशेराप्ये क्विकट्क्सा: ।४।३।१८०।

त्यदादेरन्यशब्दात्समानशब्दाच्च गौणादुपमेयवृत्तेः सुबंतात् दृशेर्धातोराप्ये कर्मणि क्विकट्क्स इत्येते भवन्ति । स इव दृश्यत इति त्यादृक् । त्यादृशः । त्यादृशी । त्यादृक्षः । तादृक् । तादृशः । तादृशी । तादृक्षः । अन्यादृक् । अन्यादृशः । अन्यादृशी । अन्यादृक्षः । सदृक् । सदृशः । सदृशी । सदृक्षः । त्यदाद्यन्यसमानादिति किम् ? वृक्ष इव दृश्यते । गौणादिति किम् ? स दृश्यते । आप्य इति किम् ? स इव पश्यति ॥

कर्तुर्णिन् ॥ ४ । ३ । १८१ ॥

कर्तृवाचिनः सुबंतात्गौणात्पराद्धातोर्णिन् भवति । उष्ट्र इव क्रोशति उष्ट्रक्रोशी । ध्वांक्षरावी । रासभरावी । खरनर्दी । सिंहनर्दी । कर्तुरिति किम् ? शालीनिव भुङ्क्ते कोद्रवान् । गौणादिति किम् ? उष्ट्रः क्रोशति ॥

शीलेऽजातेः ॥ ४ । ३ । १८२ ॥

शीलेऽर्थे वर्तमानाद्धातोः सुबंतादजातिवाचिनः पराणिन् भवति । उष्णभोजी । शीतभोजी । उदासारिण्यः । प्रत्यासारिण्यः गावः । प्रस्थायी । प्रतिबोधी प्रयायी प्रतियायी । शीले इति किम् ? उष्णभोजः । अजातेरिति किम् ? ब्राह्मणानामंत्रयिता । शालीन् भोक्ता । उपभोक्ता । सम्भोक्ता इत्यभिधानान्न भवति ॥

व्रताभीक्ष्ण्ये ॥ ४ । ३ । १८३ ॥

सुबंतात्पराद्धातोः वृते आभीक्ष्ण्ये च गम्यमाने णिन् भवति । व्रते—पार्श्वशायी । स्थंडिलशायी । अश्राद्धभोजी । अलवणभोजी । आभीक्ष्ण्ये—कषायपायिणो गांधाराः । क्षीरपा-

यिणः उशीनराः । सौवीरपायिणो बाल्हिकाः । बहुलाधिकारात्—कुलमांसखादाः इत्यत्र न भवति । अशीलार्थं जात्यर्थवचनम् ॥

साधौ ॥ ४ । ३ । १८४ ॥

साधावर्थे वर्तमानाद्धातोः सुबंतात्परात्णिन् भवति । साधुकारी । साधुदायी ॥

ब्रह्मवादी ॥ ४ । ३ । १८५ ॥

ब्रह्मकर्मपूर्वाद्वदेर्णिन् निपात्यते । ब्रह्म वदन्ति ब्रह्मवादिनो ब्राह्मणाः । अशीलाद्यर्थं वचनम् ॥

व्यभेर्भुवो भूते ॥ ४ । ३ । १८६ ॥

विअभिभ्यां सुबंताभ्यां पराद्भुवः भूते इत्यर्थे णिन् भवति । विभूतवान् । विभावी । अभिभूतवान् । अभिभावी । भूत इति किम् ? विभवति । अभिभवति ।

करणाद्यजः ॥ ४ । ३ । १८७ ॥

करणवाचिनः सुबंतात्पराद्यजेः भूते णिन् भवति । अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी ॥

इन्विक्रयः कर्मणः कुत्स्ये ॥ ४ । ३ । १८८ ॥

कर्मणः सुपः परात् विक्रयः विपूर्वात् क्रीणातेर्भूतेऽर्थे कुत्स्ये कर्तरि इन् भवति । तैलं विक्रीतवान् तैलविक्रयी । घृतविक्रयी । सोमविक्रयी । रसविक्रयी । कुत्स्ये इति किम् ? धान्यविक्रयः ।

हनो णिन् ॥ ४ । ३ । १८९ ॥

कर्मणः सुबंतात्परात् हन्तेर्भूतेऽर्थे कुत्स्ये कर्तरि णिन् भवति । पितृघाती । मातृघाती कुत्स्य इति किम् ? चोरं हतवान् ।

ब्रह्मभ्रूणवृत्रात्क्विप् ॥ ४ । ३ । १९० ॥

ब्रह्मादिभ्यः कर्मभ्यः परात् हन्तेर्भूते क्विप् भवति नान्यः ब्रह्माणं हतवान् ब्रह्महा । भ्रूणहा । वृत्रहा । पुनरेभ्य एवेतीह न भवति । पुरुषं हतवान् आखुहा । विडाल इत्यभूते । पुनर्हन्तेरेवेति इह न भवति—ब्रह्मादीन्हतवान् । पुनर्भूत एवेति इह न भवति—ब्रह्माणं हंति हनिष्यति वा मन्वन्नित्येव सिद्धे तंत्रेणेमे चत्वारो योगा नियमार्थाः । एवमुत्तरसूत्रद्वयेऽपि ।

सुकर्मपापमंत्रपुण्यात्कृञः ॥ ४ । ३ । १८१ ॥

स्वादिभ्यः कर्मभ्यः सुबंतेभ्यः परात्कृञः भूते क्विबेव भवति । सुकृतवान् । सुकृत् । कर्मकृत् । पापकृत् । मंत्रकृत् । पुण्यकृत् ॥

सोमात्सुञः ॥ ४ । ३ । १८२ ॥

सोमात्कर्मणः सुबंतात्परात् सुनोतेर्भूते क्विबेव भवति । सोमं सुतवाँन् सोमसुत् ॥

अग्नेश्चेः ॥ ४ । ३ । १८३ ॥

अग्नेः कर्मणः सुबंतात्परात्कृञः चिनोतेर्भूते क्विबेव भवति । अग्निं चितवान् अग्निचित् ॥

कर्मण्यग्न्यर्थे ॥ ४ । ३ । १८४ ॥

कर्मणः परात्चिनोतेर्भूते कर्मण्यग्न्यर्थेऽभिधेये क्विप् भवति । श्येन इव श्येनः । श्येनः चितः श्येनचित् । एवं कङ्कचित् । रथचक्रचित् । अग्न्यर्थं इष्टकाचय उच्यते । रूढं विषय एवायम् ।

दृशः क्वनिप् ॥ ४ । ३ । १८५ ॥

कर्मणः परात् दृशो भूते क्वनिप् भवति । मेरुं दृष्टवान् मेरुदृश्वा परलोकदृश्वा ॥

राजसहात्कृञ्युधिभ्याम् ॥ ४ । ३ । १८६ ॥

राजन् इत्येतस्मात् कर्मणः सहशब्दाच्च परात् कृञो युद्धेश्च भूते क्वनिप् भवति । वचनभेदान्नयाथासंख्यं । राजानं कृतवान् राजकृत्वा । राजानं योधितवान् राजयुध्वा । सह कृतवान् सहकृत्वा । सह युद्धवान् सहयुद्ध्वा । युधिर्योधयत्यर्थे सकर्मकः भवति ॥

जनोऽनौ डः ॥ ४ । ३ । १८७ ॥

कर्मणः परादनुपूर्वाज्जनेः भूते डो भवति । अण् इत्यपवादः । पुमांसमनुजाता पुमनुजा । स्त्र्यनुजः ॥

सप्तम्याः ॥ ४ । ३ । १८८ ॥

सप्तम्याः परात् जनेर्भूते डो भवति । उपसरे जातः उपसरजः । मथुरायां जातः मथुराजः । अप्सुजम् ॥

अजातेः पंचम्याः ॥ ४ । ३ । १८९ ॥

पंचम्यन्तादजातिवाचिनः सुपोर्जनेर्भूतेऽर्थे डो भवति । बुद्धेर्जाता बुद्धिजः । संस्कारजः । दुःखजो विषादजः । अजातेरिति किम् ? अश्वाज्जाताः । हस्तिनो जातः ॥

क्वचित् ॥ ४ । ३ । २०० ॥

क्वचिदन्यस्मिन्नपि विषये जनेर्डो भवति लक्षणानुसारेण । किम् जातेन किंजः । अलं जातेन अलंजः । द्विर्जातो द्विजः । न जातो अजः । उपजाः । परिजाः केशाः । प्रजाः । अनुजाः । स्त्रीजं अनृतं । ब्राह्मणजः । वशंवदः । क्षत्रियजं युद्धम् । अब्जम् । पुंसानुजाता पुंसानुजा । अन्यस्मादपि धातोर्भवति परमा हंति पराहा । परिखाता । परिखा । आखा उपखः अकःखं क्रम् ।

जृषोऽतृ ॥ ४ । ३ । २०१ ॥

जॄषोर्द्धातोर्भूतेऽर्थे अप्रत्ययो भवति । जरन् । जरन्तौ । जरन्तः ॥

सुयजो ङ्वनिप् ॥ ४ । ३ । २०२ ॥

सुयुञ्भ्यां भूते ङ्वनिप् भवति । सुत्वा । सुत्वानौ । सुत्वानः । यज्वा । यज्वानौ । यज्वानः ॥

भस्मादयः ॥ ४ । ३ । २०३ ॥

भस्मादयः मन्नादिप्रत्ययांता भूतेऽर्थे साधवो वेदितव्याः भक्षितं तदिति भस्म । चरितं तत्रेति चर्म । वृत्तं तत्रेति वर्त्म । भस्मादयः प्रयोगगम्याः ॥

क्तक्तवतू ॥ ४ । ३ । २०४ ॥

धातोर्भूतेऽर्थे क्तक्तवतू प्रत्ययौ भवतः । कृतः । कृतवान् । कृतः कटं देवदत्तः । प्रकृतः कटो देवदत्तेनेति अधिकर्मणि । तस्य भूतत्वादभूतत्वेऽपि समुदायस्य भवति ॥

लुङ् ॥ ४ । २ । २०५

भूते ऽर्थे वर्तमानाद्धातोः लुङ् प्रत्ययो भवति । अकार्षीत् । अहार्षीत् ॥

रात्रौ वसोऽन्त्ययामास्वापेऽद्यः ॥ ४ । ३ । २०६ ॥

रात्रौ भूतेऽर्थे वर्तमानाद्वसतेर्द्धातोरद्यलुङ् भवति । लङोपवादः । अन्त्ययामा स्वापे । यस्यां रात्रौ वसौ वसिर्वर्तते तस्या रात्रेरन्त्ययामस्वप्तरि चेत् कर्तरि धात्वर्थो भवति । क्व भवानुषितः । अमुत्रावात्सं रात्र्यंत्ययामे तु मुहूर्तमपि स्वापेर्लुङेव । अमुत्रावसं । अद्येति प्रयोगकालनियमः । तेन यत्रासावन्त्यो यामः तदहरेव प्रयोगो न दिवसान्तरे ॥

अनद्यतने लङ् ॥ ४ । ३ । २०७ ॥

अन्यायादुत्थानादान्यायात् संवेशनादेषोऽद्यतनकालः

अहरुभयतोऽर्धरात्रं वा, न विद्यतेऽद्यतनो यस्मिन् तस्मिन् भूतेऽर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति । अपचत् । अपठत् । बहुव्रीहिपरिग्रहं किम् ? अद्य ह्योऽभुक्ष्महीति व्यामिश्रे भूतसामान्ये च मा भूत् । जंबूद्वीपविदेहेऽभूदितः सप्तजन्मनीति भूतानद्यतने भूतमात्रविवक्षायां लुङ् ॥

ख्याते ऽदृश्ये ॥ ४ । ३ । २०८ ॥

भूतेऽनद्यतने ख्याते लोकविज्ञाते दृश्ये प्रयोक्तुः शक्यदर्शने वर्तमानाद्धातोर्लङ् भवति । विडपवादः । अरुणद्देवः पांड्यं । अदहदमोघवर्षोऽरातीन् । ख्यात इति किम् ? चकार कटं देवदत्तः । दृश्य इति किम् ? जघान कंसं किल वासुदेवः । अनद्यतन इति किम् ? उदगादादित्यः ॥

स्मृत्यर्थेऽयदि लृट् ॥ ४ । ३ । २०९ ॥

स्मृत्यर्थे धातौ उपपदे सति भूतानद्यतनेऽर्थे वर्तमानाद्धातोर्लृड् भवति अयदि-नचेत् तत्र यच्छब्दः प्रयुज्यते । अभिजानासि देवदत्त काश्मीरेषु वत्स्यामः । गमिष्यामोऽभिजानासि नभस्तिलकपर्वतं । स्मरसि बुध्यसे चेतयसे कलिङ्गेषु वत्स्यामः । अयदीति किम् ? अभिजानासि देवदत्त यत्कलिङ्गेषु अवसाम ॥

साकांक्षे वा ॥ ४ । ३ । २१० ॥

अपेक्षाकांक्षा तद्वान् साकांक्षः । साकांक्षे भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्मृत्यर्थे उपपदे लृड्वा भवति । अयदीति नास्ति । तेन-यद्ययदि च परत्वादयमेव । अभिजानासि देवदत्त कलिङ्गेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे । अभिजानासि देवदत्त कलिङ्गेष्ववसाम तत्रौदनमभुञ्ज्महि । अभिजानासि देवदत्त यत्कलिङ्गेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे । अभि-

जानासि । देवदत्त यत्कलिङ्गेष्ववसाम तत्रौदनमभुञ्जमहि । इह हि वासभोजने परस्परसाकांक्षे ॥

अत्यंतापह्नवे लिट् ॥ ४ । ३ । २११ ॥

अपह्नवोऽनभ्युपगमः अत्यंतमपह्नवोऽत्यंतापह्नवः । यत्सदसद्वा न किंचिदभ्युपैति सर्वं मूलतोऽपलपति तत्र भूतानद्यतनेऽर्थे वर्तमानाद्धातोर्लिट् प्रत्ययो भवति । लङोऽपवादः । किं त्वं गत्वा कलिंगेषु स्थितोऽसि । कः कलिंगान् जगाम नाहं कलिंगान् ददर्श । अन्यत्र ग्रहणादेकदेशापह्नवे लङेव । नाहं कलिंगेष्वतिष्ठं ॥

परोक्षे ॥ ४ । ३ । २१२ ॥

परोक्षे भूतेऽनद्यतनेऽर्थे वर्तमानाद्धातोर्लिड् भवति । परोक्षं यन्न प्रयोक्त्रा साक्षादधिगतं । चकार । जहार । सुप्तोऽहं किल विललाप । मुक्तोऽहं किल विचचार । चिंतयन्किलाहं शिरः कंपयांबभूव । अंगुलीं स्फोटयामास । अभूवंस्तापसाः केचित । पांडुपुत्राः फलाशिनः पारिव्राज्यं तदादत्तमरीचीश्च तृषार्दिताः इति भूतानद्यतनपरोक्षेऽपि भूतमात्रस्य भूतानद्यतनमात्रस्य च विवक्षायां लुङ्लङौ भवतः ॥

हशश्वत्पंचाब्ध्यन्तः प्रच्छ्ये लङ् च ॥ ४ । ३ । २१३ ॥

हशश्वच्छब्दयोरुपपदयोः पंचाब्ध्यंतः प्रच्छ्ये च भूतानद्यतनपरोक्षेऽर्थे वर्तमानाद्धातोर्लङ्लिटौ भवतः । पंचानामब्धानां वर्षाणां समाहारः पंचाब्धी । तस्यामंतर्यं पृच्छ्यते स पंचाब्ध्यन्तयः पृच्छ्यः । अभिजानासि देवदत्त इति ह्याकरोत् । इतीह चकार । शश्वदकरोत् । शश्वच्चकार । किमगच्छद्देवदत्तः । अगच्छद्देवदत्तः । किमगच्छद्देवदत्तः । अगच्छद्देवदत्तः । किं जगाम देवदत्तः । जगाम देवदत्तः । अन्यत्र—जघान कंसं किल वासुदेवः ॥

पुरि लुङ् वा ॥ ४ । ३ । २१४ ॥

परोक्ष इति निवृत्तं भूतानद्यतनेऽर्थे वर्तमानाद्धातोः पुराशब्दे उपपदे लुङ् वा भवति । अवात्सुरिह पुराच्छात्राः । अवसन्निह पुरा च्छात्राः परोक्षे लिट् । ऊषुरिह पुराच्छात्रा इतीह पुराकार्षीत् । शश्वत्पुरा कार्षीत् पुरि लुङ् च वचनात् स्मृत्यर्थे हशश्वत् स्मृत्यर्थेषु सामान्यविवक्षायां लुङ् न भवति ॥

स्मे च लट् ॥ ४ । ३ । २१५ ॥

भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्मशब्दे चोपपदे लट् प्रत्ययो भवति । पृच्छति स्म पुरोधसं वसंतीह पुराच्छात्राः । एवं पुराशब्दे चत्वारो लकाराः स्म योगे तु परत्वाल्लडेव । देवदत्त माणवकेन स्म पुरादीयते ॥

ननौ प्रष्टोक्तौ ॥ ४ । ३ । २१६ ॥

अनद्यतने इति निवृत्तं । पृष्टस्योक्तिः पृष्टोक्तिः । उत्तरं प्रतिवचनमित्यऽर्थः । तत्र भूतेऽर्थे वर्तमानाद्धातोः ननुशब्दे उपपदे लड् भवति । किमकार्षीः कटं देवदत्त । ननु करोमि भोः । किमवोचः किंचिद्देवदत्तो ननु ब्रवीमि भोः प्रष्टोक्ताविति किम्? नन्वकार्षीत् माणवकः कटं; वर्तमानविवक्षेवेयं । तथाहि शत्रा न शावपि दृश्यते । ननु कुर्वंतं मां पश्य । ननु कुर्वाणं मां पश्य । तत्रोत्तरेणैव सिद्धं भूतविवक्षाव्युदासार्थं वचनं ॥

सति ॥ ४ । ३ । २१७ ॥

सन् विद्यमानो वर्तमान इत्यर्थः । सत्यर्थे वर्तमाना-द्धातोर्लड् भवति । पचति । पठति ॥

पूङ् यजश्शानः ॥ ४ । ३ । २१८ ॥

पूङो यजेश्च धातोः सत्यर्थे शान प्रत्ययो भवति । पवमानः । यजमानः ॥

वयश्शक्तिशीले ॥ ४ । ३ । २१९

धातोः सत्यर्थे वर्तमानात् वयसि शक्तौ शीले च गम्यमाने शानो भवति । वयो यौवनादि शक्तिः सामर्थ्यं । शीलं स्वाभाविकम् । वयसि कतीह शिखंडं वहमानाः । कतीह कवचं पर्यस्यमानाः । कतीह शत्रून्निघ्नानाः । यस्मिन् वयसि शिखंडवहनादि भवति तदिह वयो गम्यते । शक्तौ—कतीह पचमानाः । कतीह समश्नानाः । कतीह पाके समाशे च समर्था इत्यर्थः । शीले—कतीहाञ्जनाः । कतीह मंडयमानाः । अंजनशीला मंडनशीला इत्यर्थः ॥

धारीङश्शत्रकृच्छ्रे ॥ ४ । ३ । २२० ॥

अकृच्छ्रः सुखसाध्यः । अकृच्छ्रे सत्यर्थे वर्तमानाद्धातोरेरि-ङश्च शतृप्रत्ययो भवति । आधार यन्नाचारप्रकल्पमधीयन् मण्डरीकं । अकृच्छ्र इति किम् ? कृच्छ्रेण धारयति । कृच्छ्रेणाधीते ॥

सुञ् द्विषार्हस्सत्र्यरिप्रशस्ये ॥ ४ । ३ । २२१ ॥

सुञादिभ्यः सत्यर्थे यथासंख्यं सत्यादौ कर्तरि शतृ भवति । सर्वे सुस्वन्तः यजमानाः सत्रिण उच्यन्ते । द्विषन् शत्रुरित्यर्थः । अर्हन् पूजां अर्हन्विद्यां । पूजा विद्यार्हतया कर्ता प्रशस्यते अन्यत्र—सुरां सुन्वन्ति । पतिं द्वेष्टि । चोरो वधमर्हति ॥

तृ साधुधर्मशीलेषु ॥ ४ । ३ । २२२ ॥

साधौ धर्मशीले च सत्यर्थे वर्तमानाद्धातोः तृप्रत्ययो भवति । धर्मोऽनुप्रवृत्त आचारः । साधौ—कर्ता विटः । गन्ता खेला । साधु करोति । साधु गच्छतीत्यर्थः । धर्मे—वधूमूढां मण्डयितारः । आविष्ठायनाः । श्राद्धे सिद्धे ऽन्नमपहर्तारः

आहारकः । मुण्डमांद्ये तेषां कुलधर्म इत्यर्थः । शीले—कर्ता कटं । वदिता जनापवादान् । करणं वदनं चास्य शीलमित्यर्थः ॥

भूवृतवृधभ्राजसहचररुचापत्रपालङ्कृञ्निराकृञ्प्रजनोत्पचोत्पदोन्मदादिष्णुः ॥ ४ । ३ । २२३ ॥

साध्वादौ सत्यर्थे वर्तमानेभ्यो भ्वादिभ्यः कर्तरि इष्णुप्रत्ययो भवति । भविष्णुः वर्धिष्णुः । वर्तिष्णुः । भ्राजिष्णुः । सहिष्णुः । चरिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । अलंकरिष्णुः निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उत्पदिष्णुः । उन्मदिष्णुः ॥

भूजेस्स्नुक् ॥ ४ । ३ । २२४ ॥

भूजिभ्यां साध्वादौ सत्यर्थे कर्तरि स्नुकप्रत्ययो भवति । भूष्णुः । जिष्णुः ॥

ग्लास्थस्स्नुः ॥ ४ । ३ । २२५ ॥

साध्वादौ सत्यर्थे ग्लास्थाभ्यां स्नुर्भवति ॥ ग्लास्नुः । स्थास्नुः ॥

गृधिधृषिक्षिप्त्रसः क्नुः ॥ ४ । ३ । २२६ ॥

साध्वादौ सत्यर्थे गृध्यादिभ्यः क्नुर्भवति । गृध्नुः । धृष्णुः । क्षिप्नुः । त्रस्नुः ॥

सन्भिक्षाशंस्विंदिच्छादुः ॥ ४ । ३ । २२७ ॥

साध्वादौ सत्यर्थे सन्प्रत्ययान्तात् भिक्षादिभ्यश्च उप्रत्ययो भवति । भवति । चिकीर्षुः । जिहीर्षुः । भिक्षुः । आशंसुः । विंदुः ॥ इच्छुः ॥

शॄवंदादारुः ॥ ४ । ३ । २२८ ॥

शॄवंद्भ्यां साध्वादौ सत्यर्थे आरुर्भवति । शरारुः । वंदारुः ॥

सद्रुशद्रुधृट्सेरुः ॥ ४ । ३ । २२९ ॥

सद्रादिभ्यः साध्वादौ सत्यर्थे रुर्भवति । सद्रुः । दारुः । शद्रुः । धारुः । सेरुः ॥

निद्रातंद्राश्रद्धास्पृहिगृहिपतिशीङ्दयादालुः ॥ ४ । ३ । २३०

निद्रादिभ्यः साध्वादौ सत्यर्थे आलुर्भवति । निद्रालुः । तंद्रालुः । श्रद्धालुः । स्पृहयालुः । गृहयालुः । पतयालुः । शयालुः । दयालुः । निद्रातन्द्रेति नितत् पूर्वो द्रायतिः तन्द्रेति दकारस्य नकारो निपातनात् । श्रद्धेति श्रत्पूर्वो दाञ् ॥

साहवहिचलिपापतो यङ इः ॥ ४ । ३ । २३१ ॥

सह्यादिभ्यो यङन्तेभ्यः साध्वादौ सत्यर्थे इप्रत्ययो भवति । सासहिः । वावहिः । चाचलिः । पापतिः । पापदिति पतेर्यङ्प्रकृतेर्निर्देशो नियमभावार्थः ॥

ददिसस्रिचक्रिजज्ञिनेमिः ॥ ४ । ३ । २३२ ॥

दद्यादयः शब्दाः इप्रत्ययांताः साध्वादौ सत्यर्थे निपात्यंते । धदाञिञः किद्द्विर्वचनं च । दधिः एवं सृ इत्यस्य सस्रिः । कृञः चक्रिः जनेर्जज्ञिः । नमेरित्वं च नेमिः ॥

भूवृषस्थाशॄहन्कम्गमादुकण् ॥ ४ । ३ । २३३ ॥

भ्वादिभ्यः साध्वादौ सत्यर्थे उकण् भवति । प्रभावुकः । वर्षुकः । उपस्थायुकः । प्रशारुकः । घातुकः । कामुकः । आगामुकः ॥

लषपतपदः ॥ ४ । ३ । २३४ ॥

लषादिभ्यः साध्वादौ सत्यर्थे उकण् भवति । अपला-

षुका वृषली । अपलाषुकं वृषलसंगतम् । प्रपातुका गर्भा । उपपादुकः सत्त्वः । योगविभाग उत्तरार्थः ॥

क्रुद्भूषार्थसृगृधज्वल्जुशुभश्चानः ॥ ४ । ३ । २३५ ॥

क्रुद् क्रोधो भूषा अलंकरणं चार्थौ येषां तेभ्यः सृादिभ्यः लषादिभ्यश्च साध्वादौ सत्यर्थे आनो भवति । क्रोधनः । रोषणः । भूषणः । मंडनः । सरणः । गर्द्धनः । ज्वलनः । जवनः । शोभनः । लषणः । पतनः । पदनः । जु सौत्रो धातुः वेगे संस्कारे च वर्तते ॥

रुचलार्थादकर्मकात् ॥ ४ । ३ । २३६ ॥

रु शब्दे चल कंपने इत्येतदर्थेभ्योऽकर्मकेभ्यः साध्वादौ सत्यर्थे अनो भवति । रवणः । शब्दनः आक्रोशनः । कथनः । चलनः । चोपनः । अकर्मकादिति किम् ? पालिता विद्यां ॥

हलाद्यन्तान्ङिदितः ॥ ४ । ३ । २३७ ॥

ङितः इदितश्च धातोर्हलादेर्हलन्तादकर्मकात्साध्वादौ सत्यर्थे अनो भवति । वर्तनः स्पर्धनः । मीमांसनः । चेतनः । अविवक्षितकर्मकस्याकर्मकत्वं ॥

न दीक्षदीप्सूद्णिङ्यः ॥ ४ । ३ । २३८ ॥

दीक्षादिभ्यो णिङन्तेभ्यो यकारान्तेभ्यश्च साध्वादौ सत्यर्थे अनो न भवति । दीक्षिता । दीपिता । सूदिता । णिङ् हस्तयिता । उत्पुच्छयिता । इदं प्राप्तिमतोऽणेरुपलक्षणं । तेन भावयिता । यः—क्नूयिता । क्ष्मायिता । मधुसूदनादिर्नंद्यादिः ॥

द्रं क्रमो यङः ॥ ४ । ३ । २३९ ॥

द्रमक्रमभ्यां यङन्ताभ्यां सध्वादौ सत्यर्थेऽनो भवति । द्रंद्रमणः । चंक्रमणः ॥

यज्वद्दशजयादूकः ॥ ४ । ३ । २४० ॥

यजादिभ्यः यङंतेभ्यः साध्वादौ सत्यर्थे ऊको भवति । यायजूकः । वावदूकः । दंदशूकः । जंजपूकः ॥

जागुः ॥ ४ । ३ । २४१ ॥

जागर्तेः साध्वादौ सत्यर्थे ऊको भवति । जागरूकः ।

शमष्टकदुषद्विषद्रुहदुहयुजत्यजरजभजाभ्याहनाऽनुरुधो घिनञ् ॥ ४ । ३ । २४२ ॥

शमादिभ्योऽष्टभ्यः दुषादिभ्यश्च साध्वादौ सत्यर्थे घिनञ् भवति । शमी । दमी । तमी । श्रमी । भ्रमी । क्षमी क्लमी । मादी । प्रमादी । दोषी । द्वेषी । द्रोही । दोही । योगी । त्यागी ॥ रागी । भागी । कल्याणभागी । अभ्याघाती । अनुरोधी । रजेति निपातनान्न लुक् ।

आङः क्रीड्यं यसमुषः ॥ ४ । ३ । २४३ ॥

आङः परेभ्यः क्रीडादिभ्यः साध्वादौ सत्यर्थे घिनञ् भवति । आक्रीडी । आयामी । आयासी । आमोषी । साध्वादयः प्रायेण रूढिशब्दा इत्युपसर्गाधिक्ये न भवन्ति । एवमुत्तरत्रापि ।

समः पृचसृजज्वरोऽकर्मकात् ॥ ४ । ३ । २४४ ॥

समः परेभ्यः पृचादिभ्योऽकर्मकेभ्यः साध्वादौ सत्यर्थे घिनञ् भवति । संपर्की । संपर्गी । संज्वारी । अकर्मकादिति किम् ? संपृणक्ति शाकम् ॥

वौ विचकषकत्थस्रम्भलसः ॥ ४ । ३ । २४५ ॥

विशब्द उपपदे विचादिभ्यः साध्वादौ सत्यर्थे घिनञ् भवति । विवेकी । विकाषी । विकत्थी । विस्रंभी । विलासी ।

लपोऽपे च ॥ ४ । ३ । २४६ ॥

लपेरपे वौ चोपपदे साध्वादौ सत्यर्थे घिनञ् भवति । अलापी । विलापी ॥

चरोऽतौ च ॥ ४ । ३ । २४७ ॥

अतिशब्देऽपे चोपपदे चरेः साध्वादौ सत्यर्थे घिनञ् भवति । अतिचारी । अपचारी ।

लप्सृद्रुमथवदवसः प्रे ॥ ४ । ३ । २४८ ॥

प्र उपपदे लपादिभ्यः साध्वादौ सत्यर्थे घिनञ् भवति । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ।

परेः सृवद्दहमुहः ॥ ४ । ३ । २४९ ॥

परिपूर्वेभ्यः स्रादिभ्यः साध्वादौ सत्यर्थे घिनञ् भवति परिसारी । परिवादी । । परिदाही । परिमोही ॥

देवो णेश्च ॥ ४ । ३ । २५० ॥

परिपूर्वात् देवृञः ण्यंतात् केवलाच्च साध्वादौ सत्यर्थे घिनञ् भवति । परिदेवत इति परिदेवी । णेः—परिदेवयतीति परिदेवी ॥

क्षिपरटः ॥ ४ । ३ । २५१ ॥

परिपूर्वाभ्यां क्षिपरटाभ्यां साध्वादौ सत्यर्थे घिनञ् भवति । परिक्षेपी । परिराटी ।

वादेश्च वुञ् ॥ ४ । ३ । २५२ ॥

परिपूर्वाद्वादेः ण्यतात् क्षिपरटिभ्यां च साध्वादौ सत्यर्थे वुञ् भवति । परिवादकः । परिक्षेपकः । परिराटकः ।

निंदहिंसक्लिशखादविनाशिव्याभाषासूयात् ॥ ४ । ३ । २५३ ॥

निंदादिभ्यः साध्वादौ सत्यर्थे वुञ् भवति । निंदकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । व्याभाषकः । असूयकः ।

उपसर्गादेव देविक्रुशः ॥ ४ । ३ । २५४ ॥

उपसर्गात्परेभ्यः देवादिभ्यः साध्वादौ सत्यर्थे वुञ् भवति । आदेवत इति आदेवकः । परिदेवकः । आदेवयतीत्यादेवकः । परिदेवकः । आक्रोशकः । परिक्रोशकः । उपसर्गादिति किम् ? देवनः । देवयिता । क्रोष्टा ।

कुट्टिलुंटिवृङ्जल्पिभिक्षादाकट् ॥ ४ । ३ । २५५ ॥

कुट्टादिभ्यः साध्वादौ सत्यर्थे आकट् प्रत्ययो भवति । कुट्टाकः । लुंटाकः । वराकः । जल्पाकः । भिक्षाकः । कुट्टाकी लुंटाकी । वराकी । जल्पाकी । भिक्षाकी ।

दृक्षीएवमज्यव्यथाभ्यंपरिभूविश्रेरिन् ॥ ४ । ३ । २५६ ॥

दृादिभ्यः साध्वादौ सत्यर्थे इन् भवति ञाद्यपवादः । आदरी । क्षयी । उदयी । अत्ययी । वमी । जयी । अव्यथी । अभ्यमी । परिभवी । विश्रयी ॥

प्रात्सूजोः ॥ ४ । ३ । २५७ ॥

प्रपूर्वाभ्यां सूजुभ्यां साध्वादौ सत्यर्थे इन् भवति। प्रसवी । प्रजवी । सू इति सुवतेर्ग्रहणं न सूतिसूयत्योः । प्रसविता ।

मरुक्सद्घसः ॥ ४ । ३ । २५८ ॥

सादिभ्यः साध्वादौ सत्यर्थे मरुग् भवति । समरः अद्मरः । घस्मरः ।

भंजभाससिदो घुरः ॥ ४ । ३ । २५९ ॥

भंजादिभ्यः साध्वादौ सत्यर्थे घुरो भवति । भंगुरं काष्ठं । भासुरं वपुः। मेदुरो नरः ॥

वेत्तिच्छिद्भिदः कित् ॥ ४ । ३ । २६० ॥

विदादिभ्यः साध्वादौ सत्यर्थे किद् घुरो भवति । विद् ज्ञाने । विदुरः । छिदुरः । भिदुरः ।

सर्तीण्नश्जेष्ट्वरप् ॥ ४ । ३ । २६१ ॥

सर्त्यादिभ्यः साध्वादौ सत्यर्थे किद् ट्वरप् भवति । सृत्वरः । इत्वरः । नश्वरः । जित्वरः । सृत्वरी । इत्वरी । नश्वरी । जित्वरी ।

गत्वरः ॥ ४ । ३ । २६२ ॥

गमेः साध्वादौ सत्यर्थे ट्वरप् अलुग्निपात्यते। गत्वरः । गत्वर्यो यौवनश्रियः ॥

नम्कम्प्यजस्कम्पस्मिहिंसदीपो रः ॥ ४ । ३ २६३ ॥

नमादिभ्यः साध्वादौ सत्यर्थे रो भवति । नम्रं मुखं कम्रा युवती । अजस्रं श्रवणं कंप्रा शाखा । स्मेरं मुखं । हिंस्रः पापः । दीप्रः प्रदीपः ।

स्वप्तृषिधृषोङ्नच् ॥ ४ । ३ । २६४ ॥

स्वपादिभ्यः साध्वादौ सत्यर्थे ङ्नज् भवति । स्वप्नक् । तृष्णक् । धृष्णक् ।

भ्यः क्रुक्रुकक्लुकाः ॥ ४ । ३ । २६५ ॥

भ्यः क्रुक्रुकक्लुकाः प्रत्ययाः भवन्ति । भीरुः। भीरुकः ।भीलुकः।

स्थेशभासपिसकसो वरः ॥ ४ । ३ । २६६ ॥

स्थादिभ्यः साध्वादौ सत्यर्थे वरो भवति । स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः । विकस्वरः ।

यायावरश्च ॥ ४ । ३ । २६७ ॥

यातेर्यङन्तात् साध्वादौ सत्यर्थे वरप्रत्यय आकारलुगभावश्च निपात्यते । यायावरः । चशब्दात् साधुधर्मशीलेष्वित्यनुकृष्यते । तेनोत्तरत्र नानुवृत्तिः ।

संविप्राद्भुवोऽनाम्न्युड् ॥ ४ । ३ । २६८ ॥

समादिभ्यः पराद्भुवः इत्यर्थे नाम्न्युड् भवति । संभवतीति संभुः जनिता । विभुः सर्वगतः । प्रभुः स्वामी । अनाम्नीति किम् ? विभुर्नाम कश्चित् ।

मितद्र्वादयः ॥ ४ । ३ । २६९ ॥

मित् द्रु इत्येवमादयः उड् प्रत्ययान्ताः साधवो वेदितव्याः । आदि शब्दः प्रकारार्थे । मितं द्रवतीति मितद्रुः । शंभुः स्वयंभुः । शंभूः स्वयंभूः स्वयंभूरितिक्विन्तौ ।

इत्रः प्वो दैवते ॥ ४ । ३ २७० ॥

पूञो धातोः देवतेव दैवतं तस्मिन्कर्तरि इत्रो भवति । पवित्रोऽर्हन् । स मां पुनातु ।

संज्ञर्षौ करणे ॥ ४ । ३ । २७१ ॥

पुवः करणे इत्रो भवति । संज्ञायां ऋषौ चाभिधेये । दर्भः पवित्रम् । बर्हिः पवित्रम् । यज्ञः पवित्रम् । पवित्रा नदी । ऋषौ पवित्रोऽयमृषी ।

लूधूसूखनसहचरर्तेः ॥ ४ । ३ । २७२ ॥

ल्वादिभ्यः करणे कारके इत्र प्रत्ययो भवति । लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् । अरित्रम् ।

व्ययो द्रोर्घनः ॥ ४ । ३ । २७३ ॥

व्यादिभ्यः परात् हन्तेः करणे अप्रत्ययो घनभावश्च

निपात्यते । विहन्यतेऽनेनेति विघनः । अयोघनः । द्रुघनः । द्रुघण इति घणातिरजन्तः ग्रहणार्थः प्रकृत्यन्तरम् ।

स्तम्बाद् घ्नश्च ॥ ४ । ३ । २७४ ॥

स्तम्बात् पराद्धन्तेः कः प्रत्ययः चकारात् पुनश्च करणे कारके निपात्यते । स्तंबो हन्यतेऽनेनेति स्तंबघ्नः । स्तंबघनः । स्वभावात्पुंसि नपुंसके च घनशब्दः तेन स्त्रियां क एव स्तंबघ्ना इषीका । असमत्वात् क्तिनादिरपि । स्तंबहतिः स्तंबहननी । करणस्य कर्तृविवक्षायां टगपि स्तंबघ्नी इषीका

वघ्नपरिघं ॥ ४ । ३ । २७५ ॥

वहतेर्यप्रत्ययः परिपूर्वस्य च हन्तेरप्रत्ययः घादेशश्च करणे कारके निपात्यते । वहंत्यनेनेति वघ्नम् । परिहन्यतेऽनेनेति परिघम् ॥

प्वो हलक्रोडमुखे त्रट् ॥ ४ । ३ । २७६ ॥

प्वः हलमुखे क्रोडमुखे च करणे त्रड्भवति । क्रोडः सूकरः हलस्य पोत्रं । सूकरस्य पोत्रं मुखमित्यर्थः ।

दाब्नीशस्युज्युसिचिसस्तुतुदमिहनहदन्शपतः ।४।३। २७७ ।

दाबादिभ्यः करणे त्रट् भवति । दाति लुनात्यनेनेति दात्रम् । नेत्रम् । शस्त्रम् । योक्त्रम् । योत्रम् । सेक्त्रम् । सेत्रम् । स्तोत्रम् । तोत्रम् । मेढ्रम् । नद्ध्री दंष्ट्रा अणादित्वादाङ् पत्रम् ।

धात्री ॥ ४ । ३ । २७८ ॥

धेटो धाञश्च करणे त्रट् निपात्यते । धयते तामिति धात्री स्तनदायिनी । दधति तां व्याधिष्विति धात्री । आमलकी ।

मतिपूजार्थञीच्छील्यादिभ्यः क्तः ॥ ४ । ३ । २७९ ॥

सतीति वर्तते । मत्यर्थेभ्यः पूजार्थेभ्यः ञिङ्भ्यः शीलादिभ्यश्च सत्यर्थे क्तो भवति । मतिरिच्छा ज्ञानं च, इच्छा-

र्थेभ्यः राज्ञां मतः—राज्ञामिष्टः । ज्ञानार्थेभ्यः राज्ञां ज्ञातः । राज्ञां बुद्धः । राज्ञां विदितः तवापि । पूजार्थेभ्यः—राज्ञां पूजितः । राज्ञामर्चितः । ञितः—ञिमिदा मिन्नः । ञिक्ष्विदा—क्ष्विण्णः । ञिधृष:—धृष्टः । शीलयादिभ्यः श्लोकः—

शीलितो रक्षितः क्षान्तः आक्रुष्टो जुष्ट उद्यतः ।
संयतः शयितः स्तुष्टो रुष्टो रुषित आसितः ॥
कांतोभिव्याहृतो हृष्टो दृप्तस्तृप्तस्मृतस्तथा ।
लिप्तश्लिष्टश्च दयत इत्याद्याः सति लक्षितः ॥
कष्टं भविष्यतीत्याहुः गम्यादिषु दृश्यतां ।

केचिद्यत्रभूतकालता तत्र क्तीदं नारंभते ॥

उणादयः ॥ ४ । ३ । २८० ॥

बहुलमिति वर्तते । धातोः सत्यर्थे वर्तमानादुणित्येवमादयो बहुलं भवंति । कारुः । पायुः करंडः । वरंडः । जरंडः-ऋपिडः । ऋपिडुः । सर्पींषि । यजूंषि । द्युः । कृसरः । धूसरः । शंखः । षंडः । बहुलग्रहणं प्रयोगानुसरणार्थं । तेन ये येभ्यो धातुभ्यः यस्मिन्नर्थे यथा दृश्यन्ते ते तेभ्यः तस्मिन् तथा भवन्तीति धात्वर्थकार्यनियमः सिद्धो भवति ॥

गम्यादिर्वत्स्यति ॥ ४ । ३ । २८१ ॥

गम्यादिः शब्दगणः इनादिप्रत्ययान्तः वत्स्यति धात्वर्थे साधुर्वेदितव्याः । गमी । आगामी । भावी । प्रस्थायी । प्रतिबोधी । प्रयायी । प्रतियायी । कष्टं पदेसामान्यवृत्तावप्यर्थात्प्रकरणात् शब्दांतरसन्निधेर्वा विशेषप्रतिपत्तिर्भवति । श्वो गमी ग्राममिति सवाक्यार्थं ॥

लृट् ॥ ४ । ३ । २८२ ॥

वत्स्यंत्यर्थे वर्तमानाद्धातोः लृट् प्रत्ययो भवति । करिष्यति हरिष्यति ।

परिदेवनानद्यतने लुट् ॥ ४ । ३ । २८३ ॥

भविष्यदर्थे वर्तमानाद्धातोर्लुट् भवति । लृटोपवादः परिदेवनेऽनद्यतने च । परिदेवनमनुशोचनं । परिदेवन | मान श्चेत् प्रयुंक्ते । अनद्यतने च यदि धात्वर्थो भवति । इयं नु कदा गंता यैत्रं पादौ निदधाति । अयं नु कदा अध्येता य एवमनभियुक्तः । अनद्यतने–श्वो गंता । श्वोऽध्येता । भविष्यत्सामान्ये लृड् बाधनार्थं परिवेदनग्रहणं । श्व करिष्यति । मासे करिष्यतीति पदं भविष्यत्सामान्ये एवमनद्यतन इति बहुव्रीहेः तेनेह न भवति । अद्य श्वो गमिष्यति ।

पुरायावतोर्ल्लट् ॥ ४ । ३ । २८४ ॥

वत्स्यंतीत्येव वर्तते । वत्स्यंत्यर्थे वर्तमानाद्धातोः पुरा यावतो रव्यययोरुपपदयोर्लट् भवति । लृट्लुटोर्बाधकः । पुराधीते । पुरा भुंक्ते । पुरा श्वोऽधीते । पुरा श्वो भुंक्ते । यावदधीते । यावद्भुंक्ते । यच्छ्वोऽधीते । यावच्छ्वो भुंक्ते । लाक्षणिकत्वादिह न भवति । प्रत्युद्यातथा पुरा मानयिष्यते । नगरेणेत्यर्थः । यावद्दास्यते तावद्भोक्ष्यते । यत्परिमाणमित्यर्थः ।

कदाकर्ह्योर्वा ॥ ४ । ३ । २८५ ॥

कदाकर्ह्योरुपपदयोर्वत्स्यंत्यर्थे लड्वा भवति । पक्षे लृट्लुटावपि । कदा भुंक्ते । कदा भोक्ष्यते । कदा भोक्ता । कर्हि भुंक्ते । कर्हि भोक्ष्यते । कर्हि भोक्ता । कदा भुंक्ते । कर्हि भुंक्ते । इति वत्स्यंद्विवक्षा एवेयं । सद्विवक्षायां हि शत्रा न शावपि प्रसज्येयातां ।

किं वृत्तेरर्थित्वे ॥ ४ । ३ । २८६ ॥

वत्स्यंत्यर्थे किंवृत्ते उपपदेऽर्थित्वे प्रष्टुर्लिप्सा यां लड्वा भवति । लृटलुटावपि । को भवतां भिक्षां ददाति । दास्यति

याताम् । को भवतो भोजयति भोजयिष्यति । भोजयिता । कतरो भिक्षां ददाति दास्यति दाता वा । कतमो भिक्षां ददाति, दास्यति, दाता वा । वृत्तग्रहणे तद्विभक्त्यन्तं इतर-इतमौ चेति वैयाकरणस्मृतिः । तेन किंतरां । किंतमां । किंगौः । किंपुरुष इत्यादौ न भवति । अर्थित्व इति किम् ? कः पाटलिपुत्रं गमिष्यति । गंता ।

अर्ध्यासिद्धौ ॥ ४ । ३ । २८७

अर्घ्यो दात्वा देयं वा अर्घ्यस्य अर्घ्याद्वा सिद्धिः फलावाप्तिस्तस्यामकिंवृत्तेऽपि वर्त्स्यत्यर्थे धातोर्लङ् वा भवति । लृट् लुटावपि । यो भक्तं ददाति दास्यति, दाता वा स स्वर्गं गच्छति । गमिष्यति, गन्ता वा । दातुर्दानात् स्वर्गसिद्धिमाचक्षाणको दाने प्रवर्तयति ॥

लेटि हेतौ ॥ ४ । ३ । २८८ ॥

लेडन्त उपपदे लेटो लेडन्तार्थस्य हेतौ निमित्ते वर्त्स्यत्यर्थे लङ्वा भवति । लृटलुटावपि । उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता । अथ त्वं सूत्रमधीष्व । अथ त्वमनुयोगमादत्स्व । उपाध्यायागमनमधीष्वेत्याद्यर्थस्य निमित्तम् ॥

लेङ् चोर्ध्वमौहूर्तिके ॥ ४ । ३ । २८९ ॥

ऊर्ध्वंमुहूर्ताद्भवमूर्द्ध्वमौहूर्तिकम् । प्रत्यासन्नमित्यर्थः । निपातनात्सिद्धिः । लेडंत उपपदे लेटो लेडंतार्थस्य हेतौ ऊर्द्ध्वमौहूर्तिके वर्त्स्यत्यर्थे वर्तमानाद्धातोर्लङ्लङ्वा भवतः । पक्षे लृट्लुटावपि । ऊर्ध्वं मुहूर्तादुपरिमुहूर्तस्य परं मुहूर्तात् शीघ्रमुपाध्यायश्चेत् आगच्छति । आगमिष्यति । आगन्ता । अथ त्वं सूत्रमधीष्व । अनुयोगमादत्स्व ।

इति शब्दानुशासने चिंतामणौ वृत्तौ ।

चतुर्थाध्यायस्य तृतीयः पादः ।

अथ चतुर्थाध्यायस्य चतुर्थःपादः ।

पद्रुजो घञ् । ४ । ४ । १ ॥

पदिरुजिभ्यां घञ् प्रत्ययो भवति । पद्यतेऽसाविति पादः । रुजत्यसाविति रागः ।

सृस्थिरव्याधिमत्स्यबले ॥ ४ । ४ । २ ॥

सर्तेर्द्धातोः स्थिरव्याधिमत्स्यबलेषु कर्तृषु घञ् भवति । स्थिरे-चंदनसारः चिरस्थायी पदार्थ उच्यते । व्याध्यादौ अतीसारो व्याधिः । विसारो मत्स्यः । सारो बलः ।

अकर्तरि ॥ ४ । ४ । ३ ॥

भावे कर्तरि वर्जिते च कारके धातोर्घञ् भवति । पचनं पाकः । त्यागः । रागः । प्रास्यन्ति तमिति प्रासः । प्रसेवः दायो दत्तः । लाभो लब्धः । दाश्यते तस्मै इति दासः । आहरंत्यस्मादित्याहारः । कृद्वाच्यो भावोऽधात्वर्थः । घर्मः सिद्धः । तानामलिंगसंख्यायोगीद्रव्यवद्धात्वर्थस्तु साध्यता नाम तद्भागी ।

इङः ॥ ४ । ४ । ४ ॥

इङः कर्तरि घञ् भवति । अचोऽपवादः । अध्यायः । उपेत्यधीयते तस्य इत्युपाध्यायः । उपाध्यायी इति बह्वादित्वात् घञ् इङि च वा भवति ।

श्रो वायुवर्णनिवृत्ते ॥ ४ । ४ । ५ ॥

श्रि इत्येतस्मादकर्तरि वायौ वर्णे निवृते चाभिधेये घञ्भवति । निवृत्तं निवारणमावारकमित्यर्थः शारो वर्णः शबलः । निशारो निवृत्तं गौरी वा कृतनिसारः । प्रायेण शिशिरे कृशः । अन्यत्र शरः ।

पूलूनीरोनिरभ्यवोपसर्गे ॥ ४ । ४ । ६ ॥

निरादिषूपसर्गे चोपपदे यथासंख्यं प्वादिभ्यो कर्तरि घञ्भवति । निष्पावः । अभिलावः । अवनायः । संरावः । विरावः । निरादाविति । किम् ? पवः । लव । नयः । रवः ।

भूश्र्यदोऽच् ॥ ४ । ४ । ७ ॥

उपसर्गोपपदे भ्वादिभ्योऽकर्तरि अज्भवति । घञोऽपवादः । चकारः घस्लृङ्वर्जिति ग्रहणार्थः । प्रभवः । विभवः । संभवः । प्रश्रयः । प्रतिश्रयः । संश्रयः । प्रघसः । विघसः । संघसः । उपसर्ग इति किम् ? भावः । श्रायः घासः ।

नौ णश्चादः ॥ ४ । ४ । ८ ॥

नौ उपसर्गे सत्यघेरकर्तरि णो भवति । अच्च । न्यादः निघसः ।

स्वनन्दगदक्वणपठो वा ॥ ४ । ४ । ९ ॥

स्वनादिभ्यो कर्तरि नावुपपदे उपसर्गे सति अज्भवति वा । पक्षे घञ् । निस्वनः । निस्वानः । निनदः । निनादः । निगदः । निगादः । निक्वणः । निक्वाणः । निपठः । निपाठः ॥

यमस्सन्निव्युपे ॥ ४ । ४ । १० ॥

समादौ उपसर्गे सति यमेर्धातोरच् वा भवति । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः ॥

क्वणो वैणे ॥ ४ । ४ । ११ ॥

वीणायां भवः वैणः । वैणेऽर्थे क्वणेर्धातोरुपसर्गे सति अकर्तरि अज्भवति वा । प्रक्वणः । प्रक्वाणः वीणायाः । वैण इति किम् ? प्रक्वाणः शृंखलस्य ॥

घोः किः ॥ ४ । ४ । १२ ॥

वेति निवृत्तं । घुसंज्ञकाद्धातोरुपसर्गेऽकर्तरि किर्भवति । प्रधिः । विधिः । उपधिः । निधिः । समाधिः । आधिः । घोरिति किम्? निधायः केदारस्य । अवदायो मुखस्य ।

आप्यादाधारे ॥ ४ । ४ । १३ ॥

आप्यात्कर्मणः परात् घोरकर्तरि आधारे किर्भवति । जलं धीयतेऽस्मिन्निति जलधिः । शरधिः । इषुधिः । बालधिः ।

य्वृगम्वश्वृरणृदॄग्रहोऽच् ॥ ४ । ४ । १४ ॥

इ उ ॠ इत्येतदन्तेभ्यः गमादिभ्यश्चाकर्तरि अच् भवति । घञोऽपवादः । इ—चयः । जयः । क्षयः । क्रयः । उ—नवः । स्तवः । लवः । पवः । ॠ—तरः । दरः । शरः । गमादिः गमः । वशः । वरः । रणः । आधरः । ग्रहः । चकारः अक्यव्घञ चेति विशेषणार्थः ।

समुद्व्यजः पशौ ॥ ४ । ४ । १५ ॥

सम् उदित्येतयोरुपपदयोरजेर्धातोरकर्तरि अज्भवति पशौ पशुविषयश्चेत् स धात्वर्थो भवति । समजः । पशूनां समवाय इत्यर्थः । उपजः—पशूनां प्रेरणमित्यर्थः । समुदीति किम्? व्याजः पशूनां । पशाविति किम्? समूहो मनुष्याणां । उदाजः क्षत्रियाणाम् ।

सर्तिग्लहपणः प्रजनाक्षेयत्वे ॥ ४ । ४ । १६ ॥

सर्त्यादिभ्योऽकर्तर्यच् भवति यथासंख्यं प्रजनादिषु । प्रजने सर्तेः । गवामुपसरः । प्रजनो गर्भग्रहणं तदर्थं स्त्रीगवीषु । पुंगवानामुपगम उच्यते अक्षविषयेऽर्थे ग्लहः । अक्षन्यग्लहः । ग्रहणमित्यर्थः । इयत्वे पणः । मूलकपणः । शाकपणः । मूलकादीनामियत्तापरिच्छिन्नः संव्यवहारार्थो मुष्टिरुच्यते । अन्यत्र उपसारः । ग्लाहः । पाणः ।

प्रमदसंमदौ हर्षे ॥ ४ । ४ । १७ ॥

प्रमदसंमदावजंतौ निपात्येते हर्षेऽर्थे । प्रमदः कन्यानां संमदः कोकिलानां । अन्यत्र–प्रमादः । संमादः ।

देशेऽन्तर्घनान्तर्घणौ ॥ ४ । ४ । १८ ॥

अंतः पूर्वपदात् हंतेः देशेऽर्थेऽच् घनघणौ चादेशौ निपात्येते । अंतर्हन्यतेऽस्मिन्निति अंतर्घनः । अंतर्घणो वा देशः । अन्यत्र-अंतर्घातः ।

प्रघणप्रघणौ कोष्ठकांशे ॥ ४ । ४ । १९ ॥

प्रपूर्वाद्धंतेः कोष्ठकांशे दीर्घकुड्यंशेऽभिधेयेऽच् घणघाण श्चादेशौ निपात्येते । प्रघाणः । प्रघणः । कोष्ठके बाह्यप्रदेशः ।

घनोद्घनापघनोपघ्ननिघोद्घसंघा मूर्त्यत्याधानाङ्गासन्ननिमितप्रशस्तगणाः ॥ ४ । ४ । २० ॥

घनादयो अजंता निपात्यंते यथासंख्यं मूर्त्यादिषु वाच्येषु । घनो मूर्तिः संहतिः काठिन्यं । अभ्रघनः । दधिघनः । घनंदधीति धर्म्यभिधानं गुणशब्दोऽयं गुणिन्यपि वर्तते । उद्घन्यते तस्मिन्निति उद्घनोऽअत्याधानं । यस्मिन् काष्ठे स्थापयित्वा काष्ठांनि तक्ष्यंते । अपहन्यतेऽनेनेति अपघनोऽङ्गं, पाणिः पादो वा न सर्वं । उपहन्यते समीपमिति ज्ञायत इत्युपघ्नः आसन्नः समीप उच्यते । पर्वतोपघ्नः । ग्रामोपघ्नः । निहन्यते निर्विशेषं निश्चयेन वा ज्ञायत इति निघः निमितः, समारोह परिणाह उच्यते । निघाः वृक्षाः । निघाः शालयः । उद्धन्यते उत्कर्षेण ज्ञायते इत्युद्घः प्रशस्तः । संहतिः संघः गणः प्राणिसमुदायः । संघातो मनुष्याणामिति संघातशब्दः समुदायमात्रे ॥

ह्वो वश्चोऽश्विन्यभ्युपे ॥ ४ । ४ । २१ ॥

व्यादौ उपपदे ह्वयतेरकर्तर्यच्प्रत्ययः उश्चादेशश्च वा शब्दस्य भवति । विहवः । निहवः अभिहवः । उपहवः । व्यादिति किम् ? संह्वायः । हव इत्यनिपातनं यङ्लुगर्थं । विह्वो हवः ॥

आङि युद्धे ॥ ४ । ४ । २२ ॥

आङ्युपपदे ह्वयतेरकर्तर्यच् प्रत्ययः उश्चादेशश्च वा शब्दस्य भवति युद्धेऽर्थे । आहूयन्तेऽस्मिन् परस्परमित्याहवो युद्धः । अन्यत्र—आह्वायः । आह्वानम् ॥

निपानमाहावः ॥ ४ । ४ । २३ ॥

आङ् पूर्वात् ह्वः अच् भवति । हावादेशश्च निपात्यते । निपातनं चेद्वाच्यं भवति । निपबंत्यत्रेति निपानमुदकाधारः । पशुशकुनीनां पानाय कृत उच्यते । आहूयंते पशवः पानायात्रेति आहावः । पशूनामाहावः । निपानमित्यर्थः । अन्यत्राह्वायः । आह्वानं ॥

भावेऽनुपसर्गात् ॥ ४ । ४ । २४ ॥

ह्वयतेर्विद्यमानादनुपसर्गादकर्तरि भावे अच्प्रत्ययो श्वादेशश्च वा शब्दस्य भवति । हवः । अन्यत्र–ह्वायः । अनुपसर्गादिति किम् ? प्रह्वायः ॥

मदूव्यधजपः ॥ ४ । ४ । २५ ॥

मदादिभ्योऽनुपसर्गेभ्योऽकर्तर्यच्भवति । मदः । व्यधः । जपः । उपसर्गात्—उन्मादः । आव्याधः । उपजापः ॥

कुणयं हस्स्वनन्यो वा ॥ ४ । ४ । २६ ॥

क्वणादिभ्योऽनुपसर्गेभ्यो अकर्तर्यच्भवति वा । क्वणः । क्वाणः । यमः । यामः । हसः । हासः । स्वनः । स्वानः । नयः । नायः । उपसर्गात् प्रक्वाणः । प्रयामः । प्रहासः । विष्वाणः । प्रणयः । अनुपसर्गात्क्वणो वीणोऽप्ययमेव ॥

आङि रुप्लोः ॥ ४ । ४ । २७ ॥

आङुपपदे रुप्लुभ्यामकर्तर्यज्वा भवति । आरवः । आरावः । आप्लवः । आप्लावः । आङिति किम् ? विरावः । विप्लवः ॥

ग्रहोऽवे वर्षे ॥ ४ । ४ । २८ ॥

अवे उपपदे ग्रहे र्धातोरकर्तर्यज्वा भवति वर्षे—वर्षविषयश्चेद्धात्वर्थो भवति । अवग्रहो वर्षस्य अवग्राहो वर्षस्य । प्रतिबन्धः प्राप्तकालस्य वर्षस्य । अन्यत्र—अवग्रहः पदस्य ॥

प्रे युग्यतुला सूत्रे ॥ ४ । ४ । २९ ॥

प्रे ग्रहेरकर्तर्यज्वा भवति युग्यसूत्रे तुलासूत्रे चार्थे । युगं वहन् युग्यः । अश्वो बलीवर्दो वा प्रग्रहः । प्रग्राहः । युग्यसंयमनरज्जुः । तुलाग्रहणं सूत्रम् । अन्यत्र—प्रग्रह एव ॥

वृर्वस्त्रे ॥ ४ । ४ । ३० ॥

प्रे वृञोऽकर्तर्यज्वा भवति वस्त्रविशेषे अभिधेये । प्रवरः । प्रवारः । अन्यत्र—प्रवरो यतिः ॥

उदि नीश्रिञः ॥ ४ । ४ । ३१ ॥

उदिनीश्रिञ्भ्यामकर्तर्यज्वा भवति । उन्नयः । उन्नायः । उच्छ्रयः । उच्छ्रायः ॥

पूद्रुयौतेर्घञ् ॥ ४ । ४ । ३२ ॥

वेति निवृत्तं । उदि पू द्रु यौतिभ्योऽकर्तरि घञ् भवति । अचोऽपवादः । उत्पावः । उद्द्रावः । उद्यावः ॥

ग्रहः ॥ ४ । ४ । ३३ ॥

उदि ग्रहेऽकर्तरि घञ्भवत्यचोऽपवादः । उद्ग्राहः । उदिति किम् ? ग्रहः । विग्रहः ॥

समि मुष्टौ ॥ ४ । ४ । ३४ ॥

समि ग्रहेर्मुष्टिविषयेऽकर्तरि घञ्भवति । मुष्टिरंगुलिसंनिवेशो न परिमाणं । तत्र माने इति सिद्धत्वात्, अहो मल्लस्य संग्राहः । मुष्टेर्दार्ढ्यमाख्यायते । अन्यत्र—संग्रहः तत्वार्थस्य ॥

युद्रुदोः ॥ ४ । ४ । ३५ ॥

युद्रुदुभ्यः सम्यकर्तरि घञ्भवति । संयावः । संद्रावः । संदावः । समीति किम् ? यवः । द्रवः । उपद्रवः दवः ॥

स्तोर्यज्ञे ॥ ४ । ४ । ३६ ॥

समि स्तौतेरकर्तरि यज्ञविषये घञ्भवति । संस्तुवंत्यत्र इति संस्तावः । छन्दोगानां प्रदेश उच्यते । यज्ञ इति किम् ? संस्तवोऽन्यदृष्टे ॥

परौ ग्रहः ॥ ४ । ४ । ३७ ॥

परौ ग्रहेरकर्तरि यज्ञविषये घञ्भवति । उत्तरपरिग्राहः अधरपरिग्राहः । अन्यत्र—परिग्रहः ॥

न्यवे शापे ॥ ४ । ४ । ३८ ॥

न्यवयोर्ग्रहेरकर्तरि घञ्भवति शापे आक्रोशे । निग्राहो हते जाल्म भूयात् । अवग्राहो हते जाल्म भूयात् । अन्यत्र—निग्रहश्चोरस्य । अवग्रहः पदस्य ॥

लिप्सायां प्रे ॥ ४ । ४ । ३९ ॥

प्रे ग्रहेरकर्तरि घञ्भवति लिप्सायां गम्यमानायां । पात्रप्रग्राहेण चरति । पिंडपातार्थी तु स्रुवप्रग्रहेण चरति दक्षिणार्थी । अन्यत्र-मनसः प्रग्रहः ।

द्रुस्तुस्रोः ॥ ४ । ४ । ४० ॥

प्रे द्रुस्तुस्रुभ्योऽकर्तरि घञ्भवति । प्रद्रावः । प्रस्तावः । प्रस्रावः । प्रे इति किं ? द्रवः । स्तवः । स्रवः ।

स्त्रोऽयज्ञे ॥ ४ । ४ । ४१ ॥

प्रे स्तृञोऽकर्तरि घञ्भवति अयज्ञे न चेत् यागविषयः प्रयोगो भवति । प्रस्तारः । मणिप्रस्तारः । विमानप्रस्तारः । नयप्रस्तारः । अयज्ञे इति किम् ? बर्हिस्तरः ।

वौ प्रथनेऽशब्दे ॥ ४ । ४ । ४२ ॥

वौ स्तृञः प्रथने विस्तीर्णतायामकर्तरि घञ् भवति । अशब्दे न चेत् प्रथनं शब्दविषयं भवति । विस्तारः पटस्य विस्तारो ग्रहस्य । प्रथन इति किं ? विस्तरणस्तृणस्य च्छादमित्यर्थः । अशब्द इति किम् ? अङ्गो द्वादशांगस्य विस्तरः ॥

क्षुश्रोः ॥ ४ । ४ । ४३ ॥

वौ क्षुश्रुभ्यामकर्तरि घञ्भवति । विक्षावः विश्रावः । वाविति किं ? क्षवः । श्रवः ।

व्युपे शीङः क्रमे ॥ ४ । ४ । ४४ ॥

व्युपयोः शीङोऽकर्तरि घञ्भवति क्रमे-क्रमविषयश्चेद्धात्वर्थो भवति तव विशायः । मम विशायः । तव राजोपशायः ॥ मम राजोपशायः । क्रमप्राप्तं पर्यायमाध्यं शयनमुच्यते ॥ क्रमे इति किं ? विशयः । उपशयः ।

हस्तादेयेऽस्तेयेऽनुदश्चेः ॥ ४ । ४ । ४५ ॥

हस्तादेये हस्तेनोपायांतरनिरपेक्षं यदाधातुं शक्यते तद्विषयाच्चिनोतेर्धातोरनुत्पूर्वादकर्तरि घञ् भवति अस्तेये सचेद्धात्वर्थः स्तेये न भवति । स्तेयं चौर्यं । पुष्पप्रचायः फलप्रचायः । गुल्मात् हस्तादेये इति किम् ? पुष्पप्रचयं करोति फलप्रचयं करोति तरुशिखरे । अस्तेये इति किम् ? पुष्पप्रचयः स्तेयेन । अनुद इति किम् ? पुष्पोच्चयः । फलोच्चयः ।

चित्युपसमाधानावासदेहे कश्चादे ॥ ४ । ४ । ४६ ॥

चीयत इति अग्न्याधारः विप्रकीर्णानामेकत्रोपर्युपरि

राशिभावेन करणमुपसमाधानं आवसंति अत्रेति आवासः। निवासः। देहः शरीरं एतेष्वभिधेयेषु चिनोतेरकर्तरि घञ्भवति। आदेशश्च ककारादेशः। चितौ—आकायमग्निं चिन्वीत। उपसमाधाने—महन् गोमयनिकायः। गोमयनिकायः आवासे—ऋषिनिकायः। देहे—जलबुद्बुदकर्मणः कायः। एतेष्विति किं? चयः। काष्ठनिचयः। इत्यत्र बहुत्वमुच्यते शब्देन, न राशिः।

संघेऽनुपरौ ॥ ४ । ४ । ४७ ॥

न विद्यते कस्यचिदुपरि कश्चिद्यस्मिन् सानुपरिस्तस्मिन् संघे प्राणिसमुदायेऽकर्तरि चिनोतेः घञ् भवति। आदेशश्च कः। वैयाकरणनिकायः। तार्किकनिकायः। संघ इति किम्? सारसमुच्चयः। सर्वसमुच्चायः। अनुपराविति किम्? सूकरनिचयः। सूकरा उपर्युपरि निचीयंते।

माने ॥ ४ । ४ । ४८ ॥

माने इयत्तायां धातोरकर्तरि घञ्भवति णाचोपादः। निघास एकः द्वौ निघासौ एकस्तंडुलावक्षायाः। एकस्तंडुलनिश्चाय एकः कारः। द्वौ कारौ। त्रयः कारः। समित्संग्रहः। मुष्टिरित्यर्थः।

न्युदिग्रः ॥ ४ । ४ । ४९ ॥

न्युदोः गिरतेरकर्तरि घञ्भवति। निगारः। उद्गारः। न्युदीति किं? गरः। संगरः।

क्रोधान्ये ॥ ४ । ४ । ५० ॥

न्युदोः किरतेरकर्तरि घञ्भवति धान्यविषये। निकारः उत्कारः। धान्यस्य राशिरित्यर्थः। अन्यत्र—पुष्पोत्करः। फलनिकरः।

नौवुः ॥ ४ । ४ । ५१ ॥

नि इत्येतस्मिन् उपपदे वु इत्येतस्मादकर्तरि घञ्भवति।

धान्ये प्रत्ययांतेन चेत् धान्यविशेषे अभिधेये । निव्रीयंते इति नीवारा व्रीहयः । अन्यत्र-निवरा कन्या ।

इणोऽभ्रेषे ॥ ४ । ४ । ५२ ॥

नौ इणो धातोरभ्रेषे विषयेऽकर्तरि घञ्भवति । भ्रेषः स्वरूपाच्चलनं एष न्यायः एतदत्र साध्वित्यर्थः । अभ्रेषे इति किं ? न्ययगतः पापः ।

परौ क्रमे ॥ ४ । ४ । ५३ ॥

परावितः क्रमविषयेऽकर्तरि घञ्भवति । मम पर्यायो भोक्तुं क्रमेण पदार्थानां क्रियासंबंधः पर्यायः । क्रम इति किं ? पर्ययः कालस्य । अतिपात इत्यर्थः ।

द्यूतेन्यः ४ । ४ । ५४ ॥

परौ णिजः द्यूतविषयेऽकर्तरि घञ्भवति । परिणायेन शारिर्हन्ति । समस्तान्नयनेनेत्यर्थः । अन्यत्र—परिणयः कन्यायाः ।

भ्वोऽवज्ञाने वा ॥ । ४ । ५५ ॥

परौ भवतेरवज्ञानेऽकर्तरि घञ्वा भवति । परिभावो देवदत्तस्य परिभवो देवदत्तस्य । अन्यत्र—समंताद्भवः परिभवः ॥

स्थादिभ्यः कः ॥ ४ । ४ । ५६ ॥

स्थ इत्येवमादिभ्यः कर्तरि को भवति । प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः । सन्तिष्ठन्तेऽस्यामिति संस्था । व्यवतिष्ठतेऽनयेति व्यवस्था । प्रस्नांत्यस्मिन्निति प्रस्नः । प्रतिबन्त्यस्यामिति प्रपा । विद्यतेऽनेनेति विदः । आविद्यते अस्मिन्निति आविदः विहन्यतेऽनेनेति अस्मिन्निति वा विघ्नः आयुद्ध्यतेऽनेनेत्यायुधं । करणाधिकरणयोरनटि प्राप्ते कः । वा इत्येव । आख्यादः ।

घातः विघातः । उपघातः ॥

टुड्वितोऽथुक्त्री ॥ ४ । ४ । ५७ ॥

टु डु इत्येतदितो धातोर्यथासंख्यमकर्तरि अथु क्रि इत्येतौ प्रत्ययौ भवतः । ट्वितः अथुः वेपथुः । श्वयथुः । क्षवथुः । ड्वितः क्रि—पक्त्रिमं । उप्त्रिमं । विहित्रिमं । याचित्रिमं ॥

यजयत्प्रच्छरक्षस्ववृक्षो नः ॥ ४ । ४ । ५८ ॥

यदादिभ्यो कर्तरि नः प्रत्ययो भवति । यज्ञः । यत्नः प्रश्नः । स्वप्नः । रक्ष्णी ॥

विच्छेर्नङ् ॥ ४ । ४ । ५९ ॥

विच्छेरकर्तरि नङ् भवति । विश्नः । एङभावार्थं नङ वचनम् ॥

व्याप्तौ भावेऽनञिन् ॥ ४ । ४ । ६० ॥

धातोः व्याप्तौ क्रियायाः स्वसम्बन्धिनः साकल्येनाभिसम्बधे गम्यमाने भावेऽनञिनौ प्रत्ययौ भवतः । संकुटनं । सांकोटिनं । एषां सरवणं संराविणं सेनायां वर्तते । व्याप्ताविति किम् ? संकोटः । संरावः ॥

स्त्रियां क्तिन् ॥ ४ । ४ । ६१ ॥

धातोरकर्तरि स्त्रियामर्थे क्तिन् भवति । घादेरपवादः दृष्टत्वे । स्तुतिः । चितिः । धृति वृतिः । नकारः वेद्क्तिनो ङीति प्रतिषेधार्थः । स्त्रियामिति किम् ? सर्गः । चयः ॥

लभादिभ्यः ॥ ४ । ४ । ६२ ॥

लभादिभ्योऽकर्तरि स्त्रियां क्तिन् भवति । लब्धिः । उपलब्धिः । टित्वादङपि । उपलभा आप्तिः । राद्धिः । दीप्तिः । स्रस्तिः । ध्वस्तिः कुंचेः निकुचितिः । ऋर्तेः शिरोऽर्तिः ॥

श्रुयजिस्तुभ्यः करणे ॥ ४ । ४ । ६३ ॥

स्त्व्यादिभ्योऽकर्तरि स्त्रियां करणे कारके क्तिन् प्रत्ययो भवति । अनडपवादः । स्तवंत्यनयेति स्तुतिः । इच्छन्त्यनयेति इष्टिः । यजंत्यनयेति इष्टिः । स्तुवंत्यनयेति स्तुतिः ॥

गापापचो भावे ॥ ४ । ४ । ६ ॥

गादिभ्योऽकर्तरि स्त्रियां भावे क्तिन् भवति अङपवादः । संगीतिः । उपगीतिः । प्रगीतिः । पक्तिः ॥

स्थो वा ॥ ४ । ४ । ६५ ॥

तिष्ठतेरकर्तरि स्त्रियां भावे क्तिन्वा भवति । प्रस्थितिः । वावचनादङपि । आस्था । व्यवस्था । णिवङ्भ्यां तु परत्वा द्वाध्यते ॥

व्यतिहारे ञः ॥ ४ । ४ । ६६ ॥

व्यतिह्रियत इति व्यतिहारः परस्परसम्बन्धिहरणं तस्मिन्नर्थे धातोरकर्तरि स्त्रियां भावे ञो वा भवति । व्यावक्रोशी वर्तते । व्यावकृष्टी वर्तते । व्यावलेखी । व्यावलावी व्यवहारी वर्तते ॥ अञिनो ङिणति अणंतस्य प्रयोगः । स्त्रियामिति किम् ? व्यतिहारो वर्तत्ते ।

णयुक्षः ॥ ४ । ४ । ६७ ॥

णयंतादुक्षेश्च धातोर्व्यतिहारेऽर्थे कर्तरि स्त्रियां भावे ञो नित्यं भवति अनाकारापवादः । व्यातिचोरि । व्यावचर्चि व्यात्युक्षिवर्तत्ते । योगविभागो नित्यार्थः ।

व्रज्यजः क्यप् ॥ ४ । ४ । ६८ ॥

व्रजयजिभ्यामकर्तरि स्त्रियां भावे क्यप् भवति । व्रज्या इज्या ।

नाम्नि भृञः ॥ ४ । ४ । ६९ ॥

भृञोऽकर्तरि स्त्रियां भावे नाम्नि क्यप् भवति । भृत्या

नाम्नीति किं ? भृतिः । भाव इति किम् ? भार्याः ।

समजनिषदनिपद्मनविदीण्घञ्शीङः ॥ ४ । ४ ७०॥

भाव इति निवृत्तः ॥ समजादिभ्योऽकर्तरि स्त्रियां क्यप् भवति नाम्नि । समजंति तस्यां समज्या । निषद्या । निपद्या । मन्या । विद्या । इत्या । सुत्या ॥ शय्या । भृतिः । भृतिः । समितिः ॥ आसुतिः । इति बहुलाधिकारात् ॥

कृञश्शक्तिन् च ॥ ४ । ४ । ७१ ॥

कृञोऽकर्तरि स्त्रियां शक्तिनौ भवतः चाकारात् क्यप् च । क्रिया । कृतिः । कृत्याः ।

सम्पदादिभ्यः क्तिन् क्विप् ॥ ४ । ४ । ७२ ॥

संपदादिभ्योऽकर्तरि स्त्रियां क्तिन्क्विपौ भवतः । संपत्तिः विपत्तिः । आपत्तिः । प्रतिपत्तिः । संवित्तिः । क्विप्—संपत विपत् । आपत् प्रतिपत् । संवित् । परिषत् । आशीः ।

यूतिजूतिसातिहेतिकीर्त्यटाट्यामृगयेच्छाया- च्जाकृपाः ॥ ४ । ४ । ७३ ॥

यूत्यादयः शब्दाः अकर्तरि स्त्रियां निपात्यंते । इच्छेति भावे यूतिः । जूतिः । युज्या । सातिः स्यतेः । हेतिः हंतेः । हिनोतेर्वा । कीर्तिः कीर्तयतेः । अटाट्या अटते । मृगया मृगयतेः । इच्छा इच्छतेः । याच्ञा याचतेः । कृपा कृपतेः ।

ग्लाज्याहो निः ॥ ४ । ४ । ७४ ॥

ग्लाज्याहाभ्योऽकर्तरि स्त्रियां निर्भवति । ग्लानिः । ज्यानिः । हानिः ।

णिवेत्त्या सश्रन्थघट्टवंदोऽनः ॥ ४ । ४ । ७५ ॥

णयंतेभ्यः वेः-ठ्यादिभ्याश्चाकर्तरि स्त्रियां अनो भवति ।

कारणा । हारणा । कामना । लक्षणा । भावना । वेदना । आसना । श्रंथना । घट्टना । वंदना । आस्या इति ध्यण् ।

इषोऽनिच्छायाम् ॥ ४ । ४ ७६ ॥

इषः अनिच्छायामर्थेऽकर्तरि स्त्रियामनो भवति । एषणा । अन्वेषणा । गवेषणा अनिच्छायामिति किं ? इष्यते इति इष्टिः । इच्छेति भावे ॥

परेर्वा ॥ ४ । ४ । ७७ ॥

परिपूर्वादिषेः अनिच्छायामकर्तरि स्त्रियामनो वा भवति पर्येषणा । परिष्टिः ॥

सृचरो यः ॥ ४ । ४ । ७८ ॥

परेः सृचराभ्यामकर्तरि स्त्रियां यो भवति ॥ परिसर्या ॥ परिचर्या ॥ परेरिति किं ? संसृतिः ॥ चूर्तिः ॥

जागुरश्च ॥ ४ । ४ । ७९ ॥

जागर्तेरकर्तरि स्त्रियामप्रत्ययो भवति यश्च ॥ जागरा ॥ जागर्या ॥

प्रत्ययात् ॥ ४ । ४ । ८० ॥

प्रत्ययांतात् स्त्रियामकर्तरि अप्रत्ययो भवति । गोपाया । चिकित्सा । तितिक्षा । चिकीर्षा । कडूया । लेलूया । पुत्रीया । पुत्रकाम्या ॥

गुरोर्हलः ॥ ४ । ४ । ८१ ॥

गुरुवतो हलन्ताद्धातोरकर्तरि स्त्रियामप्रत्ययो भवति । कुंडा हुंडा । शिक्षा । भिक्षा । ईहा । ऊहा । चेष्टा । ईडा । सेवा । गुरोरिति किम् ? निपठितिः । निगृहीतिः ॥

णिच्चिन्तिपूजिकथिकुंबिचर्च्यन्नर्घोऽङ् ॥ ४ । ४ । ८२ ॥

षितः चिन्त्यादिभ्योऽतः पूर्वाच्च दाञोऽकर्तरि स्त्रियामङ्

भवति । जृष्—जरा । क्षिप्—क्षिया । घटिप्—घटा । व्यथिप्—व्यथा । चिन्त्यादेः—चिन्ता । पूजा । कथा । कुम्बा । चर्चा । अन्तर्द्धा अन्तर्धिरिति तिरोऽन्तर्धाविति सिद्धम्॥

उपसर्गादातः ॥ ४ । ४ । ८३ ॥

उपसर्गात्परात् आकारान्ताद्धातोरकर्तरि स्त्रियामङ् भवति । प्रज्ञा । प्रदा । उपदा । आधा । उपसर्गादिति किम्? धत्तिः । श्रद्धेति । प्रज्ञाश्रद्धार्चेति सिद्धम् ॥

भिदादयः क्वचित् ॥ ४ । ४ । ८४ ॥

भिदादयः शब्दाः अङन्ता क्वचिदकर्तरि स्त्रियामर्थे साधवो भवन्ति । भिदा विदारणे । भित्तिरन्या । छिदा द्वैधीकरणे । छित्तिरन्या । विदा विचारणे । वित्तिरन्या । आरा शस्त्रयां अर्त्तिरन्या । धारा प्रपतने धृतिरन्या । गुहा गिर्योषध्योः । गूढिरन्या इत्यादयः ॥

संज्ञाभावे ण्वुः ॥ ४ । ४ । ८५ ॥

धातोरकर्तरि स्त्रियां संज्ञायां भावे च क्वचित् ण्वुर्भवति । प्रच्छर्द्दिका प्रवाहिका । विच्छर्दिका । एवं नामानोऽध्यायः । उद्दालकपुष्पभंजिका । वारणपुष्पभंजायिका । एव नामानः क्रीडा । भावे—का नाम आसिका । अन्वेषीह मानेषु । का नाम शायिका अन्वेष्य दीयानेषु क्वचिदिति वचनात् शिरोऽर्तिः । शिरोभितप्तिः । ईक्षा । ईहा ॥

प्रश्नाख्याने वेञ् ॥ ४ । ४ । ८६ ॥

धातोरकर्तरि स्त्रियां प्रश्ने आख्याने च प्रश्नस्य प्रतिवचने इञ् ण्वुश्च भवतः । वाग्वचनाद्यथाप्राप्तं च । कां कारीं कारिकां । क्रियां कृतिं । कृत्यां अकार्षीः । सर्वां कारीं कारिकां ।

कृतिः । कृत्याः । अकार्षं । एवं गणिं गणिकां । गणनां । पाचीं । पाचिकां । पक्तिं । पाठिं । पाठिकां । पठितिं ॥

पर्यायोत्पत्त्यर्हणे णवुः ॥ ४ । ४ । ८७ ॥

धातोरकर्तरि स्त्रियां पर्यायादौ णवुर्भवति क्तिन्नाद्यपवादः । पर्याये—भवतः आसिका शायिका अग्रगामिका । आसनादिपर्याय इत्यर्थः । उत्पत्तौ—इक्षुभक्षिका पयः पायिका मेदमादि । अर्हणमर्हः अत्र—अर्हति भवानिक्षुभक्षिकामोदनभोजिकां । दधिपायिकां । ऋणे—इक्षुभक्षिकां मे धारयसे ॥

नञोऽनिश्शापे ॥ ४ । ४ । ८८ ॥

नञः पराद्धातोरकर्तरि स्त्रियां शापे अनिर्भवति । क्तिन्नाद्यपवादः । अकरणिः । अप्रयाणिः । अगमनिः । ह ते वृषल भूयात् । नञ इति किम् ? मृतिः ते जाल्म भूयात् । शाप इति किम् ? । अकृतिः कटस्य ॥

नभावे क्तोऽभ्यादिभ्यः ॥ ४ । ४ । ८९ ॥

बिभेत्यादिवर्जितेभ्यो नभावे नपुंसके भावे क्तो भवति । घञाद्यपवादः । हसितं । जल्पितं । शयितं । आसितम् । छात्रस्य शोभनं । नभ्रग्रहणं किम् ? हसः । हाः । अभ्यादिभ्य इति किम् ? भयं । वर्षं ॥

करणाधारे चानट् ॥ ४ । ४ । ९० ॥

अभ्यादिभ्यः करणे आधारेऽधिकरणे चकारान्नब् भावे चार्थेऽनड् भवति । घञोऽपवादः । करणे—निचयनी । इध्मवृश्चनः । फलशातनः । अधिलवनः । श्मश्रुकर्तनः । आधारे—शयनम् । आसनं । अधिकरणं । गोदोहनी । तिलपिंडनी । सक्तुधानी । राजधानी । नभावे—हसनं । जल्पनं । शयनं । आसनं । राजभोजनाः शालयः । राजाच्छादना । निवासांसीति क्रुद्बहु-

त्वमिति सिद्धं । ष्ठीविसिव्योरनटिकारस्य पक्षे दीर्घः । निष्ठीवनं । निष्ठेवनं । सीवनं । सेवनमिति केचित् ॥

पुंनाम्नि घः प्रायः ॥ ४ । ४ । ८१ ॥

पुल्लिङ्गे नाम्नि धातोः करणाधारयोः घो भवति । प्रायः—क्वचिन्न भवतीत्यर्थः । करणे-प्रच्छाद्यतेऽनेनेति प्रच्छदः । प्लवः । करः । अधिकरणे एत्यस्मिन् कुर्वन्त्याकरः । आलवः । आप्लवः । पुंनाम्नीति किम् ? हरणी दंडः । पुंग्रहणं किम् ? विचयनी । प्रसादनं । प्राय इति किम् ? दोहनः प्रसादनः । घकारः घेद्यदिति विशेषणार्थः ॥

गोचरसञ्चरकषनिकषखलभगवहव्रजव्यजा-
पणनिगमम् ॥ ४ । ४ । ८२ ॥

गोचरादयः शब्दाः करणाधारयोः पुंनाम्नि घांता निपत्यंते । हलो घञोपवादः । गावश्चरंत्यस्मिन्निति गोचरः । संचरत्यनेनेति संचरः । कषन्ति तस्मिन्निति कषः । निकषंत्यस्मिन्निति निकषः । खलः । भगः । वहः । व्रजः । व्यजः । आपणः । निगमः । पदमिति सुङ्पदमिति सिद्धम् ॥

हलो घञ् ॥ ४ । ४ । ८३ ॥

हलन्ताद्धातोः करणाधारयोः पुंनाम्नि घञ्भवति । घापवादः । लेखः । वेदः । वेष्टः । बन्धः । नेगः । वेगः । अपामार्गः । आरामः । प्राशादः । आपाकः । प्राय इति किम् ? आकषः । दोहनः ॥

तृस्त्रो वात् ॥ ४ । ४ । ८४ ॥

अवात् तृस्तृभ्यां करणाधारयोः पुंनाम्नि घञ्भवति । अवतारः । अवस्तारः ॥

समश्च ह्वः ॥ ४ । ४ । ८५ ॥

समवाभ्यां हृञः करणाधारयोः पुंनाम्नि घञ्भवति । संहारः । अवहारः ॥

जारदाराध्यायन्यायोद्यावानायाऽऽधा-
रावायाः ॥ ४ । ४ । ८६ ॥

जारादयः शब्दाः करणाधारयोः पुंनाम्नि घञन्ता निपात्यन्ते । जीर्यतेऽनेनेति जारः । दीर्यतेऽघमानेभिरिति दाराः । अधीयतेऽस्मिन्निति अध्यायः । नियन्त्यनेनेति न्यायः । उद्युवन्त्यनेनेति उद्यावः । आनीयतेऽनेनेति आनायः । आधीयतेऽस्मिन्निति आधारः । एत्यवयवन्त्यस्मिन्निति आवायः ॥

उदङ्कोऽजले ॥ ४ । ४ । ८७ ॥

उत्पूर्वादंचतेर्घञ् निपात्यते करणाधारयोः पुंनाम्नि अजले विषये—जलं चेत्तेन नोच्यते । तैलोदंकः । घृतोदंकः । ऽजल इति किम्? जलोदंचनः । उदकोदंचनः । जलप्रतिषेधार्थारंभः ।

खनोऽडडरेकेकवकाश्च ॥ ४ । ४ । ८८ ॥

खनेः करणाधारयोः पुंनाम्नि अ ड डर इक इकवकाः प्रत्यया भवंति चकारात् घञ् च ॥ आखनः । आखः । आखरः । आखनिकः । आखनिकवकः । घञि—आखानः ।

दुस्स्वीषतः कृच्छ्राकृच्छ्रे खः ॥ ४ । ४ । ८९ ॥

करणाधार इति निवृत्तं । कृच्छ्रं दुःखं अकृच्छ्रं सुखं कृच्छ्रार्थवृत्तेर्दुरः अकृच्छ्रार्थवृत्तिभ्यां सुईषद्भ्यां पराद्धातोः खप्रत्ययो भवति । घञाद्यपवादः । संभवापेक्षं विशेषणं । दुःखेन शय्यत इति दुश्शयं । सुखेन शय्यत इति सुशयं । ईषच्छयं । भवता दुःकरः । सुकरः । ईषत्करः कटो भवता । कृच्छ्राकृच्छ्र इति किम्? ईषल्लभ्यं । अल्पलभ्यं इत्यर्थः । खकार उत्तरत्र समर्थः ।

च्वौ कर्ता प्याद्भूकृञः ॥ ४ । ४ । १०० ॥

कृच्छ्राकृच्छ्रार्थेभ्यः दुः सु ईषद्भ्यः परात् कर्तृवाचिनः आप्यात् कर्मवाचिनश्च च्वौ च्व्यर्थे वर्तमानात् परात्त्पाद्यथासङ्ख्यं भवतेः कृञश्च खो भवति । दुःखेन अनाढ्येन आढ्येन भव्यं दुराढ्यंभवम् । सुखेन अनाढ्येन आढ्येन भव्यं स्वाढ्यंभव । ईषदाढ्यं भवं भवता । दुःखेनानाढ्य आढ्यं क्रियते दुराढ्यंकरः । स्वाढ्यंकरः । ईषदाढ्यंकरः देवदत्तो भवता सुकटंकराणि वीरणानि । सुकरः कटो वीरणैरिति वीरणानां करणविवक्षा । च्वाविति किम् ? दुःखेनाढ्यः क्रियते ।

आतो ऽनः ॥ ४ । ४ । १०१ ॥

कृच्छ्राकृच्छ्रार्थेभ्यः दुःसुईषद्भ्यः परादाकारांताद्धातोरनप्रत्ययो भवति । खापवादः । दुर्ग्लानम् । सुग्लानम् । ईषद्ग्लानम् दुर्म्लानम् । सुम्लानं । ईषत्म्लानं । दुर्ज्ञानं । सुज्ञानम् । ईषज्ज्ञानं । दुष्पानं । सुपानं । ईषत्पानं । दुर्दाना । सुदाना ईषद्दाना ग्लौ ।

शास्युदिदृशिधृषिमृषेः ॥ ४ । ४ । १०२ ॥

कृच्छ्राकृच्छ्रार्थेभ्यः दुः सु ईषद्भ्यः शासादिभ्योऽनो भवति । दुःशासनः । दुर्योधनः दुर्दर्शनः । दुर्धर्षणः । दुर्मर्षणः । हृदि दुर्मर्षणमच्वहन् सकोपं । योगविभागादयमनित्यो वेदितव्यः । तेन दुर्दर्शो हि राजा । कार्यार्थविपर्यासमासन्नैः । कार्यतेऽधर्मन्विष्ट । दुर्धर्षभिरुष्टानो मुखत्वरमिति सिद्धम् ।

वाशंस्ये सद्भूतवत् ॥ ४ । ४ । १०३ ॥

प्राप्तुमिष्टमाशंस्यमभिप्रेतं तस्मिन्नर्थे धातोः सद्वद्भूतवच्च वा प्रत्ययो भवति । आशंस्यस्य भविष्यत्वादयमतिदेशः । वावचनाद्यथाप्राप्तं च । उपाध्यायश्चेदागच्छति । आगमत् । आगतः । आगमिष्यति । आगन्ता । युक्ता । अधिमहे । अध्यनीष्महे ।

एतदधीतं । अध्येष्यामहे । अध्येतास्महे । सामान्याति । देशोऽयं । न विशेषस्येति लङ्लिटौ न भवतः । आशंस इति किम् ? उपाध्याय आगमिष्यति । कदा देवदत्तागतोऽसि अयमागच्छामि । आगच्छंतमेव मां विद्धि । अयमागामुकोऽस्मि । कदा देवदत्तागमिष्यसि । अयमागच्छामि । आगच्छंतमेव मां विद्धि । अयमागामुक इति । समीपे समीपशब्दवृत्तिर्यथा गंगायां घोष इति । वर्तमानसामीप्ये वर्तमानवत् । वेति नारभ्यते । देवश्चेद्वृष्टो निष्पन्नाः शालय इति सिद्धं । कृत्वेदमभिधानं कूपोऽस्ति भविष्यति भविता अभूत् आसीत् बभूवेति । तत्तत्कालसत्तापेक्षाप्रत्ययाः ॥

क्षिप्राशंसार्थे लृट् लेङ् ॥ ४ । ४ । १०४ ॥

आशंस्येऽर्थे वर्तमानाद्धातोः क्षिप्रार्थे आशंसार्थे चोपपदे यथासंख्यं लृट्लेङौ भवतः । वाशंस्ये सद्भूतवदित्येतस्य लुटश्चापवादः । उपाध्यायश्चेदागच्छति । आगमत् । आगमिष्यति । आगन्ता क्षिप्रं आशु शीघ्रं अन्हाय अध्येष्यामहे । आशंसे संभावये अवकल्पये । युक्तोऽधियीय । द्वयोरुपदयोर्लेङेव भवति । शब्दतः परत्वादाशंसे । क्षिप्रमधीयीय ।

अद्येवासन्नाविच्छित्ये: ॥ ४ । ४ । १०५ ॥

आसन्नः कालतस्तुल्यजातीये नाव्यवहितकालः । अविच्छित्तिरव्यवच्छिन्नः सन्ततः । आसन्ने अविच्छित्तौ चार्थे वर्तमानाद्धातोरद्येव अद्यवत् प्रत्ययो भवति नानद्यतनः ये यं पौर्णमास्यतिक्रांता एतस्यां जिनमहः प्रावर्तिष्ट । प्रवृत्तः । येयं पौर्णमास्यागामिनी एतस्यां जिनमहः प्रवर्तिष्यते । यावज्जीवं भृशमंनमदात् । दत्तवान् । दास्यति यावज्जीवं युक्तोऽध्यापिपत् । अध्यापितवान् । अध्यापयिष्यति ।

वर्त्स्यत्यनहोरात्रे वेऽवधौ ॥ ४ । ४ । १०६ ॥

अवधौ सति योऽव अर्वाक् अवरस्मिन् प्रतिभागे वर्त्स्यत्यर्थस्तस्मिन्वर्तमानाद्धातोरद्यवत् प्रत्ययो भवति नानद्यतनः अनहोरात्रे न चेदसौ वर्त्स्यन्नर्थः । अहोरात्रविषयो भवति । आपिष्टपुरुषात्त गन्तव्ये अस्मिन्नध्वनि पौदनस्यावरस्तात । द्विरोदनं भोक्ष्यामहे । द्विः सूत्रमध्येष्यामहे । आगामिनि संवत्सरे अवरस्तात् आग्रहायण्याः द्विरोदनं भोक्ष्यामहे द्विसूत्रमध्येष्यामहे । लुट् न भवति । वर्त्स्यतीति किम् ? आपिष्टपुरात् गन्तव्ये अस्मिन्निध्वनि पौदनस्यावरस्तात् द्विरोदनमभुंजमहि द्विः सूत्रमध्यैमहि । अतीते संवत्सरे अवरस्तादाग्रहायण्याः द्विरोदनमभुंजमहि । द्विः सूत्रमध्यैमहि । अनहोरात्र इति किम् ? आगामिनो मासस्यावरस्मिन्पंचदशरात्रे द्विः सूत्रमध्येतास्महे । अव इति किम् ? आपिष्टपुरात् गन्तव्येऽस्मिन्नध्वनि पौदनस्य पुरस्तात् द्विः सूत्रमध्येताहे । आगामिनि संवत्सरे द्विः सूत्रमध्येतास्महे । अवधाविति किम् ? योऽयमध्वा निरवधिको गन्तव्यः । अस्मिन् पौदनस्यावरस्तात द्विः सूत्र मध्येतास्महे । योयं निरवधिकः कालः आगामी एतस्मिन्नवरस्तादाग्रहायण्याः द्विः सूत्रमध्येतास्महे ।

काले परे वा ॥ ४ । ४ । १०७ ॥

अवधौ सति परस्मिन् प्रतिभागे काले वर्त्स्यत्यर्थे वर्तमानाद्धातोरद्यवत् प्रत्ययो वा भवति । अनहोरात्रे आगामिनः संवत्सरस्याग्रहायण्याः पुरस्तात् द्विः सूत्रमध्येष्यामहे । अध्येतास्महे । अविच्छिन्नं सूत्रमध्येष्यामहे । अध्येतास्महे । काल इति किम् ? आपिष्टपुरात् गन्तव्येस्मिन्नध्वनि पौदनस्य परस्तात् द्विः सूत्रमध्येतास्महे । परे इति किम् ? आगामिनि

संवत्सरे अवरस्तादाग्रहायण्याः सूत्रमध्येष्यामहे । आसन्नाविच्छित्त्योरप्यस्मिन्विषयेऽयमेव विकल्प इति सूत्रं ।

लेङ् निमित्ते वृत्तौ भूते च लृट् ॥ ४ । ४ । १०८ ॥

लेङो निमित्तं कारणसामाग्री लेङ्निमित्तं नास्य वृत्तिर्निष्पत्तिरस्ति इति । अवृत्तिरतिपत्तिमान् । लेङ्निमित्ते वृत्तौ भूते वत्स्यंति चार्थे वर्तमानाद्धातोः लृङ् प्रत्ययो भवति वत्स्यंति यदीह गुरूनुपासिष्यत शास्त्रान्तमगमिष्यत् । दक्षिणेन चेदयास्यत् न शकटं पर्याभविष्यत् । यदि मत्समीप आसिष्यत । घृतेनाभोक्ष्यत । हेतुभूतं गुरूपासनादिफलभूतं च शास्त्रान्तगमनादि भविष्यदवृत्तिकमुपलभ्यमप्रभुज्यते कारणं फलं च लेङ् निमित्तं भूते न क्षमे न श्रद्दधे । तत्रभवान्नामाधायकृतं असेविष्यत । अत्रामर्षा श्रद्धे दृष्टो मया भवतः । पुत्रो नार्थी चंक्रम्यमाणः । अश्वातिथ्यर्थी यदि स तेन दृष्टो भविष्यत् । अप्यभोक्ष्यत । उतानिभोक्ष्यत न तु दृष्टोऽन्येन पथा गतः । अत्र वाध्येष्यते । न पर्याऽभविष्यत् । घृतेनाभोक्ष्यत इति नञ्घृत विशिष्टस्यावृत्तिः ।

वा शेषात् ॥ ४ । ४ । १०९ ॥

भूत इति वर्तते । अशेषसंशब्दनाद्यदित ऊर्ध्वं लेङ् निमित्तं तस्मिन् भूते वृत्तिकेऽर्थे वर्तमानाद्धातोर्लृङ् प्रत्ययो भवति वा । कथं नाम संयतः सन्नागारे । तत्र भवानादायकृतमसेविष्यत । दिग्गर्हामहे । वावचनाद्यथाप्राप्तं च । कथं सेवेत । सेवते । दिग्गर्हामहे । अशेषादिति किम्? कालोऽयमभोक्ष्यत् भवान् । भूत इति किम्? भविष्यति नित्यमेव ।

गर्हेऽपिजात्वोर्लट् ॥ ४ । ४ । ११० ॥

अपि जातु इत्येतयोर्धातोर्गर्हे क्षेपे लट् प्रत्ययो भवति ।

कालसामान्येऽयं लट् परत्वात्कालविशेषविहितानपि प्रत्ययान् बाधते । एवमुत्तरत्रापि । अपि तत्रभवान् भूतानि हिनस्ति । जातु तत्रभवान् भूतानि हिनस्ति । अपि संयतः सन्ननागारे तत्रभवान् आदायकृतं सेवते । दिग्गर्हामहे । अन्याय्यमेतत् इह लेङ्निमित्ताभावात् लृङ् न भवति ।

कथमि लेङ् च वा ॥ ४ । ४ । १११ ॥

कथंशब्द उपपदे धातोर्गर्हे गम्यमाने लेङ् लट् च वा भवतः । वावचनाद्यथाप्राप्तं च । कथं नाम तत्रभवान् भूतानि हिनस्ति हिंस्यात् हिंसिष्यति हिंसिता अहिंसीत् अहिंसीत् । अहिंसत् । जिहिंस । अत्र लेङ् निमित्तमस्तीत्यवृत्तौ लृङ् भवति । कथं नाम तत्रभवान् यातान्यहिंसिष्यत् ।

किं वृत्ते लेङ् लटौ ॥ ४ । ४ । ११२ ॥

किंवृत्ते उपपदे गर्हायां नित्यं लेङ्लृटौ भवतः । किं तत्रभवान् अनृतं ब्रूयात् । वक्ष्यति । को नाम कतरो नाम कतमो नाम यस्मै तत्रभवाननृतं ब्रूयात् । वक्ष्यति । वृत्तौ लृङ् । किं तत्र भवाननृतमवक्ष्यत् ।

अमर्षाश्रद्धेऽन्यत्रापि ॥ ४ । ४ । ११३ ॥

लेङ्लृटावित्यनुवर्तते । अमर्षः अक्षमा । अश्रद्धा असम्भावना । अन्यत्र अकिंवृत्तेऽपि शब्दात् किं वृत्तेऽप्युपपदे अमर्षाश्रद्धयोर्गम्यमानयोर्धातोर्लेङ्लृटौ भवतः । अमर्षे किंवृत्ते न क्षमे नावमर्षयामी दिग्मिथ्यानैतदस्ति । किं तत्र भवानदत्तं गृह्णीयात् गृहीष्यति । अकिंवृत्ते न क्षमेऽहममर्षामेदिग्मिथ्या नैतदस्ति । तत्रभवान् नामादत्तं गृह्णीयात् ग्रहीष्यति । अश्रद्धायां किम् ? वृत्ते न श्रद्धधे न सम्भावयामि । नावकल्पयामि । किम् ? तत्र भवानदत्तं गृह्णीयात् । ग्रहीष्यति । अकिंवृत्ते श्रद्धधे । तत्र भवान्नामादत्तं गृह्णीयात् । गृहीष्यति । अन्यत्रा-

व्याप्तिवारणाय । इतरच्च धर्मादौ । अत्र सर्वलक्षणमिति न भ्रमितव्यमित्याह-तत्र चेति । लक्षणस्यासम्भवमिति । लक्षणैकदेशयोग्यत्वासंभवमित्यर्थः । अत्यन्ताभावानधिकरणत्वस्य तत्प्रतियोग्यधिकरणत्वनियमादिति भावः । न च योग्यताया मिथ्यात्वात्तदत्यन्ताभावाधिकरणमेवाऽऽत्मेति वाच्यम् । प्रतियोगिसमानसत्ताकात्यन्ताभावस्य तत्सादेश्यविरोधादिति द्रष्टव्यम् ।

अत्रोक्ताव्याप्तिमपवदति-न चैवमिति ॥

अव्याप्तिनिरसनम् । न चैवं मुक्तिकालीन आत्मनि लक्षणाव्याप्तिः । नहीदं स्वप्रकाशस्य स्वरूपलक्षणं, किन्तु जगत्कारणत्ववत्तटस्थलक्षणम् । स्वरूपलक्षणं तु प्रागुक्तमेव । कदाचिद्वेद्यत्वविरुद्धधर्माधिकरणस्यैवात्मनो मुक्तावपि सत्त्वात् । एतेन "स्वप्रकाशत्वं वास्तवमवास्तवं वा ?। आद्ये ऽद्वैतक्षतिः। द्वितीये ब्रह्मणि वस्तुतोऽस्वप्रकाशत्वप्रसङ्गः कल्पितविरुद्धस्वभावत्वादधिष्ठानस्य" इति निरस्तम् । एकस्य त्वदभिमतात्मविलक्षणस्वरूपत्वात्, अन्यस्य कल्पितत्वात् ।

किं च किमस्वप्रकाशत्वम् । स्वप्रकाशत्वधर्मराहित्यं, वेद्यत्वं वा ?। आद्ये इष्टापत्तिः । ब्रह्मणो निर्धर्मकत्वात् । द्वितीयेऽपि वास्तवं न संभवति । ज्ञानात्मनो ब्रह्मणः स्वपरविषयत्वनिराकरणात् । अवास्तवं तु वेद्यत्वं स्वप्रकाशत्वस-

मानसत्ताकं तद्विरोधात्तत्र न संभवति । तदसमानसत्ताकमवास्तवं तु वेद्यत्वं काममिष्यतां, न नः क्षतिः । अत एव व्यावहारिकवेद्यत्वेऽपि पारमार्थिकवेद्यत्वेनार्थान्तरतेति निरस्तम् । व्यावहारिकवेद्यत्वस्य व्यावहारिकघटादिस्वप्रकाशत्वविरुद्धत्वेऽपि पारमार्थिकब्रह्मस्वप्रकाशत्वविरोधित्वं कथमिति च परिभावनीयम् ॥

स्वरूपलक्षणस्यैव कदाचिदभावो दोषः । न तटस्थलक्षणस्य । इदं च ब्रह्मणो जगत्कारणत्ववत्तटस्थलक्षणमेवेत्याह-न हीदमिति । तटस्थलक्षणस्य कदाचित्सत्त्वमात्रेण त्रिकालमितरेभ्यः स्वाश्रयव्यावर्त्तकत्वात्कदाचित्सत्त्वमेव प्रयोजकमित्यभिप्रेत्याह-कदाचिदिति । लक्षणद्वैविध्यकथनादेव तस्य वास्तवत्वादिविकल्पप्रयुक्तदोषो नेत्याह-एतेनेति । स्वरूपलक्षणस्य संविदविषयात्मसात्त्वान्नाद्वैतक्षतिः । न चेष्टापत्तिरित्यभिप्रेत्याह--एकस्येति । तटस्थलक्षणं तु मिथ्या, तदधिष्ठानं तु सत्यतया तद्विपरीतमेवेत्याह-अन्यस्येति ।

स्वप्रकाशत्वस्य मिथ्यात्वे यदापाद्यमानमस्वप्रकाशत्वं तन्निर्वक्तव्यमित्याह-किञ्चेति । अधिष्ठानस्य वस्तुत आरोप्यरहितत्वादाद्यमिष्टमेवेत्याह-आद्य इति । द्वितीये तद्वेद्यत्वं वास्तवमवास्तवं वा ? नाद्य इत्याह-द्वितीये इति । द्वितीये ऽपि किं तद्व्यावहारिकं प्रातीतिकं वा ? । नाद्यः । समानसत्ताकयोर्भावाभावयोर्विरोधादित्याह-अवास्तवमिति । द्वितीयमिष्टमेवेत्याह—तदसमानेति । यदुक्तं घटादौ व्यावहारिकवेद्यत्वस्यैव स्व-

प्रकाशत्वविरोधित्वात्तत्संभवेनाप्यर्थान्तरतेति, तत्राह-अत एवेति । समानसत्ताकयोर्भावाभावयोर्विरोधादेवेत्यर्थः । तदङ्गीकृत्यापि स्वरूपलक्षणालक्षितस्वप्रकाशत्वस्य न हानिरित्याह-व्यावहारिकेति । कथमिति । न कथमपीत्यर्थः ॥

यच्चोक्तं ब्रह्मणो वृत्तिवेद्यत्वान्नावेद्यत्वमिति तत्राह-नापीति ।

ब्रह्मणोवेद्यत्वप्रतिपादनम्। नापि ब्रह्मण्यवेद्यत्वस्यानिरूपणं फलाव्याप्यत्वस्यैव तस्य सर्वप्रमाणफलात्मनि तस्मिन्सत्त्वात्, फलस्य चाभिव्यक्तविषयावच्छिन्नचैतन्यात्मनस्तस्मिन्नभावात्, घटः स्फुरति पटः स्फुरतीतिफलस्य विषयावच्छेदव्यवहारात् । चैतन्यात्मनो ब्रह्मणः स्वस्वरूपचैतन्यानवच्छेदकत्वात् । चैतन्यान्तरस्य चाभावात् । घटादेश्च चैतन्यावच्छेदकत्वं निरूपितमिति न तदभावः । अन्तःकरणादि चाभिव्यक्तचैतन्यावच्छेदकम्। न चाविद्यानिवृत्तिरेव फलम् । तस्या एव ज्ञानजन्यत्वात्। तदाश्रयश्च ब्रह्मैवेति तदेव फलव्याप्यं न घटादिरितिवाच्यम् । अविद्यानिवृत्तेश्चैतन्यमात्रत्वेनाश्रयाश्रयिभावाभावात्। अस्तु वा तदपि न फलव्याप्यत्वं विवक्षितम्, किन्त्वभिव्यक्तचैतन्यावच्छेदकत्वमेव। न च ब्रह्मणः फलव्याप्यत्वाभावेऽपरोक्षत्वं न स्यादिति वाच्यम् ।

प्रमात्रव्यवधानेन प्रकाशमानत्वमात्रेणापरोक्षत्वोपपत्तेः ।

प्रमाणफलात्मनीति । तदुक्तमत्र भवद्भिः सुरेश्वराचार्यैः—

“परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित् सैवेह मे येोऽर्थो वेदान्तोक्तिप्रमाणतः” इति ।

फलस्वरूपं प्रदर्शयंस्तदव्याप्यत्वमाह-फलस्य चेति । प्रमातृधर्मवृत्त्यतिरिक्तफलमेव नास्तीत्याशङ्क्याह-घट इति । आत्मा फलव्याप्यः अपरोक्षत्वात् संमतवदित्याशङ्क्य किं स्वरूपचैतन्यव्याप्यत्वं साध्यते उत स्वातिरिक्तचैतन्यव्याप्यत्वम् ? । नाद्यः । भिन्नयोरेवावच्छेद्यावच्छेदकभावादित्यभिप्रेत्याह-चैतन्येति । द्वितीयं दूषयति-चैतन्यान्तरस्येति । घटादेरपि वृत्तिविषयत्वव्यतिरेकेण न फलव्याप्यत्वम् । तथा च तत्रातिव्याप्तिरित्याशङ्क्याह-घटादेरिति । अनावृतप्रमातृचैतन्यतादात्म्यं विना तदापरोक्ष्यानुपपत्तिरित्यादिकं निरूपितमित्यर्थः । अज्ञानान्तःकरणतद्धर्मेष्वतिव्याप्तिमाशङ्क्याह-अन्तःकरणेति । ननु क्रियासाध्यस्यैव फलत्वात्, ज्ञानक्रियासाध्याविद्यानिवृत्तिरेव फलम् । तथा च ब्रह्मैव फलव्याप्यमिति न वाच्यमित्याह-न चेति । हेतुमाह-अविद्येति । आरोपिताभावस्याधिष्ठानमात्रत्वप्रसाधनादिति भावः । अविद्यानिवृत्तिरधिष्ठानाद्भिन्नेतिमतेनाह-अस्तु चेति । अभिव्यक्तचैतन्यावच्छेदकत्वलक्षणफलव्याप्यत्वस्यैव घटाद्यपरोक्षत्वप्रयोजकत्वाद् ब्रह्मण आपरोक्ष्यं तदभावे न स्यादित्याशङ्क्य हेत्वसिद्ध्या दूषयति-न चेति । अनावृतचैतन्याव्यवधानमेवा-

परोक्षत्वप्रयोजकम् । तच्च घटादौ तेनाध्यासिकतादात्म्यप्रयुक्तम् । ब्रह्मणस्तु स्वत एवेति भावः ।

सामान्यादिप्रत्यासत्तिमङ्गीकृत्य लक्षणगतापरोक्षव्यवहारं निर्वक्ति-व्यवहारस्येति ।

व्यवहारस्यापरोक्षत्वमनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यसहकृतप्रमाणजन्यप्रत्यक्षजन्यत्वं घटादिव्यवहारस्यैवंरूपत्वात्, 'अहं ब्रह्मास्मि' इतिव्यवहारस्यापि वाक्यजन्यप्रत्यक्षज्ञानजन्यत्वात्, उक्तप्रत्यासत्तिजज्ञानाजन्यज्ञानाकरणकवृत्तिजन्यत्वं वा व्यवहारापरोक्षत्वम् । अहमिति व्यवहारश्चैवंरूपः । धर्मादिव्यवहारश्च नैवम् । न चैवमात्मनो ज्ञानविषयत्वापत्तिः । वृत्तिविषयत्वस्येष्टत्वात् । पूर्णात्मनः स्वातिरिक्तचैतन्याभावेन तद्विषयत्वस्यैवास्माभिरनङ्गीकारात् । व्यवहारमात्रे प्रकाशमात्रं कारणं, न तु तद्विषयप्रकाशत्वेन, गौरवात् । आत्मव्यवहारे आत्माभिन्नप्रकाशस्याऽनात्मत्वव्यवहारे च तद्विषयप्रकाशत्वेन कारणत्वम् । न च घटादेरपि प्रकाशविषयत्वं मास्त्विति वाच्यम् । प्रकाशमात्रस्य तद्व्यवहारकारणत्वेऽतिप्रसङ्गात् ॥

अत्रानागतगोचरसाक्षात्कारजनकप्रत्यासत्तिपदेन सामान्यादिप्रत्यासत्तिर्विवक्षिता । तथा च वर्तमानत्वप्रत्यासत्त्या इदं वर्तमानमितिज्ञानविषयधर्मादिव्यव-

हारे नातिव्याप्तिः । वस्तुतस्तु सामान्यादिप्रत्यासत्ते- र्निरसिष्यमाणत्वादपरोक्षज्ञानजन्यत्वं व्यवहारापरो- क्षत्वं, अपरोक्षार्थविषयत्वं वा । अर्थापरोक्षं तु संवि- द्भेदादिति नान्योन्याश्रयादिरिति भावः ।

नन्वात्मव्यवहारस्य नित्यसाक्षिजन्यतया जन्यप्र- त्यक्षजन्यत्वाभावादसम्भव इति तत्राह-अहं ब्रह्मास्मीति । नित्यसाक्षिजन्यात्मव्यवहारसंग्रहाय लक्षणान्तरमाह-उ- क्तेति । अनुमित्यादिजन्यव्यवहारवारणाय ज्ञानाकरण- केत्यादि । अत्राव्याप्त्यतिव्याप्तिशङ्कैव नेत्याह-अहमि- तीति । आद्यलक्षणे प्रत्यक्षज्ञानविषयत्वादात्मनो दृश्य- त्वापत्तिरित्याशङ्क्य न वृत्तिविषयत्वं दृश्यत्वं, किं तु चिद्विषयत्वमेव । तच्च न चिद्रूपात्मन इत्याह-न चैव- मिति ।

नन्वात्मनश्चित्प्रकाशविषयत्वमपि वाच्यम् । इतरथा तद्व्यवहारायोगादित्याशङ्क्य पूर्वोक्तन्यायं स्मारयति-व्यवहारेति । तथाप्यात्मव्यवहाररूपकार्यवि- शेषे तद्विषयप्रकाशरूपकारणविशेषो वाच्य इत्याश- ङ्क्याह-आत्मव्यवहार इति । आत्मनः प्रकाशविषयत्वा- संभवाद् "विज्ञातारमरे केन" इत्यादिश्रुतिप्रसिद्धत्वाच्च प्रकाशाभेद एवात्र विशेषकारणम् । स च यावद्व्यवहारं भेदाभावात्सा कल्पित आत्मातिरिक्तोऽस्तीति भावः । यद्वा यथा ज्ञानसामान्यसामग्रीत एवासति संस्कारे ऽनुभवरूपविशेषकार्यम् । यथा वा तत एवासति दोषे स्वतस्त्वमते प्रमारूपकार्यविशेषः एवं प्रकाशमात्रा- देवासति संस्कारे सति भेदे व्यवहारविशेष इत्यर्थः। तर्हि

घटादावपि सामान्यकारणादेव व्यवहारविशेष्यमित्याशङ्कामतिप्रसङ्गेन दूषयति-न चेति ।

घटादावपि प्रकाशाभेद एव विशेषकारणमिति मन्वानं सुगतं प्रत्याह-घटस्येति ।

घटस्य प्रकाश इत्यनुभवस्यासति बाधके प्रामाण्यत्यागायोगाच्च । न च साध्याप्रसिद्धिः । प्रथमसाध्याभावस्य भावरूपस्य चैतन्यविषयत्वस्य घटादौ प्रसिद्धत्वात् । अत्र गृहीतव्यतिरेकव्याप्तिकस्य पुंसो विनाऽपि साध्यप्रसिद्धिं पक्षे तदनुमानसंभवात् । द्वितीयसाध्ये चापरोक्षव्यवहारविषयसंविद्व वेद्या न भवतीति साध्यम् । वेद्यत्वं च संविद्विषयत्वंभिति । तदभावसिद्धावर्थात्फलव्याप्यत्वाभावः पक्षे सिद्ध्यति ।

अथ वा वेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वादेर्घटादौ प्रसिद्धस्यानुभूतापरोक्षव्यवहारविषयेऽनुभूतित्वेन हेतुनाऽभावानुमानात् । अर्थादवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वस्यापि पक्ष एव सिद्धेः। न चादृष्टादावसाधारण्यम् । तस्य तर्कानवतारदशायामेव दोषत्वात् । आचार्यानुमाने तु वेद्यत्वमपरोक्षव्यवहारयोग्यं किं चिन्निष्ठात्यन्ताभावप्रतियोगिभावधर्मत्वादिति विवक्षितम् ।

चिज्जडयोर्वास्तवाभेदायोगाद्भेदानुभवविरोधाच्चेत्यर्थः । यच्चोक्तमप्रसिद्धविशेषणः पक्ष इति तद्दूषयति

न चेति । साध्याप्रसिद्धिरिति । दोषायेति शेषः । अभावप्रसिद्धौ प्रतियोगिप्रसिद्धेस्तन्त्रत्वात्संविद्विषयत्वरूपप्रतियोगिनो घटादावनुभूतित्वाभावेन व्याप्ततया गृहीतत्वादनुभूतित्वहेतोर्व्यतिरेकव्याप्तिपक्षधर्मतयोः सत्त्वादाद्यलक्षणलक्षितसाध्ये साम्राज्यमित्यभिप्रेत्याह प्रथमेति । द्वितीयलक्षणे विशेष्यस्यात्मनि सिद्धस्य पक्षकोटौ निवेशसंभवाद्विशेषणमात्रस्यावेद्यत्वस्य व्यतिरेकव्याप्तिमद्धेतुबलात्सिद्धावर्थाद्विशिष्टलक्षणसिद्धिरित्यभिप्रेत्याह-द्वितीयेति । अर्थादिति । फलविषयत्वे संविदविषयत्वायोगादित्यर्थः । फलाव्याप्यत्वस्य मुखतः साध्यत्वेऽपि न दोषः । इदानीमत्रापि विशिष्टाभावस्यैव साध्यत्वात्, विशिष्टस्य च घटादौ हेत्वभावेन व्याप्तत्वात्, प्रथमलक्षणवन्न साध्याप्रसिद्धिर्दोषायेत्याह-अथ वेति । विशेष्यवति विशिष्टाभावो विशेषणभूतवेद्यत्वाभावमादायैव पर्यवस्यति । तथा चावेद्यत्वविशिष्टलक्षणसिद्धिरित्याह-अर्थादिति । ननु विशेष्याभावो विशेषणविशिष्टाभाववत्यदृष्टादौ सपक्षे हेतोरभावादसाधारण्यमित्याशङ्क्य तस्यानित्यदोषत्वान्नैतद् दूषकत्वमित्याह-न चादृष्टेति । यदप्युक्तं वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वादिति सामान्यतो दृष्टानुमानान्न विशिष्टसाध्यसिद्धिरिति । तत्राह-आचार्येति । परोक्षव्यवहारविषयत्वात्यन्ताभावे व्यभिचारवारणाय भावेत्युक्तम् । न चापरोक्षव्यवहारविषयत्वे व्यभिचारः । परमते तस्मिन्नेव तदत्यन्ताभावसत्त्वात् । अस्मन्मते तस्य मिथ्यात्वेन पक्षसमत्वान्न व्यभिचार इति भावः ।

प्रमेयत्वादावुक्तव्यभिचारमनूद्य दूषयति-यत्वि-त्यादिना ।

यत्तु केवलान्वयिधर्मै व्यभिचार इति । तदसत् । केवलान्वयिधर्मासिद्धेः प्रमेयत्वादेरपि स्वस्मिन् सम्बन्धाभावेन स्ववृत्त्यत्यन्ताभाववत्त्वात् । न 'चैवं प्रमेयत्वं प्रमेयम्'इति धीर्न स्यादिति वाच्यम् । तस्यास्तद्वृत्तिप्रमेयत्वान्तरविषयत्वात् ।

अथवा भेदो भिन्नः घटाभावे घटो नास्तीत्यादिबुद्धिवत् । प्रमेयत्वस्वरूपमेव तद्बुद्धिविषयः । एवमत्यन्ताभावप्रतियोगित्वेऽपि द्रष्टव्यम् । न च प्रमाविषयत्वाख्यप्रमेयत्वं केवलान्वयिप्रमा तद्विषयातिरिक्तस्य प्रमाविषयत्वस्यैवाभावात् । तयोश्चाकेवलान्वयित्वात् । अतिरिक्तविषयतायाश्च तैरेव निराकरणात् ।

यच्च प्रमात्वमेव प्रमेयत्वम् । परम्परासम्बन्धेन तस्य घटादावपि सत्त्वादिति । तन्न । वृत्तिमदत्यन्ताभावप्रतियोगित्वेनाकेवलान्वयित्वात् ॥

प्रमेयत्वात्यन्ताभावस्य कुत्राप्यभावाद्वृत्तिमदत्य-न्ता-भावाप्रतियोगित्वेन तस्यकेवलान्वयित्वमित्याशङ्क्याह-प्रमेयत्वादेरिति । संबन्धाभावेनेति । स्ववृत्तित्वायोगादितिशेषः । प्रमेयत्वस्य स्वस्मिन्नभावे प्रमेयत्वस्य नानात्वादेकस्यापरवैशिष्ट्यमुपपद्यत इति भावः ।

प्रमेयत्वस्यैकत्वेऽपि तत्स्वरूपमेव विशिष्टप्रत्ययविषय इति सदृष्टान्तमाह–अथ वेति । यथा घटभेदो घटभिन्न इति विशिष्टप्रत्ययविषयो घटभेदस्वरूपमेव, भेदे भेदान्तराङ्गीकारेऽनवस्थापत्तेः । यथा वा घटाभावे घटो नास्तीति प्रतीतेस्तत्स्वरूपमेव विषयः । घटाभावे तदभावान्तरस्याभावादेवमत्रापीत्यर्थः । मदुक्तमत्यन्ताभावप्रतियोगित्वाच्चेत्यर्थः । प्रमेयत्वस्यापि नानात्वे नाकेवलान्वयित्वमित्याह–न चेति । अत्र केन चित्तार्किकापशदेनोत्प्रेक्षितं प्रमात्वमेव प्रमेयत्वम् । तच्च केवलान्वयीति तदनुवदति–यच्चेति । परम्परासम्बन्धेनेति । प्रमात्वाश्रयप्रमाविषयत्वसम्बन्धेनेत्यर्थः । किं प्रमात्वं साक्षादेव केवलान्वयि उत परम्परासम्बन्धेन किं वा तदुभयसाधारण्येन ? । नाद्यः । घटादौ साक्षात्तदभावात् । न द्वितीयः । प्रमायां परम्पराया अभावात् । न तृतीयः । स्वस्मिन्नेवोभयथाऽप्यभावात् । घटत्वादेरपि साक्षात्परम्परासम्बन्धेन केवलान्वयित्वापातात् । तद्वृत्तितत्प्रकारकज्ञानत्वादिरूपस्य तत्तद्वैशिष्ट्यप्रतिभासाद्यनेकात्मकस्य प्रतिप्रमायां भिन्नत्वेनैकत्वायोगाच्चेत्यभिप्रेत्याह तन्नेति ॥

दूषणान्तरमाह–किं चेति ।

किं च प्रमात्वमेव यदि प्रमेयत्वं तर्हि सर्वमुक्तौ न प्रमेयत्वम् । प्रमाव्यक्तिघटितप्रमात्वस्य तदभावेऽभावात् । ईश्वरज्ञाने तदाऽपि प्रमात्वमस्तीति चेत् तस्याप्रमात्वात् ।

किं च यदि प्रमात्वं घटेऽपि स्यात् तर्हि

प्रमायास्तत इतरभेदानुमानं न स्यात् । विपक्षेऽपि तद्वृत्तेः । न च प्रमात्वसमवायित्वमितरभेदानुमितौ लिङ्गम् । असिद्धेः । स्वरूपसंबन्धस्तु घटेऽपि तुल्यः । लाघवेन प्रमात्वाभावस्यैव तदितरभेदाभावव्यापकत्वाच्च । यत्र यत्संबन्धेन यदत्यन्ताभावस्तत्रैव तद्वृत्तौ विरोधो दत्तजलाञ्जलिः स्यात् । एतेन शब्दप्रतिपाद्यत्वादेरपि केवलान्वयित्वं निरस्तम् । शब्दजन्यज्ञानविषयत्वादेस्तस्य व्यावृत्तत्वात् । प्रमेयत्वादेरात्मन्यभावाच्च न केवलान्वयित्वम् । अनुभूतित्वं च जातिः । कल्पितभेदवत्संविन्निष्ठत्वात् । जातौ च स्वसमानसत्ताको व्यक्तिभेदोऽपेक्ष्यते न तु धर्मिसमानसत्ताकः । अनुभूतिश्च वृत्त्युपहितचैतन्यमिति न वृत्तिभागे व्यभिचारः ॥

व्यक्तिघटितेति । तस्य यथार्थज्ञानत्वादिरूपोपाधित्वादित्यर्थः । मुक्तावनित्यज्ञानाभावेऽपि नित्यप्रमात्वमस्तीति शङ्कते-ईश्वरेति । ईश्वरज्ञानस्य गुणदोषाजन्यत्वात् प्रमाऽप्रमाबहिर्भूतत्वमेवेत्यभिप्रेत्याहन तस्येति ।

प्रमात्वस्य घटादिवृत्तौ ततः प्रमाव्यावर्तकत्वं न स्यादित्याह-किं चेति । तत इति । प्रमात्वहेतोरित्यर्थः । प्रमात्वस्य घटादौ परम्परासंबन्ध एव, न तु समवायः । तद्वृत्त्वमेवेतरभेदानुमाने लिङ्गमिति

चेन्न । प्रमात्वस्योपाधित्वेन प्रमायामपि तत्समवायासिद्धेरित्याह-न च प्रमात्वेति । अस्तु तर्हि तत्स्वरूपसंबन्ध एव लिङ्गमित्यत आह-स्वरूपेति । किं च यत्र प्रमेतरभेदाभावस्तत्र प्रमात्वाभाव इत्येव लाघवाद् व्यतिरेकव्याप्तिर्वाच्या । तथा च प्रमात्वस्य घटादिवृत्तावियं व्याप्तिर्न संभवेदित्याह-लाघवेनेति । घटादौ प्रमात्ववत्तदत्यन्ताभावोऽप्यस्त्येव । तथा च नोक्तव्याप्त्यसंभव इत्याशङ्क्याह-यत्रेति । उक्तन्यायेनाभिधेयत्वादिकमपि न केवलान्वयीत्याह-एतेनेति । अभिधेयत्वादेः सखण्डत्वेन प्रतिपदार्थभिन्नत्वान्न सर्वत्रानुगम इत्याह-शब्देति । स्वमतेनाह-प्रमेयत्वादेरिति । यदुक्तम् अनुभूतित्वं जातिरुपाधिर्वा न संभवतीति । तत्राह-अनुभूतित्वं चेति । यच्चोक्तं जातेर्धर्मिसमसत्ताकव्यक्तिभेदनियतत्वादिति । तत्र धर्मिग्रहापेक्षया धर्मत्वस्य ग्रहे लाघवम् । अनुभूतौ चानिर्वचनीयजातिसमसत्ताकभेदस्त्विष्ट एवेत्यभिप्रेत्याह-जातौ चेति । अनुभूतित्वस्य जडवृत्तावपि सत्त्वेन व्यभिचारमाशङ्क्याह-अनुभूतिश्चेति । श्रोत्रोपाधौ कर्णे श्रोत्रव्यवहारवदनुभूत्युपाधिवृत्तावनुभूतिव्यवहार इति भावः ।

आत्मनः स्वप्रकाशत्वसाधकप्रमाणविषयत्वेऽविषयत्वे वा न स्वप्रकाशत्वमित्यादिप्राकृतचोद्यस्य नात्रावसर इत्याह-एतेनेति ।

एतेन 'यदि स्वप्रकाशत्वसाधकानुमानमनुभूतिं विषयीकरोति, तर्हि तस्याः वेद्यत्वम् । अथ न विषयीकरोति । तर्ह्यसत्त्वं स्वप्रकाश-

त्वस्य । न च स्वप्रकाशत्वधर्मोऽपि स्वप्रकाशः । अथ स्वप्रकाशत्वस्यानुमितिवेद्यत्वेऽपि नानुभूतेस्तद्वेद्यत्वम् । धर्मिणं विनाऽपि शब्दादेर्ग्रहणादिति चेत्; न । अनुमानस्य पक्षविशिष्टसाध्यविषयत्वात्, इति निरस्तम् । अनुभूतेरनुमितिरूपवृत्तिवेद्यत्वेऽपि चैतन्यवेद्यत्वफलव्याप्यत्वयोरभावात् ।

अथ ज्ञानं वेद्यं वस्तुत्वाद्, व्यवहारविषयत्वाद्वा घटवत् । विपर्यये च नरशृङ्गादिवदवस्तुत्वप्रसङ्ग इति चेन्न । प्रकाशमानत्वमात्रेणैव तन्निवृत्तेरप्रयोजकत्वात् । अनुभूतेः स्वपरवेद्यत्वायोगस्योक्तत्वाच्च ।

किं च स्वात्मन्यस्तित्वादिविषयः संशयो विपर्यासो वा नेति सर्वं संप्रतिपन्नम् । स च नियमेन तत्कारणाभावप्रयोज्यः । तत्कारणं चात्र विशेषादर्शनमेव नास्तीति वाच्यम् । तदन्यस्य धर्मीन्द्रियसन्निकर्षकोटिस्मरणादेः सर्वस्य सत्त्वात् ।

अस्य निरस्तमित्युत्तरेण संबन्धः । तर्ह्यसत्त्वमिति । मानाभावे मेयासत्त्वादित्यर्थः । मानासिद्धत्वेऽपि स्वतःसिद्धत्वात् सत्त्वमित्याशङ्क्याह-न चेति । धर्मस्य मिथ्यात्वेन जडत्वादिति भावः । स्वप्रकाशत्वधर्मस्यानुमितिवेद्यत्वेऽपि न धर्मिणः स्वप्रकाशत्व-

क्षतिरिति शङ्कते-अथेति । धर्मिग्रहणं विना कथं धर्ममात्रग्रहणमित्याशङ्क्याह-धर्मिणमिति । धर्मिणः प्रत्यक्षाविषयत्वेऽप्यनुमितिविषयत्वमावश्यकमित्याह पूर्ववादी-न अनुमानस्येति । अनुभूतेरनुमितिविषयत्वेऽपि नोक्तलक्षणद्वयविरोध इत्याह-अनुभूतेरिति ।

स्वप्रकाशानुमानस्य प्रतिप्रयोगमाशङ्कते-अथेति । स्वसंज्ञाप्रकारकसंशयाद्यगोचरत्वेनैवावस्तुत्वनिवृत्तेर्वेद्यत्वं विना न वस्तुत्वाद्यनुपपत्तिरिति दूषयति-न प्रकाकाशे । प्रतिकूलतर्कपराहतं चेदमनुमानमित्यभिप्रेत्याह-अनुभूतेरिति ।

आत्मनः कदाप्यस्तित्वादिप्रकारकसंशयाद्यभावानुपपत्तिरूपार्थापत्तिरपि स्वप्रकाशत्वे मानमित्यभिप्रेत्याह-किं चेति । यावत्कालं संशयाद्यभावस्तावत्कालं तत्कारणाभावो वक्तव्य इत्याह-स चेति । अत्र संशयादिकारणस्य विशेषादर्शनस्यैवाभावो विशेषदर्शनं वाच्यम् । अन्यस्य कारणस्य कदाचिद्भावात् । तच्च विशेषदर्शनमागन्तुकं सर्वदा न संभवतीति स्वप्रकाशत्वसिद्धिरित्यभिप्रेत्याह-तत्कारणमिति ।

ननु वर्त्तमानकालीनात्मन्यहंप्रत्ययेन निश्चितत्वान्न संशयः । अतीतकालीनात्मनि धर्मिज्ञानाभावादेव न संशय इति शङ्कते नन्विति ।

ननु धर्मिज्ञानविरहात् संशयविरह इति चेन्न। एतत्कालावच्छिन्ने आत्मनि ज्ञायमानेऽप्यहं प्रातःकालीनो न वेति संशयादर्शनात् ।

तत्कालस्य च घटज्ञानधाराधारत्वेन तदानीमात्मज्ञानाभावात् । अहमिति ज्ञानानन्तरमहं ज्ञानवान्न वेति संशयप्रसङ्गाच्च । आत्मस्वरूपज्ञानस्यास्वप्रकाशत्वे स्वयंदृष्टगजादेरपरोक्षत्वाभावापत्तेश्च । एतेन संशयाभावो न स्वप्रकाशत्वनियतः शरीरादिषु तदभावादिति निरस्तम् । शरीरस्यापि स्वप्रकाशात्माभेदाध्यासेन स्वसत्तायां प्रकाशाव्यभिचारात् । तस्मान्न वेद्यत्वानुमानं साधु । अतस्सिद्धं स्वप्रकाश आत्मेति । एतेन साक्षी चेता केवलो निर्गुण इत्यादिश्रुतिसिद्धं साक्षित्वं व्याख्यातम् ।

अकर्तृत्वे सति द्रष्टृत्वं हि साक्षित्वम् । लोके तथैव प्रसिद्धेः । अहमर्थप्रकाशश्चित्स्वरूपात्माऽप्यकर्त्तृत्युक्तमित्यौदासीन्यबोधाभ्यामात्मा साक्षी भवति । न च द्रष्टृत्वं दर्शनक्रियाकर्तृत्वमतो व्याघात इति वाच्यम् । दर्शनस्य नित्यत्वेनात्मनस्तदकर्तृत्वात् । स्वरूपचैतन्यस्यैव तत्तद्विषयावच्छिन्नं तत्तद्वृत्त्यवच्छिन्नं वा प्रतिसंबन्धित्वमिति द्रष्टव्यम् ।

वर्त्तमानतया निश्चितेऽपि घटे प्रातःकालीनत्वादिसंशयवदात्मन्यस्वप्रकाशे कालान्तरीयत्वसंशयः स्यादेवेत्याह-न एतत्कालेति । प्रातःकालेऽप्यात्मनोऽहं-

प्रत्ययेन निश्चितत्वान्न संशय इत्यत आह-तत्कालस्य चेति । सर्वदाऽहंप्रत्ययधारायां बाह्यज्ञानविलोपप्रसङ्गादिति चशब्दार्थः । ज्ञानस्यास्वप्रकाशत्वे तदुत्पत्त्यनन्तरं तत्र कदाचित्संशयः स्यात् । धर्मिज्ञानादेः सत्त्वादित्यभिप्रेत्याह-अहमिति । अर्थापत्त्यन्तरमाह-आत्मेति । एतच्च स्वप्नसाक्षिवादे निरूपितमिति भावः । शरीराहङ्कारदुःखा दीनां यथा जडत्वेऽपि संशयाद्यभावस्तथाऽऽत्मनोऽपि किं न स्यादित्याशङ्क्याह-एतेनेति । न हि वयं स्वप्रकाशत्वं संशयाद्यभावे प्रयोजकं ब्रूमः । किं तु प्रकाशमानत्वम् । तच्च परिशेषादात्मनः स्वप्रकाशत्वेन शरीरादेस्तत्तादात्म्याध्यासेनेत्यभिप्रेत्याह-शरीरस्येति अनेकप्रमाणविरोधादप्रयोजकत्वाच्च प्रतिपक्षानुमानं दुर्बलमित्याह-तस्मादिति । फलितमाह-अत इति । इयता प्रबन्धेनोपपादितमात्मतत्त्वमेव त्वंपदार्थशोधकवाक्यप्रमेयमित्यभिप्रेत्याह-एतेनेति ।

आत्मनः साक्षित्वं दर्शयितुं तत्स्वरूपमाह-अकर्तृत्वे इति । लोक इति । विवादादिकं यस्तु न करोति अथ च जानाति तस्मिन्नेव साक्षित्वप्रसिद्धेरित्यर्थः । आत्मनः कर्तृत्वान्न साक्षित्वमित्याशङ्क्याह-अहमर्थेति । औदासीन्यबोधाभ्यामिति-इत्थंभावे तृतीया । नन्वकर्तृत्वद्रष्टृत्वयोः परस्परव्याघातादसंभव इति चेन्न । न हि द्रष्टृत्वन्दर्शनकर्तृत्वं किं तु पराभिमतेश्वरवद्दर्शनं प्रति संबन्धित्वमित्यभिप्रेत्याह-न चेति । आत्मनो दर्शनसंबन्धित्वं वा कथंभेदाभावादित्याशङ्क्य कल्पितभेदेनेत्याह-स्वरूपेति ।

त्रस्यादोष इति चेत् । न, तत्रापि योग्यतापेक्षणात् । अयस्कान्तायस्कर्षवत् व्यापित्वाभ्युपगमेनानुपूर्वी स्यात् । तथा हि—सा देशकृता वा स्यात् यथा पिपीलकादीनां पङ्क्तौ, कालकृता वा स्यात् यथा बीजाङ्कुरादीनाम् ? । तत्र न तावद्देशकृता । अन्योन्यदेशपरिहारेण वृत्तिर्हि देशपौर्वापर्यं तत्सर्वस्य सर्वत्र तुल्यदेशत्वाद्वर्णेषु न संभवति । वातातपादिवदात्मादिवच्च । नापि कालकृता । यतः कालपौर्वापर्यं यदैको नास्ति तदाऽन्यस्य सद्भावः स्यात् । तच्च नित्येषु न संभवति । सर्वदाभावात् । न चान्या गतिरस्ति । तत्कथं वर्णानुपूर्वीवाच्यं यदपौरुषेयं परिकल्प्येत । वाच्यदुषणेनैव च पदस्यापि निरस्तत्वात्तं न तद्दूषणं पृथगुच्यते । तत्र किञ्चिद्वैदिकोऽपौरूषेयनिबन्धनः प्रामाण्यलक्षणो विशेषो वेदे स्यात् यत्सद्भावादसिद्धता हेतोर्भवेत् । नापि विरुद्धता । हेतोः सपक्षे सद्भावात् । नाप्यनैकान्तिकता । जगतोऽहेतुकताप्रसङ्गात् । तथा हि—कार्यभेदाभेदौ कारणभेदाभेदपूर्वकौ । अन्यस्य भेदहेतोरभावात् । तदुक्तम्—अयमेव हि भेदो भेदहेतुर्वा यदुत विरूद्धधर्माध्यासः कारणभेदश्च तौ चेन्न भेदकौ विश्वस्य वैश्वरूप्यं हीयते । तत्र यदि लौकिकवैदिकयोर्भिन्नकारणता स्यात्तदा भेदोऽहेतुकः स्यात् । कारणस्य हेत्वभेदस्याभावात् । तथा विकलेऽपि कारणभेदे यदि कार्यभेदो न भवेत् सोऽप्यहेतुकः स्यात् । न च भेदाभेदौ विहायापरं जगदस्तीत्यहेतुकं सकलं स्यात् । न चाहेतुकं नित्यम् । सकलत्वादिप्रसङ्गात् । तन्नानैकान्तिकतापि । तस्मात् स्थितमेतन्नापौरुषेयो वेद इति तन्न तन्निबन्धनं वेदस्य प्रामाण्यमिति स्थितम् । नन्वीश्वरस्य सर्वकर्तृत्वात् सर्वज्ञत्वे सिद्धे कथं न प्रामाण्यम् । तथाहि—भूभृद्धरादिकं बुद्धिमत्कार-

णपूर्वकम्। कार्यत्वात्। यद्यत्कार्यं तत्तद्बुद्धिमत्कारणपूर्वकम्। यथा घटादि तथा भूभृदङ्करादिकं तस्मात्तथेति। ननु कस्येदमसिद्धं किं गृहीतसङ्केतस्य किं वाऽगृहीतसङ्केतस्य?। यद्यगृहीतसङ्केतस्य तदा धूमोऽपि न नालिकेरद्वीपादायातस्य सिद्धः। अथ गृहीतसङ्केतस्य तदाऽस्मदादेः सिद्धत्वात् कथमसिद्धम्। नैतदस्ति। नागमसिद्धं वस्तु साध्यति, किं तु प्रसिद्धम्। न च जगदादौ भूविमानादीनां प्रत्यक्षेण कार्यत्वं प्रतीयते। अनुमानेन प्रतीयत इति चेत्। तथा हि—यत्संस्थानवत्तत्कार्यम्। यथा पटस्तथा यद्रचनावत्तदवश्यं विनङ्क्ष्यति। यथा तन्तुव्यतिषङ्गजनितं रूपं तन्तुविनाशात्तन्मोचनाद्वा विनश्यति। ततो विनाशात् कार्यत्वं पृथिव्यादिरनुमीयत इति। अथ किमिदं रचनावत् किं परिमाणवः, किं वा अवयवी?। न तावदणवः। तेषां नित्यत्वाभ्युपगमात्। यथा जैनस्यावयविनमन्तरेणाऽपि परमाणवः परिणमन्तः कार्यरूपतां भजन्ते न तथा नित्याणुवादनामिति। नाप्यवयवी। तस्याभावात्। ननु धर्मिणं प्रतिपद्यते परः किं वा नेति?। यदि न प्रतिपद्यते, तदा कथं तन्निराकरणहेतोराश्रयासिद्धत्वमस्य। अथ प्रमाणे प्रतिपद्यते तदा कथं तन्निरासः?। नैष दोषः। यतः प्रसङ्गविपर्ययसाधनाभ्यां तन्निरासं मन्यन्ते। तथाहि—यदनेकवृत्तिस्तदनेकम्। यथा जलानलअनेकवृत्तिश्चावयव्युपगम्यते इति प्रसङ्गः। न चानेकरूपोऽभ्युपगम्यते। तन्नानेकवृत्तिरिति प्रसङ्गविपर्ययः। व्याप्याभ्युपगमस्य व्यापकाभ्युपगमनान्तरीयकप्रदर्शनान्ताश्रीधासिद्धताप्रसङ्गहेतोः व्यापकश्च निवर्त्तमानो व्याप्यमादाय निवर्त्तत इति व्यापकाभावेऽपि नासिद्ध इति। सिद्धो विपर्ययहेतुरपि निमित्तान्तराभावाद्व्याप्तिसिद्धेर्नानैका-

न्तिकौ। तथाहि—यद्यन्मात्रं निमित्तं तत्तस्मिन् सति भवत्येव। यथान्त्यकारणसामग्रीमात्रनिबन्धनाङ्कुरः। विरूद्धधर्माध्यासमात्रनिमित्तश्च भेदव्यवहार इति स्वभावहेतुः। प्रतिभासभेदोऽपि न विरुद्धधर्मतामतिक्रामतीति नासिद्धता, सपक्षे भावान्नविरुद्धता। तन्निमित्ते सत्यपि भवतोऽन्यनिमित्ताभावात् सर्वत्राभावनिष्प्रसङ्गव्यापकविरुद्धोपलब्धिः। सापेक्षत्वानपेक्षत्वयोर्विरोधात् विपर्यये बाधकं प्रमाणम्। तथाहि—यथा निमित्ताभावेऽपि भवतो हेतुकता तथाऽविकले निमित्ते सत्यपि भवतोऽहेतुतैवाहेतोश्च स्यात्। असत्त्वमेव सत्तदा स्यात्। तन्नानैकान्तिकता। एकस्य युगदनेकवृत्तित्वमेव च विरूद्धधर्मःसंसर्गः। तथाहि—अवयवेष्ववयवाः सामस्त्येन वा वर्त्तन्ते, एकांशेन वा?। सामास्त्ये वृत्तावेकस्मिन्नेव वावयवे परिसमाप्तत्वादनेकवृत्तित्वं स्यात्। एकं द्रव्यं च स्यादेकस्य वाणोर्विभागाभावान्नित्यत्वं च कार्यद्रव्यस्य स्यादेकस्य चाजनकत्वं समग्रत्व सामग्र्याः जनकत्वादवयवेषु वावयवीति प्रत्ययाभावप्रसज्येत। वृत्तावेकैकस्मिन्नवयवे युगपद्भावाभावौ स्यातां, तथा ह्येकस्मिन्नवयवे सामस्त्येन वर्त्तत इति तत्र सद्भाव उक्तः, पुनरन्यत्र तथैव वर्तत इति तदैव तत्रैवासद्भाव इत्येकत्र युगपद्भावाभावयोर्विरोधः। नाप्यंशेन। निरंशस्य तस्योपगमात्। सांशत्वे वा तेऽपि ततो भिन्नाः स्युरभिन्ना वा?। भिन्नत्वे पुनरप्युनेकांशवृत्तेरेकस्य सामस्त्यैकांशविकल्पानतिक्रमः। अभिन्नत्वे अंशान्तर्गमेऽशिनस्तद्भेदादभावप्रसङ्गः अंश्यंतर्गमेंऽशानां। ततो निरंशोऽशी स्यात्। तत्र च पूर्वनीतितोऽनेकवृत्त्यभावोऽनेकवृत्तित्वे वा विरुद्धधर्माध्यासिता। अथावयविनोऽवयवेषु वृत्तिस्तत्र समवायः। ननु सोऽपि समवाय-

स्तेषु वर्त्तते न वा ? । यदि समवायस्य समवायान्तराभावान्न वर्त्तते तदा यावदसौ पाण्यादिषु पुरुषावयविनं संबन्धयति तावत् तन्त्वादिष्वपि किं न संबन्धयतु । वृत्तेरविशेषात् । अथ वर्त्तते तदा तत्रापि यदि समवायो वृत्तिस्तदानवस्था । अथानेकावयवावयित्वं तदा यदनेकवृत्ति तदनेकमित्यनेनैव साधनेन तस्याभावस्तत्र । अवयविनोऽनेकावयवसमवायस्तत्र वृत्तित्वं ततः सिद्धाप्रसङ्गहेतोर्विरुद्धधर्मात्मता । इतोऽप्यवयविनोऽनेकावयववृत्तेर्विरुद्धधर्माक्रान्तता । यतः एकस्मिन्नवयवे चले सति चलत्वं प्राप्नोति पुनस्तदैव द्वितीयावयवाचलत्वे ऽचलत्वं तथैकावयवरागे रागोऽपरागे वाऽपरागस्तथाऽऽवरणे आवरणमनावरणे वाऽनावरणमिति । निरंशस्य युगपच्चलाचलत्वादियोगो विरुद्धधर्मसंसर्गः । न चावयवानामेव चलत्वादिः नावयविन इति वक्तव्यम् । एकस्य पाण्यादेश्चलाचलादिप्रतितिप्रसङ्गात् । तथा ह्यवयवचलनाच्चलत्वावभासः स्यात् तत्रैव वावयवे स्थितस्यावयविनोऽचलत्वप्रतीतिरित्येवं रक्तादिष्वपि वाच्यम् । किंचावयवेभ्यो ऽवयवी भिन्नो वा स्यादभिन्नो ? । यद्यभिन्नस्तदाऽवयवभेदवदवयविनः खण्डशो भेदप्रसङ्गः । अवयविस्वरूपवद्वायवानामभेदस्य वा तथा चैकस्यानंशस्याप्र तिभासनादप्रतिभासः जगत् स्यात् । अथ भिन्नस्तदा तस्यानुपलम्भादसत्वमेव । तथा हि—यदुपलब्धिः लक्षणप्राप्तसन्नोपलभ्यते तदसदिति व्यवहर्त्तव्यम् । यथा खरविषाणादिनोपलभ्यते चोपलब्धिलक्षणप्राप्तावयवेभ्यो व्यतिरिच्यमानमूर्त्तिरवयवीति स्वभानुपलब्धिः । परैरवयविनो दृश्यत्वाभ्युपगमान्नासिद्धता । न च समानदेशत्वादवयविनोऽवयवेभ्यः पृथगनुपलक्षणमिति वाच्यम् । समानदेशत्वेऽपि रूपरसयोर्वातातपयोश्चेकेन्द्रियग्राह्यत्वेऽपि पृथु-

गुपलक्षणात् । अथ दूरदेशस्यावयवाप्रतिभासेऽप्यवयविनः प्रतिभासनात् कथं नासिद्धता । तदसत् । अस्पष्टाकारस्यावस्तुत्वेन तत्प्रतिभासस्य भ्रान्तत्वात् । वस्तुतो चाऽन्यस्यापि निकटदेशस्य सोऽस्पष्टाकारं द्वयमुपलभेत सुतरां प्रतिभासते । अथाकारद्वयमवयविनः स्पष्टमस्पष्टं च । तत्र निकटस्थः स्पष्टमुपलभते दूरस्थोऽस्पष्टमिति । नन्वसावस्पष्ट आकारो यद्यवयवदेशः तदा निकटस्थ आकारद्वयमुपलभेताऽथान्यदेशस्थस्तदात्मनः पृष्टतस्तं पश्येत् । किंचैतदाकारद्वयमवयविनः केन गृह्यते? । न तावत् दूरदेशज्ञानेन । तत्र निकटदेशज्ञानविषयस्पष्टरूपानवभासनात् । अस्पष्टस्वरूपप्रतिभासं हि तदनुभूयते । नापि निकटदेशज्ञानेन । स्पष्टरूपावभासवेलायां हि तत्र नापरोऽस्पष्टाकारः प्रतिभासते । तन्नावयविन आकारद्वययोगः । अथ दूरदृष्टमवयविनः स्वरूपं परिस्फुटमिदानीं पश्यामीति । तयोरेकस्य । ननु किमपरिस्फुटरूपतया परिस्फुटमवगम्यते, आहोस्वित्परिस्फुटरूपतया अपरिस्फुटम् । तत्र यद्याद्यः पक्षस्तदाऽपरिस्फुटस्य रूपसंबन्धित्वमेकावयविनः प्रोप्नोति । परिस्फुटरूपस्यापरिस्फुटरूपानुप्रवेशेन प्रतिभासनात् । अथ द्वितीयस्तदास्पष्टरूपत्वमेव स्यात् । अस्फुटस्य विशदरूपानुप्रवेशनावभासनात् तन्न स्वरूपद्वयावगमोऽवयविनः । न चैकस्य विरूधर्मद्वययोगउपपत्तिमान् । ततः स्फुटास्फुटरूपयोरेकत्वप्रतिभासनमभिमानमात्रम् । अथालोकभावाभावकृतस्तत्र स्फुटास्फुटप्रतिभासभेदः । नन्वालोकेनापि अवयविस्वरूपमेवोद्भासनीयं तच्चेदविकलं दूरदेशज्ञाने प्रतिभाति कथं न तत्र स्फुटावभासः । अन्यथा विषयभेदमन्तरेणापि ज्ञानप्रतिभासभेदेन ज्ञानावभासभेदो रूपरसयोरपि भेदव्यवस्थापकः स्यात् ।

अथावयविस्वरूपमुभयत्राप्येकमेव प्रतियते । स्फुटास्फुटाकारौ तु ज्ञानस्यात्मानाविरयुच्येत । तदसत् । यदि तौ ज्ञानाकारौ कथमवयविरूपतया प्रतिभासेत इत्यभ्युपगमस्तदुपगमेऽवयव्याकारौ तावुपगन्तव्यौ । न चापरं स्फुटाकारतामुक्त्वाऽवयविस्वरूपमाभाति । व्यक्ताव्यक्ताकारात्मनश्चावयविनो व्यक्ताव्यक्ताकारवद्भेदः । तन्न । अवयवी दूरदेशस्यावयवाप्रतिभासेऽपि प्रतिभाति । किं च किं कतिपयावयवप्रतिभासे सत्यवयवी प्रतिभातीत्यभ्युपगम्यते, आहोस्वित् समस्तावयवप्रतिभासे ? । यदाद्यः पक्षस्तदा जलमग्नमहाकायस्तम्भादेरुपरितनकतिपयावयवप्रतिभेऽपि समस्तावयवव्यापिनः स्तम्भावयविनः प्रतिभासः स्यात् । नापि द्वितीयः । मध्यपरभागवर्तिसमस्तावयवप्रतिभासासंभवेनावयव्यप्रतिभासप्रसङ्गात् । अथ भूयो ऽवयवग्रहणे सत्यवयवी गृह्यत इत्युपगमस्तस्मिन्नपि समस्तस्मिन्नपि समस्तावयवव्यापिनोऽवयविग्रहणात् । तथाहि—अर्वाग्भागभाव्यवयवग्राहिणा प्रत्यक्षेण परभागभाव्यवयवाग्रहणात् न तेन व्याप्तिरवयविनो गृहीतुं शक्या । व्याप्याग्रहणात्तद्व्यापकस्यापि गृहीतुमशक्यत्वाद् ग्रहणे चातिप्रसङ्गः स्यात् । तत्र व्यवहितावयवाप्रतिभासेऽप्यव्यवहितोऽवयवो प्रतिभातीति वाच्यम् । व्यवहितावयविस्वरूपावभासे तत्सम्बन्ध्यावयविस्वरूपस्याप्यवभासः स्यात्तथा तदन्यस्यापीति सर्वस्य सर्वावयविग्रहणप्रसङ्गात् । ततोऽव्यवहितावयवव्यापिरूपादर्वागवयवव्यापिनो ऽवयविरूपस्य भेदप्रसङ्गः । तथाहि—यस्मिन्नवभासमाने यन्न प्रतिभासति तत्ततो भिन्नम् । यथा घटादप्रतिभासमानः परान् प्रतिभाति । चार्वागवयवव्यापिरूपे प्रतिभासमाने परावयवव्याप्यवयविरूपं सत्कथं न तत्ततो भिन्नं तथाप्यतिभेदेतिप्रसङ्ग उक्तः ।

परभागावयवग्राहिणा तु प्रत्यक्षेण तद्व्याप्ये वा ऽवयविस्वरूपं गृह्यते नावागवयवव्यापकमपि पूर्वोक्तनीत्येति । नापि स्मरणेनार्थाकारावयवव्याप्यवयविस्वरूपग्रहः । प्रत्यक्षानुसारेण स्मृतेः प्रवृत्तिरिति । नन्वीश्वरवादिमते न किंचित्कार्यसिद्धमस्ति तथा यथाविधघटादिषु बुद्धिमता व्याप्तं दृष्टं अदृष्टकर्तृणामपि जीर्णतपादिषु बुद्धितत्कृतमिति बुद्धिमुत्पादयति न तथाविधं भूधरादिषु सिद्धं तदाह—विशेषेण न सिद्धं भूधरादिष्विति । नन्वेवं विकल्पने न किंचिदनुमानं स्यात् तथाहि—यथाविधो धूमो धूमध्वजपूर्वकत्वेन दृष्टान्ते दृष्टः न तथाविधसाध्यधर्मिणि सिद्ध इति । अथ धूमसामान्यसिद्धमत्रापि कार्यसामान्यमिति समानम् । ननु कार्यसामान्यात् कारणसामान्ये सिद्धेऽपि नेष्टसिद्धिः । न यथा वह्निसामान्यसिद्धिः, न यथा वह्निसामान्यसिद्धौ तद्विशेषसिद्धिः तथा कारणसामान्यात् । कारणविशेषसिद्धौ कथं नेष्टसिद्धिः । सिद्ध्यतु यथा दृष्टे विशेषः । नहि धूमेनाप्यलौकिको वह्निः साध्यते तथेहापि दृष्टान्तदृष्टो विशेषः सिद्ध्यतु नतु नित्यबुद्ध्यादियुक्तः । अपि च नित्यायां बुद्धौ संबन्धाभावान्मत्वर्थीयोऽपि नोपपद्यते अनित्यत्वे तु तां यदि बुद्ध्यन्तरेण करोति तदा तामपीत्यनवस्था । अथ बुद्धिमन्तरेणापि करोति तदा न बुद्धिमत्पूर्वकं सर्वमिति व्याप्तिः । अकृष्टोत्पत्तयश्च वने वनस्पतयः कर्तारमंतरेणाप्युत्पद्यमाना दृश्यन्त इति कथं व्याप्तिः । अदृश्यत्वात्कर्तुस्तथेति चेत् । ननु किमदृश्यत्वात् किं वा अभावात्तथेतिसंदिग्धविपक्षया वृत्तिको हेतुः पक्षेणाव्यभिचारादिति चेत् । येन येन व्भिचारः तस्य तस्य पक्षीकरणेन कश्चिदहेतुः स्यात् । किं च घटेऽपि स एवादृश्यः कर्ता भवतु न कुलालस्तत्कथं तद्दृष्टान्तात्कर्तृसिद्धिः ।

कुलालस्य दृष्टत्वात् नान्यकल्पनेति चेत् । वनस्पत्यादिष्वपि दृष्टमस्तु किमदृष्टकल्पनया । अपि च यथाऽयं हेतुः कर्त्तारं साधयति तथेष्टविपर्ययमपि । तदाह । विरुद्धमित्यादि ॥

विरुद्धं वेष्टघातेन न कार्यं कर्तृसाधनम् ।
प्रकृतेश्वरं ज्ञानं पुंसोनित्यत्वमन्यथा ॥

तथाहि—कुलालः शरीरी सरागोऽसर्वज्ञश्चेश्वरोऽपि तथा स्यात् । तथेश्वरः कर्ता न भवति । शरीररहितत्वात् । मुक्तात्मवदित्यपि स्यात् । अथ हेत्वन्तरेण किं प्राक्तनस्य हेतोरन्यतररूपाभावः ख्याप्यते, किं वा तस्मिन्नेव धर्मिणि विशेषः साध्यते । यथा शब्दे नित्यत्वे सिद्धेऽम्बरगुणत्वमिति । तत्र न तावदनेनान्यतररूपाभावः ख्याप्यते, नापि विशेषः साध्यमानो दोषमावहति । यदि साध्यविपर्ययसाधनेऽपि दोषस्तद न विरुद्धस्य हेतोर्दोषः स्यात् । अथ शरीरमवश्यमभ्युपेयते । यदि तन्नित्यं तदा रचनावत्सर्वं कार्यमिति न स्यात् । अथानित्यं तदा तदपि शरीरवताऽन्येन कर्त्तव्यं तदप्यन्येन शरीरेणेत्यनवस्था । किं चेदं चेतनवताऽचेतनस्याधिष्ठानं किं तद्धेतुकत्वं किं वा तदिच्छानुविधायीत्वमिति ? । तत्र सचेतनं यदा कर्म तदा किमीशेन प्रयोजनम् । अचेतनः कथं भावस्तदिच्छामनुवर्त्तते कुलालकरसंपर्कजन्यः कुम्भस्तदिच्छया दृष्टान्तेन भवन् दृष्टस्तदिच्छासाधनः कथम् । जगतः करणे चास्य यदि किंचित्प्रयोजनं हीयते । कृतकृत्यत्वं प्रेक्षाकारित्वम् । न चान्यथा ।

प्रेक्षावतां यतोवृत्तिर्व्याप्तास्ते कार्यवत्तया ।
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ॥
प्रयोजनं विनाप्यस्य कृपया यदि तत्क्रिया ।
सृजेच्च शुभमेवैकं कृपया परिचोदितः ॥

छागादीनां पुरीषादेर्वर्तुलीकरणेन किम् ।
क्रीडार्था तस्य वृत्तिश्च नार्थता स्यात् समाहिता ॥
किञ्चिन्मात्रविशुद्धोऽपि नार्यः क्रीडासु वर्त्तते ।
सत्त्वात्यन्तविशुद्धात्मा कथं क्रीडासु वर्तते ॥
एकस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यते ।
कर्मणां पारतन्त्र्येण यदि वास्य प्रवर्त्तनम् ॥
कर्मणामीशता प्राप्ता तत्कृत्यमनेन किम् ।
कर्मणां करणे वा ऽस्य सामर्थ्यं यदि विद्यते ॥
शुभान्येव कृपायुक्तः किं न कारयते सदा ।
अक्षरूपं फलं यच्च भृत्ये राज्ञः प्रयच्छतः ॥
नासामर्थ्यं न चैकत्वं फलस्याप्युपलभ्यते ।
उक्तमत्र समर्थश्चेच्छुभं कारयतां सदा ॥
अथेदृशः स्वभावोऽस्य कोऽत्र पर्यनुयुज्यताम् ।
स्वभावश्चेदीदृशो नित्यः संहारं विदधाति किम् ॥
अथानित्यः सहेतुः स्यादहेतुश्चेति कल्पना ।
अहेतुर्यदि सर्वस्य स स्वभावः प्रसज्यते ॥
सहेतोर्हेतुरस्यास्तु स एवान्योऽथ कश्चन ।
यद्यन्यस्यात्र कर्तृत्वं स्वभावस्य विघातकम् ॥
तेनैव चेद्विधीयेत प्रसङ्गः पूर्ववद्भवेत् ।
किञ्चैककर्तृपूर्वत्वं जगतोऽनेककर्तृता ॥
संघातेनैकताव्याप्तिः प्रासादादिषु दृश्यते ॥
एकेन सूत्रितत्वं चेत्तत्रापि नियमो नहि ॥
स्वातन्त्र्येण क्वचित्तेषामेककार्ये प्रवर्त्तनात् ।
अनेककर्तृपक्षश्चेदात्मभिः किं न सिध्यति ॥
कुर्वन्तु खण्डमेकैकं तु ज्ञात्वाचन्द्रचूडवत् ।

ज्ञानवन्तोऽपि तेऽन्येन प्रेर्यंत यदि कर्मणि ॥
सोऽप्यन्येन तदन्योऽपीत्यनेकेश्वरसङ्क्रमः ।
कोदोषश्चेद्भवेदेवं नैको विहितईश्वरः ॥
सर्वेषां परतन्त्रत्वादनीशत्वं कुलालवत् ।
तदेवं कार्यतां हेतुं सर्वदोषैरुपद्रुतम् ॥
आश्रित्य जगतो हेतुं साधयन्तो निराकृताः ॥

इति निखिलविधानाधीनविज्ञानमस्य त्रिभुवननवताव-ग्राहि दूरान्निरस्तम् । तदिह सकलवस्तुज्ञानशून्यः स रागात्क्षय-मिव दयिताङ्गासङ्गिनो मानतास्तु ।

एवमीश्वरस्य प्रामाण्यं निरस्य सांख्याभिमतस्य प्रकृ-तिपुरुषान्तरज्ञानस्य प्रामाण्यं निरस्यन्नाह—प्रकृत्यन्तरविज्ञा नमित्यादि । तेह्येवं मन्यन्ते केवलानन्दभोक्तृस्वरूपो हि पुरुषः प्रकृतिश्चाचिदात्मिका कथमसौ तां भुङ्क्ते केवलमज्ञानतमच्छन्नः प्रकृतिसाध्यमेवात्मगतंमन्यमानस्तत्सुखं दुःखं चोपभभुङ्क्त इति। यदा ज्ञानमस्य भवति दुःखहेतुरियं न मयानया सह सङ्गो युक्त इति तदा किमिति तदुपार्जितं कर्मफलमुपभुङ्क्ते । सापि च विज्ञानस्वरूपाहं मदीयं कर्मफलमनेन भोक्तव्यमिति बुध्वा न किञ्चिदपि करोति । कुट्टिनीव ज्ञानस्वरूपा दूरादुपसर्पति । अतः केवलज्ञानं मोक्षायालमिति । अथेदमभिधीयते कस्य तज्ज्ञानं किं प्रकृतेरथात्मन इति ? । न तावत् प्रकृतेररूपत्वादना भ्युपगमाद्वा । अत एव निर्ज्ञाताहमनेनेत्यस्याः योचितकमखण्ड-नम् ॥ अथात्मनस्तदपि किं भिन्नमथाभिन्नम् ?। यद्यभिन्नं तदा तत्स्वरूपवन्नित्यं स्यात् तत आदित एव मुक्तो भवेत् । अत आह—सर्वदा मोक्षइति ।

नित्यत्वे सर्वदा मोक्षो नित्यत्वे न तदुद्भवः ।

कालवैपुल्ययोगे तु कुशलाभ्याससंभवैः ॥ ८ ॥

अथ भिन्नम् । भिन्नमपि किं नित्यमथानित्यम्?। नित्यमपि किं संबद्धमसबद्धं वा ?। असम्बद्धे सर्वस्य स्यात् ततश्च न कस्यापि संसारः । संबन्धोऽपि न नित्ययोः परस्परमनुपकार्योपकारकयोः स्यात् । सबंधेऽपि वा सदा मुक्तिरिति । अनित्यमपि किं जन्यमजन्यं वा ?। तत्रानित्यमजन्यं चेति व्याहतम् । अव्याहतावपि सर्वस्य स्यात् । जन्यमपि किं प्रकृतिवियुक्तात्मजन्यं किं वा तत्सहितजन्यमिति ?। प्रथमपक्षे इतरेतराश्रयत्वम् । तथाहि सति ज्ञाने प्रकृतिवियोगः, सति वियोगे तज्ज्ञानमिति । तत्सहितजन्यत्वे किं तद्वियोगेन । सर्वदा सर्वेषां च मुक्तिः स्यात् ननूक्तमज्ञानतमश्चन्न इति । तमोविरामेऽवश्यं विज्ञानमुपजायत इति । अथ किमिदं तमः ?।रागादय इति चेत् । न, तेषां प्रकृतिधर्मत्वात् । न च साम्यावस्थायां तदुत्तरकार्यभाविनः प्रकृतावपि ते सन्तीति ब्रूमः । तथाहि—प्रकृतिरचेतना भोग्यरूपा सा भोक्तारमपेक्षते पुरुषोऽपि चेतनो भोक्ता च भोग्यमपेक्षते तयोरेते शक्तिरूपतया सन्तीति । शक्तिरूपतया सन्तीति चेत् । शक्तिरपि न कार्यकार्यं करोति किंतु स्वकार्यमेव करोति । न हि क्षीरे दधिशक्तिः दधिसाध्यं कार्यं करोति किंतु दध्येव करोति । दधि पश्चादात्मकार्यं करोति । पश्चाद्भवन्तु तथापि रागादयः सिद्धा इति चेत् । न, प्रधानस्य विकाराजनने सहकारिकारणाभावेन तेषां पश्चादप्यसिद्धेः । सन्तु वाऽविद्यारागादयस्ते मुक्तात्मनः किं न तमो भवति । अधिकारिण एव ते भवन्ति न मुक्तात्मान इति चेत् । किमिदमधिकारित्वं योग्यताकृतः संबन्धो वनगतयोरिव पङ्ग्वन्धयोर्ग्रामं जिगमिष्वोरिति । ननु सा योग्यता तयोर्नित्या न कदाचिदपि निवर्तेत न कदाचिज्ज्ञानो

त्पत्तिरिति–तदाह न तदुद्भव इति। न तस्य ज्ञानस्योद्भव उत्पत्तिःस्यादिति। नचाप्रच्युतानुत्पन्नस्थिरैकरूपस्यात्मनः स्वभावविगमो युक्तिमानिति न तस्य प्राग्वत्केवलज्ञानं प्रमाणमिति स्थितिः।

निरस्तकुमुदध्वान्ते जिनार्कोदयकाङ्क्षया।

इदानीमुदयो यस्य तस्यायमभिधीयते। कालवैपुल्येत्यादि। तथाहि।

जीवस्वाभाव्यतः सिद्धा गुणा गम्भीरतादयः।
चरमे पुद्गलावर्ते भव्यत्वे पाकमागते॥
रत्नत्रयाख्यं कुशलमवाप्याभ्यस्यतः क्रमात्।
ज्ञानवृत्तिक्षयाज्ज्ञानमर्हतो जायतेऽक्षतम्॥
शरीराद्भिन्नमात्मानं प्रत्यक्षं नैव वीयते।
प्रामाण्यं नानुमानस्य सर्वमेतदसंगतम्॥

ननु मानमसीत्येतद्वचनं चार्वाकचर्वितम्। किं प्रमाणमथान्यथा प्रमाणम्। कथमनुमाननिषेधायालम्। प्रमाणमपि नाध्यक्षम्। अनक्षजत्वात्। अथानुमानम्। तदेतत् पीतमद्यस्य प्रलपितम्। प्रतिपादयिष्यतेऽनुमानप्रामाण्यं प्रमाणाद्भित्वसिद्धाविति। तदेवोपन्यसन्नाह। सहेतुकमित्यादि। अनेन प्रयोगार्थो दर्शितः। प्रयोगश्च यत् सहेतुकं तत् सर्वदास्ति। यथा पृथिव्यादिकं सहेतुकंचाहाराद्यासक्तिचैतन्यपर्यायं जीवद्रव्यमिति। एतत् साधयितुमनुमानमाह।

आहारासक्तिचैतन्यं जन्मादौ मध्यवत्तथा।
अन्त्यसामग्रिवद्धेतुः संपूर्णः कार्यकृत्सदा॥

आहारासक्तीत्यादि। इहाहारग्रहणमुपलक्षणम्। इह चेतसो यदा शक्तिः सा तदाभ्यासपूर्वका। यथा यौवनाद्यव-

स्यायां रागाद्यासक्तिचित्तं तदभ्यासपूर्वम् । अस्ति च जन्मादावाहाराद्यासक्तिचैतन्यमिति कार्यहेतुः । तत्क्षणजातस्यापि स्तनपानशरीररक्षाद्युपलब्धेर्नासिद्धता हेतोः । सपक्षे सत्वान्न विरुद्धता, कार्यकारणभावसिद्धेर्नानैकान्तिकता । अनुगमस्य भावात् सदास्तित्वमात्मन इति । अथ कार्यकारणभावाव्यवस्थानात्कथमेतत् ?। तथाहि—

धूमो धूमान्तरोत्पन्नो न धूमादेव सर्वथा ।
शालूकादपि शालूकः कथं भवति गोमयात् ॥

तथा—

चित्रं चित्रकराज्जातमेतत् त्रिष्वपि किं तथा ।
तथाभ्यासाद्विशेषो यः सोऽन्यथापि भविष्यति ।

तदसत् ।

धूमो धूमाद्यथाभूतः सोऽन्यथापि न जायते ।
अभ्यासात्तु विशेषो यः स जन्मादौ तथा स्थितः ॥

ग्रामान्तराभ्यासवज्जन्मान्तराभ्यासानुपलब्धेर्न तत्कारणं चैतन्यं किंतु तदेव तस्योपलब्धेः । तस्मात्तदेव तदिति चेत् ।'एतद्गीताख्यानं अश्मद्वीतः किलान्येन स्पृष्टः । कथमसंभवः ?।

मातुर्दीर्घविषाणस्य वृषभस्य कथं स्थिते ।
स प्राह कुक्षेर्जायन्ते न मातुर्महिषादमी ॥

हट्टागतानामेवैषा शून्येन क्रयविक्रयमात्रकम् । न च मातृपितृचैतन्यत्वेन चेतसः सिद्धसाध्यता वाच्या । अन्यथा सकलस्य व्यापित्वादिविशेषस्याप्यनुवर्त्तनं स्यात् । न चेहान्यसंस्कारोऽन्यस्य दृष्टः । उपाध्यायसंस्कारानुवर्त्तनमुपलभ्यत इति चेत् । न, स्वसन्तानस्य पूर्वविज्ञानस्यैवाभिरुचिविशेषितस्य भावात् । अन्यथाऽदृष्टेः । ये चाचेतनात् काष्टादेरुपजायन्ते

तेषां कथं मातपितृचैतन्यपूर्वकत्वम् । किञ्च कस्यचिन्मरणभावात्सकलमातापितृस्वभावानुवर्त्तनं स्यात् । पारलौकिकस्तु मरणागर्भजन्मदुःखसमुद्घातव्याकुलत्वेन कस्य चिदेव दृष्टेः । कस्य चिज्जातिस्मरणमुपलभ्यते। अपूर्वो यत्तस्य तु सैवास्थितिर्न दुःखम् ।

तदैव तत्रोत्पन्नस्य न दुःखं विषकीटवत् ।
परलोकिनस्तु तद्दुःखमनाद्यभ्याससेवनात् ॥
अथ देहात्मिका देहा कार्या देहस्य च गुणो मतिः ।
मतत्रयमिहाश्रित्य न परलोकस्य सम्भवः ॥

तथाहि—न धूमो धूमान्तरादागच्छति नापि धूमध्वजान्तरं प्रयाति । नापि धूमध्वजे विरहे भवति । चित्रं वा न कुड्यान्तरादागच्छति कुड्यान्तरं वा संक्रामति, कुड्यविरहितं वावतिष्ठते । मदशक्तिकषायादेः सशर्करादपूर्वा जायमाना मद्यान्तरमवलम्बते, मद्यान्तराद्वागच्छति, तद्विगमे चावतिष्ठते, तदमता महाभाविनस्तद्वत्कश्चिदेव महाभूतपरिणतिविशेषश्चैतन्यहेतुः। तदप्यसत् ।

यतो न कश्चित् पृथ्व्यादेरंशो यत्र न जन्तवः ।
संस्वेदजाद्या जायन्ते सर्वजीवात्मकं ततः ॥

अथ यदि न महाभूतकार्याः प्राणिनः कथं कष्ठाद्यन्वयिनी प्राणिजातिरूपलभ्यते । तत्र यतः समानजातीयं सर्वं तद्रूपप्राणिमयं स्यात् । न चैवम्। तथाहि—परिताप्य स्थापितेऽम्भसि किल तद्रूपप्राणिगणोत्पत्तिः स्यात्। कुतो वर्णसंस्थानवैलक्षण्यम् । रक्तशिरसः पीतकायादयोऽपरे जलादिप्राणिनो दृष्टाः स आकारः कुतो भवत् । तद्रूपबीजात् कमलादिभेदः किं दृष्ट इष्टो वा नियतः । कदाचिन्न प्राणिभेदो नियतोऽस्ति बीजात् सन्त्वत्र कर्माणि नियामकानि ॥ न च चैतन्यादुत्पद्यमानमुपलब्धमन्यथा शरीरा

दुत्पद्यत इति वाच्यम् । सर्वत्र कार्यकारणाभावाप्रसक्तेः । तथा च सति ।

नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥

किं च तदुत्पद्यमानं चैतन्यं किं समस्तादुत्पद्यते, व्यस्ताद्वा ?। न तावत् समस्तात् । अङ्गुल्यादिच्छेदेऽपि मरणप्रसङ्गात् । अन्यथा शिरश्छेदेऽप्यमरणप्रसक्तेः । नापि व्यस्तात् । एकस्मिन्नेव कायेऽनेकचैतन्योत्पत्तिः प्रसङ्गात् । अस्त्वेकः शरीरावयवी तत एकमेव चैतन्यमुत्पद्यते । तदप्यसत् । आवृतानावृतत्वेन रक्तारक्तत्वेन चलाचलत्वेन च तस्य सम्भवात् । किञ्च शरीरस्यावैकल्यान्मृतशरीरेऽपि चैतन्योत्पत्तिःस्यात् अथ । वातादिदोषैर्वैगुण्यान्मृतशरीरस्य चैतन्योत्पादकत्वम् । नैतत्सारम् । यतो मृतस्य समीभवन्ति दोषास्ततो देहस्यारोग्यलाभात्पुनरुज्जीवनं स्यात् । तेषां समत्वमारोग्यं क्षयवृद्धिविपर्यय इति वचनात् । अथ समीकरणं दोषाणां कुतो ज्ञायते। चक्षुरादिविकारादर्शनात् । अथ वैगुण्यकारिणि निवृत्तेऽपि नावश्यं तत्कृतस्य वैगुण्यस्य निवृत्तिः । यथाग्निनिवृत्तावपि न काष्टाद्दाहस्यापि । तदपि न । यतः किञ्चित् क्वचिदनिवर्त्यविकारारम्भकं दृष्टं यथाकाष्टेऽग्निः क्वचिच्च निवर्त्यविकारारम्भकं यथा सुवर्णे द्रवतायाः । तत्र यदि दोषविकारोऽनिवर्त्यः स्याच्चिकित्साशास्त्रं वृथैव स्यात्। ततो दौर्बल्यादिविकारस्येव महतोऽपि मरणविकारस्य निवृत्तिः प्रसज्येत । अथ चिकित्साप्रयोगाद्दौर्बल्यादिनिवृत्त्युपलब्धेः प्रत्यानेयविकारत्वमसाध्यव्याध्युपलब्धेश्चाप्रत्यानेयविकारत्वं चेत्युभयथाभावान्मरणानिवृत्तिः । तदसत् ।

वातादिधातुवैषम्यादसाध्यत्किञ्चिदीरितम् ।
आयुःक्षयाद्वा दोषे तु केवले नास्त्यसाध्यता ॥

तथा हि—तेनैव व्याधिना कश्चिन्नेति नेदमसमञ्जसं केवले दोषे विकारकारिणि घटते । तस्मात्कर्माधिपत्यमेवात्र परिहारः । अन्यथा मृते विषादिसंहारात्तद्ंशच्छेदेदतोपि वा । विकारहेतोर्वगमेननोच्छ्वनः । किञ्चोपादानविकारमन्तरेण नोपादेयस्य विकारो दृष्टः । यथा मृद्विकारमन्तरेण न कुण्डस्य स्वस्थ तु स्वस्थेऽपि देहे भयशोकादिना मनोविकारदर्शनान्न देहस्योपादानता। शरीरविकारेणापि चेतसि विकारोपलब्धेः तदुपादानमिति चेन्न । पुत्रेण व्यभिचारात् । नियमाभावाच्च । यथा हि चित्तविकारमन्तरेण नोत्तरचेतसो विकारो नैवं शरीरे नियमः ।

अवस्थाकारणं यत्तु तदुपादानकारणम् ।
अवस्थाकृन्निवृत्तौ हि सैवावस्था निवर्त्तताम् ।
सन्तानकारणं यत्तु तदुपादानकारणम् ॥
तन्निवृत्तौ भवेत्तस्य सन्तानस्य निवर्त्तनम् ।
अग्नेर्निवृत्तौ हेम्नस्तु द्रवतैव निवर्तते ॥
चेतसः सह कायेन तावत्कालमवस्थितिः ।
अन्योन्यसहकारित्वादग्नितात्र द्रवत्ववत् ॥
तयोर्हेतोरकार्ये तु चित्तं तिष्ठति हेमवत् ।

तच्चित्तमेव चेतसउपादानं न शरीरमिति। नापि चक्षुरादिनियतम् । मनःसमाश्रितान्येन चक्षुरादीन्युपलभ्यन्ते न मनस्तदाश्रितम् । यस्मान्नियमेन भयशोकक्रोधादिनोपहते मनसि चक्षुर्विकारो दृश्यते न तु सात्विकानां चक्षुरादिविकारोऽपि मनोविकारः । कादाचित्कस्तु मनसो विकारः । पुत्रेन्द्रियविकारेऽपि पितुरुपलब्धेरिति न ततो व्यभिचारः । न च

यथाग्नेर्विकारमासाद्य घटादिवस्तु तत एव नोत्पद्यते तथेन्द्रियाणीति वाच्यम् ।

यतः

घटादिरन्यथा दृष्टस्ततो न तत एव सः ।
नान्यथा तु पुनर्दृष्टमिन्द्रियं तद्विकारतः ॥

किं च चक्षुरादिभ्यः किमेकैकशो मनोविज्ञानमुत्पद्यते, समस्तेभ्यो वा?। प्रथमपक्षे नियतविषयमनोविज्ञानं स्यात्। रूपादिदर्शनादिवत् । द्वितीये तु नान्धबधिरादेर्मनोविज्ञानं स्यात् । न हि बीजादिभ्यःसमस्तेभ्यः समुत्पद्यमानोऽङ्कुरस्तदेकापाये उत्पद्यते । तन्न चक्षुरादिकार्यता । नापि प्राणापानकार्यता । प्राणापानौ हि मनोविज्ञानान्वयव्यतिरेकानुविधायिनौ । न मनोविज्ञानं तदन्वयव्यतिरेकानुविधायि। अन्यथा मूलाविच्छेदे चैतन्यं न स्यात् । तत्कार्यतामन्तरेण मनोज्ञानवश्यता च तयोर्न स्यात् । न खल्वन्याधीनमन्येन वशयितुशक्यम् । अथान्यत उत्पन्नोऽप्यन्येन नियम्यते । यथा स्वामिना भृत्यः । तदप्यसत् ।

भृत्यस्यान्यत उत्पत्तिर्दृश्यते न पुनस्तयोः ।
न चित्तमन्तरेणास्ति तयोरुत्पत्तिरन्यतः ॥

अथ स्वापावस्थायां प्राणापानौ चित्तमन्तरेणापि दृश्येते तत्कथं तत्कार्यौ ?। तन्न । निद्राभिभूतस्य तदापि भावात् ।

शरीरचेष्टा यावत्यस्ताः स्वार्थाः चित्तसंस्कृताः ।
सुप्तस्य दीर्घह्रस्वादिनिश्वासाः पूर्वचित्ततः ॥

न हि चैतन्यमन्तरेण प्रेरणाकर्षणे भवतः । न च प्रेरणाकर्षणे एव चैतन्यात् प्राणापानाविति । तत्स्वरूपव्यतिरेकेण प्रेरणाकर्षणयोरभावात । अथ स्थिरो वायुः प्राणापानयोर्हेतुस्तश्चेतना । तदप्यसत् । मृतस्यापि स्थिरो वायुरस्तीति प्राणा-

पानानिवृत्तौ चेतन्यानिवृत्तिः स्यात् । यदि च प्राणापानकार्यं चैतन्यं तदा तयोर्निर्ह्रासातिशये तस्यापि तौ स्याताम् । अवश्यं हि कारणे परिहीयमानेऽभिवर्द्धमाने वा कार्यस्य हानिरुपचयश्च स्यात् । अन्यथा तत्तस्य कार्यमेव न भवेत् । न चैवमत्र । न शरीरेन्द्रियप्राणापानकार्यं चित्तम् । नापि देहाश्रितम् । आश्रयाश्रयिभावप्रतिषेधात् । तथाहि-असतस्तावत् खरविषाणस्येव नाश्रयः केवलमसत्कारणादुत्पत्तिमेवेहतेऽतो सतः कारणमेव स्यान्नाश्रयः । सतोऽपि सर्वनिराशसत्वान्न कश्चिदाश्रयः । अथसतः स्थितिकरणे वाश्रयो न । स्थितेः स्थातुरव्यतिरेकेण तत्करणे स एव कृतः स्यात् । न च सतः करणम् । उत्पन्नस्य पुनरुत्पादायोगात् । अथोत्पन्नस्यापि किञ्चिदुत्पन्नमस्ति तत्कारणादाश्रयः सर्वात्मनोत्पादे कारणमुच्यते कस्यचित्तु धर्मस्योत्पादे आधारः । नच स्थितिरव्यतिरिक्तस्वरूपा । पततोऽपि स्थत्यभावे स्वरूपसद्भावात् । यदि पुनरव्यतिरिक्ता स्थितिः स्यात् स्थितेरव्यतिरिक्तः सभवेत् ततः सर्वदा स्थितिरेव भवेत् तेन स्वरूपेसति निवर्त्तमानविरुद्धर्माध्यासात् ततोऽव्यतिरिक्ताऽसौ । तदप्यसत् । व्यतिरिक्ते हि सति तद्धेतुरेवासौ न तस्याधारः । तस्य स्थितिकरणात्तदाधार इति चेत् । किमसावुत्पन्ना सती स्थाप्या भवत्यन्यथा वा ? । अनुत्पन्नाऽसत्वान्न । तस्य उत्पन्नाप्यन्यस्मात् कथम् । भावस्य तादात्म्यतदुत्पत्तिसंबन्धाभावात् । अथ तत एवोत्पद्यते नान्यतः । तथा सति तत्कार्या स्यान्नाश्रयकार्या । तत्र चोक्तदूषणम् । तथाहिस्थाप्येन स्थितिः क्रियते नाश्रयेण । अथ स्थितेः स्थितिः क्रियते आश्रयेण तर्ह्यनवस्था स्यात् । यदि चाश्रायो देहस्तदा यस्य स्थितिकारणमस्ति तस्य न विनाशः स्यात् । अथ स्थापके सत्यपि नाशहेतोर्नाशः । न नाशोनामान्य एव भावात् । तद्व्यतिरेके च नाश

एव तेन कृतः स्यान्न भावस्ततोऽनाशात्स्वयमेवास्त इति किं स्थितिहेतुना । यदि च नाशहेतोर्नानाशो यावन्नाशको नायाति तावत् स्वयमेवास्त इति किं स्थिहेतुना । अथ विनाशकात् पूर्वं स्थापकेन विनाशप्रतिबन्धः क्रियते । ननु सोऽपि विनाशप्रतिबन्धोऽन्यो विनाश्यात् । ततो विनाश्यस्य न किंचिदिति विनश्येत् । अथानन्यस्तर्हि विनाश्यः स्थापकेन क्रियते न स्थितिः । अथ प्रतिक्षणविनश्वरः स्थापकादन्यथा भवति तस्य विनाशोऽहेतुक इति स एव प्रतिक्षणविनाशः स चान्यथास्थापकादुत्पन्न इति करणमेव स्यान्न स्थापकः । अथ पततो धारणोपलब्धेः कथं न स्थापकः? । न पततो धारणं यस्य च धारणं न तस्य पतनम् । पतनापतनयोः परस्परविरोधात् । पूर्वं पतनं पश्चादपतनमिति चेत् । तर्हि यस्य पतनं तस्य धारणम् । प्रत्यक्षेणैकत्वाप्रतिपत्तेः । न ह्येकोऽवस्थानपतने कस्याप्युपलभ्यते । स एव पतन्नवतिष्ठत इति एकत्वाभिमानादवस्थातुः प्रतीतिरिति चेन्न । प्रत्यभिज्ञानस्याभिमानमात्रत्वात् । ततः प्रतिक्षणविनाशिना परपरादेशोत्पादवतामुपादानदेशोत्पत्तिराधारसमागमकृतेति हेतुरेव विशिष्टावस्थाया आधार उच्यते । किंच गुरुणो द्रव्यस्य पततः पातप्रतिबन्धात् स्थापकः स्यादपि निष्क्रियाणां तु गुणसामान्यकर्मणां किमाधारेण । चैतन्यं च सामान्यं गुणः कर्म वा । तच्च सर्वथा निष्क्रयमिति नाधारेणास्य किंचित् । अतोऽनाधेयस्य चेतसो नाशे न विनाशः कियत्कालं तु सहस्थानमात्रकम् । अग्नि ताम्रद्रवत्ववदित्युक्तम् । तन्न कायाश्रितं चेतः । नापि कायात्मकम् । यतः परमाणुसंघातमात्रमेव शरीरम् । तत्तादात्म्ये प्रत्येकं सकलपरमाणुसंवेदनप्रसङ्गः स्यात् । न चावयव्येको विद्यते । तत्सद्भावेऽपि वा श्यामतादिवदन्येन चैतन्ये वेदनं स्यात् । अन्तःस्प्रष्टव्यरूपत्वान्नेति चेत् । न, व्रणं स्पृशतोऽन्यस्यापि तद्वेदनावेदनं

स्यात् तच्छरीरे गृह्यमाणे चैतन्याग्रहणाद्विरुद्धधर्माध्यासेन तादात्म्यम्। तन्न देहकार्यं देहगुणो देहात्मकं चैतन्यं किन्तु जन्मान्तरचैतन्योपादानमेव जन्मादिजन्यचैतन्यपर्यायं जीवद्रव्यमिति। अथ कथं परलोकशरीराच्छरीरान्तरसंचारः। बद्धादिशरीरावस्थासंचारवत्?। अथैकोपादानभावेन तदेकत्वान्न शरीरान्तरम्। पश्वादिशरीरं तु नैवम्। तदपि स्वाप्निकशरीरसंचारदर्शनादनैकान्तिकम्। किंच शरीरान्तरे मनः संक्रान्तिः कथञ्चिद्ग्राहकत्वेनैव नान्यथातः। सा चेह पश्वादिशरीरेष्वप्युपलभ्यते। तत्कथं न शरीरान्तरसंचारोपलब्धिः। अथाग्राह्यतामात्रे संचारे परशरीरवत्स्वशरीरक्षतावपि न व्याकुलतादयः स्युः । तदप्यसत् । परक्षतादिदर्शनेऽपि केषाञ्चिद्व्याकुलतोपलब्धेरात्मशरीरक्षतावपि केषाञ्चिदभावात् । तदानेकजन्मपरम्परावासनादार्ढ्यादात्मीयग्रहसद्भावे व्याकुलतादयः प्रवर्त्तन्तइति । अथ भवतु कार्यादतीतपरलोकानुमानं भाविनस्तु कथं तदर्थावदनादिक्रियेष्यते?। तदपि यत्किञ्चित्। सिद्धे हि कार्यकारणभावे यथा कार्यात् कारणानुमानं तथाऽविकलकारणात्कार्यस्यापि इत्यनैकान्तिकत्वादिदूषणं नैव संभवति ।

कार्यकारणसद्भावाच्चैतन्येनान्यचेतसइति ।
एवं क्षणिकपर्यायपरिणामिनि संस्थिते ॥
गुणाः प्रकर्षमायान्ति कालेन सहकारिणा ।
इति निगदितमेतत् केवलज्ञानहेतुः
कुशलमखिलबन्धो ज्ञानचारित्रदृष्टिः ।
सकलमलविहीनं साधनं तस्य सिद्धै
कथयितुमिदमन्यद्वार्तिकस्याह कर्ता ॥

अन्त्यसामग्र्यवद्धेतुरित्यादि । हेतुः कारणकलापः । संपूर्ण इत्यविकलः । सदेत्यवश्यमेव कार्यकारी ।

अन्यथा कार्योत्पत्तिर्न कदाचित् स्यात् । अन्त्यसामग्र्यवदिति व्याप्तिविषयोपदर्शनम् । कश्चिद्विवादाध्यासितस्तत्वज्ञानोत्पत्तिग्रहोपरागादिसाक्षात्कारित्वाविकलकारणमिति । प्रयोगश्च यदविकलकारणं तदवश्यमेव कार्यमुत्पादयति । यथा ऽन्त्या कारणसामग्री । अविकलकारणश्चातीन्द्रियग्रहोपरागादिसाक्षाद्द्रष्टा तज्जातीयेष्वतीन्द्रियेषु जीवादिषु कश्चिदिति । हेतुमेव समर्थयितुमाह । यस्य यज्जातीयाः पदार्थाः प्रत्यक्षास्त, स्यासत्यावरणे तेऽपि प्रत्यक्षाः । यथा घटसमानजातीयं भूतलो प्रत्यक्षत्वे घटः । प्रत्यक्षाश्च कस्यचिदतीन्द्रियजीवादिपदार्थसजातीयग्रहोपरागदयो भावा इति । न तावदयं सिद्धो हेतुः यतो यो यद्विषयानुपदेशालिङ्गविसंवादिवचनरचनानुक्रमकर्त्ता स तत्साक्षात्कारी । यथास्मादादिरात्मियानुभववचनरचनानुक्रमकर्त्ता । ग्रहोपरागादिसाक्षात्कारी तच्छास्त्रकर्तेति । न चापौरुषेयत्वेनाखिद्रुत्त्वमभिधानीयम् । तस्य पूर्वमेव निरस्तत्वात् । नन्वनुमानबाधितेयं प्रतिज्ञा । तथाहि—देशान्तरे कालान्तरे च यद्रूपं तदिदानीन्तनचक्षुर्जनितप्रत्यक्षसमानजातीयं प्रत्यक्षग्राह्यम् । रूपशब्दवाच्यत्वात् । इदानीन्तनरूपवदिति - एवं रसादिष्वपि पञ्चानुमानानि भवन्ति । तथा चक्षुर्जनित, प्रत्यक्षं तत् देशान्तरादावपि नियतदेशकालरूपग्राहकम् । प्रत्यक्षशब्दवाच्यत्वात् । इदानीन्तनरूपप्रत्यक्षवदिति । एवं शेषेन्द्रियप्रत्यक्षेष्वपि पञ्चानुमानानि भवन्ति । तदुक्तम् ।

यज्जातीयैःप्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
दृष्टं संप्रति लोकस्य तथा कालान्तरेऽप्यभूदिति ॥

न च गृध्रादिभिर्व्यभिचारो वाच्यः । तेऽपि न स्वार्थमुल्लङ्घ्य वर्तन्ते ॥ तदुक्तम् ।

यत्राप्यतिशयो दृष्टः स्वस्वार्थानतिलङ्घनात् ।
दृष्टः पश्यादिदृष्टौ स्यात् न रूपो श्रोत्रवृत्तिलः ॥
येऽपि सातिशया दृष्टाः प्रज्ञामेधाबलैर्नराः ।
स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥
प्राज्ञोऽपि हि नरः सूक्ष्मानर्थान् द्रष्टुं क्षमोऽपि सन् ।
न सजातीनतिक्रामन्नतिशेते परान् नरानिति ॥
एकशास्त्रविचारेषु दृश्यतेऽतिशयो महान् ।
न तु शास्त्रान्तरज्ञानं तावन्मात्रेण लभ्यते ॥
ज्ञात्वा व्याकरणं दूरं बुद्धिः शब्दापशब्दयोः ।
प्रकृष्यते न नक्षत्रतिथिग्रहणनिर्णये ॥
ज्योतिर्विच्च प्रकृष्टोऽपि चन्द्रार्कग्रहणादिषु ।
न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति ॥
तथावेदेतिहासादिज्ञानातिशयवानपि ।
न स्वर्गदेवतादृष्टप्रत्यक्षीकरणक्षमः ॥

दशहस्तान्तरव्योम्नि यो यो नामोत्प्लुत्य गच्छति ।
न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥
तस्मादतिशयज्ञानैरतिदूरगतैरपि ।
किंचिदेवाधिकं ज्ञातुं शक्यते नत्वतीन्द्रियमिति ॥

तत्स्थितमनुमानबाधितेयं प्रतिज्ञेति । तथाऽभावप्रमाण-बाधिता । तथाहि—प्रत्यक्षानुमानागमोपमानार्थापत्यभावेऽभाव-प्रमाणमेव विजयते । तदभावमेव दर्शयितुमाह ।

सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गत्वाद्योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः ।
वेदाहमग्रे पुरुषं महान्तमादित्यवर्णं तमसः पुरस्तात्,

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति, तथा विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वत- स्पात् । सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एक आस्ते इत्यादेर्विद्यमानत्वादिति चेत् । न, स्तुतिमात्र- त्वादेवेषां न प्रामाण्यमिति । तथा चाह—

न च मन्त्रार्थवादानां तात्पर्यमवकल्पते ।
न चार्थेनाप्रधानैस्तैस्तदस्तित्वं विधीयते ॥
नचानुवदितुं शक्यं पूर्वमन्यैरबोधितम् ।
अनादिरागमस्यार्थो न च सर्वज्ञ आदिमान् ॥
कृत्रिमेण त्वसत्येन स कथं प्रतिपद्यते ।
अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते ॥
प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः ।
सर्वज्ञोक्ततया वाच्यं सत्यं तेन तदस्तिता ॥
कथं तदुभयं सिद्ध्येत् सिद्धमूलान्तरादृते ।
असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ॥
सर्वज्ञमगच्छन्तः स्ववाक्यात् किं न जानते ।
सर्वज्ञसदृशं कञ्चित् यदि पश्येम संप्रति ॥
उपमानेन सर्वज्ञं जानीयामस्ततो वयम् ।
उपदेशो हि बुद्धादेः धर्माधर्मादिगोचरः ॥
अन्यथा नोपपद्येत सर्वज्ञो यदि नाभवत् ।
बुद्धादयो ह्यवेदज्ञा तेषां वेदाद्यसंभवः ॥
उपदेशः कृतोऽतस्तैर्व्यामोहादेव केवलात् ।
येऽपि मन्वादयः सिद्धाः प्रधानेन त्रयीविदः ॥
त्रयीविद्याश्रितग्रन्थास्ते वेदप्रभवोक्तयः । तदेवम् ।
प्रामाणपञ्चकं यत्र वस्तुरूपेण जायते ॥

वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ।
तथोपमानबाधिता तथाहि—
नरान् दृष्ट्वा त्वसर्वज्ञान् सर्वानेवाधुनातनान् ॥
तत्सादृश्योपमानेन तस्यासर्वज्ञसाधनमिति ॥
तदेवमनुमानाभावप्रमाणोपमानबाधितेयं प्रतिज्ञेति ।

भवतु वा तथापि निष्फला तथापि समस्तावयवव्यक्तिविस्तरज्ञानसाधनं काकदन्तपरीक्षावत्क्रियमाणमनर्थकम् । यथा चक्षुषा सर्वभावान् वेत्तीति फलं सर्वदर्शित्वप्रतिज्ञाप्यफला । तथा ।

स्वधर्माधर्ममात्रज्ञसाधनप्रतिषेधतः ।
तत्प्रणीतागमग्राह्यहेयत्वे हि प्रसिद्धितः ॥
कुत्र सर्वजगत्सूक्ष्मभेदज्ञत्वप्रसाधने ।
अस्थाने क्लिश्यते लोकः संरम्भाद्ग्रन्थवाद्योः ॥
एतच्च फलवज्ज्ञानं यावद्धर्मादिगोचरे ।
न तु वृक्षादिभिर्ज्ञातैरस्ति किञ्चित्प्रयोजनम् ।
क्रत्वर्थाः पुरुषार्थाश्च यावन्तः खदिरादयः ॥
सर्ववृक्षज्ञता तावत्तावत्स्वेव समाप्यते ।
लतासोमगुडूच्याद्याः काश्चिद्धर्मार्थहेतवः ॥
सिद्धान्तज्ञानमात्रेण लतासर्वज्ञतापि नः ।
व्रीहिश्यामाकनीवारग्राम्यारण्यौषधीरपि ॥
ज्ञात्वा भवति सर्वज्ञो नानर्थकशतान्यपि ।
तथा कतिपयेष्वेव यज्ञगेषु तृणेष्वपि ॥
दर्भादिषु च बुद्धेषु तृणसर्वज्ञतेष्यते ।
तृणौषधिलतावृक्षजातयोऽन्याः सहस्रशः ॥
विविक्ता नोपयुज्यन्ते तदज्ञानेन नाज्ञता ।
यत्रापि चोपयुज्यन्ते व्यक्तयोर्जतिलक्षिताः ॥

यथाग्नेर्विकारमासाद्य घटादिवस्तु तत एव नोत्पद्यते तथेन्द्रियाणीति वाच्यम् ।

यतः

घटादिरन्यथा दृष्टस्ततो न तत एव सः ।
नान्यथा तु पुनर्दृष्टमिन्द्रियं तद्विकारतः ॥

किं च चक्षुरादिभ्यः किमेकैकशो मनोविज्ञानमुत्पद्यते, समस्तेभ्यो वा?। प्रथमपक्षे नियतविषयमनोविज्ञानं स्यात्। रूपादिदर्शनादिवत् । द्वितीये तु नान्धबधिरादेर्मनोविज्ञानं स्यात् । न हि बीजादिभ्यःसमस्तेभ्यः समुत्पद्यमानोऽङ्कुरस्तदेकापाये उत्पद्यते । तन्न चक्षुरादिकार्यता । नापि प्राणापानकार्यता । प्राणापानौ हि मनोविज्ञानान्वयव्यतिरेकानुविधायिनौ । न मनोविज्ञानं तदन्वयव्यतिरेकानुविधायि। अन्यथा मूलाविच्छेदे चैतन्यं न स्यात् । तत्कार्यतामन्तरेण मनोज्ञानवश्यता च तयोर्न स्यात् । न खल्वन्याधीनमन्येन वशयितुशक्यम् । अथान्यत उत्पन्नोऽप्यन्येन नियम्यते । यथा स्वामिना भृत्यः । तदप्यसत् ।

भृत्यस्यान्यत उत्पत्तिर्दृश्यते न पुनस्तयोः ।
न चित्तमन्तरेणास्ति तयोरुत्पत्तिरन्यतः ॥

अथ स्वापावस्थायां प्राणापानौ चित्तमन्तरेणापि दृश्येते तत्कथं तत्कार्यौ ?। तन्न । निद्राभिभूतस्य तदापि भावात् ।

शरीरचेष्टा यावत्यस्ताः स्वार्थाः चित्तसंस्कृताः ।
सुप्तस्य दीर्घह्रस्वादिनिश्वासाः पूर्वचित्ततः ॥

न हि चैतन्यमन्तरेण प्रेरणाकर्षणे भवतः । न च प्रेरणाकर्षणे एव चैतन्यात् प्राणापानाविति । तत्स्वरूपव्यतिरेकेण प्रेरणाकर्षणयोरभावात । अथ स्थिरो वायुः प्राणापानयोर्हेतुस्तश्चेतना । तदप्यसत्। मृतस्यापि स्थिरो वायुरस्तीति प्राणा-

पानानिवृत्तौ चैतन्यानिवृत्तिः स्यात् । यदि च प्राणापानकार्यं चैतन्यं तदा तयोर्निर्ह्रासातिशये तस्यापि तौ स्याताम् । अवश्यं हि कारणे परिहीयमानेऽभिवर्द्धमाने वा कार्यस्य हानिरुपचयश्च स्यात् । अन्यथा तत्तस्य कार्यमेव न भवेत् । न चैवमत्र । न शरीरेन्द्रियप्राणापानकार्यं चित्तम् । नापि देहाश्रितम् । आश्रयाश्रयिभावप्रतिषेधात् । तथाहि-असतस्तावत् खरविषाणस्येव नाश्रयः केवलमसत्कारणादुत्पत्तिमेवेहतेऽतो सतः कारणमेव स्यान्नाश्रयः । सतोऽपि सर्वनिराससत्वान्न कश्चिदाश्रयः । अथसतः स्थितिकरणे वाश्रयो न । स्थितेः स्थातुरव्यतिरेकेण तत्करणे स एव कृतः स्यात् । न च सतः करणम् । उत्पन्नस्य पुनरुत्पादायोगात् । अथोत्पन्नस्यापि किञ्चिदुत्पन्नमस्ति तत्कारणादाश्रयः सर्वात्मनोत्पादे कारणमुच्यते कस्यचित्तु धर्मस्योत्पादे आधारः । नच स्थितिरव्यतिरिक्तस्वरूपा । पततोऽपि स्यत्यभावे स्वरूपसद्भावात् । यदि पुनरव्यतिरिक्ता स्थितिः स्यात् स्थितेरव्यतिरिक्तः सभवेत् ततः सर्वदा स्थितिरेव भवेत् तेन स्वरूपेसति निवर्त्तमानविरुद्धर्माध्यासात् ततोव्यतिरिक्ताऽसौ । तदप्यसत् । व्यतिरिक्ते हि सति तद्धेतुरेवासौ न तस्याधारः । तस्य स्थितिकरणात्तदाधार इति चेत् । किमसावुत्पन्ना सती स्थाप्या भवत्यन्यथा वा ? । अनुत्पन्नाऽसत्वान्न । तस्य उत्पन्नाप्यन्यस्मात् कथम् । भावस्य तादात्म्यतदुत्पत्तिसंबन्धाभावात् । अथ तत एवोत्पद्यते नान्यतः । तथा सति तत्कार्या स्यान्नाश्रयकार्या । तत्र चोक्तदूषणम् । तथाहि-स्थाप्येन स्थितिः क्रियते नाश्रयेण । अथ स्थितेः स्थितिः क्रियते आश्रयेण तर्ह्यनवस्था स्यात् । यदि चाश्रयो देहस्तदा यस्य स्थितिकारणमस्ति तस्य न विनाशः स्यात् । अथ स्थापके सत्यपि नाशहेतोर्नाशः । न नाशोनामान्य एव भावात् । तद्व्यतिरेके च नाश

एव तेन कृतः स्यान्न भावस्ततोऽनाशात्स्वयमेवास्त इति किं स्थितिहेतुना । यदि च नाशहेतोर्नानाशो यावन्नाशको नायाति तावत् स्वयमेवास्त इति किं स्थिहेतुना । अथ विनाशकात् पूर्वं स्थापकेन विनाशप्रतिबन्धः क्रियते । ननु सोऽपि विनाशप्रतिबन्धोऽन्यो विनाश्यात् । ततो विनाश्यस्य न किंचिदिति विनश्येत् । अथानन्यस्तर्हि विनाश्यः स्थापकेन क्रियते न स्थितिः । अथ प्रतिक्षणविनश्वरः स्थापकादन्यथा भवति तस्य विनाशोऽहेतुक इति स एव प्रतिक्षणाविनाशः स चान्यथास्थापकादुत्पन्न इति करणमेव स्यान्न स्थापकः । अथ पततो धारणोपलब्धेः कथं न स्थापकः? । न पततो धारणं यस्य च धारणं न तस्य पतनम् । पतनापतनयोः परस्परविरोधात् । पूर्वं पतनं पश्चादपतनमिति चेत् । तर्हि यस्य पतनं तस्य धारणम् । प्रत्यक्षेणैकत्वाप्रतिपत्तेः । न ह्येकोऽवस्थानपतने कस्याप्युपलभ्यते । स एव पतन्नवतिष्ठत इति एकत्वाभिमानादवस्थातुः प्रतीतिरिति चेन्न । प्रत्यभिज्ञानस्याभिमानमात्रत्वात् । ततः प्रतिक्षणविनाशिना परपरादेशोत्पादवतामुपादानदेशोत्पत्तिराधारसमागमकृतेति हेतुरेव विशिष्टावस्थाया आधार उच्यते । किंच गुरुणो द्रव्यस्य पततः पातप्रतिबन्धात् स्थापकः स्यादपि निष्क्रियाणां तु गुणसामान्यकर्मणां किमाधारेण । चैतन्यं च सामान्यं गुणः कर्म वा । तच्च सर्वथा निष्क्रयमिति नाधारेणास्य किंचित् । अतोऽनाधेयस्य चेतसो नाशे न विनाशः कियत्कालं तु सहस्थानमात्रकम् । अग्नितास्रद्रवत्ववदित्युक्तम् । तन्न कायाश्रितं चेतः । नापि कायात्मकम् । यतः परमाणुसंघातमात्रमेव शरीरम् । तत्तादात्म्ये प्रत्येकं सकलपरमाणुसंवेदनप्रसङ्गः स्यात् । न चावयव्येको विद्यते । तत्सद्भावेऽपि वा श्यामतादिवदन्येन चैतन्ये वेदनं स्यात् । अन्तःस्प्रष्टव्यरूपत्वान्नेति चेत् । न, व्रणं स्पृशतोऽन्यस्यापि तद्वेदनावेदनं

स्यात् तच्छरीरे गृह्यमाणे चैतन्याग्रहणाद्विरुद्धधर्माध्यासेन तादात्म्यम्। तन्न देहकार्यं देहगुणो देहात्मकं चैतन्यं किन्तु जन्मान्तरचैतन्योपादानमेव जन्मादिजन्यचैतन्यपर्यायं जीवद्रव्यमिति। अथ कथं परलोकशरीराच्छरीरान्तरसंचारः। बाल्यादिशरीरावस्थासंचारवत्?। अथैकोपादानभावेन तदेकत्वान्न शरीरान्तरम्। पश्वादिशरीरं तु नैवम्। तदपि स्वाप्निकशरीरसंचारदर्शनादनैकान्तिकम्। किंच शरीरान्तरे मनः संक्रान्तिः कथञ्चिद्ग्राहकत्वेनैव नान्यथातः। सा चेह पश्वादिशरीरेष्वप्युपलभ्यते। तत्कथं न शरीरान्तरसंचारोपलब्धिः। अथाग्राह्यतामात्रे संचारे परशरीरवत्स्वशरीरक्षतावपि न व्याकुलतादयः स्युः। तदप्यसत्। पररक्तादिदर्शनेऽपि केषाञ्चिद्व्याकुलतोपलब्धेरात्मशरीरक्षतावपि केषाञ्चिदभावात्। तदानेकजन्मपरम्परावासनादार्ढ्यादात्मीयग्रहसद्भावे व्याकुलतादयः प्रवर्त्तन्तइति। अथ भवतु कार्यादतीतपरलोकानुमानं भाविनस्तु कथं तदर्थावदनादिक्रियेष्यते?। तदपि यत्किञ्चित्। सिद्धे हि कार्यकारणभावे यथा कार्यात् कारणानुमानं तथाऽविकलकारणात्कार्यस्यापि इत्यनैकान्तिकत्वादिदूषणं नैव संभवति।

कार्यकारणसद्भाच्चैतन्येनान्यचेतसइति।
एवं क्षणिकपर्यायपरिणामिनि संस्थिते॥
गुणाः प्रकर्षमायान्ति कालेन सहकारिणा।
इति निगदितमेतत् केवलज्ञानहेतुः
कुशलमखिलबन्धो ज्ञानचारित्रदृष्टिः।
सकलमलविहीनं साधनं तस्य सिद्धै
कथयितुमिदमन्यद्वार्तिकस्याह कर्ता॥

अन्त्यसामग्र्यवद्धेतुरित्यादि। हेतुः कारणकलापः। संपूर्ण इत्यविकलः। सदेत्यवश्यमेव कार्यकारी।

अन्यथा कार्योत्पत्तिर्न कदाचित् स्यात् । अन्त्यसामग्र्यवदिति व्याप्तिविषयोपदर्शनम् । कश्चिद्विवादाध्यासितस्तत्वज्ञानोत्पत्तिग्रहोपरागादिसाक्षात्करित्वाविकलकारणमिति । प्रयोगश्च यदविकलकारणं तदवश्यमेव कार्यमुत्पादयति । यथा ऽन्त्या कारणसामग्री । अविकलकारणश्चातीन्द्रियग्रहोपरागादिसाक्षाद्द्रष्टा तज्जातीयेष्वतीन्द्रियेषु जीवादिषु कश्चिदिति । हेतुमेव समर्थयितुमाह । यस्य यज्जातीयाः पदार्थाः प्रत्यक्षास्त, स्यासत्यावरणे तेऽपि प्रत्यक्षाः । यथा घटसमानजातीयं भूतलं प्रत्यक्षत्वे घटः । प्रत्यक्षाश्च कस्यचिदतीन्द्रियजीवादिपदार्थसजातीयग्रहोपरागदयो भावा इति । न तावदयं सिद्धो हेतुः यतो यो यद्विषयानुपदेशालिङ्गविसंवादिवचनरचनानुक्रमकर्त्ता स तत्साक्षात्कारी । यथाऽस्मादादिरात्मियानुभववचनरचनानुक्रमकर्त्ता । ग्रहोपरागादिसाक्षात्कारी तच्छास्त्रकर्तेति । न चापौरुषेयत्वेनासिद्धत्वमभिधानीयम् । तस्य पूर्वमेव निरस्तत्वात् । नन्वनुमानबाधितेयं प्रतिज्ञा । तथाहि—देशान्तरे कालान्तरे च यद्रूपं तदिदानीन्तनचक्षुर्जनितप्रत्यक्षसमानजातीयं प्रत्यक्षग्राह्यम् । रूपशब्दवाच्यत्वात् । इदानीन्तनरूपवदिति - एवं रसादिष्वपि पञ्चानुमानानि भवन्ति । तथा चक्षुर्जनित, प्रत्यक्षं तत् देशान्तरादावपि नियतदेशकालरूपग्राहकम् । प्रत्यक्षशब्दवाच्यत्वात् । इदानीन्तनरूपप्रत्यक्षवदिति । एवं शेषेन्द्रियप्रत्यक्षेष्वपि पञ्चानुमानानि भवन्ति । तदुक्तम् ।

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
दृष्टं संप्रति लोकस्य तथा कालान्तरेऽप्यभूदिति ॥

न च गृध्रादिभिर्व्यभिचारो वाच्यः । तेऽपि न स्वार्थमुल्लङ्घ्य वर्तन्ते ॥ तदुक्तम् ।

यत्राप्यतिशयो दृष्टः स्वस्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यात् न रूपे श्रोत्रवृत्तितः ॥
येऽपि सातिशया दृष्टाः प्रज्ञामेधाबलैर्नराः ।
स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥
प्राज्ञोऽपि हि नरः सूक्ष्मानर्थान् द्रष्टुं क्षमोऽपि सन् ।
न स्वजातीनतिक्रामन्नतिशेते परान् नरानिति ॥
एकशास्त्रविचारेषु दृश्यतेऽतिशयो महान् ।
न तु शास्त्रान्तरज्ञानं तावन्मात्रेण लभ्यते ॥
ज्ञात्वा व्याकरणं दूरं बुद्धिः शब्दापशब्दयोः ।
प्रकृष्यते न नक्षत्रतिथिग्रहणनिर्णये ॥
ज्योतिर्विच्च प्रकृष्टोऽपि चन्द्रार्कग्रहणादिषु ।
न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति ॥
तथावेदेतिहासादिज्ञानातिशयवानपि ।
न स्वर्गदेवतादृष्टप्रत्यक्षीकरणक्षमः ॥

दशहस्तान्तरव्योम्नि यो यो नामोत्प्लुत्य गच्छति ।
न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥
तस्मादतिशयज्ञानैरतिदूरगतैरपि ।
किंचिदेवाधिकं ज्ञातुं शक्यते नत्वतीन्द्रियमिति ॥

तत्स्थितमनुमानबाधितेयं प्रतिज्ञेति । तथाऽभावप्रमाणबाधिता । तथाहि—प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावेऽभावप्रमाणमेव विजयते । तदभावमेव दर्शयितुमाह ।

सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गत्वाद्योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः ।
वेदाहमग्रे पुरुषं महान्तमादित्यवर्णं तमसः पुरस्तात्,

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति, तथा विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वत-स्पात् । सम्बाहुभ्यां धमतिसम्पतत्रैर्द्यावाभूमी जनयन् देव एक आस्ते इत्यादेर्विद्यमानत्वादिति चेत् । न, स्तुतिमात्र-त्वादेवेषां न प्रामाण्यमिति । तथाचाह—

न च मन्त्रार्थवादानां तात्पर्यमवकल्पते ।
न चार्थनाप्रधानैस्तैस्तदस्तित्वं विधीयते ॥
नचानुवदितुं शक्यं पूर्वमन्यैरबोधितम् ।
अनादिरागमस्यार्थो न च सर्वज्ञ आदिमान् ॥
कृत्रिमेण त्वसत्येन स कथं प्रतिपद्यते ।
अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते ॥
प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः ।
सर्वज्ञोक्ततया वाच्यं सत्यं तेन तदस्तिता ॥
कथं तदुभयं सिद्ध्येत् सिद्धमूलान्तराद्ऋते ।
असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ॥
सर्वज्ञमगच्छन्तः स्ववाक्यात् किं न जानते ।
सर्वज्ञसदृशं कञ्चित् यदि पश्येम संप्रति ॥
उपमानेन सर्वज्ञं जानीयामस्ततो वयम् ।
उपदेशो हि बुद्धादेः धर्माधर्मादिगोचरः ॥
अन्यथा नोपपद्येत सर्वज्ञो यदि नाभवत् ।
बुद्धादयो ह्यवेदज्ञा तेषां वेदाद्यसंभवः ॥
उपदेशः कृतोऽतस्तैर्व्यामोहादेव केवलात् ।
येऽपि मन्वादयः सिद्धाः प्रधानेन त्रयीविदः ॥
त्रयीविद्याश्रितग्रन्थास्ते वेदप्रभवोक्तयः । तदेवम् ।
प्रामाणपञ्चकं यत्र वस्तुरूपेण जायते ॥

वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ।
तथोपमानबाधिता तथाहि—
नरान् दृष्ट्वा त्वसर्वज्ञान् सर्वानेवाधुनातनान् ॥
तत्सादृश्योपमानेन तस्यासर्वज्ञसाधनमिति ॥

तदेवमनुमानाभावप्रमाणोपमानबाधितेयं प्रतिज्ञेति । भवतु वा तथापि निष्फला तथापि समस्तावयवव्यक्तिविस्तर-ज्ञानसाधनं काकदन्तपरीक्षावत्क्रियमाणमनर्थकम् । यथा चक्षुषा सर्वभावान् वेत्तीति फलं सर्वदर्शित्वप्रतिज्ञाप्यफला । तथा ।

स्वधर्माधर्ममात्रज्ञसाधनप्रतिषेधतः ।
तत्प्रणीतागमग्राह्यहेयत्वे हि प्रसिद्धितः ॥
कुत्र सर्वजगत्सूक्ष्मभेदज्ञत्वप्रसाधने ।
अस्थाने क्लिश्यते लोकः संरम्भाद्ग्रन्थवादयोः ॥
एतच्च फलवज्ज्ञानं यावद्धर्मादिगोचरे ।
न तु वृक्षादिभिर्ज्ञातैरस्ति किञ्चित्प्रयोजनम् ।
क्रत्वर्थाः पुरुषार्थाश्च यावन्तः खदिरादयः ॥
सर्ववृक्षज्ञता तावत्तावत्स्वेव समाप्यते ।
लतासोमगुडूच्याद्याः काश्चिद्धर्मार्थहेतवः ॥
सिद्धान्तज्ञानमात्रेण लतासर्वज्ञतापि नः ।
व्रीहिश्यामाकनीवारग्राम्यारण्यौषधीरपि ॥
ज्ञात्वा भवति सर्वज्ञो नानर्थकशतान्यपि ।
तथा कतिपयेष्वेव यज्ञगेषु तृणेष्वपि ॥
दर्भादिषु च बुद्धेषु तृणसर्वज्ञतेष्यते ।
तृणौषधिलतावृक्षजातयोऽन्याः सहस्रशः ॥
विविक्ता नोपयुज्यन्ते तद्ज्ञानेन नाज्ञता ।
यत्रापि चोपयुज्यन्ते व्यक्तयोर्जतिलक्षिताः ॥

जातिज्ञानोपसंहारात्तत्रापि व्याप्तिरस्ति नः ।
अतश्च व्यक्तिभेदानामनभिज्ञोऽपि यो नरः ॥
सर्वज्ञत्वफले प्राप्ते सर्वज्ञत्वं न वाञ्छति ।
जरायुजाण्डजोद्भिदसंस्वेदजचतुर्विधे ॥
भूतग्रामेऽल्पऽज्ञोऽपि सर्वज्ञफलमश्नुते ।
पृथिव्यादिमहाभूतसंक्षेपज्ञश्च यो नरः ॥
सविस्तरानभिज्ञोऽपि सर्वज्ञान्न विशिष्यते ।
भूमेर्य एकदेशज्ञो भूमिकार्येषु वर्त्तते ॥
सप्तद्वीपमहीज्ञानं क्व नु तस्योपयुज्यते ।
तथाऽल्पेनैव तोयेन सिद्धं तोयप्रयोजनम् ॥
तोयान्तराण्यविज्ञाय नाज्ञदोषेण युज्यते ।
वह्नेश्चानन्तभेदस्य ज्ञातस्योपासनादिभिः ।
पञ्चभिःकृतकार्यत्वादस्याज्ञानमदूषणम् ॥
शरीरान्तर्गतस्यैव वायोः प्राणादिपञ्चके ।
ज्ञाते शेषानभिज्ञत्वं नोपालम्भाय जायते ।
व्योम्नश्चपृथुनः पारमज्ञात्वाप्येकदेशवित् ॥
न च व्योमानभिज्ञत्वव्यपदेशेन दुष्यति ।

धर्मकीर्त्तिनाप्युक्तम् ।

ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणात् विप्रलभनशङ्किभिः ॥
तस्मादनुष्ठेयगतं ज्ञानमस्य सम्यक् विचार्यताम् ।
कीटसंख्यापरिज्ञानं तस्य न क्वोपयुज्यते ॥
हेयोपादेयतत्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥
दुरं पश्यन्तु वामा वा तत्वमिष्टं तु पश्यतु ।

प्रयाणदूरदर्शी चेदेतद्गृध्रानुपास्महे ॥
धर्मज्ञत्वनिषेधस्तु केवलोऽत्रोपयुज्यते ।
सर्वमन्यद्विजानंस्तु पुरुषः केन वार्यते ॥
सर्वप्रमातृसम्बन्धिप्रत्यक्षादिनिवारणात् ।
केवलागमगम्यत्वं लप्स्यते पुण्यपापयोः ॥
एतावतैवमीमांसापक्षे सिद्धेऽपि यः पुनः ।
सर्वज्ञवारणे यत्नः तैः कृतं मृतवारणम् ॥
येऽपि च च्छिन्नमूलत्वाद्धर्मज्ञत्वे हते सति ।
सर्वज्ञान् पुरुषानाहुस्तैः कृतं तुषखण्डनम् ॥
किञ्च सर्वज्ञे सिद्धेऽपि न प्रतिज्ञातोऽर्थः सिद्ध्यति । तथाहि-
यत्सत्यं नाम लोकेषु प्रत्यक्षं तद्धि कस्यचित् ।
प्रमेयज्ञेयवस्तुत्वाद्दधिरूपरसादिवत् ॥
ज्ञातर्यत्राप्यनिर्दिष्टे पक्षे न्यूनत्वमापतेत् ।
यदि बुद्धातिरिक्तोऽन्यः कश्चित् सर्वज्ञतां गतः ॥
बुद्धवाक्यप्रमाणत्वे तज्ज्ञानं क्वोपयुज्यते ।
सर्वज्ञो यस्त्वभिप्रेतो न श्रुत्यार्थेन वाऽपि सः ॥
विज्ञायते यतः पक्षः साध्यत्वेनेप्सितो भवेत् ।
यस्त्वीप्सिततमं पक्षं विशिष्यात् तस्य संज्ञया ॥
यावज्ज्ञेयं जगत्सर्वं प्रत्यक्षं सुगतस्य तत् ।
तैरेव हेतुभिः पूर्वैर्घटकुड्यादिरूपवत् ॥
तत्र नैवं विशिष्टोऽपि पूर्वस्मादेष भिद्यते ।
विशिष्टग्रहमात्रेण हेतोर्नैव विशिष्टता ।
भ्रान्त्याहिता घटे हेतुर्दृष्टान्तानुग्रहेण वा ॥
पक्षान्तरेण तुल्यः स्यात्तदा कास्य विशिष्टता ।
सत्वात् प्रमेयमित्येतद्यतोऽन्येष्वपि वर्त्तते ॥

साधनं नियमाभावात्तेनाकिञ्चित्करं हि तत् ।
नरः कोऽप्यस्ति सर्वज्ञः स तु सर्वज्ञइत्यपि ।
साधनं यत्प्रयुज्येत प्रतिज्ञामात्रमेव तत् ।
सिषाधयिषितो योऽर्थः सोऽनया नाभिधीयते ।
यस्तूच्यते न तत्सिद्धौ किञ्चिदस्ति प्रयोजनम् ।
यदीयागमसत्यत्वसिद्धौ सर्वज्ञतोच्यते ॥
न सा सर्वज्ञसामान्यसिद्धिमात्रेण लभ्यते ।
यावद् बुद्धो न सर्वज्ञस्तावत्तद्वचनं मृषा ॥
यत्र क्वचन सर्वज्ञे सिद्धे तत्सत्यता कुतः ।
अन्यस्मिन्न हि सर्वज्ञे वचसोऽन्यस्य सत्यता ॥
समानाधिकरण्ये हि तयोरङ्गाङ्गिता भवेत् ।
तदेव दोषदुष्टस्य पक्षस्यास्य न पक्षता ।
इदानीं हेतुदोषेण हेतोर्दूषणतोच्यते ॥
वचसोऽपौरुषेयत्वं पूर्वमेवस्थितं यदा ।
नष्टमुष्ट्यादिकं नैव कृतं पुंसास्ति किञ्चन ।
एवं तावदसिद्धत्वमनैकान्तिकता तथा ॥
पारम्पर्योपदेशेन वचसः संप्रवर्त्तनात् ।
असत्यार्थं च तद्वाच्यं तेन हेतोर्विरुद्धता ।
एवं सर्वज्ञतासिद्धिः कथंचिन्नोपपद्यते ॥

इति । अत्रोच्यते ॥

देशोत्याद्यापि मानानि मीमांसादोषवाहिनी ।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥
यत्साध्यबाधनायोक्तं प्रमाणदशकं परैः ।
प्रामाण्ये तद्विधस्यैषा बहु स्यादसमञ्जसम् ॥

तथाहि—

तच्छब्दवाच्यतामात्रं प्रमाणं यदि कल्पते ।
न मानं विधिवाच्यं स्यादीश्वरस्य च सिद्धता ॥
वेदाहमग्रे पुरुषं महान्तमित्यादितद्वेदवचो प्रमाणम् ।
तच्छब्दवाच्यत्वसमानभावाद् भूभूधरादेरपि च तु सिद्धिः॥
संस्थानशब्दवाच्यत्वं यतस्तस्यापि विद्यते ।
घटवद्बुद्धिमत्कर्ता तेन तत्रापि सिद्ध्यतु ॥
विशेषः परिहाराय यदि कल्पेत कश्चन ।
नियोगादि तदा तस्य दोषाः शास्त्रकृतोदिताः ॥

तथापि यत्प्रमाणगोचरचारि न भवति तन्न सद्व्यवहृतिपथमवतरति । यथा व्योमेत्यलम् । न भवति च नियोगः प्रमाणगोचरचारीति व्यापकानुपलब्धिः । तथाहि किमसौ स्वतन्त्र इष्यते, परतन्त्रो वा? । न तावत् पटादिपदार्थवत् स्वतन्त्रोऽध्यक्षतः प्रतीयते । नाप्यनुमानात् । तत्सद्भावे लिङ्गाभावात् । न च पुरुषप्रवृत्तिर्लिङ्गम् । तस्याः फलाभिलाषकार्यत्वात् । अन्यथा स्वर्गकाम इति फलोपदर्शनं न विदध्यात् । अथ प्रचण्डप्रभुनियोगात् फलाभिलाषमन्तरेणापि प्रवर्त्तमानो दृश्यते । तन्न । तत्रापापपरिहारस्यैव फलत्वात् । नापि शब्दैकप्रमाणसमधिगम्यता तस्य वाच्या । यतः शब्देन प्रतीयमानोऽसौ किं संबन्धेन प्रतीयते ऽसंबद्धेन वा ? । असंबद्धेन प्रतीतावप्यतिप्रसङ्गः स्यात् । सबन्धेनापि किं स्वाभाविकसंबन्धात्, साङ्केतिकाद्वा? । प्रथमपक्षे बालगोपालादेरपि प्रतीतिप्रसङ्गः। व्याकारामनाकाशं कस्यचित्सङ्केतोऽपि नियोगे प्रतीतेऽप्रतीते वा? । प्रतीतिश्च किं तेनैव शब्देन शब्दान्तरेण वा ? । तेनैव चेत् । किं सङ्केतेन । इतरेतराश्रयत्वं च स्यात् । शब्दान्तरेण चेत् । तदपि शब्दान्तरं गृहीतसङ्केतं प्रवर्तेत पुनरपि सङ्केतग्रहः शब्दान्तरे-

गोत्यनवस्था । किं चासावेकोऽनेको वा? । एकश्चेत् सर्वपुरुषाणां नियोगप्रतीतिः स्यात्। अथ विपर्ययान्न परस्येति चेत्। नावापि पक्षपातादिति समानम् । अनेकश्चेत्। प्रतिपुरुषमसाधारणतया न सङ्केतक्रिया स्यात्। किं च शब्दप्रमाणैकसमधिगम्यतया सत्वे आकाशकुसुमस्यापि सत्वमापद्येत । विशेषो वा वक्तव्यः । न च शब्दप्रवृत्तिमात्रेण सत्वं युज्यते । अन्यथादाराः षण्णगरीत्यादावपि समासज्येत । तन्न कश्चित्स्वतन्त्रो नियोगो वाक्यार्थः प्रतीयते । परतन्त्रोऽपि किं तत्कार्यतया धर्मतया वा ? । न तावत् प्रथमः पक्षः । यतः किमसौ यागकार्यः, नियोगकार्यः, शब्दकार्यो वा ? । न तावत् यागकार्यः। तस्य तदानीमनिष्पन्नत्वेनाभावात्। नापि पुरुषकार्यः । पुरुषस्य पूर्वमपि सद्भावेन तद्भावप्रसङ्गात् । नापि शब्दकार्यः। तदा हि न शब्दस्य वाच्यः स्यात् । कार्यत्वात् । न च वैदिकस्य शब्दस्य नित्यत्वेन क्रमयौगपद्याभ्यां जनकत्वं युज्यते । तद्धर्मतायामपि किमसौ यागधर्मः, पुरुषधर्मः, शब्दधर्मो वा ? । न तावद्यागधर्मः । तस्याविद्यमानत्वेन तद्धर्मस्याप्यविद्यमानविषयवाच्यं निरालम्बनमपोहमात्रविषयमेव स्यात् । नापि पुरुषधर्मः। तथाहि-पुरुषाद् व्यतिरिक्तः स्यादव्यतिरिक्तो वा ? व्यतिरिक्ते पुरुषस्य सर्वथानिष्पन्ननियोगरूपता स्यात्। नियोगेन ह्यनुष्ठेयोऽर्थोऽभिधीयते निष्पन्नस्य चानुष्ठानेनानुष्ठानविरतिर्भवेत्। निष्पन्नस्यापि किञ्चिदनिष्पन्नमस्ति । तन्न । निष्पन्नानिष्पन्नयोर्विरोधेन तादात्म्याभावप्रसङ्गात् । अथ व्यतिरिक्तो वा । ननु यावदसौ तस्य धर्मस्तावदन्यस्य किं न भवति । तस्यैवाधारशक्तिर्नान्यस्येतिचेत् । सापि किं नान्यत्राभिधीयते । तां प्रति तस्यैव वाधारशक्तिर्नान्यस्येत्यभ्युपगमेऽनवस्था । न च हेतुफलाभावादन्योव्यतिरेकसंबन्धोऽस्ति ।

तद्भावे च न समानकालता। असमानकालयोर्न धर्मधर्मिभावः। एतच्च शब्दधर्मतायामपि दुषणं वाच्यम्। किन्तु यद्यसावस्ति न पुरुषः प्रवर्त्तते। न हि कश्चिन्निष्पादनाय प्रवर्त्तते। प्रवर्त्तकस्य च वाक्यस्य न प्रामाण्यमुपेयते। अथ नास्ति तथापि न प्रामाण्यम्। अविद्यमानविषयत्वात् कश्चिन्नियोगो वाच्यार्थतया प्रतीयते। अथ शब्दाद्यागादिविषये नियुक्तोऽहमनेनेति प्रतितिःकथमप्रतीतिः। तथाहि—नियोक्ता शब्दो वेदे पुरुषाभावान्नियोज्यः पुरुषो यागो विषयः सकलं चैतत् प्रतीयते तत्कथं प्रतीतावप्यप्रतीतिः। तदसत्। नेयमगृहीतसङ्केतस्य प्रतिरुदेति। किं तर्हि येन यागं कश्चित् कुर्वाणमुपलब्धस्तस्य तदैव गृहीतसङ्केतस्य पूर्वदृष्टानुसारेण विकल्पिका बुद्धिरुत्पद्यमानाऽन्यापोहविषयैवोत्पद्यते। नातस्तत्त्वव्यवस्था। एतेन भावनादयोऽपि वाक्यार्थनिरसनीयाः। इतिवाच्यत्वये वाच्यं नियोगं संप्रचक्षते खरशृङ्गेतैर्नूनं व्याख्यानिपत्यलं विधिरपि विधेयत्वेऽनवस्थैवप्रसज्यते।

स्वरूपवाचकत्वे तु न स्यादन्यविशिष्टता।
विधिबाधस्य कृच्छ्रेण लक्षण विशेषः परिकल्पते॥
कैरवे भक्षितः काकैरध्यक्षे येन नेष्यते।
नक्रञ्चरवराहादिप्रत्यक्षेऽध्यक्षवीक्षितम्॥
विशेषमाक्षिपन् मूढः कथं नाध्यक्षबाधितः।
मनुष्यत्वे सतीत्येवं यदि हेतोर्विशेषणम्॥
मनुष्यत्वं तदा हेतुः पूर्वस्य स्यादहेतुता।
जैमिन्यादिर्विशेषज्ञस्तदा नैव भवेत्तव।
प्रज्ञोन्मेषस्य चोत्कर्षः क्वनु माने व्यस्थितः॥
स्तोकस्तोकांतरज्ञत्वं यत्र पुंसः प्रसाध्यते॥
इन्द्रियान्तरविज्ञानं नेन्द्रियान्तरवस्तुनः।

ग्राहकं वेति यो दोषः सोऽतीन्द्रियदृशः कुतः ॥
अथातीन्द्रियविज्ञानं न दृष्टं केनचित् क्वचित् ।
विनेन्द्रियं च वैशद्यं कुतस्तस्य भविष्यति ॥
सर्वदेशेषु राष्ट्रेषु सर्वज्ञानेति योऽवदत् ।
तस्य सर्वज्ञताप्राप्ता सिद्धं चास्मत्समीहितम् ॥
कामादिभावनाजातं विज्ञानं विशदं यदा ।
तदेन्द्रियसमुत्थत्वं वैशद्येनोपयोगवत् ।
अक्षाश्रितत्वमध्यक्षे व्युत्पत्तेरेव कारणम् ॥
निमित्तं तु पुनस्तस्य वस्तुसाक्षात्क्रिया मता ।
तदेवं जैनमध्यक्षं नानुमानेन बाधितम् ॥
न प्रमाणमभाष्यं हि बाधकं कुत एव तत् ।
सर्वसंबन्धिवाध्यक्षं नेति तत्रेति यो वदेत् ॥
तस्य सर्वज्ञता प्राप्ता नैकस्यास्य निषेधकृत् ।
अनुमानं निषेधाय यद्यचेन्नास्य किञ्चन ॥
असिद्धावाश्रयासिद्धिः सिद्धौ हेतोर्विरुद्धता ।
अर्थः केनोपपद्येत विनाऽसर्वज्ञतां तव ॥
अपौरुषेयता नो चेन्नास्यं पूर्वं निषेधनात् ।
नोपमानस्य मानत्वं बाधकं कुत एव तत् ।
विशेषाः पुंसु दृश्यन्ते तेनादृष्टेषु का कथा ।

तथा हि—केचित्सकलशास्त्रज्ञाः, केचिन्न किञ्चिद्विदन्ति, केचिच्चतुर्वेदपाठकाः, केचिद्गायत्रीमपि न पठन्ति, तत्कथमदृष्टेषु पुरुषेषु साम्यं सिध्येत्? । ननूक्तं दशहस्तान्तरमित्यादि ।

तदसत्तुल्यजातीयपूर्वबीजप्रवृत्तयः ।
ज्ञेयेषु बुद्धयस्तासां सत्यभ्यासे कुतः स्थितिः ।

न चैवं लङ्घनादेव लङ्घनं बलयत्नयोः ॥
तद्धेत्वोः स्थितरूपत्वाल्लङ्घनस्य स्थितात्मता ।
बलयत्नोत्थमप्युच्चैर्लङ्घनं हि गरुत्मति ॥
श्रूयते तेन मानत्वं नोपमानस्य युक्तिमत् ।
न चागमविधिः कश्चिन्निषेधाय वर्त्तते ।
तन्नास्य बाधकं किञ्चित् बाधकं प्रतिपादितम् ।
धर्माधर्मज्ञतामात्रात् सिद्धं स्मत्समीहितमम् ।
यदुक्तं तदसन्मानानिष्ठानेच्छानुवर्तिनी ।
नहि प्रमाणं वस्तुनि प्रवर्त्तमानं विभाषया प्रवर्त्तते, तेन ।
समस्तवस्तुविस्तारि सर्वज्ञाज्ञानसङ्क्रमात्
प्रति यज्जगतः कार्त्स्न्यं किमन्यत्परिवर्जयेत् ।
धर्माधर्मौ तयोः कार्यं वेत्ति नाऽसकलार्थवित् ।

तदुक्तम् । जो एगं जाण इसो सवं जाणइ । यथा हि सकलकर्मकारणं सर्वप्राणिकर्माणि तत्कार्यं नरकादि तत्कारणाकार्यपरम्परायाः परमाणवन्तपरिज्ञाने कथं न सर्वज्ञता ? । तस्मादावरणविगमादनन्तवस्तुज्ञानम् न च वस्तुपरिज्ञानपरिसमाप्तिः । यथा हि वयमनाद्यनन्तरूपतां विकल्पविज्ञानेन रात्रिन्दिवादीनां बुद्ध्यामहे । न च तत्परिसमाप्तिः, तथा भगवतोऽपि अनाद्यनन्तरूपतया साक्षात्कुर्वतो न विरोधः । अकारणाधीनतया विनाश्यादनप्रसङ्गः । अत एवाऽपराधीनतयाऽनियतविषया । न चातीतानागतस्य वस्तुन इदानीमसत्त्वेनाऽसद्विषयं तदिति वाच्यम् । तत्कालालिङ्गितत्वेन तस्य सत्वात् । तदाऽपि हि यदि तद्वस्तु न भवेत्तदा तद्विषयं न स्यात् । अन्यथा चोदनाबुद्धिरपि कथं भूतभवद्भविष्यद्वस्तुविषयिणी सत्ता ऽभ्युपेयते ? । तदुक्तम् ।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।

गुणा गुणेषु वर्त्तन्त इति मत्त्वा न सज्जते ॥ २८ ॥

तत्त्वविदिति । तुशब्दोऽज्ञाद्वैलक्षण्यद्योतनार्थः हे महाबाहो गुणकर्मभ्यो विभागौ गुणकर्मविभागौ तयोर्गुणविभागस्य कर्मविभागस्य च तत्त्ववित् नाहं कार्यकरणसङ्घातात्मेति गुणेभ्य आत्मनो विभागः न मे कर्माणीति कर्मभ्य आत्मनो विभागः गुणकर्मभ्यां विभक्तात्मतत्त्वसाक्षात्कारवानित्यर्थः विभागपदबलादयमर्थो लभ्यते विग्रहस्तु विभागश्च विभागश्च विभागावित्येकशेषः गुणकर्मभ्यो विभागौ गुणकर्मविभागौ तयोरिति बोध्यः । गुणाः करणात्मका गुणेषु विषयेषु प्रवर्तन्ते विकारित्वात् न तु निर्विकार आत्मेति मत्वा न सज्जते सक्तिं कर्तृत्वाभिनिवेशमतत्त्वविदिव न करोतीत्यर्थः तथा च नायं विद्वानहङ्कारविमूढात्मा नापि कर्मण्यासक्तो येनाहं कर्तेति मन्येतेतिभावः महान्तौ बाहू शत्रुहनने प्रवर्तेतेऽतस्त्वमपि कर्तृत्वाभिनिवेशलक्षणं शत्रुं हन्तुमर्हसीति सम्बोधनाशयः ।

तत्त्वं याथातथ्यं वेत्तीति तत्त्ववित् कस्येत्यत आह गुणकर्मविभागयोः गुणा देहेन्द्रियान्तःकरणानि कर्माणि च तेषां व्यापारभूतानि ममकारास्पदानीति गुणकर्मेति द्वन्द्वैकवद्भावः विभज्यते सर्वेषां जडानां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसङ्ग आत्मा गुणकर्म च विभागश्चेति द्वन्द्वः तयोर्गुणकर्मविभागयोर्भास्यभासकयोर्जडचैतन्ययोस्तत्त्वं याथात्म्यं यो वेत्ति स गुणा गुणेषु प्रवर्त्तन्ते न त्वात्मेति मत्त्वा न सज्जते सक्तिं न करोति सामुद्रकोक्तसत्पुरुषलक्षणयोगित्वान्न पृथग्जनसाधारण्येन त्वमविवेकी भवितुमर्हसीति सूचनाय महाबाहो इत्यपरे ।

यस्तत्त्ववित् आत्मनस्तत्त्वं याथात्म्यं गुणातीतत्वादिलक्षणं विद्वान् सः गुणाश्चक्षुरादयः गुणेषु रूपादिविषयेषु वर्तन्ते इति मत्वा गुणकर्मविभागयोर्गुणानां सत्त्वरजस्तमसां विभागे अहङ्कारदेहेन्द्रियविषयरूपेण विभज्यावस्थाने न सज्जते इदमहमिति न मन्यते तथा कर्मणामहङ्कारादिव्यापाराणामभिमानादीनां विभागे न सज्जते एतं ममेति न मन्यते इत्यन्ये ॥ २८ ॥

एवं विद्वदविद्वत्स्वरूपं प्रकृतमुपपाद्य विद्वानविदुषो बुद्धिभेदनं न कुर्यादित्युपसंहरति—

न चैवं लङ्घनादेव लङ्घनं बलयत्नयोः ॥
तद्धेत्वोः स्थितरूपत्वाल्लङ्घनस्य स्थितात्मता ।
बलयत्नोत्थमप्युच्चैर्लङ्घनं हि गरुत्मति ॥
श्रूयते तेन मानत्वं नोपमानस्य युक्तिमत् ।
न चागमविधिः कश्चिन्निषेधाय वर्त्तते ।
तन्नास्य बाधकं किञ्चित् बाधकं प्रतिपादितम् ।
धर्माधर्मज्ञतामात्रात् सिद्ध रुमत्समीहितमम् ।
यदुक्तं तदसन्मानिनिष्ठानेच्छानुवर्तिनी ।
नहि प्रमाणं वस्तुनि प्रवर्त्तमानं विभाषया प्रवर्त्तते, तेन ।
समस्तवस्तुविस्तारि सर्वज्ञाज्ञानमक्रमात्
प्रति यज्जगतः कात्स्न्र्यं किमन्यत्परिवर्जयेत् ।
धर्माधर्मौ तयोः कार्यं वेत्ति नाऽसकलार्थवित् ।

तदुक्तम् । जो एगं जाण इसो सवं जाणइ । यथा हि सकलकर्मकारणं सर्वप्राणिकर्माणि तत्कार्यं नरकादि तत्कारणकार्यपरम्परायाः परमाणवन्तपरिज्ञाने कथं न सर्वज्ञता ? । तस्मादावरणविगमादनन्तवस्तुज्ञानम् न च वस्तुपरिज्ञानपरिसमाप्तिः । यथा हि वयमनाद्यनन्तरूपतां विकल्पविज्ञानेन रात्रिन्दिवादीनां बुद्ध्यामहे । न च तत्परिसमाप्तिः, तथा भगवतोऽपि अनाद्यनन्तरूपतया साक्षात्कुर्वतो न विरोधः । अकारणाधीनतया विनाश्यादनप्रसङ्गः । अत एवाऽपराधीनतयाऽनियतविषया । न चातीतानागतस्य वस्तुन इदानीमसत्वेनाऽसद्विषयं तदिति वाच्यम् । तत्कालालिङ्गितत्वेन तस्य सत्वात् । तदाऽपि हि यदि तद्वस्तु न भवेत्तदा तद्विषयं न स्यात् । अन्यथा चोदनाबुद्धिरपि कथं भूतभवद्भविष्यद्वस्तुविषयिणी सत्ता ऽभ्युपेयते ? । तदुक्तम् ।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्त्वा न सज्जते ॥ २८ ॥

तत्त्वविदिति । तुशब्दोऽज्ञाद्वैलक्षण्यद्योतनार्थः हे महाबाहो गुणकर्मभ्यो विभागौ गुणकर्मविभागौ तयोर्गुणविभागस्य कर्मविभागस्य च तत्त्ववित् नाहं कार्यकरणसङ्घातात्मेति गुणेभ्य आत्मनो विभागः न मे कर्माणीति कर्मभ्य आत्मनो विभागः गुणकर्मभ्यां विभक्तात्मतत्त्वसाक्षात्कारवानित्यर्थः विभागपदबलादयमर्थो लभ्यते विग्रहस्तु विभागश्च विभागश्च विभागावित्येकशेषः गुणकर्मभ्यो विभागौ गुणकर्मविभागौ तयोरिति बोध्यः । गुणाः करणात्मका गुणेषु विषयेषु प्रवर्तन्ते विकारित्वात् न तु निर्विकार आत्मेति मत्वा न सज्जते सक्तिं कर्तृत्त्वाभिनिवेशमतत्त्वविदिव न करोतीत्यर्थः तथा च नायं विद्वानहङ्कारविमूढात्मा नापि कर्मण्यासक्तो येनाहं कर्तेति मन्येतेतिभावः महान्तौ बाहू शत्रुहनने प्रवर्तेतेऽतस्त्वमपि कर्तृत्त्वाभिनिवेशलक्षणं शत्रुं हन्तुमर्हसीति सम्बोधनाशयः ।

तत्त्वं याथातथ्यं वेत्तीति तत्त्ववित् कस्येत्यत आह गुणकर्मविभागयोः गुणा देहेन्द्रियान्तःकरणानि कर्माणि च तेषां व्यापारभूतानि ममकारास्पदानीति गुणकर्मेति द्वन्द्वैकवद्भावः विभज्यते सर्वेषां जडानां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसङ्ग आत्मा गुणकर्म च विभागश्चेति द्वन्द्वः तयोर्गुणकर्मविभागयोर्भास्यभासकयोर्जडचैतन्ययोस्तत्त्वं याथात्म्यं यो वेत्ति स गुणा गुणेषु प्रवर्त्तन्ते न त्वात्मेति मत्त्वा न सज्जते सक्तिं न करोति सामुद्रकोक्तसत्पुरुषलक्षणयोगित्वान्न पृथग्जनसाधारण्येन त्वमविवेकी भवितुमर्हसीति सूचनाय महाबाहो इत्यपरे ।

यस्तत्त्ववित् आत्मनस्तत्त्वं याथात्म्यं गुणातीतत्त्वादिलक्षणं विद्वान् सः गुणाश्चक्षुरादयः गुणेषु रूपादिविषयेषु वर्तन्ते इति मत्त्वा गुणकर्मविभागयोर्गुणानां सत्त्वरजस्तमसां विभागे अहङ्कारदेहेन्द्रियविषयरूपेण विभज्यावस्थाने न सज्जते इदमहमिति न मन्यते तथा कर्मणामहङ्कारादिव्यापाराणामभिमानादीनां विभागे न सज्जते एतं ममेति न मन्यते इत्यन्ये ॥ २८ ॥

एवं विद्वदविद्वत्स्वरूपं प्रकृतमुपपाद्य विद्वानविदुषो बुद्धिभेदनं न कुर्यादित्युपसंहरति—

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥२९॥

प्रकृतेरिति । प्रकृतेः मायाशक्तेर्गुणैर्विकारैर्देहेन्द्रियादिरूपैः सम्यक् मूढाः स्वस्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमानास्तेषामेव गुणानां देहेन्द्रियान्तःकरणानां कर्मसु व्यापारेषु सज्जन्ते वयं कर्म कुर्मः फलायेति दृढतरामात्मीयबुद्धिं कुर्वन्ति ये तान्कर्मसङ्गिनोऽतएवाकृत्स्नविद आत्मज्ञानशून्यान् कर्मफलमात्रदर्शिनो यतो मन्दान् मन्दप्रज्ञानशुद्धचित्तत्वेन ज्ञानाधिकारमप्राप्तान् कृत्स्नवित् परिपूर्णात्मवित् आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुत्यात्मविदः कृत्स्नवित्वोक्तेः न विचालयेत् तद्बुद्धिभेदनं न कुर्यादित्यर्थः ये त्वमन्दाः शुद्धान्तःकरणास्ते स्वयमेव विवेकोदयेन तद्विचलनेन ज्ञानाधिकारम्प्रापयिष्यन्तीत्याशयः ॥२९॥

अन्येत्विदं द्वयमित्थं योजयन्ति । विद्वान् युक्त इति यदुक्तमात्मनो देहेन्द्रियतत्कर्मसम्बन्धाभावदर्शनं विदुषस्तदनेन प्रतिपाद्यते तत्त्ववित्त्विति । गुणकर्मविभागयोः गुणाश्चक्षुरादयो वागादयो बुद्धिर्मनश्च तत्र चक्षुःश्रोत्रादीनामेव दर्शनश्रवणादिक्रिया नत्वात्मनो वाक्पाण्यादीनामेव वचनादानादिक्रिया बुद्धेरेवाहङ्करणक्रिया मनस एव सङ्कल्पनक्रिया आत्मनस्तु कूटस्थासङ्गसच्चिदानन्दरूपेणावस्थानमात्रमेवं गुणविभागः कर्मविभागश्च तयोर्गुणकर्मविभागयोरात्मनश्च तत्त्वं याथात्म्यं वेत्तीति तत्त्वविद्विद्वान् तुशब्दोऽविद्वद्व्यावृत्त्यर्थः सर्वकर्मसु गुणाश्चक्षुरादय एव गुणेषु रूपादिषु वर्तन्ते वागादय एव वचनादिषु वर्तन्ते बुद्धिरेव तेषां कर्मस्वहं कर्तेत्यहङ्करोति अहन्तु न शृणोमि न पश्यामि न वदामि न करोमि न गच्छामि किन्तु कूटस्थासङ्गसच्चिदानन्दात्मना सर्वदा तूष्णीमेवासमिति मत्वा निश्चित्य तेषां कर्मसु न सज्जते तत्राह ममेति प्रत्ययं न करोतीत्यर्थः । तदुक्तम्—

धूलिधूमाम्बुदैर्यद्वन्मलिनीक्रियते नभः ।
परामृष्टस्तथैवात्मा विशुद्धः प्रावृतैर्गुणैः ॥ इति ।

एवं देहेन्द्रियादिभिः क्रियमाणेषु कर्मसु स्वस्याकर्तृत्वदृष्ट्या विद्वान् स्वविलक्षणानज्ञान् कर्मिणः प्रमादेनापि न विचालयेदिति पुनरुक्तमेवार्थं दृढयति कर्मिणां विद्वद्वैलक्षण्यं दर्शयन् प्रकृतेर्गुणसम्मूढाइति । प्रकृतेरुक्तलक्षणाया गुणेषु कार्येषु देहेन्द्रियादिष्वहम्बुद्ध्या सम्मूढास्तदात्मतामापन्नाः पामरा जनाः स्वयं गुणकर्मसु गुणैः श्रोत्रादिभिर्वागादिभिश्च क्रियमाणे कर्मसु

श्रवणदर्शनस्पर्शनरसनघ्राणनवचनादानगमनविसर्गानन्दभोजनादिष्वहमेव श्रोता द्रष्टा स्प्रष्टा रसयिता घ्राता वक्ता दाता गन्ता विसर्जयिता नन्दयिता कर्ता भोक्तेति सज्जन्तेऽभिनिवेशं कुर्वन्ति तान् कर्मिणोऽकृत्स्नविदोऽब्रह्मविदोऽज्ञान् कृत्स्नवित् पूर्वोक्तलक्षणो ब्रह्मविन्न विचालयेत् न कामनया कर्म कर्तव्यमिति वा स्वर्गादिकर्मफलमसदिति वा कर्त्रादि मिथ्येति वा त्वं ब्रह्मैव तव न किञ्चित्कर्तव्यमस्तीति वा न विक्षेपयेत्किन्तु कर्मस्तुत्या कर्मस्वेव प्रवर्तयेदित्यर्थः ॥ २९ ॥

एवं ज्ञानिनामप्यधिकारिणां लोकसङ्ग्रहार्थमवश्यं कर्म कर्तव्यमिति लोकसङ्ग्रहकारिणेत्येवं वर्तितव्यमिति चोपदिश्याधुना लोकसङ्ग्रहदृष्ट्यापि स्वधर्मं कुर्वित्याह—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युद्धयस्व विगतज्वरः ॥ ३० ॥

मयीति । लोकसङ्ग्रहकर्तात्मतत्त्वज्ञस्त्वमध्यात्मचेतसा सर्वं यदयमात्मेति श्रुत्युक्तरीत्याऽऽत्मानमधिकृत्य प्रवृत्तमध्यात्मं चेतो ज्ञानमध्यात्मञ्च तच्चेतश्च तेनाध्यात्मचेतसा ब्रह्मार्पणम्ब्रह्महविरिति वक्ष्यमाणलक्षणया प्रत्यग्दृष्ट्या सर्वं ब्रह्मैवेति दर्शनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि मयि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेति प्रविलाप्य जयेन प्राप्ते राज्ये युद्धक्रियाफले निराशीर्निरपेक्षः सन् वध्यमानेषु भ्रात्रादिषु निर्ममो ममतारहितो भूत्वा एते मदीया मया हन्यन्ते इति यो ज्वरः सन्तापः स विगतो यस्य स विगतज्वरो निश्शोको भूत्वा युध्यस्व लोकसङ्ग्रहार्थं कर्म कुर्वित्यर्थः । अत्रायमाशयः सर्वमिदमहञ्च ब्रह्मैवेति परावरैकत्वविषयकाप्रतिबद्धापरोक्षज्ञानवानधिकारिको ब्रह्मविदत्रोक्तरीत्या लोकहितार्थं कर्म कुर्यादस्य जीवत एव मुक्तत्वात्परतारणमेव प्रयोजनं, परोक्षज्ञानी चेदात्मा देहादिभिन्नस्तद्द्रष्टृत्वात् घटद्रष्टृवदिति स्वदेहादिभिन्नत्वज्ञानेन यौक्तिकेन नाहं कर्ता कारयितेत्यकर्तृत्वबुद्ध्या मायामात्रमिदं द्वैतमित्यादिश्रुतिबलेनेदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकवदित्यादियुक्तिबलेन च कर्ता कार्यं करणं च सर्वं मिथ्यैवेति कर्त्रादेः सर्वस्य मिथ्यात्वमेव पश्यन् सर्वत्र निराशो निर्ममो भूत्वा लोकहितार्थं कर्म कुर्यात्तेन चित्तपरिपाको ज्ञानं मोक्षश्च सिध्यति लोकोपकारश्चास्य तरणं तारणं चोभयमप्युपपद्यते अनात्मज्ञश्चेत्परिग्रहे ममतारहितः कर्मफलानपेक्षश्च भूत्वा श्रौतानि स्मार्तानि च सर्वाणि कर्मा-

णीश्वरार्पणबुद्ध्या स्वार्थमेव कुर्यात्तेन चित्तशुद्धिस्तया ज्ञानं मोक्षश्चास्य सिद्ध्यतीति ॥ ३० ॥

न कर्मणामनारम्भादित्यारभ्य मयि सर्वाणि कर्माणीत्यन्तेन ग्रन्थेन मुमुक्षोरवश्यं मोक्षार्थमीश्वरार्पणबुद्ध्या कर्म कर्तव्यमिदम्मम मतमिति निश्चित्य श्रीकृष्णो ये मम मतानुसारिणस्ते मुक्ता भविष्यन्ति ये तु विपरीतकारिणस्ते विनङ्क्ष्यन्तीति नियमयति—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।

श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

ये विवेकिनो मानवा ब्राह्मणादयो मुमुक्षव इदमुक्तलक्षणं मे ममेश्वरस्य मतं शासनमनसूयन्तोऽसूया नाम गुणदूषणा जगद्गुरौ मयि तामकुर्वन्तः किन्तु श्रद्धावन्तस्तत्र श्रद्धाम्भक्तिञ्च कुर्वन्तः सन्तोऽनुतिष्ठन्त्यनुवर्तन्ते मच्छासनमनुल्लङ्घ्य ये नित्यं कर्म कुर्वन्तीत्यर्थः ते सत्त्वशुद्ध्या शुद्धात्मविज्ञानं प्राप्य कर्मभिः पुण्यापुण्यलक्षणैर्नानादुःखहेतुभिः संचितादिभिर्मुच्यन्ते अपिशब्दाज्जन्मादिभिश्च मुक्ता भवन्तीत्यर्थः ।

अन्येतु इदं द्वयमित्थं योजयन्ति । एवं कर्मानुष्ठानसाम्येऽप्यज्ञविज्ञयोः कर्तृत्वाभिनिवेशतदभावाभ्यां विशेष उक्त इदानीमज्ञस्यापि मुमुक्षोरमुमुक्षवपेक्षया कर्मणां भगवदर्पणं फलाभिसन्ध्यभावं च विशेषं वदन्नर्जुनस्याप्यज्ञतया कर्माधिकारमेव दृढयति मयीति । मयि भगवति वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि लौकिकानि वैदिकानि च कर्माणि आध्यात्मचेतसाहङ्कर्तान्तर्याम्यधीनस्तस्मा एवेश्वराय राज्ञ इव भृत्यः कर्माणि करोमि न त्वन्यस्मै स्वतन्त्रो वेत्यनया बुद्ध्या सन्न्यस्य समर्प्य, दर्शितरीत्या कर्मसु प्रवृत्तस्य कर्तव्यान्तरमाह निराशीर्निष्कामः निर्ममो देहपुत्रभ्रात्रादिषु ममताशून्यः विगतज्वरः विगतो ज्वरः सन्तापहेतुः शोको यस्मात्स ऐहिकपारित्रिकदुर्यशोनरकपातादिनिमित्तशोकरहितश्च भूत्वा त्वं मुमुक्षुर्युद्ध्यस्व विहितानि कर्माणि कुर्वित्यभिप्रायः अत्र भगवदर्प्पणं निष्कामत्वञ्च सर्वकर्मसाधारणं मुमुक्षोः निर्ममत्वं त्यक्तशोकत्वञ्च प्रकृतयुद्धाभिप्रायमिति बोध्यम् ॥ ३० ॥

फलाभिसन्धित्यागेन भगवदर्प्पणबुद्ध्या विहितकर्मानुष्ठानं सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण मुक्तिफलमित्याह ये मे इति । ये मानवा मनुष्याः श्रद्धावन्तः शास्त्राचार्योपदिष्टेऽर्थेऽननुभूतेप्येवमेवैतदिति विश्वासवन्तोऽनसू-

यन्तः गुणेषु दोषाविष्करणमसूया तामकुर्वन्तः प्रकृते तु दुःखात्मके कर्माणि मां प्रवर्तयन्नकृपालुरयं भगवानित्येवंरूपां प्रसक्तामसूयां मयि सर्वगुरौ सर्वसुहृद्यकुर्वन्तो मे ममेदं फलाभिसन्धित्यागेन विहितकर्मानुष्ठानरूपं मतं नित्यं नित्यवेदबोधितत्वेनानादिपरम्परागतमावश्यकं सर्वदेति वाऽनुतिष्ठन्त्यनुवर्तन्ते तेऽपि चित्तशुद्धिज्ञानप्राप्तिद्वारेण सम्यग्ज्ञानिवद्धर्माख्यैः कर्मभिर्मुच्यन्ते मुक्ता भवन्तीत्यर्थः ॥ ३१ ॥

एवं भगवन्मतानुवर्तिनां गुणमुक्त्वा तदननुवर्तने दोषमाह—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

ये त्विति । ये तु पूर्वोक्तविपरीता श्रद्धाहीनाः अभ्यसूयन्तो मयि दोषमुद्भावयन्तः एतन्मे मम मतं नानुवर्त्तन्ते तानचेतसोऽविवेकिनो दुष्टचित्तान् अतएव सर्वज्ञानविमूढान् सर्वत्र कर्मणि सगुणे निर्गुणे च ब्रह्माणि यज्ज्ञानं तत्र विविधं प्रमाणतः प्रमेयतः प्रयोजनतश्च मूढांस्तज्ज्ञानायोग्यान्नष्टान्सर्वपुरुषार्थभ्रष्टान्विद्धि जानीहीत्यर्थः ।

विपक्षे दण्डमाह ये त्वविवेकिनो ब्राह्मणादयो दुरहङ्कारा एतदुक्तम् ममेश्वरस्य मतं शासनमभ्यसूयन्तोऽत्यन्तं दूषयन्तः सन्तो नानुतिष्ठन्ति दुराग्रहेण मदाज्ञां न कुर्वते सर्वज्ञानविमूढान्सर्वात्मकत्वात्सर्वं ब्रह्म तद्विषयकं ज्ञानं सर्वज्ञानं तस्मिन्विषये विशिष्य मूढांस्तान् सर्वज्ञानविमूढान् विचेतसोऽविवेकिनः कर्म बहुसाधनसाध्यं क्लेशभूयिष्ठमदृष्टफलं चातस्तत्संन्यास एव परमसुखमित्येवं विपरीतबुद्धयस्तान्संन्यासानर्हानकर्मनिष्ठान् जनान्नष्टान् विनष्टपुण्यलोकान् विद्धि स्वधर्मं परित्यज्य परधर्मे वर्तमानाः स्वयमेव विनश्येयुरित्यर्थ इत्यन्ये ॥ ३२ ॥

ननु कस्मात्पुनः कारणात्त्वदाज्ञातिक्रमदोषादबिभ्यन्तस्त्वन्मतं स्वधर्मं नानुवर्तन्त निषिद्धञ्च परधर्ममनुतिष्ठन्तीति चेत्तत्राह—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

सदृशमिति । ज्ञानवानपि ब्रह्मवित् गुणदोषज्ञानवान्वा स्वस्याः स्वकीयायाः प्रकृतेः पूर्वकृतधर्माधर्मज्ञानेच्छादिसंस्कारभूतायाः 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति' श्रुतिप्रमाणिकायाः सदृशमनुरूपं चेष्टते चेष्टां करोति

किम्पुनर्मूर्ख इत्यर्थः । ज्ञानवतामज्ञानवताञ्च प्रकृत्यधीनत्वाविशेषे फलितमाह प्रकृतिमिति । भूतानि सर्वेपि प्राणिनः पुरुषार्थभ्रंशहेतुभूतामपि प्रकृतिं यान्ति तत्सदृशीं चेष्टां गच्छन्त्यनिच्छन्तोपीत्यर्थः तत्र मम वा राज्ञो वा निग्रहः किङ्करिष्यति रागप्राबल्यान्न दुरितं निवर्त्तयितुं शक्नोतीत्यर्थः महानरकसाधनत्वं ज्ञात्वापि दुर्वासनाप्राबल्यात्पापेषु प्रवर्तमाना न मदाज्ञातिक्रमदोषाद्बिभ्यतीति भावः । मम मतमनादृत्य कर्त्तव्यं कर्म संन्यस्य स्थाणुवत्तूष्णीमास्मह इति ये तु मन्यन्ते तेषां प्रकृत्यधीनानाञ्चलित्वा-तूष्णीमासनं न घटते ज्ञानिनामप्यजेयायाः प्रकृतेर्मम मायायाः निग्रहस्यातिदुष्करत्वादिति ।

कार्यते ह्यवशः कर्मेति वचनार्थमेव पुनर्दृढयति । यूनां कर्मणि नियमनार्थं ज्ञानवानपि निरन्तरब्रह्मनिष्ठानिर्मूलितसर्ववासनाग्रन्थिरपि ब्रह्मवित्प्राणत्राणहेतुतयाऽविशिष्टायाः स्वस्याः प्रकृतेर्वासनायाः सदृशमनुरूपमेवाहारादौ चेष्टते तां निग्रहीतुं न शक्नोति शरीरस्थितिहेतोः प्रकृतेर्दुर्निवारत्वादेवं ब्रह्मनिष्ठया प्रकृतिमतीत्य तिष्ठतो जितेन्द्रियस्य ब्रह्मविदोऽपि प्रकृत्यनुवर्तित्वे सत्यवाशिष्टानां मूढानाङ्किमु वक्तव्यमित्याशयेनाह प्रकृतिमिति । सुखदुःखयोरनुभूत्यै स्वस्वकर्मणा भवन्तीति भूतानि सर्वे प्राणिन स्वस्वजात्यनुरूपेण नानाक्रियाहेतुभूतां प्रकृतिं रागद्वेषादिगुणवतीं वासनात्मिकां यान्ति स्वस्वप्रकृत्यनुरूपेण रागद्वेषाभ्यां नानारूपं चेष्टन्त एव न प्रकृत्यधीनास्तूष्णीं स्थातुं क्षणमपि शक्नुवन्ति अतो वयं न किञ्चित्कुर्म इति निग्रहस्तात्कालिकेन्द्रियानिरोधः किङ्करिष्यति रागादिदोषवत्स्वकीयप्रकृतिवेगेन सर्वस्यापि चेष्टितव्ये सति नाहं किञ्चित्करोमीति नियमोऽव्यर्थ इत्यन्ये ॥ ३३ ॥

ननु सर्वस्य प्राणिजातस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषप्रयत्नविषयाभावाद्विधिनिषेधशास्त्रानर्थक्यं प्राप्तं न च प्रकृतिशून्यः कश्चिदास्ति यं प्रति तदर्थवत्त्वं स्यादित्यत आह—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्येति । इन्द्रियस्येन्द्रियस्यार्थे सर्वेषामिन्द्रियाणामर्थे शब्दादिविषये वचनादौ च अनुकूले निषिद्धेपि रागः प्रतिकूले विहितेऽपि द्वेषः इत्येवं प्रतीन्द्रियार्थं रागद्वेषौ व्यवस्थितावानुकूल्यप्रातिकूल्यव्यवस्थया स्थितौ

न त्वनियमेन तौ सर्वत्र भवतस्तत्र पुरुषकारस्य शास्त्रस्य चायं विषयो यत्तयोर्वशं नागच्छेदिति तयोः रागद्वेषयोर्वशं नागच्छेत्तदधीनो न प्रवर्तेत न निवर्तेत वा किन्तु पूर्वमेव शास्त्रीयतद्विरोधिविवेकज्ञानेन तत्कारणमिथ्याज्ञाननाशद्वारा तौ नाशयेत् हि यस्मात् तौ रागद्वेषौ स्वाभाविकदोषप्रयुक्तौ अस्य पुरुषस्य श्रेयोऽर्थिनः परिपन्थिनौ शक्तश्रेयोमार्गस्य विघ्नकर्तारौ दस्यू इव पथिकस्येत्यर्थः। अयं भावः या हि पुरुषस्य प्रकृतिः सा बलवदनिष्टसाधनत्वज्ञानाभावसहकृता सत्यापाततात्कालिकेष्टसाधनत्वज्ञाननिबन्धनं रागं पुरस्कृत्यैव शास्त्रनिषिद्धे परस्त्रीगमनादौ पुरुषं प्रवर्तयति तथा बलवदिष्टसाधनत्वज्ञानाभावसहकृतापाततात्कालिकानिष्टसाधनत्वज्ञाननिबन्धनं द्वेषं पुरस्कृत्यैव शास्त्रविहितादपि सन्ध्यावन्दनादेर्निवर्तयति तत्र शास्त्रेण पूर्वमेव निषिद्धस्य बलवदनिष्टसाधनत्वे ज्ञापिते सहकार्यभावात्केवलं दृष्टेष्टसाधनत्वज्ञानं मधुविषमिलितान्नभोजन इव तत्र न रागं जनयितुं शक्नोति एवं शास्त्रेण विहितस्य बलवदिष्टसाधनत्वं बोधिते सहकार्यभावात्केवलं दृष्टानिष्टसाधनत्वज्ञानं भोजनादाविव तत्र न द्वेषं जनयितुं शक्नोति ततश्चाप्रतिबद्धं शास्त्रं विहिते पुरुषं प्रवर्तयति निषिद्धाच्च निवर्तयतीति शास्त्रीयविवेकविज्ञानप्राबल्येन स्वाभाविकरागद्वेषयोः कारणोपमर्दनेनोपमर्दान्न प्रकृतिर्विपरीतमार्गे शास्त्रदृष्टिं पुरुषं प्रवर्तयितुं शक्नोतीति न शास्त्रस्य पुरुषप्रयत्नस्य च वैयर्थ्यं नापि स्वधर्मं त्यक्त्वा परधर्मे प्रवृत्तिर्भवति शास्त्रीयदृष्टेस्तत्प्रतिबन्धकत्वादिति। अयमेवार्थो नवीनैः प्रकारान्तरेणोक्तः तथाहि प्रथमं हीन्द्रियार्थसन्निकर्षे पदार्थज्ञानं ततो मिथ्याज्ञानवशात्तत्र रागादिः प्रकृतिश्च रागादिपुरस्सरैव पुरुषं इष्टानिष्टयोर्विहितप्रतिषिद्धयोः प्रवर्तयति तदा निषिद्धाचरणं विहितपरित्यागश्च सम्पद्यते यदा पुनः शास्त्रदृष्ट्या पूर्वमेव यथावद्वस्तु प्रतिभाति तदा मिथ्याज्ञाननिवृत्त्या रागादिनिवृत्तेः सहकारिरागादिनिवृत्त्या च प्रकृतिः प्रवर्तयितुं न शक्नोति तस्माच्छास्त्रानुसारिपुरुषप्रयत्नेन प्रवृत्तः पूर्वमेव रागद्वेषौ निवर्तनीयौ तयोरेवानर्थहेतुत्वादिति।

अन्ये तु ननु सर्वस्यापि प्राणिजातस्य रागद्वेषात्मिकया प्रकृत्या ग्रस्तत्वे त्वन्मतानुसारिणामप्युक्तलक्षणप्रकृतिग्रस्तत्वात्त्वदुक्ते कर्मयोगे कथं तेषां प्रवृत्तिर्घटतेत्याकाङ्क्षायां रागद्वेषयोः समीचीनत्वासमीचीनत्वबुद्धिमूलकत्वात् 'न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते' इतिन्यायेनेश्वराराधनात्मके विध्युक्ते कर्तव्ये कर्मणि कुशलत्वाकुशलत्वबुद्धिपरित्यागे रागद्वेषयोरनव-

काश इति सूचयितुं रागद्वेषयोः स्थितितन्निवृत्तिप्रकारं तयोर्बन्धकत्वञ्चाह इन्द्रियस्येन्द्रियस्यार्थे सर्वेषामिन्द्रियादीनां श्रोत्रादीनामर्थे शब्दादिरूपे रागद्वेषौ व्यवस्थितौ इष्टे रागोऽनिष्टे द्वेष इत्येवं प्रतिविषयं नियमेन स्थितौ भवतः। इन्द्रियाणां विषयेषु रागो वा द्वेषो वाऽस्तु मुमुक्षोस्तेन तु का हानिरित्यत आह तौ हीति । हि यस्मात्कारणात्तौ रागद्वेषावस्य धर्मचिकीर्षोर्मोक्षमार्गस्य परिपन्थिनौ पथि चोराविव प्रतिबन्धकौ मुमुक्षुं मोक्षसाधनमाश्रयन्तं स्वाश्रयबलेन विषयारण्यं पातयित्वा तदन्तरेव भ्रामयतः ततो मुमुक्षुः पुरुषः सदसद्विवेको भूत्वा विषये समीचीनत्वादिबुद्ध्या तयोरागद्वेषयोर्वशमधीनतां न गच्छेत् द्रव्ये गुणे कर्मणि वा समीचीनत्वबुद्धिं न कुर्यात् विषयेषु समीचीनत्वासमीचीनत्वबुद्धिकरणमेव तयोर्वशवर्तित्वहेतुस्तो मुमुक्षरकुर्वन् रागद्वेषयोरविषयो भूत्वा स्वधर्मे कुशले वाऽकुशले वापीश्वरप्रीत्यै प्रवर्त्तेत एवं प्रवृत्तो निष्प्रत्यूहं मोक्षं प्राप्नोतीत्यर्थ इत्याहुः।

इन्द्रियस्य श्रोत्रादेरर्थे शब्दादिविषये इन्द्रियस्य मुख्येन्द्रियस्य मनसो धर्मौ रागद्वेषौ व्यवस्थितौ अवश्यं भाविनौ स्यातां स्वानुकूले विषये रागः प्रीतिः प्रतिकूले च द्वेषस्तथापि तयोर्वशं नागच्छेत् तद्वशवर्ती न भवेत् हि यस्मात्तौ रागद्वेषावस्य मुमुक्षोर्मनसः परिपन्थिनौ क्षोभकरत्वेन शत्रुवदुपस्थितौ न हि लोकेऽपि कश्चिदुपायदक्षो वैरिवशवर्ती भवति दुःखहेतौ प्रवृत्त्यभावात् । यद्यपि तौ प्रकृतिबलेन वशं नयतस्तथापि मदाश्रयबलेन शास्त्राचार्यबलेन च वशं न गच्छेदित्यर्थः। ननु तत्रापि पूर्वसंस्कारएव शरणमिति चेन्न वर्त्तमानसामग्रीं विना केवलसंस्कारस्याकिञ्चित्करत्वात् आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्य इत्यादिश्रुत्या तत्प्रतिबन्धकोपायस्य बोधितत्वाच्चेत्यके ॥ ३४ ॥

ननु अभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेदिति स्मरणात्कर्मसंन्यासोपि धर्मः कर्तव्य एवेति चेत्, सत्यं संन्यासोऽपि शास्त्रीय एव धर्मः कर्तव्यश्च मुमुक्षोस्तथापि स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तित इति वचनादपक्वान्तःकरणस्य स धर्मो न भवति किन्तु बहुजन्मानुष्ठित पुण्यपुञ्जैः परिपक्वान्तःकरणस्य सर्वतो विरक्तस्य कर्मणां मोक्षसाधनत्वमपश्यत एव मुमुक्षोर्विविदिषया कर्तव्यः धर्मः संन्यासः कृतार्थस्य वा विदुषः नतु मूढस्य कर्मस्वलसस्य दुःखबुद्ध्या ततोऽस्य संन्यासः परधर्म